The Adyar Library Series—No. 26

SĀMAVEDASAṂHITĀ

N 41

Q13:21
N41

KENDRIYA SANSKRIT VIDYA PEETHA,
9129
TIRUPATI.
LIBRARY

Printed by
C. SUBBARAYUDU,
AT THE VASANTA PRESS,
ADYAR, MADRAS.

DEDICATED

TO

THEM

WHO GAVE US THE MUSIC OF THE SAMANS

PREFATORY NOTE

IT is with great pleasure that I introduce to the world the second contribution of Dr. C. Kunhan Raja to the Adyar Library Publications through the Bulletin of the Library. The first was the *Ṛgveda* with the commentary of Mādhava. Here there are two commentaries on the *Sāmaveda*, one by Mādhava son of Nārāyana who belongs to about 600 A.D. and the other by Bharatasvāmin, son of Nārāyaṇa, who belongs to the early fourteenth century. Both are very early authors and as such the commentaries have a special interest.

This is the first time that these commentaries have been made available in print. In this volume, only the text and the two commentaries are published. Dr. Raja has utilised a large number of manuscripts in bringing out the edition. He has been working at it for some years, attending to it day after day with commendable regularity and punctuality. Now the text portion is finished and in the second part the variant readings found in the different manuscripts, some indices and appendices, and some notes will appear. These supplementary materials will be issued through the Bulletin and made available in due course.

The commentary of Mādhava is available only for the Pūrvārcika portion of the Sāmaveda and there is no evidence of his having written a commentary for the Uttarārcika portion. A small part of the commentary by Bharatasvāmin for the Uttarārcika portion is available in some of the

manuscripts. Since Mādhava does not comment on this portion and since Bharatsvāmin's commentary is available only for a small part in the beginning, it is not proposed to include this part in the edition.

By an oversight the last four verses were omitted in the fifth Daśatī of the third Prapāṭhaka. They are given at the end of the edition.

It is the division into Prapāṭhakas and Daśatīs that is adopted in this edition. This is the division found in the commentary of Mādhava. Bharatsvāmin follows a different division. [And in the *Vedic Concordance* of Bloomfield, the verses are numbered serially from one to the end. For easy reference a comparative table for these different divisions and numberings is added at the end, page 415.]

Most of the verses comprising the *Sāmaveda* are found in the *Ṛgveda* also. But there are variations in the text as it appears in the *Ṛgveda* and in the *Sāmaveda*. The text as accepted by the two commentators is not uniform. The Ṛṣis mentioned by the two commentators as the authors of the verses are not also identical. All such points will be noted in the supplementary portion.

It is my pleasant duty to thank Dr. C. Kunhan Raja for his valuable contribution to the Adyar Library Series. I take this opportunity to thank the University of Madras for the permission given to Dr. C. Kunhan Raja to have the work published in this Series.

Adyar Library
5th May, 1941

G. SRINIVASA MURTI,
Director

FOREWORD

In this edition of the Sāmaveda, I include two commentaries on the Saṃhitā, one by Mādhava and the other by Bharatasvāmin. Neither of these commentaries has been till now made available in print. Both of them are ancient commentaries and earlier than Sāyaṇa.

The edition of the commentary of Mādhava is based on a photograph copy of the manuscript in the Berlin Library, described by Weber in his catalogue as No. 1424, and another manuscript kindly lent to me for the purpose by the Vis'vabhārati University, Santiniketan. The photograph copy of the Berlin manuscript is in the Adyar Library and bears the shelf No. XXXIX. F. 16.

Besides these two copies, I had access to the three manuscripts in the Library of the Calcutta Sanskrit College described in the catalogue by Hṛṣīkes'a S'astri in Vol. I, as Nos. 50, 51 and 52, and to the manuscript in the Library of the Palace of His Highness the Maharaja of Bikaner, described by Rajendralal Mitra as No. 276 in his catalogue. I was allowed a loan of the latter a few years ago and I am obliged to the authorities in Bikaner for the same. I worked

in the Library of the Calcutta Sanskrit College for some time and I was able to examine the three manuscripts there. I take this opportunity to express my gratitude to the Principal of the college for the facilities he gave me at that time to work in the Library.

There are two manuscripts in the Bodlein Library, Oxford (Catalogue, Winternitz and Keith, No. 917). I have not been able to examine them till now. I find that the manuscripts are not in a very good condition. I will make use of them also before this edition is completed and any material which may be found important on an examination of these two manuscripts will be duly incorporated in this edition. But the manuscripts I have with me are found to be sufficient for the edition.

The edition of the commentary of Bharatasvāmin is based upon five palm leaf manuscripts in the Adyar Library (shelf Nos. XIX. K. 84, XXIV. C. 25, XXV. D. 24, XXIII. D. 5 and XXVI. K. 14) and one Devanāgari transcript with the shelf No. XXXVI. D. 15. There are other manuscripts available. But these are quite enough as a basis for the edition. I am also making use of the manuscripts available in Madras and around.

The name of Mādhava is given by Satyavrata Sāmāśramin as the vivaraṇakāra in his Introduction to the Nirukta in Sanskrit added to the fourth volume of his edition of the Nirukta in the Bibliotheca Indica Series. In the commentary itself it is mentioned as a

Bhāṣya (see P. 5, LL. 3 and 21). In the Catalogue of the Manuscripts in the Palace of H. H. the Maharaja of Bikaner, Rajendralal Mitra describes the work as a dissertation on the Sāmaveda.

Little is known of the commentator, his personality and his date. His father's name is Nārayaṇa as is given by him in the Introductory portion of the commentary (see P. 6, L. 20). The opening stanza of the commentary is identical with the maṅgalas'loka in Bāṇa's Kādambarī. Perhaps both Mādhava and Bāṇa had a common source; or one utilised the Maṅgalas'loka of the work of the other. Or perhaps the two are identical, Mādhava being the real name and Bāṇa being the assumed name. There are reasons to believe that Bhavabhūti the dramatist and Uṃveka the writer on the Mīmāṃsā are identical. There is nothing impossible in the same person being known by two names. So far as common Maṅgalas'lokas are concerned, for this also there are instances; I give the following which is found both in the beginning of Daṇḍin's Kāvyādars'a and in the commentary on the Sarvānukramaṇī by Uvaṭa :

caturmukhamukhāmbhojavanahaṃsavadhūr mama
mānase ramatām nityam sarvas'uklā sarasvatī

Manuscripts of the commentary of Uvaṭa on the Sarvānukramaṇī are found in the Tanjore Palace Library, in the Bhaṇdarkar Institute and in the D.A.V. College (Lahore). In the last one the name of Uvaṭa appears as the author of the commentary in the

colophon. In the other two, the name of the author of the commentary is not given. Thus from the identity of the Maṅgalaśloka no conclusion can be drawn.

The close similarity of the Introductory portion of the commentary with the corresponding portion in the commentary on the Ṛgveda by Skandasvāmin (edited by me in the Madras University Sanskrit Series as No. 8) cannot escape the notice of any one. The similarity is in wording, in method and in ideas. This close similarity cannot be an accident; and since this commentator mentions the Ṛgvedabhāṣya it may reasonably be concluded that he is referring to the Bhāṣya of Skandasvāmin, though he does not mention the name of Skandasvāmin.

Mādhava son of Venkaṭārya speaks of a Nārāyaṇa as the collaborator of Skandsvāmin in writing the Ṛgvedabhāṣya ; the passage is :

> skandasvāmī nārāyaṇa udgītha iti te kramāt
> cakruḥ sahaikam ṛgbhāṣyam padavākyārthago-
> caram
>
> VIII, iv, 9 (Madras University
> Sanskrit Series No. 2)

One may be tempted to identify this Nārayaṇa with Nārāyaṇa the father of Mādhava (whose commentary on the Sāmaveda is now being edited).

Skandasvāmin must be put to about 600 A.D. (See my article on the Chronology of the Vedabhāṣyakāras in the Journal of Oriental Research, Madras, Vol. X, pp. 261 and 262.) The relation of Mādhava

with Bāṇa, his relation with Skandasvāmin and with Nārāyaṇa and the date of Skandasvāmin being more or less the date of Bāṇa make it quite possible that Mādhava belonged to the school of Skandasvāmin ; he may have been his disciple. I leave it as a mere "may have been". Nothing more can be said at this age with any kind of certainty.

When we come to Bharatasvāmin, the position becomes much easier. His father is Nārāyaṇa as is mentioned in the eighth stanza in the beginning. He wrote the commentary at the time when Rāmanātha the Hoysla King was reigning, *i.e.*, about the year 1300. He was a native of Srirangam. These two latter facts are given in the ninth stanza.

There is not much difference in text between the various manuscripts of the commentary of Mādhava. But in the case of the manuscripts of commentary of Bharatasvamin, the differences are considerable. I print the commentary, constituted from the different manuscripts, according to the readings which I consider the best. In part II of the book I will give the various readings found in the different manuscripts.

Regarding the division of the text of the Sāmaveda, I have followed the division accepted in the commentary of Mādhava, *i.e.*, into six prapāṭhakas, each prapāṭhaka being divided into das'atīs consisting of about ten mantras. Bloomfield in his Vedic Concordance gives the stanzas with the continuous numbers for the pūrvā and the uttara ārcikas. In order to enable the readers to make use of that concordance

with reference to the text as printed here, I give a comparative table showing the relation of the numbers used in this edition to the numbers given in the Concordance. I am printing the saṃhitā without marking the Sāma accent, since my purpose is only to present the text which forms the basis of the commentaries.

Mādhava comments only on the pūrvārcika. The commentary of Bharatasvāmin continues to portions of the uttarārcika also. But in this edition I stop with the pūrvārcika. I need not say anything about the importance of these two commentaries to students of vedic literature. Both of them are earlier than Sāyaṇa. Bharatasvāmin's date is known and Sāyaṇa quotes Bharatasvāmin. Regarding Mādhava, there is no evidence by which his date can be fixed. The probability is that he is a disciple of Skandasvāmin. His date and personality must be discussed in greater detail and I can do it only after I print the entire text of the commentary. I will do so in the Introduction which will be published when the second part is completed.

Although I have many manuscripts of the two commentaries, I regret to say that in some places I am not quite satisfied with the readings I am printing. Whatever improvements I am able to make in the course of printing, I will incorporate in the second part.

ADYAR LIBRARY C. KUNHAN RAJA

CONTENTS

	PAGE
Dedication	v
Prefatory Note	vii
Foreword	ix
Text:	
Prapāṭhaka I	1
„ II	87
„ III	149
„ IV	216
„ V	299
„ VI	357

NOTE

1. In the first three Prapāṭhakas and at the end of the fourth Prapāṭhaka mistakes like सम्म्या द्शत्या, which crept in through some oversight, may be corrected.

2. On pages 319 and 320, the figure on the top may be corrected from 4-9-2 into 5-3-9 and on page 334, the figure on the top may be corrected from 5-5-6 into 5-6-6.

3. In III. v. (P. 177) The last four verses were omitted by an oversight and they are given on Pp. 415 and 416 at the end of the edition.

॥ श्री ॥

सामवेदसंहिता

सभाष्या

माधवभाष्यम्

रजोजुषे जन्मनि सत्त्ववृत्तये
स्थितौ प्रजानां प्रलये तमःस्पृशे ।
अजाय सर्गस्थितिनाशहेतवे
त्रयीमयाय त्रिगुणात्मने नमः ॥

षट्त्रिंशत्प्रकारा मन्त्राः । प्रैषाः करणाः क्रियमाणानुवादिनः स्तोत्रशस्त्रगताः जपानुवचनगताश्च । एते पञ्चप्रकारा ऋग्व्याख्यायां भवन्ति । अन्ये सामव्याख्यायामुच्यन्ते ।

प्रस्तावश्च तथोद्गीथः प्रतिहारोपद्रवस्तथा ।
निधनं पञ्चमं प्राहुर्हिङ्कारं प्रणवमेव च ॥
आशास्तिस्तुतिसङ्ख्यानं प्रलापः परिदेवनम् ।
प्रैषमन्वेषणं चैव सृष्टिराख्यानमेव च ॥

सप्तधा गेयमेकेषामन्ये षोडशधा विदुः ।
पञ्चविधं तु सर्वेषामध्वरार्थं प्रचक्षते ॥

अन्येऽपि स्तोत्रप्रकारा अयं वाव लोको हा ऊकारो वायुर्हा इकारश्चन्द्रमा अथकारः । आत्मेहाकारः अग्निरीकारः आदित्य ऋकारः निहव एकारः विश्वे देवा अहो ईकारः प्रजापतिर्हिङ्कारः प्राणः स्वरोऽन्नं या वाग्विराट् । अनिरुक्तस्त्रयोदशस्तोभः सञ्चरो हुकारः । एते षट्त्रिंशत्प्रकाराः सामव्याख्यायां भवन्ति । साम्नां च प्राधान्यमस्मिन् सामवेदे । यतः स्तोत्राणि तानि । तान्येव मन्त्राः छन्दोगानाम् । तानि च ऋगव्यूढानि स्तोभसामानि आदिमध्यान्तनिधनानि पदविभाग्यानि स्तोभविभाग्यानि पदस्तोभविभाग्यानि । तेषां च देवता अग्निरिन्द्रः प्रजापतिः सोमो वरुणस्त्वष्टा अङ्गिरसः पूषा सरस्वती इन्द्राग्नी इडा निधनानि पदनिधनानि इकारनिधनानि । इत्याग्नेयानि सर्वाणि निधनवन्ति । ऐन्द्राण्यन्यान्यादिष्टेभ्यः । सर्वाणि स्वाराणि प्राजापत्यानि । यथा वामदेव्यमित्येवमादीनि । निरुक्तसिद्धा देवताप्रकाराः । अन्येऽपि ब्राह्मणसिद्धाः । सर्वदेवत्यं वै वामदेव्यम् । यत्कवतीषु तेन प्राजापत्यम् । को हि प्रजापतिः । यदनिरुक्तासु तेन प्राजापत्यम् । अनिरुक्तो हि प्रजापतिः । यद्गायत्रीषु तेनाग्नेयम् । गायत्रं छन्दो ह्यग्नेः । यत्पृष्ठेषु न्यदधुस्तेनैन्द्रम् । सर्वाणि हि पृष्ठानीन्द्रस्य निष्केवल्यानि । यन्मैत्रावरुणोऽनुशंसति तेन मैत्रावरुणम् । यत् बहुदेवत्यमुत्तमं पदं तेन वैश्वदेवमिति । तेन ब्राह्मणसिद्धा देवता गृह्यन्ते सर्वत्र । अन्येऽपि देवताप्रकाराः साम्नाम् । यद्देवत्यासु स्तुवते सा स्तोत्रदेवतेति । अनेनापि प्रकारेण देवता ज्ञातव्या । अन्योऽपि प्रकारो विद्यते स्तोत्राणाम् । त्रयः पावमानाः सौम्याः । प्रथममाज्यमाग्नेयम् । द्वितीयं मैत्रावरुणम् । तृतीयमैन्द्रम् । चतुर्थमैन्द्राग्नम् । पृष्ठान्यैन्द्राणि । आग्नेयमग्निष्टोमसामचित्यै ।

न क्वचिद्बृहदग्निष्टोमसाम । वारवन्तीयमग्निष्टोमसामेत्येवमादिभिः क्रतुविशेषै-स्तानि भवन्ति । प्रथममुक्तमाग्नेयम् । द्वितीये तृतीये चतुर्थे च ऐन्द्रावरुण-मैन्द्राबार्हस्पत्यमैन्द्रावैष्णवम् । ऐन्द्रः षोडशी विष्णोः शिपिविष्टवतीषु । बृहद्वाजपेयसाम । ऐन्द्राणि रात्रिस्तोत्राणि द्वादशैव । तत्त्रिदेवत्यः सन्धिः । अग्निरुषा अश्विनाविति । यथासङ्ख्यमप्तोर्याम्णि । प्रथममाग्नेयमतिरिक्त-स्तोत्रम् । द्वितीयमैन्द्रम् । तृतीयं वैश्वदेवम् । चतुर्थं वैष्णवम् । एवं सर्वेषु क्रतुषु समासाद्देवताविचार उक्तः । एकाहहीनसत्रान्तेषु आर्षप्रकारश्च साम्नामार्षेयसिद्धः सर्वसाम्नां गृहीतव्यः । ऋचो गुणभूताः । तासामार्षेयं पाक्षिकम् । एवमार्षप्रकार उक्तः । इदानीं छन्दसः प्रकारः उच्यते । गायत्रं प्रातस्सवनम् । गायत्री बृहती त्रिष्टुबिति माध्यन्दिनं सवनम् । प्रथमं पृष्ठम् । बृहत्यः ककुबुत्तरा । द्वितीयं वामदेव्यं गायत्रीषु । तृतीयं पृष्ठं बार्हतं चतुर्थं च । आर्भवे ककुबुष्णिहावनुष्टुप् जगती च । क्वचिद्द्विपदा अपि भवन्त्यार्भवे । क्वचिदक्षरपङ्क्तयः । बृहत्यः ककुबुत्तरा अग्निष्टोम-साम्नि । प्रथममुक्थ्यं गायत्रीषु । ब्रह्मवर्चसकामयोत्थानि प्रणयेयुरित्युक्थ-प्रणयने प्रकारविशेषाः विच्छन्दस ऋचो भवन्ति इति । ककुप् प्रथमा । अथ उष्णिक् । अथ पुरउष्णिगनुष्टुप् । आनुष्टुभी रात्रिः । बृहत्यः ककुबुत्तरा । सन्धिरप्तोर्याम्णि । अतिरिक्तस्तोत्राणि जराबोधीयप्रभृतीनि गायत्रछन्दस्कानि । एवमेकाहाहीनसत्रेषु छन्दोदेवतार्षप्रयोगो न्याय्य उक्तः । इदानीं प्रैषादयो मन्त्रा उच्यन्ते । प्रैषास्तावत् दैव्याः शमितार आरभध्वम् (का. सं. १६. २१) इत्यादयः । करणाः इदमहमर्वावसोः सदने सीदामि (कौ. ब्रा. ६. १३) इत्यादयः । क्रियमाणानुवादिनः युवा सुवासाः परिवीत आगात् (ऋ. वे. ३. ८. ४) इत्यादयः । स्तोत्रशस्त्रगताः ब्रह्म जज्ञानम् (सा. वे. ४. ३. ९) आ त्वा रथं यथोतये (ऋ. वे.

८. ६८. १) इत्यादयः। जपानुवचनगताः तदद्यवाचः प्रथमं मसीय (ऋ. वे. १०. ५३. ४) आपो रेवतीः (ऋ. वे. १०. ३०. ११) इत्यादयः। एते सर्वे प्रयोगकाले स्वार्थं प्रतिपादयन्तः कर्मणोऽङ्गत्वं प्रतिपद्यन्ते। न उच्चारणमात्रेण। कुत एतत्। ये तावत्प्रैषाः करणाः क्रियमाणानुवादिनश्च तेषां योऽर्थः स कर्मणोऽङ्गत्वं प्रतिपद्यन्ते। अङ्गं चानुष्ठातव्यम्। न चास्मृत-मनुष्ठातुं शक्यते। अतः कर्मणोऽङ्गस्मरणमपेक्षितम्। तच्च प्रैषादिभिः शक्यते कर्तुम्। अतः प्रैषादयस्तावत्प्रयोगकाले स्वार्थं प्रतिपादयन्तः कर्मणोऽङ्गत्वं प्रतिपद्यन्ते इति। येऽपि स्तोत्रशस्त्रगतास्तेषामर्थो यद्यपि कर्मणोऽङ्गत्वं न प्रतिपद्यते तथापि तमेवार्थं प्रत्याययन्तः कर्मणोऽङ्गत्वं प्रतिपद्यन्ते। कथम्। स्तुतिर्हि स्तोत्रशस्त्रशब्देनाभिधीयते। स्तुतिश्च का। गुणिनः प्रस्तावात् प्रयोगकाले स्वार्थं प्रतिपादयन्तः गुणैः सम्बन्धप्रतिपादनम्। न गुणः पदानामुच्चारणमात्रम्। कुत एतत्। यो हि लोके अभ्यासार्थं गुणपदा-नामुच्चारणं करोति तस्य स्तौतीति व्यपदेशाभावात्। अतः स्तोत्र-शस्त्रगता अपि मन्त्राः स्वार्थमेव प्रतिपादयन्तः कर्मणोऽङ्गत्वं प्रतिपद्यन्त इति। येऽपि जपानुवचनगतास्तेषां यद्यपि जपिना वचिना वा धातुना उच्चारणमात्रं चोदितं तथापि सति अर्थे प्रत्याययन्तः कर्मणोऽङ्गत्वं प्रति-पद्यन्ते। कथम्। यो ह वा अविदितार्षेयछन्दोदैवतब्राह्मणेन मन्त्रेण या-जयति वाध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यते इत्यार्षेयश्रुतेः अविदि-तदैवतस्य मन्त्रस्य कर्मणि विनियोगः प्रतिषिध्यते। न च अविज्ञातार्थस्य ऋषिदैवतं शक्यं विज्ञातुम्। परिज्ञाने च गुणः श्रूयते। अथ यो मन्त्रे मन्त्रे वेद स सर्वमायुरेति श्रेयान् भवति अयातयामान्यस्य छन्दांꣳसि भवन्ति। तस्मादेतानि मन्त्रे मन्त्रे विद्यात्। ऋषीणां संस्थानो भवति संस्थानो भवति। ब्रह्मणः स्वर्गे लोके महीयते। अस्य रत्ना जायन्ते

पुनर्य एवं वेद । इत्येवमादिभिर्वाक्यैः परिज्ञानं प्रशस्यते । तस्मात्तेऽपि स्वार्थप्रत्यायनेनैव कर्मणोऽङ्गत्वं प्रतिपद्यन्त इत्युपपन्नम् । एवं मन्त्राणां कर्मणोऽङ्गत्वप्रतिपादनार्थं बोद्धव्योऽर्थो यस्मात् तस्माद्भाष्यं प्रस्तूयते । ये च साम्नां स्तोभप्रकारविशेषा आशास्तिस्तुतिसङ्ख्यानादयः तेऽपि स्वार्थं प्रतिपादयन्तः कर्मणोऽङ्गत्वं प्रतिपद्यन्ते । तथाहि तेषां स्तोभानामुद्देशतः स्वरूपमुच्यते । अगन्म ज्योतिरमृता अभूम । अन्तरिक्षं पृथिव्या अध्यारुहाम । दिवमन्तरिक्षादध्यारुहाम । अविदाम देवान् समु देवैरगन्महि इत्येतदाशास्महे । एषा आशास्तिः । स्तुतिश्च नमोऽन्नाय नमोऽन्नपतये इति । सङ्ख्यानं ये देवा दिविषदः अन्तरिक्षसदः पृथिवीषदः अप्सुषदः ह्व॰पा।
असङ्ख्याताः सहस्राणि ये रुद्राः । एतत्सङ्ख्यानम् । रिशादस इन्द्र मुडिति प्रलापः । यदीन्द्राहं यथात्वं इत्येवं परिदेवितम् । उन्नयामि इति प्रैषः । परिदेवनं वा । ततो विराडजायत इति एवं गुणानामन्वेषणम् । सृष्टेश्चैतदेवोदाहरणम् । आख्यानं च । येऽन्ये त्रयोदश स्तोभाः अयं वाव लोको हा ऊकार इत्येवमादयः । तत्र हा ऊकारे भूर्लोकस्य दैवतत्वम् । वायोर्हा इकारे । चन्द्रमसः अथकारे । एवं सर्वस्तोभानां द्रष्टव्यम् । यो निरुक्तस्त्रयोदश स्तोभः हुम् हुम् किट् किट् सः । स्वादनिगारौ एकारमकारयकारश्वासः स्वादेहकारमकारनासिक्यावानिगारे । यथा वसिष्ठस्य प्राणापानयोः एते सर्वे निरुक्ताः । यथा हुपहुपविविविविविवीफाल्फल्फल् फल् । हाउहाउहाउहाउवाग्वहहह । एवंविधा निरुक्ताः प्राजापत्याः । सञ्चारो हुकारो गत्यर्थः ।

एवं सर्वस्तोभानां बोद्धव्योऽर्थो यस्मात्तस्मात्साम्नां केषांचिद्भाष्यं प्रस्तूयते । तत्रार्षछन्दोदैवतब्राह्मणविनियोगप्रकारा उक्ताः समासतः सामान्याः । इदानीं विशेषतः केषांचित् साम्नामुन्नयप्रभृतीनां श्रद्धया व्याख्या

क्रियते । तत्रार्षमुच्यते । आदित्यस्योन्नयं तदादित्यमित्याचक्षते । विनियोगस्तु येषां ज्योतिष्टोमादिषु क्रतुषु साक्षान्न स्तूयते तेषां वाचस्तोमेषु विनियोगः बृहत्वात् स्तोमानाम् । एकया प्रथमस्य बहिष्पवमानम् । दशभिर्द्वितीयस्य । शतेन तृतीयस्य । सहस्रेण चतुर्थस्य । अत ऊर्ध्वं दशगुणक्रमाद्दशभिः सहस्रैर्होतुराज्यस्य । शतेन सहस्राणां मैत्रावरुणस्य । इत्येवं अपरिमितानि सामानि अर्बुदन्यर्बुदानि सर्वबद्धम् । एवं बहुत्वात्सर्वसाम्नां विनियोगः । तत्रोन्नयं साम उन्नयामि हो ई ऊर्ध्वमुन्नयाम्युन्नयामि । न पञ्चविंशकं पुरुषं शरीरावस्थितमादित्यमेकत्वं नयामि परेणादित्यात्मना हो इति विश्वे देवा हो इकारो विश्वेभ्यो देवेभ्यो यज्ञे । न ऋणं वायुरूपो भवति । प्रजया पितृभ्यः स्वाध्यायेन ऋषिभ्यः । एवं ऋणत्रयमनिवर्त्य एवादित्यलोकं यियासुरहं ततो विश्वेदेवान्प्रार्थयाम्यहम् । वाङ्मनः प्राणोऽपानो व्यान इत्येवमादयः स्तोभा आशास्तिस्वरूपा एतत्सर्वं मम भवत्वित्याशास्महे । आदित्यः पित्र्यं आयुः पित्र्यं पितृस्वरूपत्वमादित्यस्य ज्ञापयति । आयुषः प्राप्तिर्यजमानस्य आशास्महे । हाउहाउहाउ भ्राजाही दीप्तिरायुश्च सवितुरन्वायन्ते । उदुत्यं जातवेदसमिति उक्तार्थम् । हाऊहाऊ भ्राजा ओवा । अर्चिः शोचिस्तपो हर एते दीप्तिपर्यायाः भाशब्दश्च । इति निबन्धनं शम्बरं साम । सर्वाण्येतान्यादित्यदैवत्यानि स्तोभश्च ।

एवं सर्वसाम्नां ये त्रयोदशविधाः स्तोभा अयं वाव लोको हा ऊकार इत्यादयस्ते समासतो व्याख्याताः ।

छन्दसिकोत्तररहस्याः पञ्चाग्निना माधवेन श्रीनारायणसूनुना सवितुः परां भक्तिमालम्ब्य तत्प्रसादाद्भाष्यं कृतम् । यदत्र न्यूनं यदतिरिक्तं व्याहतं पुनरुक्तं भिन्नसंस्थानं युक्तिहीनं च तत्सर्वं भूमिदेवैः सज्जनैर्भूत्वा क्षन्तव्यमिति । एष एव सम्बन्धो व्याख्यानेऽपि ।

भरतस्वामिभाष्यम्

गजाननाय महसे प्रत्यूहतिमिरच्छिदे ।
अपारकरुणापूरतरङ्गितदृशे नमः ॥
ममास्तु काननाम्भोजकाननास्वादषट्पदी ।
सितसारसना वाणी रसनारङ्गनर्तकी ॥
नमोऽस्तु साममुग्धाब्धिमन्थमन्दरभूभृते ।
श्रीमते नागनाथाय गुरवे गुणराशये ॥
उज्जहारागमाम्भोधेर्यो धर्मामृतमञ्जसा ।
न्यायैर्निर्मथ्य भगवान् स प्रसीदतु जैमिनिः ॥
सुमन्तुं जैमिनिं पैलं वैशम्पायनमेव च ।
नमाम्यहमहोरात्रं वेदानां पारसिद्धये ॥
तं वेदशास्त्रपरिनिष्ठितशुद्धबुद्धिं
　चर्माम्बरं सुरमुनीन्द्रनुतं कवीन्द्रम् ।
कृष्णत्वचं कनकपिङ्गजटाकलापं
　व्यासं नमामि शिरसा तिलकं द्विजानाम् ॥
वागर्थोभयरूपेण भासमानं महेश्वरम् ।
वन्दे पूरुषमृक्संज्ञमृक्सामभ्यामभिष्टुतम् ॥
नत्वा नारायणं देवं तत्प्रसादादवाप्तधीः ।
साम्नां श्रीभरतस्वामी काश्यपो व्याकरोत्यृचः ॥
होसलाधीश्वरे पृथ्वीं रामनाथे प्रशासति ।
व्याख्या कृतेयं क्षेमेण श्रीरङ्गे वसता मया ॥
श्रवणेनानुगृह्णन्तु सन्तस्तां वीतमत्सराः ।
अपश्यन्तस्सतो दोषानुत्पश्यन्तोऽसतो गुणान् ॥
मन्त्रैस्तद्ब्राह्मणार्षेयच्छन्दोदैवतविद्द्विजः ।
अर्थज्ञश्चाश्नुते भद्रं यतो ज्ञेयान्यमूऩ्यतः ॥

तथाहि श्रूयते—यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण—इत्यारभ्य —तस्मादेतानि मन्त्रे मन्त्रे विद्यात्—इति । तथा च मन्त्रौ ।

स्थाणुरयं भारवाहः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥
यदधीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥
ब्राह्मणानि न दृश्यन्ते मन्त्राणां संहिताभुवाम् ।
साम्नां तु ब्राह्मणव्याख्यासमयेनापि वक्ष्यते ॥
न स्मर्यन्त ऋचां यासामृषयः क्वापि केन च ।
वामदेव ऋषिस्तासां ज्ञेय इत्याह शौनकः ॥
आग्नेयमाद्यं पर्वैन्द्रपावमाने ततः परे ।
त्रिपर्वा सामवेदस्य संहितैवमधीयते ॥
आदौ गायत्र्य आग्नेय्यश्चतुस्त्रिंशदृचोऽत्र तु ।
उदित्यमित्यसौ सौरी शं नो देवीत्यपां स्तुतिः ॥
आद्ये खण्डे तृतीयायां मेधातिथिर्ऋषिः स्मृतः ।
प्रेष्ठं व उशनाः काव्यस्त्वदितिस्त्वं न इत्यृचः ॥
आ ते वत्स ऋषिर्वत्सो वामदेवेक्षितान्तिमा ।
भरद्वाजेक्षिताः शिष्टाः पश्चाग्नेरथ निर्वचः ॥
अङ्गेऽस्ति प्रत्ययो लोपो कारकस्येति शाब्दिकाः ।
सर्वगः सर्वविद्याग्निर्गत्यर्थौ हि मतिक्रिया ॥
अग्रस्यानयनाद्वाग्निः स्तोतॄनग्निर्नयेदिति ।
नीयते वाग्रमित्यग्रं स्तोत्रादीनां हि नीयते ॥

स्तोत्रादीनां तावत् पावमानव्यतिरिक्तानां प्रथमकाण्डमाग्नेयम् । शस्त्राणां च प्रथममाज्याख्यमाग्नेयम् । प्रातःसवनं छन्दसां च मुख्यम् । गायत्रसंस्थानां च प्रथमाग्निष्टोमाख्याग्नेयी । इत्येवं बहुप्रकारं अग्नेरग्रभाक्त्वम् ।

TIRUPATI

अग्न आ याहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि ॥

भरद्वाजस्यार्षम् । हे अग्ने आयाहि आगच्छ । किमर्थं पुनरागच्छामि । उच्यते । वीतये । भक्षणायेत्यर्थः । कस्य । सामर्थ्याद्धविषाम् । एत्य च गृणानः स्तूयमानः । हव्यदातये हविर्दानार्थमित्यर्थः । नि होता । नीत्ययमुपसर्गः सत्सीत्याख्यातेन सम्बन्धयितव्यः । होता आह्वाता । केषाम् । देवानामित्यध्याहारः । निषत्सि । निषीदेत्यर्थः । क्व पुनर्निषीदामि । उच्यते । बर्हिषि । यदेतदास्तीर्णं बर्हिस्तत्रेत्यर्थः ॥

हे अग्ने आयाहि आगच्छ देवतात्मना । वीतये अशनाय हविषाम् । वी गतिव्याप्तिप्रजननकान्त्यसनखादनेषु । गृणानः स्तूयमानः । गृणातेः । भावकर्मणोः (पा १. ३. १३) इत्यात्मनेपदम् । यक्स्थाने श्नाप्रत्ययो व्यत्ययेन छान्दसः ।

गृणाना जमदग्निना (ऋ. वे. ३. ६२. १८)

इति हि भवति । हव्यदातये हव्यानां देवेभ्यो दानाय यजमानैः स्तूयमानः । अथवा हव्यदातिः यजमानः हव्यानि देवेभ्यो ददातीति । तदर्थं गृणानः स्तुवन् इति ।

होता गृणीत उक्थ्यः (ऋ. वे. १. ७९. १२)

इति च मन्त्रान्तरम् । नीत्ययमुपसर्गो व्यवहितेनापि सत्सीत्याख्यातेन संबन्धनीयः । व्यवहिताश्च (पा १. ४. ८२) इति छन्दसि व्यवहितानामप्युपसर्गाणां धातुसंबन्धस्मरणात् । निषत्सीति लेडन्तम् । लिङर्थे लेट् (पा. ३. ४. ७) इति लेट् । उपविश । बर्हिषि स्तीर्णे । होता सन् । ह्वयतेर्धातोर्होता । ऐतरेयब्राह्मणे च जुहोतेर्होता इत्याशङ्क्य आवहनाद्धोता इति होतृशब्दनिर्वचनं कृतम् । तदाहुर्यदन्यो जुहोत्यथ योऽनु चाह यजति च कस्मात्तं होतेत्याचक्षत इति । यद्वाव स तत्र यथाभाजनं देवता अमुमावहामुमावहेत्यावाहयति तदेव होतुर्होतृत्वम् (ऐ. ब्रा. १. २) इति । अग्नेस्तु स्वयमेवावहनात् होतृत्वम् ॥ (१)

त्वमग्ने यज्ञानाँ होता विश्वेषाँ हितः । देवेभिर्मानुषे जने ॥

भरद्वाजस्यार्षम् । अग्ने त्वं यज्ञानां होता आह्वाता । विश्वेषां सर्वेषाम् । हितः निहितः । स्थापित इत्यर्थः । कैः । उच्यते देवेभिः । देवैरित्यर्थः । क्व पुनर्निहितः । उच्यते । मानुषे जने । मनुष्यलोके इत्यर्थः ॥

त्वं हे अग्ने यज्ञानां विश्वेषां होता होतृत्वेन । हितः निहितः । देवेभिः देवैः । मानुषे जने मनुष्यलोके ॥ (२)

अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् ॥

मेधातिथेरार्षम् । परस्य यः सन्देशं कथयति स दूत इत्युच्यते । अग्निं दूतं सन्देशहरम् । वृणीमहे प्रार्थयामः । होतारं विश्ववेदसम् । वेद इति धननाम । विश्वं वेदो यस्य स विश्ववेदाः । सर्वधनमित्यर्थः । अथवा विद ज्ञाने इत्यस्यैतद्रूपम् । विश्वं वेत्तीति विश्ववेदाः । तं विश्ववेदसम् । सर्वज्ञमित्यर्थः । अस्य प्रक्रान्तस्य यज्ञस्य । षष्ठीनिर्देशात् परिसमाप्त्यर्थमिति वाक्यशेषः । सुक्रतुम् । क्रतुरिति कर्मनाम यज्ञनाम वा । सुशब्दः शोभनवचनः । सुकर्माणं सुयज्ञं वा ॥

अग्निं वयम् । दूतं दूत्येन । वृणीमहे प्रार्थयामः । दूतो द्रवतेर्धावतेर्वा । यथादर्शनं वर्णव्यत्ययः । होतारं देवानाम् । विश्ववेदसम् । वेदो वित्तम् । बहुधनम् । विश्वविदमिति वा । एवंभूतमग्निं अस्य यज्ञस्य दूतं वृणीमहे इति संबन्धः । सुक्रतुम् । क्रतुः कर्म प्रज्ञा वा । सुकर्माणं सुप्रज्ञानमिति वा ॥ (३)

अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुतः ।

भरद्वाजस्यार्षम् । अग्निः वृत्राणि शत्रुकुलानि स्तोतुः यष्टुश्च । जङ्घनत् जघान अत्यर्थं हन्ति । पुनः पुनर्हन्तीत्यर्थः । कस्य । सामर्थ्यात् स्तोतुरिति शेषः । द्रविणस्युः । द्रविणं धनम् । स्युप्रत्ययो मतुबर्थे । द्रविणवानित्यर्थः । अथवा द्रविणं हविर्लक्षणं धनम् । तदिच्छुर्द्र-विणस्युः । हविष्काम इत्यर्थः । विपन्यया । पनिरिति स्तुत्यर्थः । विशब्दो वैविध्यार्थः । विविधया स्तुत्या । तृतीयानिर्देशात् स्तुतः सन्निति वाक्यशेषः । समिद्धः सम्यग्दीप्तः । शुक्रः शुक्लवर्णः । आहुतः मर्यादया हुतः सन्नित्यर्थः ॥

वृत्राणि तमांसि शत्रून् वा । जंघनदिति पञ्चमलकारान्तम् । हन्तेश्च कर्तरि रूपमिदम् । भृशं हन्तु । द्रविणस्युः । द्रविणः धनम् । हविर्लक्षण धनं कामयमानः । सुप आत्मनः क्यच् (पा. ३. १. ८) इति क्यचि क्याच्छन्दसि (पा ३. २. १७०) इति उप्रत्ययः । द्रविणःशब्दः सकारान्तश्च विद्यते । विपन्यया स्तुत्या । पनतेः स्तुतिकर्मणो विपूर्वस्य रूपमिदं विपन्येति । स्तुत्या सार्धम् । समिद्धः यजमानैराहूतः अभिहुतश्च हविर्भिः । शुक्रो दीप्तिमान् । शुचि दीप्तौ ॥ (४)

प्रेष्ठं वो अतिथिँ स्तुषे मित्रमिव प्रियम् । अग्ने रथं न वेद्यम् ॥

उशनस आर्षम् । प्रेष्ठं अतिशयेन प्रियम् । वः । बहुवचनमिद-मेकवचनस्य स्थाने द्रष्टव्यम् । त्वां अतिथिं अतिथिस्थानीयम् । अथवा अतिर्गत्यर्थः । तस्मादयं इथिन्प्रत्ययः । अतिथिं गन्तारम् । सर्वयजमान-गृहान् प्रति गन्तारमित्यर्थः । स्तुषे । नेदं लडात्मनेपदमध्यमपुरुषैकवचनम् । किं तर्हि । पञ्चमस्य लकारस्यात्मनेपदे उत्तमपुरुषैकवचनम् । स्तौमीत्यर्थः । कथं पुनः स्तौमि । उच्यते । मित्रमिव प्रियम् । यथा कश्चित्प्रियं मित्रं स्तौति तद्वदित्यर्थः । अग्न इत्यत्र सम्बुद्ध्येकवचनमिदं द्वितीयैकवचनस्य

स्थाने द्रष्टव्यम् । अग्निम् । रथं न । रथो रंहतेर्गतिकर्मणः । नशब्दस्तु उपरिष्टादुपचारादुपमार्थीयः । रथमिव गन्तारमिव । यथा कश्चिदश्वमन्यं वा शीघ्रं गन्तारं स्तौति तद्वदित्यर्थः । कीदृशमग्निम् । उच्यते । वेद्यं वेदनार्हम् । ज्ञानार्हमित्यर्थः ॥

प्रेष्ठं प्रियतमं देवानां यजमानांनां वा । व इति वचनव्यत्ययः । त्वामित्यर्थः । अतिथिमित्युपमा । अतिथिमिव पूज्यम् । स्तुषे स्तवे । मित्रमिव सुहृदमिव प्रियम् । हे अग्ने रथं न । उपरिष्टादुपचारो नकार उपमार्थीयः । रथमिव । वेद्यं लंभनीयम् । हविषां वहनार्थमाहवनार्थं च देवानां इति सूचयितुं रथमिवेत्युपमा ॥ (९)

त्वन्नो अग्ने महोभिः पाहि विश्वस्यारातेः । उत द्विषो मर्त्यस्य ॥

पुरुमीढस्य आर्षं सुदीतेर्वा । त्वं नः अस्मान् । हे अग्ने । महोभिः महद्भिरित्यर्थः । कैः । सामर्थ्यात्पालनैः । पाहि । रक्षेत्यर्थः । विश्वस्याः सर्वस्याः अरातेः । अरातिः शत्रुः । स्त्रीलिङ्गनिर्देशो जात्यपेक्षः । सर्वस्याः शत्रुजातेः सकाशात् रक्षेत्यर्थः । उत अपि च । द्विषः द्वेष्टुः । मर्त्यस्य मनुष्यस्य । सकाशाद्रक्षेत्यर्थः ॥

त्वं नः अस्मान् । पाहि रक्ष । हे अग्ने । महोभिस्तेजोभिः बाधकदाहकैः । विश्वस्य सर्वस्य अरातेः सपत्नात् । अरातिशब्दः छन्दसि स्त्रीलिंगः । अर्तेरत्रातिः । अभिहन्ता । उत अपि च । द्विषो द्वेषात् । मर्त्यस्य मनुष्यस्य । या द्विट् द्वेषः तस्मात् पाहि । अथवा मर्त्यस्येति पञ्चम्यर्थे व्यत्ययात् षष्ठी । द्विष इति च कर्तरि । द्वेष्टुर्मनुष्यात् पाहि ॥ (६)

एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः । एभिर्वर्धास इन्दुभिः ॥

भरद्वाजस्यार्षम् । एहि आयाहि । आभिमुख्येनागच्छेत्यर्थः । उ सु इति पादपूरणे । ब्रवाणि उच्चारयामि । ते तव । अग्ने इत्था सत्याः इत्यर्थः । इतराः अन्याः असत्याः । सत्याश्च असत्याश्चेत्यर्थः । गिरः स्तुतिलक्षणा वाचः । स्तुतीः इत्यर्थः । एभिः एतैरित्यर्थः । वर्धसे वर्धस्व । इन्दुभिः सोमैरित्यर्थः ॥

एहि आगच्छ । ऊ सु इति च पादपूरणौ । ब्रवाणि स्तौमीत्यर्थः । लडर्थे लोट् । ते त्वामित्यर्थः । विभक्तेर्व्यत्ययः । अथवा ते इति चतुर्थ्येव । ते त्वदर्थम् । स्तुतीरिति शेषः । ब्रवाणि उच्चारयामि । अग्ने । इत्था इति निपातः अमुत्रेत्यर्थे च वर्तते । अत्र तु दूरस्य लक्षणा । दूरे । सन्त्विति शेषः । इतरा गिरः शत्रूणां सम्बन्धिन्यः दुष्कृता इत्यर्थः । असुर्या ह वा इतरा गिरः (ऐ. ब्रा. ३. ४९) इति ह्यैतरेयकम् । असुर्या असुरसम्बन्धिन्यः । दुष्कृता इत्यर्थः । एभिरिन्दुभिः सोमैः वर्धासे वर्धस्व ॥ (७)

आ ते वत्सो मनो यमत् परमाच्चित्सधस्थात् । अग्ने त्वां कामये गिरा ॥

वत्सस्यार्षम् । आ इत्ययमुपसर्गः यमदित्याख्यातेन सम्बन्धयितव्यः । यमिश्च बन्धनार्थः । आभिमुख्येन बद्धवान् । वत्सो नामाहमृषिः । ते तव । मनः । केन पुनर्बद्धवान् । सामर्थ्यात् स्तुत्या हविःप्रदानेन च । कथं पुनर्बद्धवान् । उच्यते । परमाच्चित्सधस्थात् । परममुत्कृष्टम् । तस्मात् । चिच्छब्दः पादपूरणः । सह तिष्ठन्ति यत्र देवताः स सधस्थः स्वर्ग उच्यते । तस्मात्स्वर्गात् । पञ्चमीनिर्देशाच्च आगमयेति वाक्यशेषः । केन पुनरागमय । उच्यते । यतः हे अग्ने त्वां कामये गिरा स्तुतिलक्षणया वाचेत्यर्थः ॥

यमदिति पञ्चमलकारान्तम् । आयमत् आयच्छतु नियच्छतु स्वात्मनि । ते तव । मनः यजमानान्तरेभ्यः । परमाच्चित् परमादेव । सधस्थात् त्वत्स्थानात् ।

सहतिष्ठन्त्यस्मिन्निति सधस्थम् । सध मादस्थयोश्छन्दसि (पा. ६. ३. ९६) इति सहस्य सधादेशः । वत्सः ऋषिः । आत्मन एव परोक्षतया निर्देशः । गिरा स्तुत्या इति उपरितनं अत्र संबध्यते । हे अग्ने त्वां कामये अहम् । अतो गिरा त्वदीयं मनः मय्येव नियच्छामि ॥ (८)

त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ॥

भरद्वाजस्यार्षम् । अत्रेतिहासमाचक्षते । सर्वमिदमन्धं तम आसीत् । अथ मातरिश्वा वायुः आकाशे सूक्ष्ममग्निमपश्यत् । स तममथ्नात् अथर्वा च ऋषिः । तदेतदुच्यते । हे अग्ने । त्वां पुष्करात् । पुष्करमित्यन्तरिक्षनाम । अन्तरिक्षात् । अधिशब्दश्च अधिपरी अनर्थकौ (पा. १. ४. ९३) इति कर्मप्रवचनीयः पादपूरणः । अथर्वा निरमन्थत नितरां मथितवान् । कीदृशात अन्तरिक्षात् । उच्यते । मूर्ध्नः प्रधानभूतात् । कस्य । उच्यते । विश्वस्य सर्वस्य । वाघतः । ऋत्विङ्नामैतत् । अन्तर्णीतमत्त्वर्थं चात्र द्रष्टव्यम् । ऋत्विजो यजमानस्य । षष्ठीनिर्देशात् अर्थयेति वाक्यशेषः ॥

त्वां हे अग्ने । पुष्करात् अन्तरिक्षात् । पुष्करपर्णादित्यपरे । अधीति पञ्चम्यर्थानुवादकः । अथर्वा ऋषिः । निरमन्थत । मूर्ध्नो धारकात् । विश्वस्य वाघतः निर्वाहकात् । अन्तरिक्षे हि सर्वं तिष्ठति । पुष्करपर्णे प्रजापतिरादौ पृथिवीमप्रथयदिति वा ॥ (९)

अग्ने विवस्वदा भरास्मभ्यमूतये महे । देवो ह्यसि नो दृशे ॥

वामदेवस्यार्षम् । हे अग्ने विवस्वत् विवासनवत् । तमसां विवासनकरम् । किं तत् । सामर्थ्यात् ज्योतिः । आभर आहर आनय । दीप्तो भवेत्यर्थः । अस्मभ्यमूतये महे अस्माकं पालनस्य महतः अर्थयेत्यर्थः ।

कस्मात्पुनर्दीप्तो भवामि । उच्यते । देवो ह्यसि । हिशब्दो यस्मादर्थे । यस्मात्त्वं देवः असि भवसि । तस्माद्दीप्तो भवेत्यर्थः । न चास्माकं पालनायैव केवलं दीप्तो भव । किं तर्हि । नो दृशे । अस्माकं दर्शनाय चेत्यर्थः ॥

हे अग्ने विवस्वत् विवासयत्तमांसि तेजः । अस्मभ्यं आ भर आहर । हृग्रहोर्भः छन्दसि (वा. ८. २. ३२-१) इति हस्य भः । ऊतये रक्षणाय । महे महत्यै । यथादर्शनं वर्णलोपः । देवो दाता दीप्तो वा त्वं नः अस्माकम् । दृशे दर्शनाय प्रकाशनाय । हि असि भवसि । यस्मादेवं तस्मात् अस्मभ्यं तेजः आभर ॥ (१०)

प्रथमस्य प्रथमा दशती ।

नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः । अमैरमित्रमर्दय ॥

आयुङ्क्ष्वाहेरार्षं विरूपस्य वा । नमः । कृत्वेति वाक्यशेषः । नमस्कृत्य । ते । षष्ठ्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । हे अग्ने त्वाम् । ओजसे । ओज इति बलनाम । तस्मादियं तादर्थ्ये चतुर्थी । बलार्थमित्यर्थः । गृणन्ति स्तुवन्ति । देव कृष्टयः मनुष्याः । त्वमपि स्तूयमानः अमैः अनिष्टैः रोगैर्भयैर्वा । अमित्रं शत्रुम् । अर्दय नाशय । विनाशयेत्यर्थः ॥

विरूप आंगिरस ऋषिः । नमः स्तोत्रम् । नमति ह्यनेन देवतामिति । गृणन्ति उच्चारयन्ति । कृष्टयः जनाः । ते त्वदीयाय । ओजसे तेजसे । ओजस्विने तुभ्यमिति वा । हे अग्ने देव । एषाममित्रं शत्रुम् । अमैः बलैः रोगैर्वा । अर्दय बाधस्व । अमेरभिभवार्थादमित्रम् । अमश्च अम रोगे ॥ (१)

दूतं वो विश्ववेदसं हव्यवाहममर्त्यम् । यजिष्ठमृञ्जसे गिरा ॥

वामदेवस्यार्षम् । दूतं सन्देशहरम् । वः । बहुवचनमिदमेकवचनस्य स्थाने द्रष्टव्यम् । त्वाम् । विश्ववेदसम् । विश्व इति सर्वनाम । वेद इत्यपि धननाम । विद ज्ञाने इत्यस्य वा वेदः ज्ञानम् । विश्वं वेदो यस्य स विश्ववेदाः । तं विश्ववेदसम । सर्वज्ञं सर्वधनं वेत्यर्थः । हव्यवाहं हविषां वोढारम् । अमर्त्यं अमरणधर्माणम् । यजिष्ठं अतिशयेन यष्टारम् । ऋञ्जसे । ऋञ्जतिः प्रसाधनकर्मा । मध्यमपुरुषैकवचनमिदमुत्तमपुरुषैकवचनस्य स्थाने द्रष्टव्यम् । ऋञ्जामि प्रसाधयामीत्यर्थः । गिरा स्तुतिलक्षणया वाचा ॥

वामदेवः । दूतं सन्तं यजमानानाम् । विश्ववेदसं विश्वविदं बहुधनं वा । हव्यवाहं हव्यानां वोढारम् । अमर्त्यं अमरणधर्माणम् । यजिष्ठं यष्टृतमम् । मनुष्येभ्यः ऋत्विग्भ्यः आधिक्येन यष्टारम् । अग्नीध्रप्रभृतयः ऋत्विजः स्वं स्वं यागं कुर्वन्ति । तेषां सर्वेषां आर्त्विज्यं अग्निरेव करोति इति यजिष्ठ उच्यते । आर्त्विज्यानि हि सर्वाणि मन्त्रप्रधानानि । द्विमात्राश्च वाङ्मयाः । वाचश्चाग्निरधिष्ठाता । अग्निर्वाक् भूत्वा मुखं प्राविशत् (ऐ. उ. २. ४) इति ह्यैतरेयोपनिषदि श्रुतम् । अतः सर्वाण्यार्त्विज्यानि अग्नेरेव । तथा च मन्त्रः ।

तवाग्ने होत्रं तव पोत्रं ऋत्वियं तव नेष्ट्रं त्वमग्निदृतायतः ।
तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे ॥

ऋ. वे. २. १. २.

इति । व इति प्रथमैकवचनस्य द्वितीयाबहुवचनेन व्यत्ययः । त्वमित्यर्थः । हे स्तोतः ऋञ्जसे प्रसाधय । गिरा स्तुत्या ॥ (२)

उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः । वायोरनीके अस्थिरन् ॥

प्रयोगस्यार्षम् । उपेत्ययमुपसर्गः गिर इत्यनेन सम्बन्धयितव्यः । त्वा इत्येतत् द्वितीयैकवचनं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् । तव जामयो भगिन्यः । काः पुनरग्नेर्भगिन्यः । ज्वालाः । कीदृश्यो भगिन्यः । ऊच्यते । गिरः उपगम्य याः गिरन्ति भक्षयन्ति हवींषि ताः गिरः । भक्षयित्र्य इत्यर्थः । देदिशतीः अत्यर्थं ददत्य इत्यर्थः । किं ददत्यः । सामर्थ्याद्धनम् । हविष्कृतः हविषा याः क्रियन्ते ताः हविष्कृतः । कथं पुनर्हविषा ताः क्रियन्ते । आज्ये हि प्रक्षिप्यमाणे बह्व्यो ज्वाला भवन्ति । प्रत्यक्षमेतत् । वायोः । वायुर्गन्ता । सर्वयजमानगृहान् प्रति गन्तुः तव । अनीके । अनीकशब्दो मुखवचनः । खड्गानीकं खड्गस्य मुखमुच्यते । तस्मादियं सप्तमी । अनीके मुखे इत्यर्थः । अस्थिरन् तिष्ठतीत्यर्थः ॥

भार्गवः प्रयोगः । अत्र गृणन्तीति गिरः स्तोत्र्यः प्रजाः । उपास्थिरन् उपतिष्ठन्ते । छन्दसि लुङ्लङ्लिटः (पा. ३. ४. ६) इति लडर्थे लुङ् । त्वा त्वाम् । जामयः बन्धुभूताः पूर्वमपि स्तुतिशीलाः । देदिशतीः स्तुवन्त्यः । वा छन्दसि (पा. ६. १. १०६) इति जसि पूर्वसवर्णः । हविष्कृतः हवींषि कुर्वन्त्यः । वायोरनीके प्रमुखे वर्तमानं त्वाम् ॥ (३)

उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसि ॥

मधुछन्दसः आर्षम् । उपेत्ययमुपसर्गः एमसीत्याख्यातेन सम्बन्धयितव्यः । त्वा त्वाम् । हे अग्ने । दिवेदिवे अहन्यहनीत्यर्थः । दोषावस्तः । दोषेति रात्रेर्नाम । वस्ता आच्छादयिता । रात्रौ यः स्वेन ज्योतिषा तमांस्याच्छादयति स दोषावस्ता । तस्य सम्बोधनं हे दोषावस्तः । रात्रौ स्वेन ज्योतिषा तम आच्छादयितरित्यर्थः । धिया स्वया प्रज्ञया । नमः ।

नमःशब्दः स्तुतिवचनः। स्तुतिं भरन्तः हरन्तः। प्रापयन्तः इत्यर्थः। उप एमसि उपागच्छामो वयम् ॥

वैश्वामित्रो मधुच्छन्दाः। उपेत्ययं आ इमसि इत्यनेन संबन्धनीयः। त्वा त्वाम्। हे अग्ने। दिवेदिवे प्रतिदिनम्। हे दोषावस्तः। दोषा रात्रिः। तस्या विवासयितः। तमोनाशकेत्यर्थः। धिया। धीरिति प्रज्ञायाः कर्मणश्च नाम। अत्र तु श्रद्धाख्यो धीवृत्तिविशेषो लक्ष्यते। श्रद्धया। वयं नमः। नतिः अवत्तं हविर्लक्षणमन्नं वा। भरन्तः हरन्तः। हृग्रहोर्भः छन्दसि (वा. ८. २. ३२–१) इति हस्य भः। उपहरन्तः इत्यर्थः। उप आ इमसि उपागच्छामः। इदन्तो मसि (पा ७. १. ४६) इति उत्तमपुरुषबहुवचनस्य इकारोपजनो वैकल्पिकः ॥ (४)

जराबोध तद्विविड्ढि विशेविशे यज्ञियाय। स्तोमँ रुद्राय दृशीकम् ॥

शुनःशेपस्यार्षम्। अत्रेतिहासमाचक्षते। अग्निः शुनःशेपमुवाच। रुद्रं स्तुहि। रौद्रा हि पशवः। स तं प्रत्युवाच। नाहं जानामि रुद्रं स्तोतुम्। त्वमेव चैनं स्तुहि इति। तदेतदनया ऋचा उच्यते। जरा स्तुतिः। तां यः स्वयं बुध्यति बोधयति वा देवान् स जराबोधः। तस्य सम्बोधनं हे जराबोध। यन्मामवोचः तत्त्वमेव विविड्ढि वेत्थ जानासि। नाहम्। अथवा विविड्ढीति विषॢ व्याप्तावित्येतस्य रूपम्। अयं च धातुः वेष इति कर्मनामसु पाठात् नाम्नां चाख्यातजत्वात् कर्मणि च करोत्यर्थस्य सम्भवात् करोत्यर्थोऽपि व्याप्त्यर्थ एवेति गम्यते। तत्कुर्वि त्यर्थः। किं तत्। उच्यते। विशेविशे मनुष्यस्यार्थाय। यज्ञियाय यज्ञसंपादिनोऽर्थाय। स्तोमं स्तोत्रम्। रुद्राय दृशीकं दर्शनीयम्। अथवा रोदनक्रियायोगात् अग्निरेवात्र रुद्र उच्यते। जराबोध इत्यपि अन्तरात्मनः

सम्बोधनम् । प्रैषश्च हे मदीय अन्तरात्मन् । कुरु । किं तत् । सर्वमनुष्याणां यज्ञसंपादिनः अग्नेरर्थाय स्तोमं दर्शनीयम् ॥

शुनःशेपः । जराबोध । जरया स्तुत्या बोधयति देवानिति जराबोधः स्तोता । जरतिः स्तुतिकर्मा । हे स्तोतः । आत्मनः एव ऋषेरामन्त्रणम् । यत् बुद्धिस्थं स्तुतिरूपं तद्विविड्ढि । विष्लेर्व्याप्तिकर्मणः लोटि मध्यमपुरुषैकवचनम् । व्याप्नुहि । कुर्वित्यर्थः । विशेविशे । वीप्सायां द्विर्वचनम् । षष्ठ्यर्थे चतुर्थी । सर्वस्या विशः जनस्य । यज्ञियाय यजनीयाय अग्नये । किं तत् यत्रा विड्ढि इत्युच्यते तदाह । स्तोमं स्तोत्रम् । रुद्राय रोरूयमाणाय । स्तुवतो द्रवन्त्येनः इति रुद्रोऽग्निरिहोच्यते । सोऽरोदीत् । यदरोदीत् तद्रुद्रस्य रुद्रत्वम् (तै. सं. १. ५. १. १) इति तैत्तिरीयकं रुद्रशब्दमग्नौ वर्तयति । दृशीकं दर्शनीयम् । शोभनमित्यर्थः । तत् विविड्ढि इति प्रथमं सामान्येन निर्दिश्य पश्चाद्विशेषाकाङ्क्षायां स्तोममिति अन्वयात् नपुंसकलिङ्गत्वम् ॥ (५)

प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे । मरुद्भिरग्न आ गहि ॥

मेधातिथेरार्षम् । प्रतीत्येष लक्षणे कर्मप्रवचनीयः । त्यंशब्दः तच्छब्दपर्यायः । तच्छब्दश्रुतेश्च योग्यार्थसम्बन्धो यच्छब्दोऽध्याहर्तव्यः । योऽयमस्माभिः प्रकल्पितो यज्ञः तं प्रति । चारुं शोभनम् । अध्वरम् । गोपीथाय । गोशब्देनात्र सोम उच्यते । तस्य पानार्थम् । प्रहूयसे प्रकर्षेणाहूयसे मया । एतत् ज्ञात्वा मरुद्भिः सह हे अग्ने आगहि आगच्छ ॥

मेधातिथिः । इयमाग्निमारुती । प्रति उद्दिश्य । त्यम् । त्यच्छब्दः तच्छब्दपर्यायः । यः सर्वसाधकः तम् । चारुं शोभनम् । अध्वरं यज्ञम् । यद्यप्यत्र पशुजातीनां वधो दृश्यते तथापि नासौ हिंसा इत्यध्वरः । ध्वरतिर्हिंसाकर्मा ।

यज्ञार्थं पशवः सृष्टाः स्वयमेवस्वयंभुवा ।
यज्ञश्च भूत्यै लोकस्य तस्माद्यज्ञे वधोऽवधः ॥ म. ५. ३९.

इति स्मृतिः । गोपीथाय । गौः सोमः । गच्छति देवान् इति । तस्य पीथाय पानाय । प्रहूयसे प्रकर्षेण आहूयसे । मरुद्भिः सार्धं आगहि हे अग्ने ॥ (६)

अश्वं न त्वा वारवन्तं वंदध्या अग्निं नमोभिः । सम्राजन्तमध्वराणाम् ॥

शुनःशेपस्यार्षम् । अश्वं न । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । अश्वमिव । त्वा वारवन्तं वन्दध्यै । तुमुन्प्रत्ययः । वन्दितुम् । इच्छाम इति वाक्यशेषः । अग्निं नमोभिः स्तुतिभिः । सम्राजन्तं सम्यग्दीप्तारम् । अध्वराणां यज्ञानाम् ॥

शुनःशेपः । अश्वं न अश्वमिव । त्वा त्वाम् । वारवन्तं वालवन्तम् । वारयन्ति दंशानिति वारा एव वालाः इत्युच्यन्ते । प्रशंसायां मतुप् । प्रशस्तकेसरवन्तं अश्वं इवेति अर्चिष्टत्वस्य उपमा । त्वां वन्दध्यै । वदि अभिवादनस्तुत्योः इत्यस्मात् तुमर्थे सेसेन (पा. ३. ४. ९) इत्यादिना कध्यै प्रत्ययः । वन्दितु स्तोतुम् । आह्वयाम इति शेषः । अग्नि अग्रगण्यं त्वाम् । नमोभिः नमस्कारैः आह्वयाम इत्यन्वयः । सम्राजन्तम् । राजतिरैश्वर्यकर्मा । सम्यगीशानम् । अध्वराणां यज्ञानाम् । वन्दध्यै इत्याख्यातमिति यास्कः । तस्मिन् पक्षे नमोभिः स्तुतिभिः वन्दामहे ॥ (७)

और्वभृगुवच्छुचिमप्नवानवदा हुवे । अग्निं समुद्रवाससम् ॥

प्रयोगस्यार्षम् । और्वभृगुवत् यथा और्वः ऋषिः यथा च भृगुर्ऋषिः यथा च अप्नवान् आह्वयति तद्वदहमपि शुचिं आहुवे आह्वयामीत्यर्थः । अग्निम् । कीदृशम् । समुद्रवाससम् । समुद्र इत्यन्तरिक्षनाम । तत्र निवासो यस्य स समुद्रवासाः । तं समुद्रवाससम् । अन्तरिक्षन्निवासमित्यर्थः । वैद्युतात्मा ह्यसौ तत्र निवसति । अथवा समुद्रशब्देन पार्थिवः समुद्र उच्यते । तत्र ह्यसौ बडबात्मा निवसति ॥

अस्या ऋचः प्रयोग ऋषिः । और्वभृगुवत् अप्नवानवत् च इति ऋषिः स्वज्ञातीन् कीर्तयति । यथा और्वादयः आह्वयन्ति तथाहं च । शुचिं दीप्तम् । अग्निं समुद्रवाससं वैद्युतमग्निं आह्वयामि । समुद्रोऽन्तरिक्षम् । समुद्द्रवन्त्यस्मादाप इति ।

स उत्तरस्मादधरं समुद्रं अपो दिव्या असृजद्वर्ष्या अभि ।

(ऋ. वे. १०. ९८. ५)

इति । अत्र उत्तरसमुद्रमिति अन्तरिक्षमुच्यते । अम्भोधिरधरः समुद्रः ॥ (८)

अग्निमिन्धानो मनसा धियँ सचेत मर्त्यः । अग्निमिन्धे विवस्वभिः ॥

प्रयोगस्यार्षम् । अग्निं इन्धानः सन्दीपयन् । मनसा । मनसापि । धियम् । धीरिति कर्मनाम । यागम् । सचेत सं भजेत । कुर्यादित्यर्थः । अथवा धीरिति प्रज्ञानाम । तां सचेत संभजेत । लभेत इत्यर्थः । मर्त्यः मनुष्यः । किं पुनर्यः । अग्निं इन्धे । इत्युत्तमपुरुषस्यैकवचनमिदं प्रथमपुरुषैकवचनस्य स्थाने द्रष्टव्यम् । सन्दीपयति अनुष्ठानेन । विवस्वभिः तमसां विवासयितृभिः हविर्भिः ॥

अग्निं मनसा श्रद्धया । इन्धानः काष्ठैः दीपयन् । धियं कर्म यज्ञम् । सचेत लभेत । मर्त्यः । किमुक्तं भवति तदाह । अग्निमिन्धे । लोडर्थे लट् । इन्धीय । विवस्वभिः । विवः धनम् । तद्वद्भिः । हविर्लक्षणधनयुक्तैः काष्ठैः । केवलाभिः अपि समिद्भिः । श्रद्धया अग्निमिन्धानः हविष्मतीभिरिन्धानस्य फलं लभते इति । समिधमेवापि श्रद्दधानो आदधन् मन्येत यज इति इदमिति नमः तस्मै इति आश्वलायनः ॥ (९)

आदित्प्रत्नस्य रेतसो ज्योतिः पश्यन्ति वासरम् । परो यदिध्यते दिवि ॥

वत्सस्यार्षम्। आत् इत्। द्वावपि पादपूरणौ। प्रत्नस्य पुराणस्य। रेतसः। उदकस्य सम्बन्धि। ज्योतिः सूर्यादि। केन पुनः सम्बन्धेन। उच्यते पतनलक्षणेन सम्बन्धेन। उदकं हि पात्यते। ज्योतिः पातयति। अत उच्यते प्रत्नस्य रेतसः सम्बन्धि ज्योतिः पातयितृ इति। पुराणग्रहणं च प्रदर्शनार्थम्। नवस्यापि पातयितृ। सर्वस्योदकस्य वर्षितृ इत्यर्थः। कथं पुनर्ज्योतिः वर्षितृ। उच्यते। पश्यन्ति वासरम्। परो यदिध्यते इति परस्ताद्यच्छब्दः श्रूयते। स पूर्वत्र सर्वत्रानुप्रयुज्यते। यत्पश्यन्ति। के। सामर्थ्यात्सर्वप्राणिनः। वासरम्। वाशब्दः वैविध्ये वर्तते। सर इत्यपि सर्तेर्गत्यर्थस्य रूपम्। वा विविधं यद्गच्छति तद्वासरम्। किं पुनस्तत्। तदेव सूर्याख्यं ज्योतिः। तद्धि दिवा उष्णेन गच्छति। रात्रौ शीतेन। अतो यद्वासरमित्युच्यते। यच्च: परः। व्यत्ययेनेदं पुंलिङ्गं नपुंसकलिङ्गं कर्तव्यम्। परम्। इध्यते दीप्यते। दिवि द्युलोके। परस्ताद्यच्छब्दश्रुतेः पुरस्तात्तच्छब्दमध्याहृत्य एकवाक्यता योजयितव्या। ये पश्यन्ति जनाः यच्च वासरं यच्च परं इध्यते दिवि तत्पुराणस्योदकस्य सम्बन्धीत्येवमेकवाक्यत्वम्। अथवा वासरं गमनम्। तत् करोतीति णिच्। वासरयते गमयते इति वासरम्। गमयितृ इत्यर्थः। वैद्युतं हि ज्योतिः मेघात् यत् पृथिवीं प्रति उदकं गमयति नयति। अत उच्यते प्रत्नस्य रेतसो ज्योतिः पश्यन्ति वासरं गमयितृ इत्यर्थः ॥

काण्वो वत्सः। इयमासन्नमरणे जप्येति बह्वृचोपनिषदि श्रूयते (ऐ. आ. ३. २. ४. ८)। इयं वैश्वानरस्याग्नेः स्तुतिः। वैश्वानरश्च त्रैलोक्यशरीरः परमात्मेति उपनिषदि स्थितम्। आत् इति निपातः अनन्तरमित्यस्मिन् अर्थे वर्तते। इदित्येवार्थे। आदित् अनन्तरमेव आत्मविज्ञानात्। प्रत्नस्य पुराणस्य। रेतसः कारणात्मनः स्वरूपभूतम्। ज्योतिः वैश्वानराख्यं सूर्यम्। पश्यन्ति विद्वांसः। वासरं विवासकं तमसाम्। परः परस्तात्। इध्यते दीप्यते। दिवि

दिव इत्यर्थः। यत दिवः परस्तादिध्यते इति संबन्धः। अथ यदतः परो दिवो ज्योतिर्दीप्यते (छा. उ. ३. १३. ७) इत्यादि श्रूयते ॥ (१०)

प्रथमस्य द्वितीया दशती।

अग्निं वो वृधन्तं अध्वराणां पुरूतमम्। अच्छा नप्त्रे सहस्वते ॥

प्रयोगस्यार्षम्। अग्निं वः। द्वितीयाबहुवचनमेकवचनस्य स्थाने द्रष्टव्यम्। वृधन्तं वर्धन्तम्। अध्वराणां यज्ञानाम्। पुरूतमं बहुतमम्। अच्छ इत्ययमुपसर्गः अभेरर्थे। उपसर्गाश्च पुनरेवमात्मकाः। यत्र क्रियावाची शब्दः प्रयुज्यते तत्र क्रियाविशेषमाहुः। यत्र क्रियावाची शब्दो न प्रयुज्यते। तत्र ससाधनां क्रियामाहुः। इह च क्रियावाची शब्दो न प्रयुज्यते अत उपसर्गश्रवणसामर्थ्यात्क्रियापदमध्याह्रियते। अभिष्टौमि। अथवा अच्छशब्दः आप्तुमित्यस्यार्थे वर्तते। इच्छामीति च वाक्यशेषः। केन पुनः अग्निं आप्तुमिच्छामि। सामर्थ्याद्धविर्भिः स्तुतिभिश्च। किमर्थं पुनरभिष्टौमि आप्तुं वा इच्छामि। उच्यते। नप्त्रे सहस्वते। नप्तृ इत्यपत्यनाम। सह इत्यपि बलनाम। तद्यस्यास्तीति मतुप्। तादर्थ्यचतुर्थ्यौ। अपत्यस्य बलस्यार्थायेत्यर्थः ॥

प्रयोगः। अग्निमच्छ आभिमुख्येन। स्तुतेति शेषः। अभिष्टुत। हे स्तोतारः। वः यूयमित्यर्थः। वृधन्तं वर्धयितारम्। अध्वराणां यज्ञानाम्। वृधेरन्तर्भावितण्यर्थादौणादिको झ्चः। पुरूतमम्। दीर्घः सांहितः। पूर्णतमम्। अथवा वृधन्तं वर्धमानम्। अध्वराणां पुरूतमं पूरयितृतमम्। किमर्थमभिष्टुमः। नप्त्रे पुत्राय। न पतन्ति अनेन लब्धेनेति नप्ता। सहस्वते बलवते। तं लब्धुं इत्यर्थः ॥ (१)

अग्निस्तिग्मेन शोचिषा यँसद्विश्वं न्यत्रिणम् । अग्निर्नो वंसते रयिम् ॥

भरद्वाजस्यार्षम् । अग्निः तिग्मेन तीक्ष्णेन । शोचिषा दीप्त्या । यंसत् । यमिर्बन्धनार्थः । नीत्ययं छन्दसि परोऽपि व्यवहिताश्च (पा. १. ४. ८२) इति व्यवहितः परस्तात्प्रयुक्तः सन् पूर्वः अनन्तरश्च द्रष्टव्यः । नियंसत् नियच्छति निबध्नाति । निरुणद्धीत्यर्थः । विश्वं सर्वम् । अत्रिणं अत्तारं भक्षयितारं विनाशयितारं रक्षःपिशाचादिकम् । अग्निरेधमानः । अस्मभ्यं वंसते । वंसतिरत्र दानार्थः । यथा वाञ्छति तथा ददातीत्यर्थः । रयिं धनम् ॥

भरद्वाजः । अग्निः तिग्मेन शोचिषा तीक्ष्णेन शोचिषा । नि इत्ययमुपसर्गः यंसदित्याख्यातेन संबन्धनीयः । छन्दसि परोऽपि व्यवहिताश्च (पा १. ४. ८२) इति स्मृतेः । यंसदिति च यमेर्लेटि रूपम् । लेडर्थे लेट् । लेटस्तिप् । लेटोऽडाटौ (पा. ३. ४. ९४) इति लेडादेशस्य तिपः अडागमः । सिब्बहुलं लेटि (पा. ३. १. ३४) इति सिप् । इतश्च लोपः परस्मैपदेषु (पा. ३. ४. ९७) इति इकारलोपः । नियंसत् नियच्छतु । हिनस्तु इत्यर्थः । विश्वं अत्रिणं अदनशीलं राक्षसम् । रक्षांसि वै पाप्मात्रिणः (ऐ. ब्रा. २. २) इति ह्यैतरेयकम् । न्यत्रिणमित्यत्र स्वरितस्य कम्पः न तु दीर्घः । किच अग्निः नः अस्मभ्यम् । वंसते वनतां प्रयच्छतु । रयिं धनम् । वंसते इति च पञ्चमलकारान्तम् । वनिर्दानकर्मापि दृश्यते ॥ (२)

अग्ने मृड महाँ अस्यय आ देवयुं जनम् । इयेथ बर्हिरा सदम् ॥

वामदेवस्यार्षम् । हे अग्ने । मृड सुखय । कस्मात् । उच्यते । महान् असि भवसि । महतां च परोपकारार्थमेव प्रवृत्तिः । अतः उच्यते मृडय । अपि च अयः गतवानसि । आ । आकारः पादपूरणार्थः ।

देवयुं । देवान् यष्टुमिच्छन्तं जनं प्रति । अहमपि देवान् यष्टुमिच्छामि । अतो ब्रवीमि इयेथ आगच्छ । किमर्थं पुनरागच्छामि । उच्यते । बर्हिः । द्वितीयैकवचनमिदं सप्तम्येकवचनस्य स्थाने द्रष्टव्यम् । बर्हिषि । आसदम् । इदमपि च द्वितीयैकवचनं चतुर्थ्येकवचनस्य स्थाने द्रष्टव्यम् । आसदे । आसदनार्थमित्यर्थः ॥

वामदेवः । हे अग्ने । मृड सुखय अस्मान् । मृड सुखने । मृडयतिरुपदयाकर्म (नि. १०. १६) इति यास्कः । उपदयां कुरु अस्मभ्यम् । महांस्त्वमसि । अन्यतर आकारः पादपूरणः । यस्त्वं आ इयेथ आगच्छसि । देवयुं देवकामम् । जनं सर्वम् । इयेथेत्येतल्लुडर्थे लिट् । बर्हिरासदं आसत्तम ॥ (३)

अग्ने रक्षा णो अँहसः प्रति स्मदेव रिषतः । तपिष्ठैरजरो दह ॥

वसिष्ठस्यार्षम् । हे अग्ने रक्ष नः अस्मान् । अंहसः । पापात् । प्रति इत्ययं अपीत्येतस्यार्थे । स्म इति पादपूरणः । अपि च । हे देव रिषतश्च हिंसितुश्च सकाशात् । तपिष्ठैः तापयितृतमैः । कैः । सामर्थ्यात् ज्वालासमूहैः । अजरः । जरा स्तुतिः । सा येषां कर्तव्यत्वेन न विद्यते ते अजराः । स्तुतिवर्जिता इत्यर्थः । तांश्च दह विनाशयेत्यर्थः ॥

हे अग्ने । रक्ष नः अस्मान् । अंहसः पापात् । प्रति दह । हे देव दातः । हे दीप्त इति वा । रिषतो हिंसतः रक्षःप्रभृतीन् तपिष्ठैः तापकतमैः ज्वालाजालैः । अजरः त्वम् । स्मेति पादपूरणः ॥ (४)

अग्ने युङ्क्ष्वा हि ये तवाश्वासो देव साधवः । अरं वहन्त्याशवः ॥

भरद्वाजस्यार्षम् । हे अग्ने युङ्क्ष्व । शुद्धोऽप्ययं युजिः निपूर्वार्थे द्रष्टव्यः । नियुङ्क्ष्व । स्वे रथे अस्मदीयाद्यज्ञाद्गमनार्थं । हीति पादपूरणार्थः ।

ये तवाश्वास इति यच्छब्दश्रवणसामर्थ्यात्तानित्येतदध्याह्रियते । नियुङ्क्ष्व ये तव अश्वासः अश्वाः । देव दानादिगुणयुक्त । साधवः शोभनाः । अरं अलं पर्याप्तम् । वहन्ति । यावदिच्छसि तावदेव वहन्तीत्यर्थः । आशवः व्यापयितारः । कस्य । सामर्थ्याद्ध्वनः । शीघ्रया गत्या इत्यर्थः ॥

भरद्वाजः । हे अग्ने युंक्ष्व रथे स्वीये । हि इति पादपूरणः । कान् रथे युनज्मि । ये तव अश्वासः अश्वाः । आज्जसेरसुक् (पा. ७. १. ५०) इति जसेरसुक् । देव साधवः साधकाः । अरं पर्याप्तम् । वहन्ति प्रापयन्ति यज्ञान् । आशवः शीघ्रगाः ॥ (९)

नि त्वा नक्ष्य विश्पते द्युमन्तं धीमहे वयम् । सुवीरमग्न आहुत ॥

वसिष्ठस्यार्षम् । नीत्ययमुपसर्गः नक्ष्येत्यनेन सम्बन्धयितव्यः । नक्षतिश्च नक्षति इति व्याप्तिकर्मसु पाठात् व्याप्तिकर्मा । निनक्ष्य नियमेन व्याप्य । केन । सामर्थ्याद्धस्ताभ्यां गृहीत्वेत्यर्थः । त्वा त्वाम् । विश्पते । विशो मनुष्याः । तेषां पतिः स्वामी विश्पतिः । तस्य सम्बोधनं हे विश्पते । मनुष्याणामधिपते । कीदृशं त्वाम् । उच्यते । द्युमन्तं दीप्तिमन्तम् । ज्वालावन्तमित्यर्थः । धीमहे स्थापयामः । क्व । वेद्याख्ये प्रदेशे । वयम् । कीदृशं त्वाम् । उच्यते सुवीरम् । शोभनाः वीराः पुरुषाः ऋत्विगाख्याः परिचारकत्वेन सम्बन्धिनो यस्य स सुवीरः । तं सुवीरम् । शोभनैर्वीरैः सम्बद्धमित्यर्थः । हे अग्ने आहुत आभिमुख्येन हुत ॥

वसिष्ठः । निधीमहे निदध्महे वयम । त्वां निधिवत्कुर्म इत्यर्थः । हे नक्ष्य । नक्षतिर्व्याप्तिकर्मा । उपगन्तव्य । विश्पते विशां जनानां पते । विश्वस्य पते इत्यपरे । द्युमन्तं दीप्तिमन्तम् । सुवीरं कल्याणस्तोतृकम् । विविधं ईरयति स्तोत्रं इति वीरः । हे अग्ने । आहुत अभिहुत सर्वैः यजमानैः ॥ (६)

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपाँ रेताँसि जिन्वति ॥

विरूपस्यार्षम्। अग्निः मूर्धा। लुप्तोपममिदं द्रष्टव्यम्। मूर्धानमिव। यादृशं मनुष्यस्य शिरः सर्वाङ्गानां प्रधानं तादृशः प्रधानः स्वामीत्यर्थः। कस्य। उच्यते। दिवः द्युलोकस्य। स्वर्गलोकस्येत्यर्थः। ककुत्। एतदपि लुप्तोपमम्। ककुदमिव। यथा बलीवर्दस्य ककुदं प्रधानं तादृशः प्रधानः। पतिः स्वामी। कस्याः। पृथिव्याः पृथिवीलोकस्य। अयं अपां रेतांसि। आप इत्यन्तरिक्षनाम। रेत इत्युदकनाम। अन्तरिक्षस्य सारभूतानि उदकानि। अथवा अपां वीर्याणि रेतांसि। उदकानीत्यर्थः। अथवा अपां वीर्याणि जिन्वति प्रीणयति आप्यायतीत्यर्थः। कुत एतत्। अग्निर्वा इतो वृष्टिं समीरयति इति श्रुतेः॥

विरूपः। अग्निः मूर्धा धारकः। दिवः ककुत् उच्छ्रितः। पतिश्च पृथिव्याः भुवः। अयं अपां रेतांसि कारणानि मेघान्। जिन्वति प्रेरयति वैद्युतरूपोऽयमग्निः। अथवा कार्यं रेतः। अपां कार्याणि वृक्षादीनि। जिन्वति तर्पयति परिणमयति॥ (७)

इमम् षु त्वमस्माकँ सनिं गायत्रं नव्याँसम्। अग्ने देवेषु प्र वोचः॥

शुनःशेपस्यार्षम्। उ सु इति द्वावपि पादपूरणौ। इमं त्वं अस्माकं स्वभूतं सनिम्। षणु दाने। सनिं पुरोडाशादिकं दानम्। गायत्रं स्तोत्रं च। नव्यासं नवतरम्। अन्यैरकृतं पूर्वमित्यर्थः। हे अग्ने देवेषु प्रवोचः। देवेष्विति सप्तमीबहुवचनं चतुर्थीबहुवचनस्य स्थाने द्रष्टव्यम्। देवेभ्यः प्रकर्षेण कथय॥

शुनःशेपः। अत्र ऊ सु इतीमौ पादपूरणौ। त्वं हे अग्ने। इममिति लिङ्गव्यत्ययः। इदम्। गायत्रं स्तोत्रम्। गायतेर्गायत्रम्। अस्माकं अस्मदीयं अस्माभिः

क्रियमाणम् । सनिम् । सनोतेः सनिः । सनोतिश्च संभजनकर्मा दानकर्मा च । संभजनीयमिति वा दातृकाममिति वा । नव्यांसं नवीयांसं नवतरम् । अत्रापि लिङ्गव्यत्ययः । देवेषु देवेभ्य इत्यर्थः । प्रवोचः प्रब्रूहि । अयं स्तोता आयुष्मान् गायति । तं गच्छत इति प्रेरयेत्यर्थः ॥ (८)

तं त्वा गोपवनो गिरा जनिष्ठदग्ने अङ्गिरः । स पावक श्रुधी हवम् ॥

गोपवनस्यार्षम् । तच्छब्दश्रुतेर्योग्यार्थसम्बन्धो यच्छब्दोऽध्याहर्तव्यः । यः उक्तगुणोऽग्निः तं त्वा गोपवनः । आत्मानं परोक्षरूपेण प्रतिनिर्दिशति । गोपवनो नामायमृषिः । गिरा स्तुतिलक्षणया वाचा । जनिष्ठत् जनितवानित्यर्थः । हे अग्ने अङ्गिरः । अङ्गानि शरीरावयवाः । स्तद्वत् अङ्गि शरीरम । तस्य स्थितिर्हेतुरशितपीतरसः । तत्करोतीति णिच् । अङ्गिरसयति । जाठरो ह्यग्निः अन्नं रसीकरोति । तस्य सम्बोधनं हे अङ्गिरः शरीरस्थितिहेतोरशितपीतरसस्य कर्तः इत्यर्थः । यतः एवं स्तुतवान् । अतो ब्रवीमि । स त्वं हे पावक शोधयितः श्रुधि शृणु । हवं आह्वानम् । श्रुत्वा च एहि अस्मद्यज्ञमित्यर्थः ॥

गोपवन आत्रेयः । तं यं सर्वे जनाः स्तुवन्ति तम् । त्वा त्वाम् । गोपवन ऋषिः । गिरा स्तुत्या । अजनिष्ठत् जनयति वर्धयति । स्तूयमाना हि देवता वर्धन्ते । हे अग्ने । अङ्गिरः अङ्गिरसः पुत्र । अङ्गिरसां वा एकोऽग्निः (ऐ. ब्रा. ६. ३४) इति ऐतरेयकम् । अगेर्वा अङ्गिराः । गन्तव्य सर्वग । स त्वम् । हे पावक शोधक । श्रुधि शृणु । हवं स्तोत्रं गोपवनस्य ॥ (९)

परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥

वामदेवस्यार्षम् । परीत्येष अक्रमीदित्याख्यातेन सम्बन्धयितव्यः । वाजपतिः । वाजमन्नम् । तस्य पतिः स्वामी । कविः मेधावी । अग्निः ।

हव्यानि हवींषि हविः । अक्रमीत् । क्रमिर्गत्यर्थः । शुद्धोऽपि च ण्यर्थे द्रष्टव्यः । पारिक्रमितवान् परिगमितवान् । नीतवानित्यर्थः । कं प्रति । सामर्थ्यात् देवान् । किं पुनः कुर्वन् हवींषि नीतवान् । उच्यते । दधत् ददन्नित्यर्थः । रत्नानि धनानि । दाशुषे यजमानाय ॥

वामदेवः । इयं पशोः पर्यग्निकरणे मैत्रावरुणे नोच्यते । मन्त्रलिङ्गं च तथाविधं भवति । अतः अग्नीषोमीयस्य पशोः पर्यग्निकरणे क्वचित् ब्राह्मणे प्रस्तोतुर्विनियोगेनैव भाव्यम् । पर्यक्रमीत् परिक्रामति परितो गच्छति । हव्यानि हवींषि । वाजपतिः अन्नानां पतिः । कविः क्रान्तदर्शी । सर्वविषयप्रज्ञ इत्यर्थः । अग्निः दधत् प्रयच्छन् । रत्नानि रमणीयानि धनानि । दाशुषे यजमानाय ॥ (१०)

उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥

प्रस्कण्वस्यार्षम् । उच्छब्दः वहन्तीत्याख्यातेन सम्बन्धयितव्यः । व्यवहिताश्च (पा. १. ४. ८२) इति पाणिनीयस्मरणात् । उ इति पादपूरणः । त्यच्छब्दस्तच्छब्दपर्यायः । तच्छब्दश्रुतेश्च योग्यार्थसम्बन्धो यच्छब्दोऽध्याह्रियते । यं सर्वप्राणिनो नित्यं नमस्यन्ति तम् । जातवेदसं जातप्रज्ञं जातधनं वा । देवं दानादिगुणयुक्तम् । उद्वहन्ति । के । अर्थात् रश्मयः । कीदृशाः रश्मयः । केतवः प्रज्ञानवन्त इत्यर्थः । किमर्थमुद्वहन्ति । दृशे दर्शनाय । विश्वाय । षष्ठ्यर्थे एषा चतुर्थी । सर्वस्य जगतः । कमुद्वहन्ति । सूर्यमादित्यम् । उदिते ह्यादित्ये सर्वं जगत्पश्यति नानुदिते । एकमेवेदं ज्योतिः त्रिधा विभक्तमित्येवमाग्नेयत्वमविप्रतिषिद्धम् ॥

प्रस्कण्वः काण्वः । इयं सौरी । आग्नेयसमाख्या तु छत्रिणो गच्छन्तीतिवत् प्राणभृत उपदधातीतिवच्च द्रष्टव्यम् । सृष्टिन्यायेन वा । भूयस्त्वादाग्ने-

यीनाम् । उद्वहन्ति केतवः प्रकाशस्वभावा रश्मयः । रश्मिषु पूर्वदृष्टेषु पश्चात् सूर्यो दृश्यते इति ।

अब्जा गोजा (ऋ. वे. ४. ४०. ५)

इति च निगमान्तरम् । गोभ्यो रश्मिभ्यो जायते इति हि गोजा इत्युच्यते । तच्च रश्मीनां पूर्वदृष्टत्वमात्रेण । अथवा अश्वाः सूर्यस्य हरितः उद्वहन्ति । उ इति पादपूरणः । त्यं तं यं सर्वे नमस्यन्ति । जातवेदसम् । जातं प्रभूतं वेदो वित्तं ज्ञानं वा यस्य स जातवेदाः । जातान् प्राणिनो वेत्तीति वा । देवं दानादिगुणकम् । सूर्यम् । सुवतेः प्रेरणकर्मणः सर्तेर्वा । दृशे द्रष्टुम् । विश्वाय विश्वं इत्यर्थः । दृशे विख्ये च (पा. ३. ४. ११) इति तुमर्थनिपातनात् रूपसिद्धिः । समानकर्तृकेषु छन्दसि तुमर्थीया दृश्यन्ते । अथवा दृक् दर्शनम् । दर्शनाय । विश्वाय इति षष्ठ्यर्थे चतुर्थी । विश्वस्य तमसावृतस्य अपश्यतो दर्शनार्थम् ॥ (११)

कविमग्निमुपस्तुहि सत्यधर्माणमध्वरे । देवममीवचातनम् ॥

मेधातिथेरार्षम् । अन्तरात्मनश्चायं प्रैषः । हे मदीय अन्तरात्मन् । कविं मेधाविनम् । अग्निमुपस्तुहि सत्यधर्माणं सत्यकर्माणम् । अध्वरे यज्ञे । देवं दानादिगुणयुक्तम् । अमीवचातनम् । अमीवो रोगः । तस्य चातयितारम् । नाशयितारमित्यर्थः ॥

मेधातिथिः । कविं क्रान्तदर्शिनम् । अग्निं उपस्तुहि । अभिष्टुहि इति आत्मानमेवाह मेधातिथिः । सत्यधर्माणं सत्यकर्माणम् । अध्वरे यज्ञे । देवं दानादिगुणकम् । अमीवचातनम् । अमीवाः अमित्राः । तेषां चातनं नाशयितारम् । रोगो वा अमीवः ॥ (१२)

शं नो देवीरभिष्टये शं नो भवन्तु पीतये । शं योरभिस्रवन्तु नः ॥

सिन्धुद्वीपस्य अम्बरीषस्य वा आर्षम् । तृतस्य वा आप्तस्य वा । शमिति सुखनाम । शं सुखम् । नोऽस्माकम् । देवीः दानादिगुणयुक्ताः ।

भवन्तु । काः । आपः । क्क पुनः सुखा भवन्तु । उच्यते । अभिष्टये अभिगमनाय । अपां हि किमभिगमनम् । स्नानादिभिस्तत्पुनरासेवनम् । तदर्थं सुखा भवन्त्वित्यर्थः । किमभिष्टये एव केवलम् । उच्यते । पीतये पानाय चास्माकं सुखा भवन्त्वित्यर्थः । शं शमनं युः अपनयनमित्यर्थः । द्वे अप्येते प्रथमैकवचने चतुर्थ्येकवचनस्य स्थाने द्रष्टव्ये । शमनाय । कस्य सामर्थ्याद्रोगाणाम् । यावनाय च । कस्य । सामर्थ्याद्भयानाम् । अभिस्रवन्त्वस्माकम् । अग्निप्रसादेनेत्येवमाग्नेयत्वम् ॥

सिन्धुद्वीपः । शं सुखाय । नः भवंतु देवीः देव्यः गच्छन्त्यः आपः । दिव्यतेः गतिरपि अर्थो भवति । अभिष्टये अभीष्टये अभ्याप्तये च अभीष्टानां भवन्तु । शं न इति पुनर्वचनमादरार्थम् । पीतये पानायापि भवन्तु । नः । शं शान्तिरुपद्रवाणां । योः मिश्रणं अभिष्टिः । तदुभयं अभिस्रवन्तु अभिक्षरन्तु । नः अस्मभ्यम् ॥　　　　(१३)

कस्य नूनं परीणसि धियो जिन्वसि सत्पते । गोषाता यस्य ते गिरः ॥

उशनसः आर्षम् । कमिति सुखनाम । कस्य सुखस्येत्यर्थः । नूनं निश्चयेन । परीणसि । सप्तम्येकवचनमिदं द्वितीयाबहुवचनस्य स्थाने द्रष्टव्यम् । परीणसः । बह्वय इत्यर्थः । धियः प्रज्ञाः । जिन्वसि प्रीणयसि पूरयसि । प्रज्ञासुखाभ्यां पूरयन् सुखिनं करोतीत्यर्थः । सत्पते सतां पालयितः । कस्य पुनः प्रज्ञासुखेन पूरयसि । उच्यते । गोषाता यस्य ते गिरः । गोशब्देनात्र सोम उच्यते । साता इत्यपि सनोतेः सम्भजनार्थस्य रूपम् । सोमान् याः सम्भजन्ते ताः गोषाताः । सोमानां सम्भक्त्र्यः । सोमैः सह याः क्रियन्ते इत्यर्थः । यस्य यजमानस्य । ते तव सम्बन्धिन्यः । गिरः स्तुतयः । सोमेन सहूताभिः स्तुतिभिः यस्त्वां स्तौतीत्यर्थः ॥

उशनसाहूयमानस्याग्नेरनागमनाद्विलंबमसहमान ऋषिः आह । कस्य यजमानस्य । धियः स्तुतीः कर्माणि यज्ञात्मकानि वा । नूनं अद्य । जिन्वसि तर्पयसि कामैः । परिणः इति महन्नामेदम् । परिपूर्वात् णसेः व्यातिकर्मण इदं रूपम् । महति यज्ञे । सत्पते सतां आर्याणां यज्वनां पते पालयितः । यस्य ते तव । गिरः स्तुतयः । गोषाता गवां सातौ लाभे निमित्तं भवन्ति । यस्य ते स्तोतारः गवां संभक्तारो भवन्ति । सः त्वं इदानीं कस्य यज्ञे स्तुतीः परिचर्यां वा स्वीकरोषि ॥ (१४)

प्रथमस्य तृतीया दशतिः ।

यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे ।
प्रप्र वयं अमृतं जातवेदसं प्रियं मित्रं न शँसिषम् ॥

भरद्वाजस्यार्षम् । यज्ञायज्ञेति सप्तम्याः स्थाने अयमाकारः । वीप्सायां च द्विर्वचनम् । यज्ञे यज्ञे । अन्यत्र चान्यत्र च यज्ञे इत्यर्थः । वः । द्वितीयाबहुवचनमिदमेकवचनस्य स्थाने द्रष्टव्यम् । त्वाम् । अग्नये । चतुर्थ्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । अग्निम् । गिरा गिरा अन्यया चान्यया च स्तुत्या इत्यर्थः । चशब्दः समुच्चयादेरर्थस्यासम्भवात् पादपूरणः । दक्षसे । दक्षतेर्धातोरुत्साहार्थस्यैतद्रूपं बलनाम च । अन्तर्णीतमत्वर्थं द्रष्टव्यम् । चतुर्थी च द्वितीयार्थे । उत्साहिनं बलवन्तं चेत्यर्थः । प्रप्रेति प्रशब्दः पादपूरणः इति पादपूरणार्थं द्विर्वचनम् । प्रेत्ययं शंसिषमित्यनेन सम्बन्धयितव्यः । वयमित्येतत् प्रथमाबहुवचनं एकवचनस्य स्थाने द्रष्टव्यम् । अहम् । अमृतममरणधर्माणम् । जातवेदसम् । वेद इति धननाम । ज्ञानं वा । जातं धनं ज्ञानं वा यस्य स जातवेदाः ।

तं जातवेदसम् । उत्पन्नज्ञानमुत्पन्नधनं वेत्यर्थः । प्रियं मित्रं न । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । प्रियं मित्रमिव । शंसिषम् । शंस स्तुतौ । यथा कश्चित्प्रियं मित्रं स्तौति तद्वत् स्तूयेम अहमित्येतदाशास्महे ॥

अथ बार्हतम्

यज्ञा यज्ञेति चाग्नेय्यो बृहत्योऽष्टोर्ध्वविंशतिः ।
अध ज्मो अध वेत्यैन्द्री प्रैत्विति ब्रह्मणस्पतेः ॥
ऊर्ध्व ऊ ष्विति यूपस्य स्तुतिरग्ने जरितेति ।
समाख्या प्राणभृत्यायामिति पूर्वमुदीरितम् ॥

बार्हस्पत्यः। यज्ञा यज्ञा । सप्तम्येकवचनस्य सुपां सुलुक् (पा. ७. १. ३९) इत्यादिना आकारादेशः । यज्ञे यज्ञे । व इति विभक्तिव्यत्ययः । यूयमिति वा त्वमिति वा । हे स्तोतार इति वा हे स्तोतरिति वा । अग्नये अग्न्यर्थम् । गिरा गिरा स्तुत्या स्तुत्या । चेति चणो निपातस्य रूपम् । चः चेदर्थे वर्तते । तद्यो-गाच्च दक्षसे इति आख्यातस्य उदात्तत्वम् । निपातैर्यद्यदिहन्तकुविन्नेच्चेचण्-कच्चिद्यत्रयुक्तम् (पा. ८. १. ३०) इति । अन्यथा सर्वानुदात्ततैव स्यात् तिङ्-तिङः (पा. ८ १. २८) इति । दक्षसे । दक्षतिः समर्धयतिकर्मा । समर्धयसीति वा समर्धयथेति वा । यदि यूयं मे सहायभूताः स्तोत्रैः अग्नये समृद्धिमुत्पादयथ तदा इत्यध्याहार्यः । प्रप्रेति द्विरुक्तिः पादपूरणार्था प्रसमुपोदः पादपूरणे (पा. ८. १. ६) इति । प्रशंसिषमिति संबन्धनीयः । वयं इति आत्मनि बहुवचनम् । प्रशंसिषमिति वचनव्यत्ययः वयमित्यनेन सामानाधिकरण्यात् । शंसिषमिति पञ्चम-लकारान्तम् । लोडर्थे लेट् । लेटो सिपि कृते लेटोऽडाटौ (पा. ३ ४. ९४) इत्यडागमः । सिप् बहुलं लेटि (पा. ३. १. ३४) इति सिप् । आर्धधातुक-स्येड्वलादेः (पा. ७. २. ३५) इति सिपो विकरणस्य इडागमः । इतश्च लोपः परस्मैपदेषु (पा. ३. ४. ९७) इति इकारलोपः । प्रशंसिषं प्रकर्षेण स्तवानि स्तवाम वयम् । अमृतं अमरणधर्माणं अग्निम् । जातवेदसम् । जातवेदो व्या-ख्यातः । प्रियं देवानां यजमानानां वा । मित्रं न सुहृदमिव प्रियं अग्निम् ॥ (१)

पाहि नो अग्न एकया पाह्युत द्वितीयया ।
पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥

भर्गस्यार्षम् । पाहि रक्ष । नः अस्मान् । हे अग्ने । एकया । परस्तात् गीः इति गिरां निर्देशात् गिरा एकया ऋगुलक्षणया । तृतीया-निर्देशात् स्तुतः सन्निति वाक्यशेषः । पाहि । उत अपि च । रक्ष द्वितीयया गिरा यजुर्लक्षणया । अपि च रक्ष तिसृभिर्गीर्भिः ऋग्यजुःसामलक्षणाभिः । हे ऊर्जां पतेः । ऊर्जः अन्नानि । तेषां पतिः स्वामी ऊर्जां पतिः । तस्य सम्बोधनं हे ऊर्जांपते अन्नानामधिपतिभूत । पाहि चतसृभिः ऋग्यजुः-सामनिगदलक्षणाभिः । वसो । लुप्तमत्वर्थं चैतत् द्रष्टव्यम् । हे धनवन् ॥

भर्गः प्रगाथः । पाहि रक्ष । नः अस्मान् । हे अग्ने । एकया गिरा रक्षाणीत्युदीरितया । पाहि उत अपि च । द्वितीयया । पाहि गीर्भिः तिसृभिः हे ऊर्जां पते अन्नानां स्वामिन् । पाहि चतसृभिः गीर्भिः । हे वसो वासक स्वतेजसा विश्वम् । यद्वा अस्मदीयाभिः गीर्भिः स्तुतिभिः हेतुभिः पाहि ॥ (२)

बृहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा ।
भरद्वाजे समिधानो यविष्ठ्य रेवत्पावक दीदिहि ॥

तृणपाणेरार्षम् । बृहद्भिः महद्भिः । हे अग्ने अर्चिभिः । किम् । उपरिष्टाद्वक्ष्यति । दीदिहि दीप्यस्व । हे अग्ने । किंचान्यत् । शुक्रेण देव शोचिषा प्रभासेनेत्यर्थः । भरद्वाजे समिधानः । ताच्छील्येऽयं शानच् । प्रत्यक्षकृतत्वाच्च मन्त्रस्य अव्यतिरिक्तप्रातिपदिकार्थप्रथमान्तम् । अतो यत्त-च्छब्दावध्याहृत्यैकवाक्यतां नेयम् । यस्त्वं भरद्वाजे ऋषौ मयि यजति सम्यग्दीपनशीलः स त्वं हे यविष्ठ्य अतिशयेन युवतम । रेवत् धनवत् ।

ावक शोधयितः । दीदिहि दीप्यस्व । हे अग्ने धनसंयुक्तं तद्दीदिहि । ानं ददद्दीप्यस्वेत्यर्थः ॥

शंयुः । बृहद्भिरर्चिभिः हे अग्ने देव । शुक्रेण शुभ्रेण । शोचिषा दीप्त्या ा । भरद्वाजे मम भ्रातरि । समिधानः समिद्धः त्वम् । समिन्धेः लटः कानच् । यविष्ठ्य युवतम । रेवत् रयिमत् । धनयुक्तमिति क्रियाविशेषणम् । दीदिहि ोप्यस्व । दीदिहि इति वैदिको धातुः दीप्तिकर्मा ॥ (३)

त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः ।
यन्तारो ये मघवानो जनानां ऊर्वं दयन्त गोनाम् ॥

वसिष्ठस्यार्षम् । त्वे । युष्मदः परस्य षष्ठ्येकवचनस्य शेभावेन (पा.). १. ३९) युष्मदश्च त्वादेशेन इदं रूपम् । त्वे तव हे अग्ने स्वाहुत । जुहोर्दानार्थस्येदं रूपम् शोभनदान । प्रियासः प्रियाः । सन्तु भवन्तु । सूरयः धाविनः स्तोतारः । कीदृशाः । उच्यते । यन्तारः स्तुतिभिर्हविर्भिश्च ावबोद्धारः । ये मघवानः हविर्लक्षणेन धनेन धनवन्तः । जनानामूर्वं यन्त गोनाम् । यजमानमनुष्याणां स्वभूतानाम् । गोनां गवाम् । ऊर्वं यन्त । उरुशब्दस्य बहुनाम्नः द्वितीयैकवचने छान्दसमादिदीर्घत्वम् । गमिपूर्वत्वं च छान्दसत्वादेव भवति । यणादेशः । ऊर्वं बह्वित्यर्थः । यन्त विभजन्ति । गोनाम् । द्वादशशतसङ्ख्यापरिमाणादि गवां विभजत त्यर्थः ॥

वसिष्ठः । त्वे इति षष्ठ्येकवचनस्य शे सुपां सुलुक् (पा. ७. १. ३९) यादिना । त्वे तव । प्रियासः प्रियाः । सन्तु सूरयः स्तोतारः । हे स्वाहुत अभिहुत यजमानैः । यन्तारः । यमिर्दानकर्मा । प्रदातारः । ये च मघवानः

धनवन्तः । धनवाचिनो मघशब्दात् ईवनिपौ छन्दसि इति मत्वर्थीयो वनिप् । जनानां मध्ये यन्तारः ये इति संबन्धः । ऊर्वं समूहम् । दयन्त प्रयच्छन्ति । गोनां गवाम् । ऊर्वं ये त्वत्प्रीणनार्थं प्रयच्छन्ति ते च तव प्रियाः सन्तु इति । अथवा जनानां इति चतुर्थ्यर्थे षष्ठी । जनेभ्यः तव स्तोतृभ्यः ये ददति ते च तव प्रियाः सन्तु ॥ (४)

अग्ने जरितर्विश्पतिस्तपानो देव रक्षसः ।
अप्रोषिवान् गृहपते महानसि दिवस्पायुर्दुरोणयुः ॥

भरद्वाजस्यार्षम् । हे अग्ने जरितः स्तोतः । विश्पतिः । विशो मनुष्याः तेषां पतिः । तपनः सन्तापयन् । देव दानादिगुणयुक्त । रक्षसः राक्षसान् । अप्रोषिवान् अप्रोषितः । सर्वदा सन्निहित इत्यर्थः । गृहपते गृहस्य स्वामिन् । दिवस्पायुः द्युलोकस्य पालयिता । दुरोणयुः । दुरोण इति गृहनाम । तद्य इच्छति स दुरोणयुः । एष पदार्थः । वाक्यार्थस्तु अग्ने जरितः देव गृहपते । चत्वार्येतान्यामन्त्रितानि । आमन्त्रणयोगाच्च प्रत्यक्षकृतो मन्त्रः । विश्पतिः तपानः अप्रोषिवान् दिवस्पायुः दुरोणयु- रित्येतानि अव्यतिरिक्तप्रातिपदिकार्थप्रथमान्तानि । अतोऽत्र यत्तच्छब्दा- वध्याहृत्य क्रियापदमेकवाक्यतां याति । यश्च विश्पतिः तपानः राक्षसान् । महान् असि यश्च अप्रोषिवान् यश्च दिवस्पायुः यश्च दुरोणयुः तं त्वां हे अग्ने जरितः देव गृहपते । स्तौमीति वाक्यशेषः ॥

भर्गः । हे अग्ने जरितः स्तोतः यजमानार्थं देवानाम । अथवा कर्मण्येवेदं रूपम् । जरितः जरणीय । स्तुत्येत्यर्थः । विश्पतिः विशां जनानां यजमानानां पतिः भर्ता स्वामी । तपानः तपन् । रक्षसः राक्षसान् । रक्षःशब्दः पुल्लिंगोऽपि दृश्यते छन्दसि ।

प्रति ष्म रक्षसो दह (ऋ. वे. १०. ८७. २३)

इति ।

यो वा रक्षाः शुचिरस्मीत्याह (ऋ. वे. ७. १०४. १६)

इति च । हे देव अप्रोषिवान् अप्रोषितः यजमानानां गृहेभ्यः । लिटः क्वसुः । गृहपते यजमानगृहाणां पालयितः । महांश्च त्वमसि । दिवः द्युलोकस्य । देवानामित्यर्थः । पायुः रक्षकः हविषां प्रदानात् । दुरोणयुः गृहकामश्च असि ॥ (५)

अग्ने विवस्वदुषसश्चित्रं राधो अमर्त्य ।
आ दाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः ॥

प्रस्कण्वस्यार्षम् । हे अग्ने विवस्वत् विवासनकरं तमसाम् । उषसः स्वभूतम् । किं तत् । सामर्थ्याज्ज्योतिः । चित्रं विचित्रं पूज्यं वा । राधः । लुप्तोपममेतत् । उज्ज्वलत्वात्प्रीतिकरत्वसामान्याद्वा राधःसदृशम् । हे अमर्त्य मरणवर्जित । आ इत्ययमुपसर्गः वहेत्याख्यातेन सम्बन्धयितव्यः । दाशुषे । दाश्वान् यजमानः । तस्यार्थाय । हे जातवेदः उत्पन्नधन उत्पन्नज्ञान वा । आवह त्वं अद्यास्मिन्नहनि । ज्योतिर्द्वारेण चेदं उषस एव आवहनमुच्यते । उषसमावह इत्यर्थः । न केवलमुषसमेव । किं तर्हि । अन्यानपि देवान् । कीदृशान् । उच्यते । उषर्बुधः । उषसि उदयकाले यज्ञागमनार्थं ये बुध्यन्ते ते उषर्बुधः । तांश्चेत्यर्थः ॥

प्रस्कण्वः । हे अग्ने । विवस्वत् । विवासयति तमांसि इति विवस्वान् । उषसः उषःसंबन्धि । चित्रं चायनीयं दर्शनीयम् । राधः तेजः राधयति प्रकाशयतीति । दृश्यते इति शेषः । तस्मादावह दाशुषे यजमानाय । हे जातवेदः । त्वं अद्य देवान् उषर्बुधः । उषसि बुध्यन्ते यज्ञगृहं गन्तुमिति उषर्बुधः । उषसि हि तेजो दृश्यते । अतः उषर्बुधो देवान् आवह ॥ (६)

त्वं नश्चित्र ऊत्या वसो राधाँसि चोदय ।
अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः ॥

तृणपाणेरार्षम् । वसो इति सम्बोधनश्रुतेः चोदय विदा इति च मध्यमपुरुषश्रुतेः प्रत्यक्षकृतोऽयं मन्त्रः । न च चित्र इत्येतदामन्त्रणम् । अतो यत्तच्छब्दावध्याहृत्य एकवाक्यता नेया । यस्त्वं चित्रः विचित्रः पूज्यो वा स नः । कर्मप्रवचनीयः प्रतिशब्दोऽध्याहर्तव्यः । अस्मान्प्रति ऊत्या । सहयोगलक्षणैषा तृतीया । पालनेन सह । हे वसो प्रशस्त धनवन् । त्वं राधांसि धनानि । चोदय प्रेरय । पालय अस्मान् धनानि च देहीत्यर्थः । किं कारणम् । उच्यते । अस्य रायः । रायः धनम् । यदिदं पृथिव्यां धनमस्य सर्वस्य । हे अग्ने रथीः । रथीशब्दः सारथिवचनः । स इह प्रेरकत्वसामान्यात् अग्नौ प्रयुक्तः । प्रेरयितासि । दातासीत्यर्थः । किंच विदा वेत्थ जानीहि । ज्ञानेनात्र दानं लक्ष्यते । देहीत्यर्थः । किम् । गाधम् । गाधशब्दोऽयं अगाधमुदकमित्येवमादिषु प्रयोगेषु उदकमध्ये या भूमिः पादयोराश्रयत्वं प्रतिपद्यते तस्या वाचकः । इह तु स्थानसामान्यादाश्रयस्थाने प्रयुक्तः । आश्रयस्थानम् । कस्मै । उच्यते । तुचे । तुगित्यपत्यनाम । तस्मादियं संप्रदाने चतुर्थी । अपत्याय । तु इति पादपूरणः । नः अस्माकम् ॥

शंयुः । त्वं नः अस्मभ्यम् । राधांसि धनानि । चोदय प्रेरय । चित्रः दर्शनीयः । त्वं ऊत्या रक्षया सह । हे देव वसो वासक । अस्य योऽयं दृश्यते त्रैलोक्यवर्ती तस्य सर्वस्य । रायो धनस्य । रथीः नेता । असि । त्वं हे अग्ने । विदा इति पञ्चमलकारान्तम् । वेदय लंभय । गाधं प्रतिष्ठाम् । तुचे तोकाय अपत्याय । तु क्षिप्रम् । नः अस्मान् । तुचेऽपि पर्याप्तां प्रतिष्ठां अस्मान् लंभय ॥

(७)

त्वमित्सप्रथा अस्यग्ने त्रातर्ऋतः कविः ।
त्वां विप्रासः समिधान दीदिव आविवासन्ति वेधसः ॥

भर्गस्यार्षम् । त्वम् । इदिति पादपूरणः । सप्रथा असि सर्वतः पृथुर्भवसि । हे अग्ने त्रातः सर्वस्य जगतः पालयितः । ऋतः सत्यः अविसंवादी । कविः मेधावी । त्वां विप्रासः विप्राः ब्राह्मणाः । हे समिधान सम्यग्दीप्यमान । हे दीदिव दानवन् । आविवासन्ति वेधसः मेधाविनः ऋत्विजः । असीति मध्यमपुरुषः । अग्ने त्रात इति सम्बोधनश्रुतेः प्रत्यक्षकृतो मन्त्रः । न च सप्रथा इत्येवमादीनि आमन्त्रितानि । अतो यत्तच्छब्दावध्याहृत्यैकवाक्यतां नेयानि । यस्त्वं सप्रथाः असि यश्च ऋतः यश्च कविः तं त्वां हे अग्ने त्रातः समिधान दीदिव विप्राः आविवासन्ति वेधसः ॥

भर्गः । परश्चापि । त्वं सप्रथाः सर्वतः पृथुः । असि । इत् इति पादपूरणः । हे अग्ने । त्रातः रक्षितः । ऋतः सत्यः । कविः प्राज्ञः । त्वमसि । त्वां विप्रासः विप्राः प्राज्ञाः । वेधसः विधातारः कर्मणाम् । आविवासन्ति परिचरन्ति हे समिधान समिद्ध यजमानैः । हे दीदिवः दीदिवन् दीप्त । मतुवसोरु संबुद्धौ छन्दसि (पा. ८. ३. १) इति नकारस्य रुत्वम ॥　　(८)

आ नो अग्ने वयोवृधं रयिं पावक शंस्यम् ।
रास्वा च न उपमाते पुरुस्पृहं सुनीती सुयशस्तरम् ॥

भर्गस्यार्षम् । आ इत्ययमुपसर्गः रास्वेत्याख्यातेन सम्बन्धयितव्यः । नः अस्मभ्यम् । हे अग्ने वयोवृधम् । वयः अन्नम् । तद्यद्वर्धयति तद्वयोवृधम् । अन्नस्य वर्धयितृ इत्यर्थः । किं तत् । उच्यते । रयिं धनम् । हे पावक शोधयितः । शंस्यं शंसनीयम् । श्लाघ्यमित्यर्थः । आरास्व आभिमुख्येन

देहीत्यर्थः । चेति पादपूरणः । नः अस्माकम् । उपमाते । उपमाता निर्माता । तस्य सम्बोधनं हे उपमाते । स्रष्टः इत्यर्थः । एतदुक्तं भवति । त्वमेवास्माकं स्रष्टा त्वमेवास्मभ्यं शरीरस्थित्यर्थं धनं देहीत्यर्थः । कीदृशं पुनर्धनं ददामि । उच्यते । पुरुस्पृहं बहूनां स्पृहणीयम् । सुनीती । नीतिशब्दो मार्गवचनः । तस्मादियं तृतीया । नीत्या मार्गेण । प्रतिग्रहादिनेत्यर्थः सुयशस्तरम् । यशः कीर्तिः । शोभनं यशः यस्य तत् सुयशः । अतिशयेन सुयशः । सुयशस्तरम् । अतिशयेन कीर्तिमदित्यर्थः ॥

आरास्व प्रयच्छ । हे अग्ने । नः वयोवृधं अन्नस्य वर्धनम् । नः रयिं धनम् । शंस्यं प्रशंस्यम । हे पावक । उपमाते उपमानभूत विश्वस्य । पुरुस्पृहं बहुभिः स्पृहणीयम् । सुनीती सुनीत्या सुमार्गेण । सुयशस्तरं अतिशयेन यशस्करम् । यशसा संयुक्तमित्यर्थः ॥ (९)

यो विश्वा दयते वसु होता मन्द्रो जनानाम् ।
मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्वग्नये ॥

सौभरेरार्षम् । यः विश्वा विश्वानि सर्वाणि । दयते ददाति । वसु । एकवचनमिदं बहुवचनस्य स्थाने द्रष्टव्यम् । वसूनि धनानि । होता आह्वाता देवानाम् । मन्द्रः स्तुत्यः । जनानां मनुष्याणां ऋत्विग्यजमानानाम् । मधोः न । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । मधुन इव । पात्रा पात्राणि । प्रथमानि उत्कृष्टानि । अस्मै । इदमप्येतदो रूपम् । व्यत्ययेन च इदंशब्दस्तच्छब्दस्य स्थाने द्रष्टव्यः । तस्मै । प्रेत्ययमुपसर्गः यन्त्वित्याख्यातेन सम्बन्धयितव्यः । स्तोमं स्तोत्राणि । प्रयन्तु प्रकर्षेण गच्छन्तु । वाक्यानां गमनं न सम्भवति । अतो गमनेनात्र करणं प्रतिपाद्यते । क्रियन्ते । एतदुक्तं भवति । यथा मधुनः स्वादुयुक्तसोमपात्राणि क्रियन्ते

तद्वत् स्तोमा अपि क्रियन्त इत्यर्थः । कस्मै । उच्यते । अग्नये अग्नेरर्थाय इत्यर्थः ॥

सौभरिः । यः होता । अग्निरित्यर्थः । अग्निर्हि देवानां आह्वाता । विश्वा विश्वानि । दयते ददाति । वसु वसूनि । शेश्छन्दसि (पा. ६. १. ६०) इति शेर्लुक् । मन्द्रः मदनीयः । मदिः स्तुतिकर्मा । जनानां यजमानानां मन्द्रः । अस्मै अग्नये । इमं उद्दिश्य । स्तोमाः अस्मदीयाः । प्रयन्तु प्रगच्छन्तु स्तोमाः स्तोत्राणि । मधोर्न मादयितुः सोमस्येव । पात्रा पात्राणि । प्रथमानि मुख्यानि ॥ (१०)

प्रथमस्य चतुर्थी दशत्या ।

एना वो अग्निं नमसोर्जो नपातमा हुवे ।
प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम् ॥

वसिष्ठस्यार्षम् । एना अनया । वः । बहुवचनमिदं एकवचनस्य स्थाने द्रष्टव्यम् । त्वाम् । अग्निं नमसा । नमः स्तुतिः । तया । अथवा नमः अन्नं हविर्लक्षणम् । तेन हेतुना । तस्य भक्षणार्थमित्यर्थः । ऊर्जो नपातम् । ऊर्ग् अन्नम् । तस्य नपातं पौत्रम् । कथं पुनरसावन्नस्य पौत्रः । अन्नाद्धि बलं जायते । बलान्मथ्यमान एष जायते । एवमग्नेरन्नस्य पौत्रत्वम् । आहुवे आह्वयामि । प्रियं चेतिष्ठं अतिशयेन चेतितारम् । ज्ञातारमित्यर्थः । अरतिं अलमतिम् । अथवा यजमानं देवांश्च प्रतिगन्तारम् । स्वध्वरं शोभनानां यज्ञानां कर्तारम् । विश्वस्य दूतं सर्वस्य यजमानस्य सन्देशहरम् । अमृतं मरणवर्जितम् ॥

वसिष्ठः। एना। एनेति तृतीयैकवचनस्य पूर्वसवर्णः। अनन्वादेशे छान्दसत्वात् इदंशब्दस्य एनादेशः। एनमिति वा अग्नेर्विशेषणम्। द्वितीयैक वचनस्य आकारः। एनं पूर्वेषु सूक्तेषु प्रकृतम्। अग्निम्। वः युष्मदर्थम्। नमसा स्तोत्रेण आहुवे आह्वयामि हे यजमानाः। ऊर्जः अन्नस्य बलस्य वा। नपातं पुत्रम्। स्वीयैरन्नैः काष्ठैः वर्धत इति वा बलेन मथ्यमानो जायत इति वा।

स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्रमङ्गिरः।

(ऋ. वे. ९. ११. ६)

इति हि निगमः। प्राणाद्धि बलान्मथ्यमानोऽधिजायते (ऐ. ब्रा. ८. २८) इति चैतरेयकम्। प्रियमस्माकम्। चेतिष्ठं ज्ञातृतमम्। अरतिम्। अर्तेररतिश्च स्वामी। स्वामिनम्। स्वध्वरं सुयज्ञम्। विश्वस्य यजमानस्य दूतं इति वा विश्वस्य जगतः अरतिमिति वा संबन्धः। अमृतं अमरणधर्माणम्॥ (१)

शेषे वनेषु मातृषु सं त्वा मर्तास इन्धते।
अतन्द्रो हव्यं वहसि हविष्कृत आदिद्देवेषु राजसि॥

भर्गस्यार्षम्। शेष इत्यपत्यनाम। तस्मादियं निमित्तसप्तमी। चर्मणि द्वीपिनं हन्ति (महाभाष्य. २. ३. ३६) इति यथा। अपत्ये निमित्तभूते। अपत्यार्थमित्यर्थः। वनेषु। वन इत्युदकनाम। तस्मादियं निमित्तसप्तमी। उदकेषु निमित्तभूतेषु। उदकार्थे चेत्यर्थः। कीदृशेषु उदकेषु निमित्तभूतेषु। उच्यते। मातृषु सर्वस्य जगतः निर्माणभूतेषु। समित्ययमुपसर्गः इन्धत इत्याख्यातेन सम्बन्धयितव्यः। त्वा त्वां। मर्तासः यजमानमनुष्याः। समिन्धते सम्यक् दीपयन्तीत्यर्थः। कीदृशं त्वां समिन्धते। उच्यते। यस्त्वं अतन्द्रः तन्द्रा आलस्यम्। अविद्यमाना तन्द्रा यस्य सोऽतन्द्रः। अनलस इत्यर्थः। हव्यं हवींषि। वहसि देवान्प्रति नयसीत्यर्थः। न केवलं हविरेव नयसि। किं तर्हि। हविष्कृतः। हविषा सह याः क्रियन्ते

ता हविष्कृतः स्तुतयः । ताश्च नयसीत्यर्थः । आत् इत् । द्वावपि पाद-
पूरणौ । यश्च त्वं देवेषु देवानां मध्ये राजसि दीप्यसे ॥

भर्गः । शेषे गूढः तिष्ठसि । वनेषु अरण्येषु । काष्ठेषु इत्यर्थः । मातृषु अरणीषु । वनेष्विति सामानाधिकरण्येन अन्वयः । त्वा त्वां मथितजातम् । समिन्धते मर्तासः मर्त्याः यजमानाः । अतन्द्रः अनलसः । हव्यं वहसि । हविष्कृतः हविषां कर्तुः यजमानस्य । आत् इत् तदानीमेव । देवेषु राजसि ॥ (२)

अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः ।
उपो षु जातमार्यस्य वर्धनमग्निं नक्षन्तु नो गिरः ॥

सौभरेरार्षम् । अदर्शि एकवाक्यताप्रसिध्यर्थं यच्छब्दोऽध्याहर्तव्यः । यः अग्निः अदर्शि दृश्यते अवगम्यते । ज्ञायत इत्यर्थः । गातुवित्तमः । कैगैरैशब्दे इत्येतस्य रूपम् । गातुः शब्दयिता स्तुतीनां उच्चारयिता । तं यो वेत्ति स गातुवित् । अतिशयेन गातुवित् गातुवित्तमः । स्तुतीनामुच्चारयितुरतिशयेन वेत्तीत्यर्थः । यस्मिंश्च अग्नौ । व्रतानि कर्माणि हविर्नयनादीनि । आदधुः आहितवन्तः । त्वदायत्तानि कृतवन्त इत्यर्थः । के । सामर्थ्याद्देवाः । उप उ सु । त्रयोऽपि पादपूरणाः । यच्छब्दश्रुतेः तच्छब्दोऽध्याहर्तव्यः । तं जातं जातमात्रम् । आर्यस्य यजमानस्य । वर्धनं वर्धयितारम् । अग्निं नक्षन्तु । लोडयं लडर्थे द्रष्टव्यः । नक्षतिर्व्याप्तिकर्मा । नक्षन्ति । तं व्याप्नुवन्ति इत्यर्थः । नो गिरः वाचः अस्माकं स्वभूताः स्तुतयः ॥

सौभरिः । अदर्शि दृश्यते अनावृत एवाग्निः । गातुवित्तमः अतिशयेन मार्गलम्भकः । यस्मिन् अग्नौ । व्रतानि कर्माणि । आदधुः आदधति यज्वानः ।

उपो। उप उ इति निपातद्वयसमुदायः। उपनक्षन्तु। नक्षतिः व्याप्तिकर्मा। उपव्याप्नुवन्तु। सु सुष्ठु जातं मथितम्। आर्यस्य यज्ञशीलस्य। वर्धनं वर्धयितारम्। अग्नि नः अस्मदीयाः। गिरः स्तुतयः॥ (३)

अग्निरुक्थे पुरोहितः ग्रावाणो बर्हिरध्वरे।
ऋचा यामि मरुतो ब्रह्मणस्पते देवा अवो वरेण्यम्॥

मनोरार्षम्। अग्निः प्रथमैकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्। उक्थे यज्ञे। पुरोहितं पूर्वस्यां दिशि आहवनीयात्मना निहितं स्थापितमित्यर्थः। ग्रावाणः। इदमपि प्रथमाबहुवचनं द्वितीयाबहुवचनस्य स्थाने द्रष्टव्यम्। अभिषवग्राव्णश्च। बर्हिश्च। क यद्बर्हिः। उच्यते। अध्वरे यज्ञे। ऋचा। अर्च्यते अनया इति ऋक् स्तुतिः। तया ऋचा। स्तुत्येत्यर्थः। यामि। नेदं याचते रूपम्। किं तर्हि। ईमहे यामीत्यर्चतिकर्मसु पाठात् याते रूपम्। यामि अत्र यज्ञे कर्म याचे। प्रार्थयामीत्यर्थः। न केवलमग्न्यादीनेव प्रार्थयामि। किं तर्हि। मरुतश्च। ब्रह्मणस्पते। देवाः। इदमपि प्रथमाबहुवचनं द्वितीयाबहुवचनस्य स्थाने द्रष्टव्यम्। देवांश्च अन्यानपि। किं पुनः प्रार्थयामि। उच्यते। अवः पालनं तर्पणं वा। वरेण्यं वरणीयम्॥

मनुर्वैवस्वतः। इयं वैश्वदेवसूक्तस्था। अग्निः उक्थे शस्त्रे। पुरोहितः पुरस्कृतः। आज्याख्यं हि प्रथमं शस्त्रं आग्नेयम्। ग्रावाणः च सोमाभिषवप्रयुक्ताः। बर्हिश्च स्तीर्णम्। अध्वरे यज्ञे अस्मिन्। इत्थं यज्ञपरिकरक्लृप्तौ सत्यां ऋचा स्तुत्या। ऋच स्तुतौ इत्यस्मात् धातोः भावे क्विप्। ऋक्। तया यामि याचामि। मध्यमाक्षरलोपः। युष्मान् इति शेषः। मरुतो ब्रह्मणस्पते देवाः इति त्रीणि संबोधनानि। हे मरुतो ब्रह्मणस्पते बृहस्पते। बृहस्पतिरेव ब्रह्मणस्पतिः। ब्राह्मणस्पत्यं प्रगाथं शंसति (ऐ. ब्रा. ३. १७)। बृहस्पतिपुरोहिता

वै देवा अयजन् स्वर्गं लोकं (ऐ. ब्रा. ३. १७) इत्यादि ब्राह्मणान्तरेषु तयोः पर्यायप्रसिद्धेः। देवा इति च आद्युदात्तत्वात् संबोधनम्। आमन्त्रितस्य च (पा. ६. १. १९८) इति हि पादादौ आमन्त्रितस्य आद्युदात्तत्वं स्मर्यते। अवः अन्नम्। अवतेस्तृप्तिकर्मणः अवः। वरेण्यं श्रेष्ठम्॥ (४)

अग्निमीडिष्वावसे गाथाभिः शीरशोचिषम्।
अग्निं राये पुरुमीढ श्रुतन्नरोऽग्निः सुदीतये छर्दिः॥

पुरुमीढस्यार्षम्। अन्तरात्मनः प्रैषः। हे मदीय अन्तरात्मन् अग्निं ईडिष्व स्तुहीत्यर्थः। किमर्थम्। उच्यते। अवसे पालनाय तर्पणाय वेत्यर्थः। केन पुनः स्तौमि। उच्यते। गाथाभिः वृत्तविशेषैः स्तुतिलक्षणाभिर्वाग्भिः। कीदृशं पुनस्तं स्तौमि। उच्यते। शीरशोचिषम्। शीरं व्यापि। शोचिर्दीप्तिः। व्यापिनी दीप्तिर्यस्यासौ शीरशोचिः। तं शीरशोचिषम्। व्यापिदीप्तिमित्यर्थः। अथवा जठरात्मना आश्रयणीया दीप्तिर्यस्य। अग्निं राये। रयिरिति धननाम। धनार्थम्। ईडिष्वेत्येतदनुषज्यते। हे पुरुमीढ मदीय अन्तरात्मन्। कीदृशमग्निम्। उच्यते। श्रुतं विख्यातम्। नरः। प्रथमैकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्। नरं नराकारम्। अग्निः। प्रथमैकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्। अग्निमेव ईडिष्व। सुदीतये शोभनस्य दानस्यार्थाय। छर्दिः। प्रथमैकवचनमिदं चतुर्थ्येकवचनस्य स्थाने द्रष्टव्यम्। छर्दिषे गृहस्य अर्थायेत्यर्थः॥

सुदीतिः पुरुमीढो वा द्वौ वा। अग्निं ईडिष्व। ईडतिर्यञ्चकर्मा भवति। ईडिष्व स्तुहि। याचस्व इति वा। अवसे रक्षणाय। गाथाभिः गीतिभिः। शीरशोचिषं श्रयतेः शीरम्। शोचिः दीप्तिः। प्रवृद्धशोचिषम्। अग्निं राये धनार्थं ईडिष्व। हे पुरुमीढ इत्यत्र आत्मानमेव आमन्त्रयते यदि पुरुमीढः ऋषिः। यदि सुदीतिः ऋषिः तदा सखायं पुरुमीढं अग्निं ईडिष्व इति शास्ति।

श्रुतं विश्रुतं अग्निम्। नरः इति उत्तरपादेन संबध्यते। नरः नेता अग्निः। सुदीतये मह्यम्। छर्दिः गृहम्। प्रयच्छतु इति शेषः। पुरुमीढश्चेदपिः मम सख्ये सुदीतये छर्दिः प्रयच्छतु इतिः। उभयोर्ऋषित्वे अन्यतरस्य कीर्तनं इतरस्य उपलक्षणार्थम् ॥ (९)

श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः।
आ सीदतु बर्हिषि मित्रो अर्यमा प्रातर्यावभिरध्वरे ॥

प्रस्कण्वस्यार्षम्। श्रुधि शृणु। हे श्रुत्कर्ण। शृणुतः कर्णौ यस्य स श्रुत्कर्णः। तस्य सम्बोधनं हे श्रुत्कर्ण। वह्निभिः वोढृभिः। देवैरन्यैरग्निभिः। हे अग्ने सयावभिः। त्वया सह ये यान्ति ते सयावानः। तैः सयावभिः। सहगामिभिरित्यर्थः। किं पुनः शृणोमि त्वया हूतः सन्। आसीदतु बर्हिषि मित्रः अर्यमा च। प्रातर्यावभिः प्रातर्यागे ये यान्ति ते प्रातर्यावाणः। तैः प्रातर्यावभिः अन्यैरपि देवैः सह। अध्वरे अस्मदीये यज्ञे ॥

प्रस्कण्वः। श्रुधि शृणु स्तोत्रं मदीयम्। हे श्रुत्कर्ण। शृणोतीति श्रुत्। स्तोत्रश्रवणप्रिय अवहितकर्ण। अग्ने वह्निभिः। वहन्तीति वह्नयः। ताभिः वहनसमर्थाभिः वोढृभिः जगतः। देवैः सयावभिः। सह यान्तीति सयावानः। तव नित्यैः सहचारिभिः देवैः सार्धं आसीदतु अत्रोपविशतु। बर्हिषि मित्रः अर्यमा च। प्रत्येकं आख्यातसंबन्धात् आसीदत्वित्येकवचनम्। प्रातर्यावभिः सार्धं अध्वरे अस्मिन्। एते वाव देवाः प्रातर्यावाणो यदरुषा अश्विनौ (ऐ. ब्रा. २. १५) इति चैतरेयकम् ॥ (६)

प्र दैवोदासो अग्निर्देव इंद्रो न मज्मना।
अनु मातरं पृथिवीं विवावृते तस्थौ नाकस्य शर्मणि ॥

सौभरेरार्षम्। प्रेत्ययमुपसर्गः तस्थावित्याख्यातेन सम्बन्धयितव्यः। दैवोदासः। दिवोदासः ऋषिः। तेन समिन्धितः दैवोदासः। अग्निः

देवः । इन्द्रो न । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । अस्त्युपमार्थस्य सम्प्रत्यर्थे प्रयोग इति पादपूरणः । इन्द्र इव । मज्मना स्वेन बलेन । अन्विति पादपूरणः । मातरं सर्वस्य आश्रयत्वप्रतिपत्त्या मातृभूताम् । पृथिवीम् । विवावृते परिवर्तयति । यस्य संपत्तिद्वारेण अन्यरूपां करोति । वैद्युतो ह्यग्निः स्वेन बलेन मेघान् घ्नन् पृथिवीं वर्तयति । प्रतस्थौ च प्रतिष्ठते । स्वेनैव बलेन गच्छतीत्यर्थः । क्व पुनर्गच्छति । उच्यते । नाकस्य शर्मणि द्युलोकस्य सम्बन्धिनि गृहे । द्युलोकं यद्गृहं तस्मिन् गच्छतीत्यर्थः ॥

सौभरिः । प्रेत्युपसर्गदर्शनादाख्याताध्याहारः । प्रगच्छतु देवोऽग्निः । दैवोदासः दिवोदासेन अभिहितः पूर्वं अग्निः । अथवा प्रभवतीति समाप्तिः । देवोऽग्निः । इन्द्रो न इन्द्र इव । प्रभवति मज्मना बलेन । अयं च अनु मातरं पृथिवीमनु । पृथिव्यामित्यर्थः । विवावृते विशेषेण वर्तते । तस्थौ तिष्ठति । नाकस्य अन्तरिक्षस्य । शर्मणि स्थाने वैद्युतरूपः । छन्दसि लुङ्लङ्लिटः (पा. ३. ४. ६) इति लडर्थे लिट् ॥ (७)

अध ज्मो अधवा दिवो बृहतो रोचनादधि ।
अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण ॥

मेधातिथेरार्षम् । अध ज्मः । ज्मेति पृथिवीनाम । तस्मादियं पञ्चमी । पञ्चमीनिर्देशाच्च आगत्येति वाक्यशेषः । अथवा पृथिवीतः आगत्य । अथवा दिवः द्युलोकात् । कीदृशात् द्युलोकात् । उच्यते । बृहतः महतः । रोचनात् दीप्तात् आगत्य । अधीति पादपूरणः । अया अनया । वर्धस्व तन्वा शरीरेण । गिरा स्तुतिलक्षणया वाचा । मम स्वभूतया । स्तूयमान इति वाक्यशेषः । वर्धस्व । मम जाता जातानि । ममापत्या-नीत्यर्थः । हे सुक्रतो सुप्रज्ञ सुकर्म वा । पृण प्रीणयेत्यर्थः ॥

मेधातिथिः मेध्यतिथिश्च उभावृषी । इयमैन्द्री इत्युक्तमेव । अध अथ । ज्मेति पृथिवीनाम । ततः पञ्चम्येकवचने पूर्वसवर्णो ह्रस्वः । पृथिव्या इत्यर्थः । अथवा दिवः अन्तरिक्षात् । बृहतः रोचनात् लोकात् स्वर्गात् वा । आगच्छेति शेषः । अधीति पादपूरणः । आगत्य च अया अनया । तन्वा ततया । मम गिरा स्तुत्या । वर्धस्व । आपृण आपूरय कामैः । जाता जातानि । जातान् जनान् मदीयान् । हे सुक्रतो सुकर्मन् इन्द्र ॥ (८)

कायमानो वना त्वं यन्मातॄरजगन्नपः ।
न तत्ते अग्ने प्रमृषे निवर्तनं यद्दूरे सन्निहाभुवः ॥

विश्वामित्रस्यार्षम् । कायमानः । चायृ पूजानिशामनयोरित्यस्य चकारस्य ककारापत्त्या रूपम् । वना । वनशब्देनात्र वनावयवकाष्ठान्युच्यन्ते । तानि । त्वं । यत् अजगत् आगच्छसि । यच्च मातॄः सर्वस्य जगतः निर्माणभूताः अपः गच्छसि तेनैवमुच्यते वना त्वं यच्च मातॄः अजगन्नपः । न तत्ते अग्ने । नेत्ययं प्रमृषे इत्यनेन सम्बन्धयितव्यः । ते तव । हे अग्ने । न प्रमृषे न प्रमृष्यते । निवर्तनं गमनम् । तत्र च आत्यन्तिकं गमनं मरणलक्षणमिति । कस्मात् । उच्यते । यत् यस्मात् दूरे सन् । यो हि दूरे भवति स न दृश्यते । अतः दूरभवनेनात्रादर्शनं लक्ष्यते । यस्मात् अदृश्यः सन् । इह अभुवः भवसि । दृश्यसे इत्यर्थः ॥

विश्वामित्रः । इयं वद्युतस्याग्नेः स्तुतिः । कायमानः । कै शब्दे । शब्दायमानः त्वम् । वना वनानि । यत् यदा । मातॄः विश्वस्य अपः अजगन् । अजगन्निति गमेः लुङि रूपम् । द्विर्वचनं छान्दसम् । तस्मिन् च्लेः लोपः । हलि आलोपः । मो नो धातोः (पा ८. २. ६४) इति मकारस्य नकारः । लडर्थे लुङ् । गच्छसि । तदा हे अग्ने ते निवर्तनम् । न प्रमृषे न प्रमर्षणीयम् प्रमर्षणं प्रहसनम् । कृत्यार्थे तवैकेन्केन्यत्वनः (पा. ३. ४. १४) इति

केन्प्रत्ययः । निवर्तनं स्फुरणम् । यत् यस्मात् । त्वं दूरे अन्तरिक्षे सन् । इह अन्तिके । आ भुवः इति लेडन्तम् । आ समन्तात् भवेः । तस्मात् ते निवर्तनं न प्रमर्षणीयं भवति ॥ (९)

नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते ।
दीदेथ कण्व ऋतजात उक्षितो यन्नमस्यन्ति कृष्टयः ॥

प्रस्कण्वस्यार्षम् । मनुः प्रजापतिः । त्वां देवं सन्तम् । निदधे नीचैर्भूमौ धारितवान् । जनाय यजमानाय । ज्योतिः तेजोरूपं दृष्टादृष्टकार्यार्थम् । स तथाभूतः कण्वेन मनुना च दीदेथ । ऋतजातः यज्ञार्थं जातः । उक्षितो महानुपचितः । यं कृष्टयो मनुष्याः । नमस्यन्ति नमस्कुर्वन्ति ॥

कण्वः । निदधे आहितवान् । त्वां हे अग्ने । मनुः वैवस्वतः । ज्योतिः ज्योतीरूपं सन्तम् । जनाय मनुष्याय । शश्वते विभवे । अहरहर्वा । सर्वेषां मनुष्याणां अर्थाय स्वराष्ट्रपरिपालनार्थम् । स त्वम् । दीदेथ इति लोडर्थे लिट् । दीप्यस्व । कण्वे मयि । ऋतजातः ऋते यज्ञे यो जातः स ऋतजातः । यद्वा ऋताय यज्ञार्थं जात इति । उक्षितः सिक्तः हविर्भिः । यं त्वां नमस्यन्ति कृष्टयः मनुष्याः ॥ (१०)

प्रथमे पञ्चमी दशत्या ।

देवो वो द्रविणोदाः पूर्णां विवष्ट्वासिचम् ।
उद्वा सिञ्चध्वं उप वा पृणध्वं आदिद्वो देव ओहत ॥

वसिष्ठस्यार्षम् । हे ऋत्विजः देवो द्रविणोदाः अग्निः युष्माकं सम्बन्धिनीम् । आज्यपूर्णां स्रुचम् । विवष्टु कामयते । तां च पूर्णां कृत्वा उत्सिञ्चध्वम् । पश्चादुपपृणध्वं अग्नौ विक्षिपत । वाशब्दः समुच्चये । अथ स एवाग्निः युष्मान् ओहते वर्धयति ॥

वसिष्ठः । देवः वः द्रविणोदाः धनानां दाता अग्निः होता । युष्मदीयां पूर्णां आसिच आसिक्तां हविषा जुहूम् । विवष्टु कामयताम् । द्वित्वसन्वद्भावौ छान्दसौ । उत्सिञ्चध्वं च सोमेन पातम् । समुच्चयार्थे वाशब्दः । उपपृणध्वं उपप्रयच्छत यजत । सोमम् । ध्रुवग्रहणे पूरयत च होतृचमसं प्रयच्छत च सोमं अग्नये । आत् इत् अनन्तरमेव । वः युष्मान् । देवः अग्निः । ओहत वहतु प्रापयतु कामान् ॥ (१)

प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता ।
अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥

कण्वस्यार्षम् । प्रैतु ब्रह्मणस्पतिः । ब्रह्म अन्नम् । तस्य पतिः स्वामी । प्रैतु देवी सूनृता वाक् । अच्छ आप्तुम् । वीरम् । वीराः पुत्राः पौत्राश्च । तान् यः करोति उत्पादयति स वीरयति । वीराणां फलभूतानां कर्तारमित्यर्थः । नर्यं नृभ्यो हितम् । पङ्क्तिराधसम् । धाना करम्भः परीवापः पुरोडाशः पयः इत्येषा हविःपङ्क्तिः । द्विनाराशंसं प्रातःसवनं द्विनाराशꣳसं माध्यन्दिनꣳ सवनं सकृन्नाराशꣳसं तृतीयसवनं एषा नाराशꣳसपङ्क्तिः । पशुरुपवसथ्यः त्रीणि सवनानि पशुरनूबन्ध्य इत्येषा सवनपङ्क्तिः । एताभिः पङ्क्तिभिः यः साध्यते एता वा साधयति स पङ्क्तिराधाः । तं पङ्क्तिराधसम् । देवाः अन्येऽपि । यज्ञं नयन्तु आत्मानं गमयन्त्वित्यर्थः । नः अस्माकं स्वभूतम् । यज्ञं प्राप्तुं सम्भावयितुमित्यर्थः ॥

कण्व: द्वयो: । प्रैतु प्रगच्छतु अग्नीषोमाभ्यां प्रणीयमानाभ्यां पुरस्तात् गच्छतु । ब्रह्मणस्पति: । ब्रह्मणां मन्त्राणां श्रेष्ठ: ब्रह्मणस्पति: । ब्रह्मैव ब्रह्मणस्पति: । ब्रह्म वै बृहस्पति: ब्रह्मैवात्मा एतत् पुरोगवमकर्ण वै ब्रह्मण्वद्रिष्यति (ऐ: ब्रा. १. १३) इति चैतरेयकम । प्रैतु देवी सूनृता वाक् । वीरम् । वीरयति पापान् इति वीर: । तम् । नर्यं नरेभ्य: हितम् । पङ्क्तिराधसं पङ्क्तिभि: हविष्पङ्क्त्यादिभि: आराधनीयं समर्थनीयं यज्ञम् । अच्छ अभि । नयन्तु न: अस्मान् । देवा: हे ब्रह्मणस्पते तव अनुग्रहात् ॥ (२)

ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता ।
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥

कण्वस्यार्षम् । ऊर्ध्व इत्येतत्तिष्ठेत्यनेन सम्बध्यते । ऊर्ध्वः प्रस्करोति य: स ऊर्ध्व: । तिष्ठ व्यापयस्वेत्यर्थ: । ऊ सु इति द्वावपि पादपूरणौ । न: ऊतये अस्माकं पालनार्थमित्यर्थ: । कथं पुनर्व्यापयस्व । उच्यते । देवो न । नशब्द उपरिष्टादुपचारत्वादुपमार्थीय: । देव इव । सविता । ऊर्ध्व: । तिष्ठेत्येतदनुषज्यते । ऊर्ध्वस्तिष्ठ व्यापय । वाजस्य अन्नस्य । सनिता सनितिर्लाभ: । तस्मादयं तादर्थ्यचतुर्थ्या आआदेश: । सनितये लाभायेत्यर्थ: । कस्मात्पुनर्व्याप्यते । उच्यते । यत् अस्मान् । अञ्जिभि: त्वद्गुणप्रकाशकैश्छन्दोभि: । वाघद्भि: ऋत्विग्भि: त्वां विह्वयामहे । ह्वयतिरत्र अन्तर्णीतण्यर्थो द्रष्टव्य: । आह्वयाम इत्यर्थ: ॥

इयं यूपस्य उच्छ्रयणे अनूच्यते । ऊर्ध्व: तिष्ठ । उ सु इतीमौ पादपूरणौ । उकारस्य दीर्घ: सकारस्य च षकार: सांहित: । न: अस्माकम् । ऊतये रक्षायै । देवो न देव इव । सविता ऊर्ध्व: तिष्ठ । त्वं वाजस्य धनस्य । सनिता दाता । भवेति शेष: । ऊर्ध्वो वाजस्य सनिता इति वाजसनिमेवैनं तद्धनसां सनोति (ऐ. ब्रा. २. २) इति हि ऐतरेयकम । धनमिति वाज इति व्याचष्टे । वाजसनिमित्यस्य व्याख्यानम् । धनसां इति धनं सनोति इति धनसा: । यत्

यस्मात्। अयं अञ्जिभिः छन्दोभिः। व्यज्यन्ते सिच्यन्ते वर्धन्ते देवता अमीभिरिति अञ्जयः। वाघद्भिः आवहद्भिः। देवान् विह्वयामहे विशेषेण वर्धयामः देवान्। यस्मादेवं तस्मात् वाजस्य सनिता भवेति संबन्धः। यदञ्जिभिः वाघद्भिः विह्वयामह इति छन्दांसि वा अञ्जयो वाघतः तैरेतत् देवान् यजमाना विह्वयन्ते मम यज्ञं आगच्छत मम यज्ञमिति। (ऐ. ब्रा. २. २) इति हि ऐतरेयकम्॥ (३)

प्र यो राये निनीषति मर्तो यस्ते वसो दाशत्।
स वीरं धत्त अग्न उक्थशंसिनं त्मना सहस्रपोषिणम्॥

सौभरेरार्षम्। प्रेत्ययमुपसर्गः। निनीषतीत्याख्यातेन सम्बन्धयितव्यः। यः यजमानः। राये हविर्लक्षणस्य धनस्यार्थाय। तदुपभोक्तुमित्यर्थः। प्रनिनीषति प्रकर्षेण पूर्वस्यां दिशि आहवनीयात्मना नेतुमिच्छति। मर्तः यजमानमनुष्यः। यश्च नीतः सः। ते तव। हे वसो प्रशस्तधनवन्। त्वां दाशत् ददाति। सः यजमानः। वीरं पुत्रम्। धत्ते धारयति लभते। तस्य पुत्रं ददासीत्यर्थः। हे अग्ने। कीदृशं पुत्रं ददासि। उच्यते। उक्थशंसिनम्। उक्थानि स्तोत्राणि। तेषां शंसितारम्। त्मना आत्मना। सहस्रपोषिणं बहूनां पोषितारम्॥

प्रणिनीषति प्रणेतुमिच्छति स्तोत्राणि। यः मर्तः। मर्त्यः राये धनार्थं आत्मनः। यश्च ते तुभ्यम्। दाशत् दद्यात् हवींषि। हे वसो प्रशस्य। सः मर्तः वीरं पुत्रम्। धत्ते धारयति। हे अग्ने उक्थशंसिनं शस्त्राणां शंसितारम्। वेदविदं इत्यर्थः। त्मना आत्मना। आद्यक्षरलोपः। सहस्रपोषिणं सहस्रस्य पोषिणं बहुपोषमिति वा बहुप्रदं इति वा॥ (४)

प्र वो यह्वं पुरूणां विशां देवयतीनाम्।
अग्निं सूक्तेभिर्वचोभिर्वृणीमहे यं समिदन्य इन्धते॥

कण्वस्यार्षम् । प्रेत्ययमुपसर्गः वृणीमहे इत्याख्यातेन सम्बन्धयितव्यः । वः । बहुवचनमिदं एकवचनस्य स्थाने द्रष्टव्यम् । त्वाम् । यह्वं महान्तम् । पुरूणां बह्वीनाम् । विशां मनुष्यजातीनाम् । देवयतीनां देवान् यष्टुमतीनां मध्ये । वयं अग्निं सूक्तेभिः वचोभिः शोभनाभिः स्तुतिलक्षणाभिर्वाग्भिः । प्रवृणीमहे याचामहे । किं पुनर्याचामहे । सामर्थ्याद्धनम् । कीदृशं पुनरग्निं याचामहे । यं सम् । समित्ययं इन्धत इत्याख्यातेन सम्बन्धयितव्यः । इदिति पादपूरणः । ये अन्येऽपि यजमानाः समिन्धते सन्दीपयन्ति ॥

प्रवृणीमहे संभजामहे वयम् । अग्निं यह्वं महान्तम् । सूक्तेभिः सूक्तरूपैः वचोभिः । सूक्तस्य प्रथमाभिः । यं वः युष्मदर्थम् । पुरूणां बह्वूनाम् । विशां जनानाम् । देवयतीनां देवान् नियच्छन्तीनां मध्ये युष्मभ्यं एव अग्निं वृणीमहे हे यजमानाः । विट्शब्दः स्त्रीलिङ्गः । यं अग्निं अन्ये अपि यजमानाः समिन्धते । इत् इति पादपूरणः ॥ (९)

अयमग्निः सुवीर्यस्येशे हि सौभगस्य ।
राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथानाम् ॥

श्रुत्कीलस्यार्षम् । अयमग्निः सुवीर्यस्य शोभनवीर्यस्य । ईशे ईष्टे । हीति पादपूरणः । सौभगस्य सौभाग्यस्य चेत्यर्थः । रायः धनस्य । ईशे स्वपत्यस्य शोभनस्य चापत्यस्य । गोमतः गोभिः सहितस्य । ईशे वृत्रहथानाम् । वृत्रः शत्रुः । तस्य हथानि प्रहाराः । तेषामप्ययमेव ईष्टे । य एवंगुणयुक्तस्तं वयं स्तुम इति वाक्यशेषः ॥

अयं अग्निः । सुवीर्यस्य सुवीरभावस्य शोभनवीर्यस्य वा । ईशे ईष्टे । लोपस्त आत्मनेपदेषु (पा. ७. १. ४१) इति तलोपः । हि इति पादपूरणः ।

सौभगस्य सुभगत्वस्य च ईशे । रायः धनस्य ईशे । स्वपत्यस्य शोभनापत्य-युक्तस्य । गोमतः गोभिः सहितस्य ईशे । वृत्रहथानां तमोदहनानां च ईशे ॥ (६)

त्वमग्ने गृहपतिस्त्वँ होता नो अध्वरे ।
त्वं पोता विश्ववार प्रचेता यक्षि यासि च वार्यम् ॥

वसिष्ठस्यार्षम् । त्वं हे अग्ने । गृहपतिः गृहस्य स्वामी । त्वमेव होता होतृकर्मकारी आह्वाता वा देवानाम् । नो अध्वरे अस्माकं स्वभूते यज्ञे । त्वमेव पोता पोतृकर्मकारी शोधयिता वा । विश्ववार सर्वस्य वरणीय । प्रचेता. संप्रवृद्धज्ञानः । अतो ब्रवीमि । यज्ञे देवान् यक्षि । यासि च । ईमहे यामीति याच्ञाकर्मसु पठितत्वात् यातिरत्र याच्ञा-कर्मणि । लट् लोडर्थे । याहि याचस्व । प्रार्थयेत्यर्थः । किं पुनः प्रार्थय । सामर्थ्यात् धनम् । कीदृशम् । उच्यते । वार्यं वरणीयम् ॥

वसिष्ठः । त्वं हे अग्ने गृहपतिः यजमानः भवसि । त्वं होता असि । नः अस्माकम् । अध्वरे । त्वं पोता च असि । हे विश्ववार विश्वैर्वरणीय संभज-नीय । प्रचेताः प्रकृष्टचेताः । त्वं यक्षि यज । देवान् । सर्वैः आर्त्विज्यैः यासि प्रापय च अस्मान् । वार्यं वरणीयं धनम् ॥ (७)

सखायस्त्वा ववृमहे देवं मर्तास ऊतये ।
अपान्नपातं सुभगं सुदंससं सुप्रतूर्तिमनेहसम् ॥

विश्वामित्रस्यार्षम् । सखायः सन्तः । त्वा त्वाम् । ववृमहे प्रार्थयामः । कीदृशं त्वाम् । उच्यते । देवं दानादिगुणयुक्तम् । मर्तासः मनुष्याः । ऊतये । चतुर्थ्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । ऊतिम् । तर्पणं पालनं वेत्यर्थः । कीदृशं पुनस्त्वां प्रार्थयामहे । उच्यते । अपां

नपातं अपां पौत्रम् । कथं पुनरग्नेरपां पौत्रत्वम् । अभ्द्य ओषधयो वृक्षाश्च जायन्ते । वृक्षेभ्यः सकाशात् निर्मथ्यते । एवमग्नेरपां पौत्रत्वम् । सुभगं शोभनधनम् । सुदंससं सुकर्माणम् । सुप्रतूर्तिम् । तूर्वतिः हिंसार्थः । सुष्ठु प्रकर्षेण हिंसितारं शत्रूणाम् । अनेहसमक्रोधम् अपापमित्यर्थः ॥

विश्वामित्रः । सखायः स्तोतृत्वेन सखायः सन्तः वयम् । त्वा त्वाम् । ववृमहे प्रार्थयामः । देवं त्वां मर्तासः मनुष्याः वयम् । ऊतये रक्षायै । अपान्नपातं पुत्रं वैद्युतबाडवरूपाभ्याम् । सुभगं सुधनम् । सुदंससम् । दंस इति कर्मनाम । सुकर्माणम । सुप्रतूर्तिं सुप्रतरणं सूपगमम् । अनेहसं अपापम् । पापाना हन्तारम् ॥ (८)

प्रथमस्य षष्ठी दशत्या ।

आ जुहोता हविषा मर्जयध्वं नि होतारं गृहपतिं दधिध्वम् ।
इडस्पदे नमसा रातहव्यं सपर्यता यजतं पस्त्यानाम् ॥

वामदेवस्यार्षम् । हे ऋत्विजः मत्पुत्रादयो वा । आभिमुख्येन जुहोता । केन । हविषा । हुत्वा च मार्जयध्वं शोधयध्वम् । संमार्गं तृणैः कुरुध्वम् । नीत्ययमुपसर्गो दधिध्वमित्याख्यातेन सम्बन्धयितव्यः । होतारं आह्वयितारं देवानाम् । गृहपतिं यजमानगृहस्य स्वामिनम् । निदधिध्वं नियमेन स्थापयध्वम् । क्व पुनः स्थापयामः । इडस्पदे । इडित्यन्ननाम । तेन चात्र हविर्लक्षणमन्नं परिगृह्यते । तस्य पदे । वेद्याख्ये स्थाने इत्यर्थः । केन स्थापयामः । उच्यते । नमसा स्तुत्येत्यर्थः । कीदृशमग्निम् । उच्यते । रातहव्यम् । रातं दत्तं हव्यं यस्य सः रातहव्यः । तं रातहव्यम् । दत्तहवि-

ष्कमित्यर्थः । स्थापयित्वा च सपर्यत परिचरत । यजतं यष्टव्यमग्निम् । पस्त्यानाम् । पस्त्यानि गृहाणि । तेषु ये निवसन्ति ते पस्त्याः । तेषां यष्टव्यम् ॥

अष्टादशार्चस्त्रिष्टुभो जगतीत्विह चित्र इत् ।
इतीमं स्तोममिति चाग्निं नरो दीधितिर्विराट् ।
आग्नेय्य एताः सकलाः पौष्णी शुक्रन्त इत्यसौ ॥

वामदेवः । आजुहोत अभिजुहुत अग्निम् । हविषा हे ऋत्विजः । तप्तनप्तनथनाश्च (पा. ७. १. ४५) इति लोण् मध्यमपुरुषबहुवचनस्य तपादेशः । मर्जयध्वं परिचरत । निदधिध्वं आहवनीयायतने । होतारं ह्वातारं देवानाम् । गृहपतिं यजमानगृहाणां पालयितारम् । किमत्राहवनीयायतनं विवक्षितं तदाह । इडः इडायाः । पदे स्थाने । यत्र सर्वा पृथिवी समाप्यते तस्मिन् अन्तरवेद्यां इत्यर्थः ।

इयं वेदिः परो अन्तः पृथिव्याः (ऋ. वे. १. १६४. ३५)

इति निगमः । एतद्वा इडायाः पदं यदुत्तरवेदीनाभिः (ऐ. ब्रा. १. २८.) इति बह्वृचब्राह्मणम् । उत्तरवेदीनाभिरिति उत्तरवेद्या मध्यमः । तस्मिन् इडायाः पदे निदधिध्वं इति पूर्वेण संबधः । नमसा स्तोत्रेण सपर्यत परिचरत । रातहव्यम् । रातं दत्तं हव्यं हविः यस्मै यजमानैः तम् । यजतं यजनीयम् । पस्त्यानाम् । पस्त्याः गृहाः । गृहस्थानां इत्यर्थः । भृमृदृशियजि (उ. ३. १०९) इत्यादिना यजेरतप्रत्ययः कर्मणि ॥ (१)

चित्र इच्छिशोस्तरुणस्य वक्षथो न यो मातरावन्वेति धातवे ।
अनूधा यदजीजनदधा चिदा ववक्षत्सद्यो महिदूत्यं चरन् ॥

उपस्तुतस्य आर्षम् । चित्रः पूज्यः । इत् इति पादपूरणः । शिशोः शंसनीयस्याग्नेः । तरुणस्य । तॄ प्लवनतरणयोरित्यस्यैतद्रूपम् ।

प्लवनसमर्थस्य । अथवा तरुणस्य युवानस्य । वक्षथः वहनम् । गमनमित्यर्थः । कीदृशस्य पुनरग्नेः पूज्यं गमनम् । उच्यते । न यो मातरावन्वेति धातवे । नेत्ययमन्वेतीत्यनेन सम्बन्धयितव्यः । यः अग्निः मातरौ अरणी प्रति न अन्वेति न गच्छतीत्यर्थः । धातवे । धेट् पाने इत्यस्यैतद्रूपम् । स्तनपानार्थमित्यर्थः । अनूधाः । ऊधोवर्जिता अरणिः । पञ्चम्या अत्र लुक् । यत् अजीजनत् जनितवती । अधेत्ययं यदाशब्दस्य श्रुतत्वात् तदाशब्दस्यार्थे वर्तते । चिच्छब्दः एवशब्दस्यार्थे । तदैव । जातमात्र एवेत्यर्थः । आववक्षत् आभिमुख्येन वहति । किम् । सामर्थ्याद्धवींषि । सद्यः । यस्मिन्नेवाहनि जायते तस्मिन्नेवेत्यर्थः । महि महत् । दूत्यं दूतकर्म । चरन् । चरतिर्यद्यप्यन्यत्र गत्यर्थस्तथापीह सामर्थ्यात्करोतीत्यर्थे वर्तते । कुर्वन्नित्यर्थः ॥

वार्ष्टिहव्य उपस्तुतः । चित्रो दर्शनीयो भवति । शिशोः जातमात्रस्य । तरुणस्य अग्नेः । वक्षथः वहनशीलः रश्मिः । इत् इति पादपूरणः । वहेरौणादिकः सथप्रत्ययः । यः अग्निः मातरौ जनन्यौ । न अन्वेति न अनुगच्छति । धातवे पातुं स्तन्यम् । अग्नेर्मातरौ अरणी । अनूधाः ऊधोहीना अरणिः । यत् यदा । अजीजनत् एनम् । चित् एव । आ इति पूरणः । ववक्षत् वहति । सद्य एव महि महान्ति हवींषि । दूत्यं चरन् आचरन् यजमानानाम् । लडर्थे व्यत्ययेन लेट् । लेटस्तिपि कृते लेटोऽडाटौ (पा. ३. ४. ९४) इति तिपोऽडागमः । सिप् बहुलं लेटि (पा. ३. १. ३४) इति सिपः छान्दसं द्विर्वचनम् । बहुलं छन्दसि इति हो ढः । षढोः कः सि (पा. ८. २. ४१) इति कः । आदेशप्रत्यययोः (पा. ८. ३. ५९) इति सकारस्य षकारः । इतश्च लोपः परस्मैपदेषु (पा. ३. ४. ९७) इति इकारलोपः । ततो ववक्षत् इति रूपसिद्धिः ॥ (२)

इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा संविशस्व ।
संवेशनस्तन्वे चारुरेधि प्रियो देवानां परमे जनित्रे ॥

बृहदुक्थस्यार्षम् । इदं ते तव । एकं ज्योतिः वैद्युताख्यम् । परः परम् । उत्कृष्टमित्यर्थः । उ इति पादपूरणः । ते तव । एकमादित्याख्यम् । तृतीयेन ज्योतिषा पार्थिवेन अग्न्याख्येन । संविशस्व । क्व पुनः संविशामि । उच्यते । संवेशनः तन्वे । संविश्यते अस्मिन्निति संवेशनं वेद्याख्यं स्थानम् । तस्मिन्नित्यर्थः । तन्वः शरीरस्य । संविश्य चारुः एधि शोभनो भव । प्रियः देवानाम् । क्व पुनः प्रियः । उच्यते । परमे उत्कृष्टे । जनित्रे । जन्यतेऽस्मिन्निति जनित्रं कर्म यागाख्यम् । तस्मिन्नित्यर्थः । अथवा जन्मैव जनित्रम् । परमे जन्मनि । वृक्षादौ यज्जन्म तस्मिन्नित्यर्थः ॥

बृहदुक्थः । आहवनीये स्वस्थानात् अर्वाक् शम्यापरासात् भ्रष्टे निर्गतस्याग्नेः स्वस्थानं संवापे कारणतया इयं विहिता । अतः तदानुगुण्येन व्याख्यायते । यदिदं स्थानात् च्युतं परं परस्तात् दिवि ते एकं ज्योतिः इति व्याख्यातम् । उ इति पूरणः । तृतीयेन योनिभूतेन आहवनीयाख्येन ज्योतिषा । संविशस्व संगच्छस्व । संवेशनः संगतः त्वम् । तन्वे मदीयायै । चारुः कल्याणकरः । एधि भव । प्रियश्च देवानां एधि । परमे श्रेष्ठे । जनित्रे जनके ज्योतिषि । आहवनीये स्थितः त्वं स्थानभ्रंशनिमित्तात् अग्निं परित्यज्य हव्यवाडेव भवति ॥ (३)

इमँ स्तोममर्हते जातवेदसे रथमिव संमहेमा मनीषया ।
भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषाम वयं तव ॥

कुत्सस्यार्षम् । इमं स्तोमं स्तोत्रम् । अर्हते पूज्याय । जातवेदसे जातविद्याय जातधनाय वा । द्वेऽप्येते तादर्थ्ये चतुर्थ्यौ । अर्हतो जातविद्यस्यार्थायेत्यर्थः । रथमिव संमहेमा । महतिरत्र गमनार्थः । अन्तर्णीतण्यर्थश्च द्रष्टव्यः । यथा कश्चिद्रथं गमयति । तद्वद्गमयेम । उच्चारयामीत्येतदाशास्महे इत्यर्थः । मनीषया स्वप्रज्ञया । भद्रा हि । हिशब्दो यस्मादर्थे ।

यस्माद्भद्रा कल्याणी । नः अस्माकम् । उपरीति वाक्यशेषः । प्रमतिः प्रकृष्टा मतिः । अनुग्राहिका बुद्धिरित्यर्थः । अस्य अग्नेः । संसदि यजमानसभायामित्यर्थः । अतो ब्रवीमि । हे अग्ने । सख्ये स्तुत्यस्तोतृलक्षणे । वर्तमाना इति वाक्यशेषः । मा रिषाम । ऋष रिष हिंसायामित्यस्यैतद्रूपम् । मा हिंसिष्मः केनचित् । वयं तव ॥

कुत्सः । इमं स्तोमं स्तोत्रम् । संमहेम सम्यक् प्रयच्छाम । अर्हते योग्याय स्तोमस्य । जातवेदसे प्रभूतधनाय । मनीषया । रथमिव । यथा रथः कल्पितागमनहेतुः एवमागमनहेतुम् । भद्रा भजनीया । हीति पादपूरणः । प्रमतिः प्रकृष्टा मतिः अनुग्रहबुद्धिः । अस्य अग्नेः । अस्मदीयायां संसदि सभायाम् । संसद्विषया भवतु । शेषः अन्त्यः पादः प्रत्यक्षस्तुतिः । हे अग्ने तव सख्ये सति । वयं मा रिषाम न हिंस्याम केनचिदपि ॥ (४)

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविं सम्राजमतिथिं जनानामासन्नः पात्रं जनयन्त देवाः ॥

भरद्वाजस्यार्षम् । मूर्धानं प्रधानभूतमित्यर्थः । दिवः द्युलोकस्य । अरतिं गन्तारं अलमतिं वा । पृथिव्याः । पृथिवीतः हवींषि गृहीत्वा द्युलोकस्य गन्तारमित्यर्थः । वैश्वानरं अग्निम् । ऋते यज्ञे । आजातं । आ इत्येष उपेत्येतस्य स्थाने । उपजातम् । प्रवृद्धमित्यर्थः । अग्निं कविं मेधाविनम् । सम्राजं सम्यगीशानं सम्यग्दीप्तं वा । अतिथिं अतिथिस्थानीयम् । जनानां यजमानमनुष्याणाम् । आसन् । आस्यशब्दस्य पद्न्नोमास्हृन्निशसन् (पा. ६. १. ६३) इति आसन्नादेशः । सप्तमीयं द्वितीयार्थे द्रष्टव्या । आस्यं आस्यभूतं देवानाम् । तथाहि

अग्निमुखा वै देवाः (ता. ब्रा. २५. २४. ४)

इति श्रुतिवचनम् । नः अस्माकं सम्बन्धिनम् । स्वामिनमित्यर्थः । पात्रं भाजनमाहुतीनाम् । जनयन्त जनितवन्तः । देवाः इन्द्रादयः ॥

द्वयोर्भरद्वाजः । मूर्धानं धारकम् । दिवो द्युलोकस्य । अरतिं मध्यमलोकस्वामिनं पृथिव्याः । वैश्वानरं विश्वनरहितम् । अग्निं ऋते यज्ञे । यज्ञप्रवृत्त्यर्थं जातम् । आ इति पादपूरणः अभेरर्थे वा । यज्ञार्थमभिजातं इति । कविं क्रान्तप्रज्ञम् । सम्राजं सम्यक् दीप्यमानम् । अतिथिं पूज्यं सर्वेषां जनानाम् । आसन् आस्ये । आस्यशब्दस्य पद्दन्नित्यादिना (पा. ६. १. ६३) छस्प्रभृतिषु आसन्नादेशः । आसन्शब्दात् सप्तम्येकवचनस्य लुकि आसन्निति रूपम् । नः अस्मभ्यम् । मनुष्याणां अर्थाय । पात्रं भाजनं हविषां जुहूम् । जनयन्त अजनयन् अकुर्वन् देवाः । आस्यस्थानीयां जुहूं चक्रुरिति यावत् । आस्पात्रं जुहूः देवानां चमसो देवपानः (तै. सं. २. ५. ९. ३) इति निगमान्तरम् ॥　　　　(९)

वि त्वदापो न पर्वतस्य पृष्ठादुक्थेभिरग्ने जनयन्त देवाः ।
तं त्वा गिरः सुष्टुतयो वाजयन्त्याजिं न गिर्ववाहो जिग्युरश्वा ॥

भरद्वाजस्यार्षम् । वीत्ययमुपसर्गः जनयन्त इत्याख्यातेन सम्बन्धयितव्यः । त्वत् । पञ्चम्या अत्र लुक् । त्वत्तः । तं त्वा गिर इति परस्तात्तच्छब्दस्य श्रुतेः एतस्य समानाधिकरणो यच्छब्दोऽध्याहर्तव्यः । यतः त्वत्तः । उक्थेभिः स्तोत्रैः । हे अग्ने । विजनयन्त विविधं जनितवन्तः उत्पादितवन्तः । लब्धवन्त इत्यर्थः । किं तल्लब्धवन्तः । सामर्थ्याद्धनम् । के पुनर्लब्धवन्तः । उच्यते । देवाः । हविषां दातृत्वात देवशब्देनात्र ऋत्विग्यजमाना उच्यन्ते । कथं पुनर्लब्धवन्तः । उच्यते । आपो न । आप इति प्रथमाबहुवचनं द्वितीयाबहुवचनस्य स्थाने द्रष्टव्यम् । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । आप इव । पर्वतस्य मेघस्य । पृष्ठात् । एतदुक्तं भवति । यथा केचिन्मरुदादयः मेघमस्तकाद्धूदकं लब्धवन्तः

तद्वत् यतो धनं लब्धवन्तः । तं त्वा गिरः सुष्टुतयः । द्वे अप्येते प्रथमा-बहुवचने तृतीयाबहुवचनस्य स्थाने द्रष्टव्ये । गीर्भिः सामलक्षणाभिर्वाग्भिः स्तुतिभिः ऋग्लक्षणाभिश्च । वाजयन्ति पूजयन्ति । वयं जिग्युः । शुद्धोऽपि उपपूर्वो द्रष्टव्यः । उपजिग्युः । उपगच्छाम इत्यर्थः । हे गिर्व-वाह । गिरः स्तुतयः । ता उह्यन्ते यं प्रति स गिर्ववाहः । तस्य सम्बोधनं हे गिर्ववाह । कथं पुनरुपगच्छामः । उच्यते । आजिं न अश्वाः । आजिः सङ्ग्रामभूमिः । नशब्द उपमार्थीयः । सङ्ग्रामभूमिमिव अश्वाः । यथा सङ्ग्रामभूमिं अश्वाः शीघ्रमुपगच्छन्ति तद्वदुपगच्छाम इत्यर्थः ॥

विजनयन्त पृथक् जनयन्ति संपादयन्ति स्वीयान् कामान् पुत्रपश्वादीन् । त्वत् त्वत्तः । उक्थेभिः स्तोत्रैः । देवाः स्तोतारः । दीव्यतेः स्तुतिकर्मणः देवा इति । हे अग्ने आपो न पर्वतस्य पृष्ठात् इत्युपमा । आप इति द्वितीयायाः स्थाने प्रथमायाः व्यत्ययः । अप इव । पर्वतस्य पृष्ठादुपरिभागात् । तं त्वा त्वाम् । गिरः स्तोतारः । गृणातेः कर्तरि क्विपि रूपं गीः इति । सुष्टुतयः शोभनस्तुतियुक्ताः । वाजयन्ति वाजिनं बलिनं कुर्वन्ति स्तुतिभिः । आजि न संग्राममिव । अश्वाः । जिग्युः इति लडर्थे लिट् । छन्दसि लुङ्लङ्लिटः (पा. ३. ४. ६) इति । वाजयन्ति वशीकुर्वन्ति च मां स्तोतारः । हे गिर्ववाहः गीर्भिः स्तुतिभिः उह्यते प्राप्यते स्तोतॄन् इति गिर्ववाहः । वहेः सार्वधतुभ्यो विहितः असुन्प्रत्ययः । वकारस्य द्वित्वं छान्दसम ॥ (६)

आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः ।
अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ॥

वामदेवस्यार्षम् । आ इत्ययमुपसर्गः कृणुध्वमित्याख्यातेन सम्बन्ध-यितव्यः । वः । बहुवचनमिदं एकवचनस्य स्थाने द्रष्टव्यम् । त्वाम् राजानं ईश्वरम् । अध्वरस्य यज्ञस्य । रुद्रं रोदनस्वभावम् । पार्थिवोऽग्निः

प्रदीप्तः धुगुधुगाशब्दं करोति। वैद्युतोऽपि गर्जितलक्षणम्। अतोऽसौ रोदनक्रियायोगात् रुद्र उच्यते। होतारं देवानां आह्वातारम्। सत्ययज्ञं अविसंवादिनं यष्टारम्। रोदस्योः द्यावापृथिव्योः। द्यावापृथिवीग्रहणं चात्र प्रदर्शनार्थम्। सर्वदेवानां यष्टारम्। अग्निं पुरा तनयित्नोः प्राक् धुगुधुगाशब्दात् प्राक् गर्जितलक्षणाच्छब्दात्। कीदृशात्। अचित्तात् चेतनावर्जितात्। यावद्गर्जितलक्षणशब्देनैव करोति जातमात्रस्तावदेवेत्यर्थः। कीदृशमग्निम्। उच्यते। हिरण्यरूपम्। अवसे आत्मनः पालनार्थं तर्पणार्थं वेत्यर्थः। कृणुध्वं आभिमुख्येन कुरुध्वम्। केन। स्तुतिभिर्हविर्भिश्च ॥

इयं रौद्रीति केचित। वामदेवः। आकृणुध्वं अभिमुखीकुरुत। वः यूयम्। राजानं स्वामिनम्। अध्वरस्य यज्ञस्य।

राजन्तमध्वराणाम् (ऋ. वे. १. १. ८)

इति हि निगमान्तरम्। रुद्रं रोरूयमाणं द्रवन्तं अग्निम्। होतारं देवानाम्। सत्ययजं सत्यान् देवान् यजन्तम्। अग्निर्हि देवान् याजयति हविषां वहनात्। रोदस्योः। व्याप्तमिति शेषः। द्यावापृथिव्यौ रोदसी। रोदस्योः राजानं अध्वरस्य होतारमिति वा संबन्धः। हिरण्यरूपं हिरण्यरूपसदृशं अग्निम्। अवसे रक्षणाय युष्माकं तर्पणाय वा हविषा आकृणुध्वम्। पुरा पुरस्तात्। तनयित्नोः तायमानात् सर्वत्र। अचित्तात् अचिन्तितात्। इति प्रायेणाभिप्रायः जीवदवस्थायामेवेति। यदीयं रौद्रीति निर्णयः तदा होतारमिति होतव्यमिति व्याख्येयम्। अग्निमित्यस्य नेतारं इति ॥ (७)

इन्धे राजा समर्यो नमोभिर्यस्य प्रतीकमाहुतं घृतेन।
नरो हव्येभिरीळते सबाध आग्निरग्रमुषसामशोचि ॥

वसिष्ठस्यार्षम्। समित्ययमुपसर्गः पुरस्तादिन्धेर्द्रष्टव्यः। समिन्धे। सम्यक् दीप्यते इत्यर्थः। राजा दीप्तः। दीप्तोऽपि सुतरां दीप्यत इत्यर्थः।

अर्यः ईश्वरः । केन दीप्यते । उच्यते । नमोभिः स्तुतिभिः । स्तूयमान इति वाक्यशेषः । यः कीदृशोऽग्निः । उच्यते । यस्य प्रतीकं नाम मुखं वा । आहुतं आभिमुख्येन हुतम् । घृतेन । यं च नरः मनुष्याः । हव्येभिः हविर्भिः । यजन्त इति वाक्यशेषः । ईडते स्तुवन्ति । कीदृशा मनुष्याः । सबाधः ऋत्विजः । यस्य प्रतीकमिति पुरस्ताद्यच्छब्दस्य श्रुतेः तच्छब्द इहाध्याहर्तव्यः । स आ अग्निः । आ इत्ययमुपसर्गः अशोचीत्याख्यातेन सम्बन्धयितव्यः । अग्निः । अग्रं प्रथमतरम् । उषसाम् । आभिमुख्येन दीप्यत इत्यर्थः ॥

वसिष्ठः । समिन्धे समिध्यते अग्निः । राजा दीप्तः । अर्यः स्वामी । नमोभिः स्तुतिभिः सह । यस्य अग्नेः । प्रतीकं रूपम् । आहुतं घृतेन अभिहुतं भवति घृतेन । तमग्निं नरो नेतारः ऋत्विजः । हव्येभिः हव्यैः सार्धम् । ईडते स्तुवन्ति । सबाधः संबाधमानः संश्लिष्टः । यद्वा हव्यैः पूजयन्ति । पूजाकर्मा चेडिः । आ अभीत्यर्थः । सः अग्निः उषसां अग्रं प्रमुखं अभि । अशोचि । शुचिर्दीप्तिकर्मा । दीप्यते । उषःकाले हि आग्निहोत्रिकः अग्निः दीप्यते ॥ (८)

प्र केतुना बृहता यात्यग्निरा रोदसी वृषभो रोरवीति ।
दिवश्चिदन्तादुपमामुदानडपामुपस्थे महिषो ववर्ध ॥

त्वाष्ट्रस्य त्रिशिरस आर्षम् । प्रेत्ययमुपसर्गो यातीत्याख्यातेन सम्बन्धयितव्यः । केतुना स्वेन प्रज्ञानेन कर्मणा वा । बृहता महता । प्रयाति गच्छतीत्यर्थः । अग्निः । आकारः रोरवीतीत्यनेन सम्बन्धयितव्यः । कं पुनः प्रति याति । उच्यते । रोदसी द्यावापृथिव्योः प्रति । कीदृशोऽग्निः । उच्यते । वृषभः वर्षिता । आरोरवीति अत्यर्थं शब्दं

करोति गर्जितलक्षणम् । किञ्च दिवः द्युलोकस्य । चिच्छब्दः पादपूरणः । अन्तात् । पञ्चम्येकवचनमिदं द्वितीयाबहुवचनस्य स्थाने द्रष्टव्यम् । उपमां सन्निकृष्टामित्यर्थः । उत् आनट् ऊर्ध्वं व्याप्नोतीत्यर्थः । किञ्च अपामुपस्थे । आप उपगम्य यत्र तिष्ठन्ति तदपामुपस्थं अन्तरिक्षम् । तस्मिन्नित्यर्थः । महिषः महान् । ववर्ध वर्धते वीर्येण ॥

त्रिशिराः त्वाष्ट्रः । प्रयाति अग्निः केतुना भानुना । बृहता महता सह । आ अभि रोरवीति भृशं शब्दायते । वृषभः वर्षिता कामानाम् । रोदसी द्यावापृथिव्यौ अभि इति संबन्धः । दिवः अन्तरिक्षस्य । चित् एव । अन्तात् पर्यन्तात् । उपमाम् । उपमेत्यन्तिकनाम । उपमां अन्तिकं मेघस्य । उदानट् उदाप्नोति । नशेर्व्याप्तिकर्मणो रूपं उदानडिति । अपां उपस्थे उपस्थाने अन्तरिक्षे । ववर्ध वर्धते वैद्युतरूपः । महिषो महान् ॥ (९)

अग्निर्नरो दीधितिभिररण्योर्हस्तच्युतं जनयत प्रशस्तम् ।
दूरेदृशं गृहपतिमथर्व्युम् ॥

वसिष्ठस्यार्षम् । अग्निं नरः । नर इति जनयतेति मध्यमपुरुषयोगात् आमन्त्रितान्तम् । हे नरः ऋत्विजो मत्पुत्रादयो वा । दीधितिभिः अङ्गुलिभिः । अरण्योः सकाशात् । हस्तच्युतम् । हस्ताभ्यां गृहीत्वा च्याव्यते उत्तरवेद्याख्ये स्थाने नीयते यः सः हस्तच्युत् । तं हस्तच्युतम् । अथवा हस्ताभ्यां च्यवनं हस्तच्युत् । तस्मादियं तृतीयार्थे द्वितीया । हस्तच्युता । हस्तप्रच्यावनेनेत्यर्थः । जनयत उत्पादयत । कीदृशम् । उच्यते । प्रशस्तं दूरेदृशं दूरे व्यवहितो यो दृश्यते स दूरेदृक् । तं दूरेदृशम् । गृहपतिं यजमानगृहस्य स्वामिनम् । अथवा यजमानगृहान् देवांश्चाभिगन्तारम् ॥

वसिष्ठः। अग्निं जनयत जनयन्ति नरः। लटः प्रथमपुरुषबहुवचनस्य लोण्मध्यमपुरुषबहुवचनेन व्यत्ययः। हे नरः मनुष्या ऋत्विजः। जनयत इति वा प्रार्थना। तस्मिन् पक्षे नर इति पदस्य आद्युदात्तत्वं स्वरव्यत्ययात्। सर्वानुदात्तं हि प्राप्तं आमन्त्रितस्य च (पा. ८. १. १९) इति। नरो नेतारो यूयं इति वा कर्तृविशेषणम्। दीधितिभिः अंशुभिः। दधातेर्दीधितयः कर्माणि विदधतीति। अरण्योर्विद्यमानमग्निम्। हस्तच्युतं हस्ताभ्यां च्यावितं मन्थनेन। प्रशस्तं प्रकर्षेण स्तुतं सर्वैः। दूरेदृशं दूरे दृश्यमानम्। दूरेऽपि पश्यन्तं इति वा। गृहपतिं गृहाणां पालकम्। अथर्व्युम्। थर्व्यतेगतिकर्मणः नञुपसृष्टात् लुप्तरेफात् अथर्व्यु इति रूपसिद्धिः। अगम्यम्॥ (१०)

प्रथमस्य सप्तम्या दशत्या।

अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम्।
यह्वा इव प्रवयामुज्जिहानाः प्र भानवः सस्रते नाकमच्छ॥

अबोद्ध्यग्निः—बुधगविष्ठिरयोरार्षम्। अबोधि बुद्ध्यते। अग्निः। किं बुद्ध्यते। यद्यत् बोद्धव्यम्। अथवा भक्ततां अभक्तां च। केन पुनर्बुद्ध्यते। उच्यते। समिधा समिन्धनेन। जनानां यजमानमनुष्याणाम्। प्रतीत्ययमुषासमित्यनेन सम्बन्धयितव्यः। कथं पुनर्बुद्ध्यते। उच्यते। धेनुमिव आयतीं आगच्छतीम्। कदा पुनर्बुद्ध्यते। प्रति उषासं उषसं प्रति। उदयकाले इत्यर्थः। प्रवृद्धस्य च यह्वा इव महान्त इव पक्षिणः। प्रवयाम्। द्वितीयैकवचनमिदं पञ्चम्येकवचनस्य स्थाने द्रष्टव्यम्। प्रवयायाः। शाखात इत्यर्थः। उज्जिहानाः। ओहाङ्गता-

वित्यस्येदं रूपम् । ऊर्ध्वं गच्छन्तः । उत्पतन्त इत्यर्थः । द्युलोकं व्याप्नुवन्ति । तद्वद्भानवः दीप्तयः । सस्रते । सृ गतावित्यस्येदं रूपम् । गच्छन्तीत्यर्थः । नाकं द्युलोकम् । अच्छ आप्तुमित्यर्थः ॥

बुधश्च गविष्ठिरश्च द्वावृषी । अबोधि बोध्यते । अग्निः समिधा समिद्भिः । जनानां यजमानानाम् । धेनुमिवायतीं आगच्छन्तीम् । उषासं प्रति उषःकाले । यह्वाः महान्त इव वृक्षाः । वयां शाखाम् । प्रोज्जिहानाः प्रोद्गमयन्तः । प्रसस्रते प्रसरन्ति । भानवः दीप्तयः अग्नेः । नाकमन्तरिक्षम् । अच्छ अभि । अभिमुखाः ॥ (१)

प्र भूर्जयन्तं महां विपोधां मूरैरमूरं पुरां दर्माणम् ।
नयन्तं गीर्भिर्वना धियं धा हरिश्मश्रुं न वर्मणा धनर्चिम् ॥

वत्सप्रेः आर्षम् । प्रेत्ययं जयन्तमित्यनेन सम्बन्धयितव्यः । भूः । प्रथमैकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । भुवं पृथिवीलोकम् । भूर्ग्रहणं च प्रदर्शनार्थम् । त्रीनपि लोकान् । प्रजयन्तम् । विपोधाम् । विप इति कर्मनाम । तस्येदमादिह्रस्वत्वम् । स्वकर्मणः हविर्वहनादेः धारयितारम् । सूरैः । तृतीयाबहुवचनमिदं प्रथमाबहुवचनस्य स्थाने द्रष्टव्यम् । मूराः मूढाः । अमूरं अमूढं अग्निम् । पुरां शत्रुपुराणाम् । दर्माणं विदारयितारम् । नयन्तं गीर्भिः स्तुतिभिः हविर्भिश्च प्रापितवन्तम् । कीदृशमग्निम् । वना वननीयम् । धियं प्रज्ञाम् । धाः । एकवचनमिदं बहुवचनस्य स्थाने द्रष्टव्यम् । धारितवन्तः । लब्धवन्त इत्यर्थः । कीदृशं पुनरग्निं ये स्तुतिभिः हविर्भिश्च प्रापितवन्तः तेन वननीयं धियं लब्धवन्तः । उच्यते । हरिश्मश्रुं हरितज्वालाख्यश्मश्रुम् । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । अस्त्युपमार्थस्य संप्रत्यर्थे प्रयोग इति पादपूरणः । किं शुद्धामेव प्रज्ञां

लब्धवन्तः । उच्यते । वर्मणा । वर्मेति गृहनाम । तस्मादियं सहयोगलक्षणा तृतीया । गृहेण सहितां प्रज्ञां लब्धवन्तः । कीदृशं पुनरग्निं स्तुतिभिर्हविर्भिश्च प्रापितवन्तः । उच्यते । धनर्चिं धनेन अर्चितारं धनस्य पूजितारम् ॥

वत्सप्रिः ऋषिः । प्रभूः इत्याख्यातं अनुदात्तत्वात् पञ्चमलकारान्तम् । प्रभूः प्रगच्छ उपगच्छ अग्निं हे स्तोतः । जयन्तं रक्षःप्रभृतीन् । महां महान्तम् । विपोधां विप्राणां धारकम् । मूरैः । मूर इति मूढनाम । मूढैरसुरैः सार्धम् । पुरां आसुरीणाम् । दर्माणं दारयितारम् । अमूरं अमूढम् । नयन्तं विश्वं जगत् नेतारं विश्वस्य । गीर्भिः स्तुतिभिः प्रभूरिति संबन्धः । वना वननीयं संभजनीयम् । हरिश्मश्रुं हरितज्वालं हरितं हिरण्यवर्णम् । नेति पुरस्तादुपचारोऽपि उपमार्थीयः । वर्मणा कवचेन इव । इत्थंभूता ज्वालास्य कवचस्थानीया । धनं प्रीणनं अर्चिरर्चनं स्तोत्रं यस्य सः । धियं कर्मपरिचरणम् । धाः निधेहि अग्नेः हे स्तोतः ॥ (२)

शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि ।
विश्वा हि माया अवसि स्वधावन् भद्रा ते पूषन्निह रातिरस्तु ॥

भरद्वाजस्यार्षम् । आदित्यात्मना व्यवस्थितस्य अग्नेरेवेयं स्तुतिः । शुक्रशब्दः शुक्लशब्दपर्यायः । शुक्रं शुक्लम् । तव । अन्यत् । किं तत् । सामर्थ्याद्रूपम् । यजतं ते अन्यत् । शुक्लप्रतियोगित्वेनोपादानात् यजतशब्दो लोहितवचनः । लोहितम् । ते तव । अन्यत् । किं तत् । सामर्थ्याद्रूपमेव । आदित्यस्य हि मध्यन्दिने शुक्लं रूपं भवति । उदयास्तमनयोश्च लोहितम् । ते द्वे रूपे अभिसमीक्ष्यैतदुक्तं शुक्रं ते अन्यद्यजतं ते अन्यदिति । किंच विषुरूपे अहनी ये अपि चैते विषुरूपे भिन्नरूपे अहनी अहोरात्रे । एते अपि त्वमसि त्वत्कर्तृत्वादेते अपि त्वमेव भवसि । द्यौरिव

च असि । यथा द्यौः सर्वव्यापिनी तद्वत्त्वं सर्वव्यापी भवसीत्यर्थः । किं च विश्वा हि । हिशब्दश्चशब्दस्यार्थे । विश्वाश्च । मायाः प्रज्ञाः । अवसि प्रज्ञाहेतुभूतं प्रकाशं पालयसि । स्वधावन् । स्वधेत्यन्ननाम उदकनाम वा । हविर्लक्षणेन अन्नेन रश्म्याहृतेत वा उदकेन तद्वान् स्वधावान् । तस्य सम्बोधनं हे स्वधावन् । अन्नवन् उदकवन् वा । भद्रा कल्याणी । ते तुभ्यम् । हे पूषन् । इह यज्ञे । रातिः हविर्दानम् । अस्तु । अथवा ते इति कर्तृलक्षणा षष्ठी । त्वत्कर्तृका रातिः इह भद्रास्तु । इह यज्ञे शोभनं धनमस्मभ्यं देहीत्यर्थः ॥

भरद्वाजः । शुक्रं ते त्वदीयम् । अन्यत् अहः दिवसो भवति । यजतं यजनीयम् । यजिः संगतिकरणे वर्तते । संगमनीयं प्रकाशेन । स्वयंप्रकाशं भवति । ते अन्यदहः निशा । इत्थं विषुरूपे विषमरूपे अहनी भवतः । यद्वा अहनी कर्मणी उच्येते । आह्रियते क्रियते इत्यहः । शुक्रं पावनं एतत्कर्म । यजतं यजनीयं पूज्यं भवति अन्यत् । इत्थं विषुरूपे अहनी भवतः । प्रकाशं पोषणं च । यथोक्तं भगवता यास्केन—शुक्रं ते अन्यत् लोहितं ते अन्यत् यजनीयं ते अन्यत् इति वा विषमरूपे ते अहनी कर्मणी । (नि १२. १७) इति । द्यौः सूर्य इवासि त्वम् । विश्वा हि मायाः प्रज्ञानानि । अवसि रक्षसि । हे स्वधावन् अन्नवन् । भद्रा कल्याणी । रातिः दानम् । इह स्तोतरि मयि । अस्तु मद्विषये भवतु । हे पूषन् । पुष्णातेः पुष्यतेः वा पूषा ॥ (३)

इडामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नस्सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥

विश्वामित्रस्यार्षम् । इडां अन्नम् । हे अग्ने । कीदृशमन्नम् । पुरुदंसम् । पुर्विति बहुनाम । दंस इत्यपि कर्मनाम । बहूनि कर्माणि यागहोमदानादीनि कर्तव्यत्वेन सम्बन्धीनि यस्य तत्पुरुदंसम् । बहूनां कर्मणां

सम्पादयितृ । बहूनि कर्माणि यागादीनि येन क्रियन्त इत्यर्थः । अथवा दंस इति दसि दंसदर्शनयोरित्यस्यैतद्रूपम् । बहूनां दर्शनीयम् । सनिम् । षणु दाने । तत्पूर्वकत्वाल्लाभ उपलक्ष्यते । सनिं च लाभं च । गोः । कीदृशं लाभम् । उच्यते । शश्वत्तमं अतिशयेन बहु । बह्वीनां गवां लाभं इत्यर्थः । हवमानाय मनसा धिया । एतदुक्तं भवति । अन्नं गावश्च अस्मभ्यं देहीत्यर्थः । किं च स्यान्नः सूनुः । सा ते सुमतिरिति परस्तात्तच्छब्दश्रुतेर्यच्छब्दस्याध्याहारः । यः स्याद्भवेत् । नः अस्माकम् । सूनुः पुत्रः । तनयः पौत्रश्च । कीदृशः पौत्रः । उच्यते । विजावा विविधं जनयिता पुत्राणाम् । अनेन प्रकारेण वंशस्याविच्छेद आशास्यते । अग्ने सा ते तव । सुमतिः शोभना मतिः अनुग्रहात्मिका । भूत् भवतु । अस्मे अस्मासु । अस्माकमुपरीत्यर्थः ॥

विश्वामित्रः । इडां अन्नं भूमिं वा । हे अग्ने पुरुदंसं बहुकर्माणम् । दंसः कर्म । एकः सकारो लुप्तः । बहुकर्मसाधिकां इत्यर्थः । सनिं दात्रीम् । गोः गवाम् । शश्वत्तममिति क्रियाविशेषणम् । चिरकालम् । हवमानाय स्तुवते मह्यम् । साध साधय । स्यात् भूयात् । नः अस्माकम् । सूनुः पुत्रः । तनयः सन्तानहेतुः । तनोतेस्तनयः । विजावा स्त्री विजयते इति । छन्दसीवनिपौ वक्तव्यौ (वा ५. २. १०९–२) इति मत्वर्थीयो वनिप् । भगिनी । इमाश्च हे अग्ने सा प्रसिद्धा । ते त्वदीया । सुमतिः अनुग्रहबुद्धिः । भूतु भवतु । अस्मे अस्मासु ॥ (४)

प्र होता जातो महान्नभोविन्नृषद्मासीदद्पां विवर्ते ।
दधद्यो धायी सुते वयांसि यन्ता वसूनि विधते तनूपाः ॥

वत्सप्रेः आर्षम् । वत्सप्रिः पुत्रपौत्रस्य कथयति । प्र होता प्रकर्षेण आह्वाता देवानाम् । जातः जातमात्र एव । महान् नभोवित् । नभः

आदित्यः द्युलोको वा । तस्य वेत्ता । नृषद्मा । नरो मनुष्याः । तान्प्रति यजमानमनुष्यान् प्रति स्थितो यः स नृषद्मा । सीदत् सीदति गच्छति । क्व पुनः सीदति । उच्यते । अपां विवर्ते । आपो यत्र विविधं वर्तन्ते सोऽपां विवर्तः अन्तरिक्षलोकः । तस्मिन्नित्यर्थः । तत्र हि वैद्युतात्मा निवसति । किं च दधत् ददत् । किम् । सामर्थ्याद्धनम् । यः धायी धारयिता । कस्य हविर्वहनादेः कर्मणः । एतदुक्तं भवति । दधद्यो हविर्वहनादिकर्म करोतीत्यर्थः । कदा । उच्यते । सुते अभिषुते सोमे । वयांसि अन्नानि । यन्ता निरोद्धा । सामर्थ्यात्तमसाम् । वसूनि हविर्लक्षणान्यन्नानि । विधत्ते परिचरति । कीदृशोऽग्निः । उच्यते । तनूपाः । शरीरस्य पाता । कथं पुनरग्निः शरीरस्य पाता । उच्यते । विद्यमानोऽपि तस्मिंस्तन्न दहति ॥

वत्सप्रिः । प्रासीदत् प्रकर्षेण सीदति आस्ते । अपां विवर्ते अन्तरिक्षे वैद्युतात्मना । होता आह्वाता देवानाम् । जातः जातमात्र एव महान् भवन् । नभोवित् नभसः स्वर्गस्य वेदयिता लंभयिता । नृषद्मा नृषु सीदन् वैश्वानररूपेण । दधत् धारयन् विश्वम् । यो धायि यो न्यधायि । अडभावः छान्दसः । देवैर्दिव आहृत्य न्यधायि । सोऽग्निः यन्ता दाता भवति । यमिर्दानकर्मापि दृश्यते । वयांसि अन्नानि । वसूनि धनानि च । षष्ठ्यर्थे द्वितीयाव्यत्ययः । वयसां वसूनां च यन्ता भवति । तनूपाः तनूनां पाता रक्षिता अग्निः । सुते मयि विधते धत्ताम् । पञ्चमलकारान्तम् । लेटोऽडाटौ (पा. ३. ४. ९४) इति अट् ॥ (९)

प्र सम्राजमसुरस्य प्रशस्तं पुंसः कृष्टीनां अनुमाद्यस्य ।
इन्द्रस्येव प्र तवसः कृतानि वन्दद्वारा वन्दमाना विवष्टु ॥

वसिष्ठस्यार्षम् । प्रेत्ययमुपसर्गः । वन्ददित्याख्यातेन सम्बन्धयितव्यः । सम्राजम् । द्वितीयैकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् । सम्राजस्य सम्यक् दीप्तस्य ईश्वरस्य वा । असुरस्य । असुः प्राणः । स यस्यास्ति

सोऽसुरः । अथवा रा दाने । प्राणदस्य । तस्य असुरस्य प्राणवतश्चेत्यर्थः । प्रशस्तम् । इदममि द्वितीयैकवचनं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् । प्रशस्तस्य । पुंसः पुरुमनसः । कृष्टीनां मनुष्याणाम् । अनुमाद्यस्य अनुमोदनीयस्य । इन्द्रस्येव प्रतवसः प्रकृष्टस्य महतः इन्द्रस्येव । यथा इन्द्रस्य कृतानि वृत्रवधादीनि कर्माणि कश्चिद्वदति तद्वदग्नेरपि कृतानि कर्माणि हविर्नयनादीनि । प्रवन्दत् प्रकर्षेण स्तौति । मदीयोऽन्तरात्मा । तं च मदीयं अन्तरात्मानम् । वारा । द्वितीयैकवचनस्य स्थाने आकारः । वारं वरणीयम् । वन्दमाना । अत्रापि द्वितीयैकवचनस्य स्थाने आकारः । वन्दमानम् । स्तुवन्तमित्यर्थः । विवष्टु विविधं कामय ॥

वसिष्ठः । प्रेत्युपसर्गादाख्याताध्याहारः । प्रशंसामीति वा प्रशंसेति वा । सम्राजं सम्यगीशानम् । प्रशस्तं प्रकर्षेण स्तुतमग्निम् । असुरस्य । असु बलम् । तद्वतः । पुंसो वीरस्य । पौंस्यमिति हि वीर्यमुच्यते । कृष्टीनां जनानाम् । अनुमाद्यस्य अनु सन्ततं स्तुत्यस्य । इन्द्रस्येव प्रतवसः प्रवृद्धस्य । तु वृद्धौ इत्यस्माद्धातोः तवाः । एवंभूतस्य अग्नेः कृतानीति भावे निष्ठा । कर्माणि । वन्दद्वारा वन्दद्वाराणि । वन्दमाना वन्द्यमानानि । वदि अभिवादनस्तुत्योः । स्तूयमानद्वाराणि स्तूयमानानि च कविभिः कर्माणि । विवष्टु विवक्तु स्तोता । इत्यात्मानमेव निर्दिशत्यृषिः । वचेर्वर्णव्यत्ययात् विवष्टु इति रूपम् ॥　　(६)

अरण्योर्निहितो जातवेदा गर्भ इवेत्सुभृतो गर्भिणीभिः ।
दिवे दिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः ॥

विश्वामित्रस्यार्षम् । अरण्योः निहितः स्थापित इत्यर्थः । जातवेदा उत्पन्नप्रज्ञः उत्पन्नधनो वा । कथं पुनर्निहितः । उच्यते । गर्भ इव इत् । इच्छब्दः पादपूरणः । कीदृशो गर्भः । उच्यते । सुभृतः सुपुष्टः । गर्भिणीभिः । तृतीयाबहुवचनमिदं सप्तमीबहुवचनस्य स्थाने द्रष्टव्यम् ।

गर्भिणीषु । एतदुक्तं भवति । यथा गर्भः सुपुष्टः गर्भिणीषु स्त्रीषु निहितः तद्वदरण्योर्निहितो जातवेदाः । दिवे दिवे अहन्यहनि । ईड्यः जागृवद्भिः । जागरणवता प्रयत्नवन्तो लक्ष्यन्ते । प्रयत्नवद्भिरित्यर्थः । हविष्मद्भिः । पुरोडाशादीनि हवींषि येषां विद्यन्ते ते हविष्मन्तः । तैर्हविष्मद्भिः । मनुष्येभिर्मनुष्यैः ऋत्विग्यजमानैरित्यर्थः । अग्निः । पूर्वोत्तरयोरर्धर्चयोर्यत्तच्छब्दावध्याहृत्य एकवाक्यता योजयितव्या । यः अरण्योर्निहितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः स दिवे दिवे ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः ॥

विश्वामित्रः । अरण्योर्निहितो भवति । जातवेदा व्याख्यातः । सोऽग्निर्गर्भ इव सुभृतः सुष्ठु धार्यमाणः गर्भिणीभिः । इदिति पूरणः । दिवे दिवे प्रतिदिनम् । ईड्यः स्तुत्यः । जागृवद्भिः प्रबुद्धैः । जागृ निद्राक्षये इत्यस्माद्धातोः लिटः क्वसौ जागृवानिति रूपसिद्धिः । हविष्मद्भिः मनुष्येभिः मनुष्यैः । दिवे दिवे ईड्य इति संबन्धः ॥ (७)

सनादग्ने मृणसि यातुधानान्न त्वा रक्षांसि पृतनासु जिग्युः ।
अनु दह सहमूरान् कयादो मा ते हेत्या मुक्षत दैव्यायाः ॥

पायोरार्षम् । सनात् विश्वप्रभृति । त्वं हे अग्ने । मृणसि मारयसि । यातुधानान् राक्षसान् । नेत्ययं प्रतिषेधः जिग्युरित्येतेन सम्बन्धयितव्यः । त्वा त्वाम् । रक्षांसि पृतनासु सङ्ग्रामेषु । न जिग्युः न जयन्तीत्यर्थः । सर्वदा पराजेता एवमतो ब्रवीमि । अनुदह । आत्मनो ज्योतीरूपेण दह । सहमूरान् सहभूतान् मूढान् । मूर्खानित्यर्थः । कयादः । क्रव्यशब्दस्य रेफवकारयोश्छन्दसि वर्णलोपेन कय इत्येतद्भवति । कयं ये अदन्ति ते कयादः क्रव्यादाः । तान् । मांसस्य भक्षयितॄनित्यर्थः । किंच मा ते

हेत्याः । हेतिर्वधः । तस्य । मा मुक्षत अमुच्यत इत्यर्थः । दैव्यायाः देवानां स्वभूतायाः । सर्वदा देवैर्हन्यन्तामित्यर्थः ॥

पायुर्भारद्वाजः । सनात् चिरादारभ्य । हे अग्ने त्वं मृणसि हरसि । यातुधानान् राक्षसान् । मृणिर्हिंसाकर्मा । यातिर्हिंसाकर्मा । यातुर्हिंसा । यातोर्निधानभूता इति यातुं विदधति इति वा यातुधानाः । न जिग्युः न जयन्ति स्म । त्वा त्वाम् । रक्षांसि पृतनासु संग्रामेषु । इदानीं च अनुदह क्रमेण दह । सहमूरान् मूढेन सहितान् । कयादः क्रव्यादः । क्रव्याच्छब्दे रेफवकारयोर्लोपः । सहमूरान् क्रव्यादो मा (ऋ. वे. १०. ८७. १९) इति बह्वृचा आमनन्ति । ते च क्रव्यादा मा मुक्षत न मुच्येरन् । ते तव । हेत्याः आयुधात् । हन्तेः हिनोतेर्वा हेतिः । दैव्यायाः देवेभ्यो हितायाः हेत्याः ॥ (८)

प्रथमस्याष्टम्या दशत्या ।

अग्न ओजिष्ठमा भर द्युम्नमस्मभ्यमध्रिगो ।
प्र नो राये पनीयसे रत्सि वाजाय पन्थाम् ॥

गयस्यार्षम् । हे अग्ने ओजिष्ठं अतिशयेन बलवत् । आभर आनय । देहीत्यर्थः । किं पुनस्तत् । उच्यते । द्युम्नं यशः अन्नं वा । कस्मै पुनर्ददामि । उच्यते । अस्मभ्यम् । हे अध्रिगो । अध्रिगुः अनिरुद्धगमनः । हविर्गृहीत्वा देवान् प्रति गच्छतो न केनचिद्गमनं निरोद्धुं शक्यं यस्य स अध्रिगुः । तस्य संबोधनम् हे अध्रिगो । अधृतगमन इत्यर्थः । प्रेत्ययमुपसर्गः रत्सीत्याख्यातेन सम्बन्धयितव्यः । न इत्येतदपि वाजायेत्यनेन सम्बन्धयितव्यः । राये पनीयसे । द्वे अप्येते चतुर्थ्यौ तृतीयैकवचनस्य स्थाने द्रष्टव्ये ।

राया धनेन हविर्लक्षणेन । कीदृशेन । उच्यते । पनीयसा अतिशयेन बहुना । तृतीयानिर्देशात् उपचरित इति वाक्यशेषः । नः अस्मभ्यम् । वाजाय अन्नाय । रत्सि । लडयं लोडर्थे द्रष्टव्यः । राहि । प्रकर्षेण देहीत्यर्थः । किं पुनर्ददामि । उच्यते । पन्थां पन्थानम् । येन पथा अस्मभ्यं अन्नानि आगच्छन्ति तं पन्थानं देहीत्यर्थः ॥

अग्न ओजिष्ठमित्येताः षोडशानुष्टुभा ऋचः ।
सोमं राजानमित्येतां वैश्वदेवीं विदुःर्बुधाः ॥
स्तुतिमङ्गिरसामन्या आग्नेय्यस्तु चतुर्दश ।

आत्रेयो गयः । हे अग्ने ओजिष्ठं ओजस्विनम् । ओजसा सहितमित्यर्थः । आभर आहर । द्युम्नं नः अस्माकम् । अध्रिगो अधृतगमन अप्रतिहतगते । प्ररत्सि प्रकर्षेण विलिख । रतिर्विलेखनकर्मा । कुर्वित्यर्थः । पन्थां पन्थानं द्वारम् । नः अस्मभ्यम् । राये धनाय । पनीयसे पन्यतराय स्तुत्यतराय श्रेष्ठतराय वाजाय अन्नाय च । एतयोः प्राप्त्यर्थम् ॥ (१)

यदि वीरो अनु ष्यादग्निमिन्धीत मर्त्यः ।
आजुह्वद्धव्यमानुषक् शर्म भक्षीत दैव्यम् ॥

वामदेवस्यार्षम् । यदीत्ययं अग्निमिन्धीतेत्यनेन सम्बन्धयितव्यः । यदि अग्निं इन्धीत सम्यग्दीपयेत । मर्त्यः मनुष्यः । किं कुर्वन् । उच्यते । आजुह्वत् आभिमुख्येन ददन् हव्यं हवींषीत्यर्थः । आनुषक् आनुपूर्व्येण । यथोक्तेन क्रमेणेत्यर्थः । ततः किं स्यात् । उच्यते । वीरः विक्रान्तः । वीर्यवानित्यर्थः । अनु स्यात् । अन्विति पादपूरणः । स्याद्भवेत् । न केवलं विक्रान्तो भवेत् । किं तर्हि । अग्नेः समिद्धस्य प्रसादेन शर्म सुखं गृहं वा । भक्षीत भजेत । लभेतेत्यर्थः । कीदृशं पुनः शर्म लभेत । उच्यते । दैव्यं देवानां स्वभूतम् ॥

वामदेवः । वीरः स्तोता । वीरयति स्तोत्राणीति वीरः । स यदि अनुस्यात् अनुभवेत् हविरादिकं अग्निम् । इन्धीत दीपयेत् समिद्भिः । मर्त्यः मनुष्यः । आजुह्वत् अभिजुह्वत् उपरि होमं कुर्वन् । हव्यं हविः । आनुषक् अनुषक्तं सन्ततम् । शर्म सुखम् । दैव्यं देवानां संबन्धि देवैर्देयमिति वा देवानां भोग्यमिति वा । भक्षीत भजेत लभेत ॥ (२)

त्वेषस्ते धूम ऋण्वति दिवि सं छुक्र आततः ।
सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥

भरद्वाजस्यार्षम् । त्वेषः दीप्तः । महत्त्वं वेति लक्षणया दीप्तः । ते तव । धूमः ऋण्वति गच्छति । व्यापीभवतीत्यर्थः । दिवि सन् द्युलोकं प्राप्त इत्यर्थः । शुक्रः शुक्लवर्णः । आततः विस्तीर्णः । सूरो न । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । सूर्य इव । हीति पादपूरणः । द्युता स्वया दीप्त्या । त्वं कृपा । अर्चतिकर्मसु पाठात् कृपिः स्तुत्यर्थः । तया कृपा स्तुत्या । स्तूयमान इति वाक्यशेषः । हे पावक शोधयितः । रोचसे दीप्यसे इत्यर्थः ॥

भरद्वाजः परस्याश्च ऋषिः । त्वेषो दीप्तिः । ते तव । धूम ऋण्वति गच्छति सर्वत्र मेघात्मना परिणतः । दिवि अन्तरिक्षे । सन् भवन् । शुक्रः शोचिष्मान् । आततः विस्तीर्णः । किंच त्वं सूरो न सूर्य इव । हीति पूरणः । द्युता दीप्त्या । रोचसे दीप्यसे । कृपा कृपया स्तुत्या युक्तः । स्तूयमान इत्यर्थः । हे पावक शोधक ॥ (३)

त्वं हि क्षैतवद्यशोऽग्ने मित्रो न पत्यसे ।
त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि ॥

भरद्वाजस्यार्षम् । त्वम् । हीति पादपूरणः । क्षैतवत् । क्षितिः पृथिवी । तस्यां भवं क्षैतम् । अथवा क्षि निवासगत्योरित्येतस्येदं रूपम् ।

क्षितिर्निवासः । तस्य संबन्धि क्षैतम् । किं पुनस्तत् । गृहम् । तद्यस्यास्ति स क्षैतवान् । किं पुनस्तत् । उच्यते । यशः कीर्तिः । गृहं च कीर्तिं चेत्यर्थः । हे अग्ने मित्रो न । नशब्द उपमार्थीयः । मित्र इव देवता-विशेषः । पत्यसे । पत्यतिर्यद्यप्यन्यत्र ऐश्वर्यकर्मा तथापीह दानार्थो द्रष्टव्यः । ददासि । कस्मै । स्तोतृभ्यः यष्टृभ्यश्च । अथवा पत्यस इत्यैश्वर्य-कर्मैव । क्षैतवद्यश इत्यपि द्वितीया अधीगर्थदयेशां कर्मणि (पा २. ३. ५२) इति षष्ठ्याः स्थाने द्रष्टव्या । क्षैतवतो यशसः स्तोतृणां च त्वमेव ईश्वर इत्यर्थः । त्वमेव विचर्षणे विश्वस्य द्रष्टः । श्रवः अन्नम् । वसो प्रशस्य धनवन् त्वम् । पुष्टिं न । नशब्द उपमार्थीयः । पुष्टिमिव । यथैव स्तोतृणां यष्टृणां च पुष्टिं तद्वत् अन्नमपि पुष्यसि । पुषिरन्तर्णीतण्यर्थो द्रष्टव्यः । पोषयसि । वर्धयसीत्यर्थः ॥

त्वं हि खलु । क्षैतवत् । क्षितिरेव क्षैतं निवासः । तद्युक्तम् । यशोऽन्नम् । हे अग्ने मित्रो न मित्र इव देवः । पत्यसे । पत्यतिरैश्वर्यकर्मा । ईशिषे । यद्वा मित्र इव सुहृदिव । पत्यसे पतसि अभिगच्छसि गृहं यजमानानाम् । मित्रशब्दः पुल्लिंगः सुहृद्वाची छन्दसि दृश्यते । त्वं हे विचर्षणे हविर्भिः दृष्टः । श्रवः अन्नम् । पुष्टिं न पुष्टिं च । पुष्यसि प्रापयसि यजमानान् । हे वसो वासक व्यापक प्रशस्य इति वा । वसिष्ठ इति हि प्रशस्य इत्युच्यते ॥ (३)

प्रातरग्निः पुरुप्रियो विश स्तवेतातिथिः ।
विश्वे यस्मिन्नमर्त्ये हव्यं मर्तास इन्धते ॥

सृक्तवाहद्वितस्यार्षम् । विश्वे यस्मिन्निति परस्ताद्यच्छब्दश्रवणात् पूर्वस्मिन्नर्धर्चे तच्छब्दोऽध्याहर्तव्यः । पाठक्रमादर्थक्रमस्य बलीयस्त्वात् पूर्वं द्वितीयोऽर्धर्चो व्याख्यातव्यः । विश्वे सर्वे । यस्मिन् अमर्त्ये मरणवर्जिते । हव्यं हविः । मर्तासः मनुष्याः । इन्धते । इन्धतिर्होमार्थः । जुह्वति । स

प्रातरेवाग्निः । पुरुप्रियः बहूनां यजमानानां प्रियः । विशः । प्रथमाबहुवचनमिदं तृतीयाबहुवचनस्य स्थाने द्रष्टव्यम् । विड्भिर्यजमानमनुष्यैः । स्तवेत । लिङयं लडर्थे द्रष्टव्यः कर्मणि च । विड्भिः स्तूयते । अतिथिः अतिथिस्थानीयो यजमानानाम् । विश्वे सर्वे यजमानाः । यस्मिन् अग्नौ । अमर्त्ये मरणवर्जिते । हव्यं मर्तासः मनुष्याः । इन्धते । इन्धी दीप्तौ दीपयन्ति हविर्भिः ॥

मुक्तवाहः द्वितः । प्रातः प्रातःकाले । स्तवेत स्तूयेत युष्माभिः । हे स्तोतारः अग्निः पुरुप्रियः पुरूणां बहूनां देवानां यजमानानां वा प्रियः । विशः जनस्य सर्वस्य अतिथिः अतिथिरिव पूज्यः । विश्वे मर्तासः मनुष्याः । यस्मिन्नग्नौ अमर्त्ये अमरणधर्मिणि । हव्यमिन्धते प्रकाशयन्ति । क्षिपन्तीत्यर्थः ॥ (४)

यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो ।
महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥

वसूयव ऋषयः । तेषामार्षम् । ऋत्विजां प्रैषणं स्तुतिरूपम् । यत् वाहिष्ठं अतिशयेन वोढारम् । अग्नेर्गुणानां अतिशयेन प्रापकमित्यर्थः । तत् । तृतीयाया अत्र लुक् । तेन स्तुतिरूपेण अग्नये । चतुर्थ्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । अग्निम् । कीदृशेन रूपेण । उच्यते । बृहत् । तृतीयाया अत्र लुक् । बृहता महता । अर्च पूजय । स्तुहीत्यर्थः । विभावसो । वसु धनम् । तत् विविधं भाति दीप्यते यस्य स विभावसुः । तस्य सम्बोधनं हे विभावसो । विविधदीप्तधन । कस्मात्पुनः स्तौमि । उच्यते । यस्मात् त्वद्रयिः । त्वदित्यत्र तृतीयाया लुक् । सहयोगलक्षणा तृतीया । त्वया सह धनम् । त्वद्वाजा त्वया सह वाजानि अन्नानि । उदीरते । उदित्येष समेत्येतस्य स्थाने । ईरयतिः गत्यर्थः । समीरते सङ्गच्छन्ति ।

एतदुक्तं भवति। यस्मादग्निना दत्तं धनं अन्नं च त्वया संगच्छते तस्मादग्निना दत्तेन धनेन अन्नेन च त्वमीश्वरोऽसीत्यर्थः। कथं पुनर्धनमन्नानि च त्वया संगच्छन्ते। उच्यते। महिषीव। यथा राजभार्या तेनैव राज्ञा सह संगच्छते तद्वत्संगच्छत इत्यर्थः ॥

अत्रिपुत्रा वसूयवः। अत्र प्रथमः पादः परोक्षस्तुतिः। शेषः प्रत्यक्षस्तुतिः। यत् स्तोत्रम्। वाहिष्ठं वोढृतमम्। स्तोत्रेण हि देवा आनीयन्ते। तत् अग्नये प्रेरयाम इति शेषः। बृहत् ब्रह्मेत्यर्थः। ब्रह्मेत्यन्नस्यापि नाम। अन्नं अर्च प्रयच्छ अस्मभ्यम्। अनेकार्था हि धातवो भवन्ति। हे विभावसो। महिषी। महिषशब्दो महन्नाम। महती। रयिः धनम्। त्वत् त्वत्तः। उदीरत इति उपरिश्रुतमिह विपरिणतं संबध्यते। उदीरते उद्गच्छति। इवेति पादपूरणः। त्वदेव वाजाः अन्नानि उदीरते उद्गच्छन्ति ॥ (६)

विशो विशो वो अतिथिं वाजयन्तः पुरुप्रियम्।
अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः ॥

गोपवनस्यार्षम्। विट् इति मनुष्यनाम। तस्मादियं षष्ठी। वीप्सायां च द्विर्वचनम्। मनुष्यस्य मनुष्यस्य। सर्वमनुष्याणामित्यर्थः। वः। बहुवचनमिदं एकवचनस्य स्थाने द्रष्टव्यम्। त्वाम्। अतिथिमतिथिस्थानीयम्। वाजयन्तः। बहुवचनमिदं एकवचनस्य स्थाने द्रष्टव्यम्। वाजयन्। पूजयन्नित्यर्थः। कीदृशं त्वाम्। पुरुप्रियं बहूनां यजमानानां इष्टम्। अग्निम्। वः त्वां दुर्यं यज्ञं गृहद्वारे भवम्। स्तुषे स्तौमि। केन पुनः स्तौमि। उच्यते। वचः वचसा। तथा शूषस्य बलस्य। मन्मभिः स्तुतिभिः। बलसम्बन्धिनीभिः स्तुतिभिरित्यर्थः ॥

गोपवनः। विशो विशः सर्वस्यापि विशः जनस्य। अतिथिं पुरुप्रियं अग्निं वः यूयम्। वाजयन्त अन्नमिच्छन्तः। परिचरन्ते इति शेषः। अग्नि

दुर्ये गृहे भवम् । वः युष्मदर्थम् । स्तुषे स्तुवे । वचः वचोभिः । तृतीया-बहुवचनस्य लुक् । मन्मभिः स्तुतिसाधनैः । मनिः स्तुतिकर्मा । शूषस्य शूषाय । सुखार्थम् ॥　　　　　　　　(७)

बृहद्वयो हि भानवेऽर्चा देवायाग्नये ।
यं मित्रं न प्रशस्तये मर्तासो दधिरे पुरः ॥

पूरोरार्षम् । बृहत् महत् । वयः अन्नम् । हीति पादपूरणः । अर्च पूजय । संस्कुर्वित्यर्थः । हे ऋत्विक् । भानवे देवाय अग्नये । त्रीण्येतानि तादर्थ्यचतुर्थ्यन्तानि । दीप्तिमतः देवस्य अग्नेरर्थायेत्यर्थः । कीदृशस्य अग्नेरर्थाय महदन्नं संस्करोमि । उच्यते । यमग्निं मित्रं न मित्रमिव । प्रशस्तये । चतुर्थ्येकवचनमिदं तृतीयाबहुवचनस्य स्थाने द्रष्टव्यम् । प्रशस्तिभिः स्तुतिभिः । स्तुवत इति वाक्यशेषः । मर्तासः मनुष्याः । दधिरे धारयन्ति । स्थापयन्तीत्यर्थः । क्व पुनः स्थापयन्ति । उच्यते । पुरः पूर्वस्यां दिशि आहवनीयात्मना ॥

पूरुरात्रेयः । बृहत् वयः अन्नं हविर्लक्षणम् । हीति पूरणः । भानवे दीप्ताय अग्नये । देवाय दानादिगुणकाय । अर्च प्रयच्छ । यं अग्निं मर्तासः मनुष्याः । पुरो दधिरे पुरस्कुर्वन्ति । प्रशस्तये प्रकृष्टस्तुत्यर्थम् । प्रकर्षेण अस्मदर्थं देवान् स्तौति अग्निः इति । मित्रं न सखायमिव कार्यसाधनार्थम् ॥　　　　(८)

अगन्म वृत्रहन्तमं ज्येष्ठमग्निमानवम् ।
यः स्म श्रुतर्वन्नार्क्ष्ये बृहदनीक इध्यते ॥

गोपवनस्यार्षम् । अगन्म । गमिरयं शुद्धोऽपि उपपूर्वार्थो द्रष्टव्यः । उपगच्छामः । आश्रयाम इत्यर्थः । कम् । अग्निम् । कीदृशमग्निम् । वृत्रहन्तमं शत्रूणां हन्तारम् । ज्येष्ठं अतिशयेन प्रशस्यं अतिशयेन वा

वृद्धम्। आनवम्। अनुर्मनुष्यः। तस्यापत्यम्। मनुष्येण हि मन्थनेन अग्निर्जन्यते। तेनासौ आनवः। तं आनवं मनुष्यस्यापत्यम्। किं च यः स्म इत्यत्र द्वितीयाया लुक्। स्मेति पादपूरणः। यं अग्निम्। श्रुतर्वन्। आमन्त्रितैकवचनमिदं प्रथमैकवचनस्य स्थाने द्रष्टव्यम्। श्रुतर्वा नाम ऋषिः। आर्क्ष्ये। आर्क्ष्य ऋक्षस्य पुत्रः। तस्मिन्नार्क्ष्ये। बृहत् महत्। शत्रोरनीकः अग्र्यः। प्रधानतम इत्यर्थः। इध्यते। कर्तर्ययं व्यत्ययेन द्रष्टव्यः। इन्धते। सन्दीपयतीत्यर्थः। वृत्रहन्तमं ज्येष्ठं अग्निं आनवं यं च श्रुतर्वा ऋषिः इन्धते तं वयं आश्रयाम इति समस्तार्थः॥

गोपवनः। अगन्म अगमाम उपगच्छामः वयम। वृत्रहन्तमं अतिशयेन तमोहन्तारम्। ज्येष्ठं प्रशस्यतमं अग्निम्। आनवम्। अनवो मनुष्याः। तेभ्यः हितम। यः अग्निः। स्मेति इध्यत इत्यनेन संबध्यते। श्रुतर्वन् श्रुतर्वणि राज्ञि। आर्क्ष्ये ऋक्षपुत्रे। बृहदनीकः बृहत्तेजाः। इध्यते स्म ऐध्यत। स्मयोगात् भूते अर्थे लट्॥ (९)

जातः परेण धर्मणा यत्सवृद्भिः सहाभुवः।
पिता यत्कश्यपस्याग्निः श्रद्धा माता मनुः कविः॥

वामदेवस्यार्षम्। जातः उत्पन्नः। परेण उत्कृष्टेन। धर्मणा कर्मणा यागाख्येन निमित्तभूतेन। कीदृशः पुनरग्निरुत्पन्नः उत्कृष्टेन कर्मणा निमित्तभूतेन। उच्यते। यत्। नपुंसकमिदं व्यत्ययेन पुंलिङ्गस्य स्थाने द्रष्टव्यम्। यः अग्निः। सवृद्भिः। सह ये वर्तन्ते गच्छन्ति ते सवृतः। तैः सवृद्भिः। सहयोगलक्षणैषा तृतीया। सहगामिभिः सह। आभुवः। येनैव कर्मणा निमित्तभूतेन उत्पन्नस्तस्मिन्नेव कर्मणि सहगमनैर्देवैः सह आभिमुख्येन भवतीत्यर्थः। यः कीदृशः अग्निः। उच्यते। पिता पालयिता। यत् यः।

कश्यपस्य ऋषेः । अग्निः श्रद्धा सत्यस्य धारयिता । माता वृष्टिप्रदानद्वारेण सर्वस्य जगतः निर्माता । मनुः ज्ञाता अधिकारस्य भक्तताया अभक्तताया वा । कविर्मेधावी । एवंलक्षणोऽग्निः नोऽस्मभ्यं धनप्रदः सर्वकामप्रदः पुत्र-पौत्रप्रदश्च ॥

वामदेवः । जातोऽसि त्वम् । परेण उत्कृष्टेन । धर्मणा कर्मणा हविर्वह-नादिना सार्धम् । यत् यदा । सवृद्धिः सहवर्तमानैः छन्दोभिः । सह अभुवः अजायथाः । कश्यपस्य अग्निः इत्येतयोः पदयोः विभक्त्योः परस्परं व्यत्ययः । यत् यस्मिन् जन्मनि । अग्नेः कश्यपः पिता आसीत् । श्रद्धादेवी माता । मनुः वैवस्वतः । कविः । कवतेः शब्दकर्मणः कविः । स्तोता आसीत् । तदा त्वं परेण धर्मणा जातः ॥ (१०)

प्रथमस्य नवम्या दशत्या

सोमं राजानं वरुणमग्निमन्वारभामहे ।
आदित्यं विष्णुं सूर्यं ब्रह्माणञ्च बृहस्पतिम् ॥

तापसस्यार्षम् । सोमम् । कीदृशं सोमम् । उच्यते । राजानम् । वरुणं अग्निं च । अन्वारभामहे आश्रयाम इत्यर्थः । न केवलं एतानेव देवताविशेषान् आश्रयामः । किं तर्हि । आदित्यं च विष्णुं च सूर्यं च ब्रह्माणं च बृहस्पतिं च ॥

अग्निस्तापसः । सोमं राजानं वरुणमग्निमन्वारभामहे आलम्बामहे आश्रि-तत्वेन । आदित्यमदितेः पुत्रम् । विष्णुं त्रिविक्रमम । सूर्यं ब्रह्माणं च इति

बृहस्पतेर्विशेषणम्। परिवृढं सर्वैः गुणैः इति बृहस्पतिर्ब्रह्मा। ब्रह्मसदन आसिष्यत इति निगमः। अथवा ब्रह्माणं च देवानां बृहस्पतिं च अन्वारभामहे ॥ (१)

इत एत उदारुहन् दिवः पृष्ठान्यारुहन्।
प्रभूर्जयो यथा पथा द्यामङ्गिरसो ययुः ॥

वामदेवस्यार्षम्। इतः पृथिवीलोकात्। एते उत् आरुहन् ऊर्ध्वं आरोहन्ति। क्व पुनः आरोहन्ति। उच्यते। दिवः पृष्ठानि द्युलोकस्य सम्बन्धीनि यानि विशिष्टस्थानानि तानि। आरुहन्। कीदृशानि पुनर्द्युलोकस्य सम्बन्धीनि विशिष्टस्थानानि आरोहन्ति। उच्यते। प्रभूर्जयः। भूः पृथिवी। तां ये पशुकर्मादिभिः कर्मभिः महावीराख्येन च कर्मणा प्रकर्षेण जितवन्तः ते प्रभूर्जयः। कथं पुनर्दिवः पृष्ठानि आरोहन्ति। उच्यते। यथा पथा यो यः तेषां पन्था तेन पथा कर्मणा। यथाबलमित्यर्थः। एवमुक्तेन मार्गेण। उत्। उदित्येषः ययुरित्यनेन सम्बन्धयितव्यः। द्यां द्युलोकम्। अङ्गिरसः ऋषयः। उद्ययुः ऊर्ध्वं गतवन्तः ॥

वामदेवः द्वयोः। इतो लोकात्। एते अङ्गिरसः। उदारुहन् ऊर्ध्वं आरुहन् यज्ञाद्यनुष्ठानैः। किमारुहन्। तदाह। दिवो लोकस्य। पृष्ठानि उपरिभागान्। आरुहन्। प्र प्रकर्षेण। भूर्जयः। भूर्जतेः पाककर्मणः भूर्जय इति रूपम्। हविषां पक्तारः अङ्गिरसः। उत् ऊर्ध्वाः सन्तः। द्यां दिवं लोकम्। ययुः जग्मुः। यथा पथा मार्गेण ऋजुना यथा ग्रामादीन् यान्ति तथा। बहुषु मन्त्रेषु ब्राह्मणेषु च अङ्गिरसां इतो लोकात् स्वर्गगमनं इन्द्रसाहचर्यं च श्रूयते ॥
(२)

राये अग्ने महे त्वा दानाय समिधीमहि।
ईडिष्वा हि महे वृषन् द्यावा होत्राय पृथिवी ॥

वामदेवस्यार्षम् । राये महे । द्वे अप्येते षष्ठ्यन्ते द्रष्टव्ये । रायः महतः । महतः धनस्येत्यर्थः । दानाय दानार्थम् । त्वां हे अग्ने समिधीमहि संदीपयाम इत्यर्थः । किं च ईडिष्व स्तुहीत्यर्थः । हीति पादपूरणः । महे होत्राय । हूयते तदिति होत्रं होमद्रव्यम् । द्वे अपि चैते तादर्थ्ये चतुर्थ्यौ । महतो होमद्रव्यस्यार्थायेत्यर्थः । होमग्रहणं चात्र प्रदर्शनार्थम् । सर्वासां दानादिक्रियाणां सम्बन्धिनो द्रव्यस्यार्थायेत्यर्थः । हे वृषन् वर्षितः । के पुनः स्तौमि महतो होमद्रव्यस्यार्थाय । उच्यते । द्यावापृथिवी द्यावापृथिव्यावित्यर्थः । एतदुक्तं भवति । होमादिक्रियार्थं द्रव्यं द्यावापृथिव्यावपि दत्तमित्यर्थः ॥

राये धनाय । महे महते । षष्ठ्यर्थे चतुर्थी । महतो धनस्य हविषः दानाय । अथवा अस्मभ्यं धनस्य दानाय । हे अग्ने त्वां समिधीमहि सन्दीपयामः समिद्भिः । ईडिष्व स्तुहि त्वम् । हि इति पूरणः । महे महते । होत्राय यज्ञाय । हे वृषन् वर्षितः । द्यावा पृथिवी इति परस्परापेक्षया द्विवचनम् । प्र मित्रयोर्वरुणयोः (ऋ. वे. ७. ६६. १) इति यथा । दिवं च पृथिवीं च स्तुहि ते उभे हविषा प्रीणयितुम् ॥ (३)

दधन्वे वा यदीमनु वोचद्ब्रह्मेति वेरु तत् ।
परि विश्वानि काव्या नेमिश्चक्रमिवाभुवत् ॥

सोमाहुतेरार्षम् । दधन्वे धारयति । अश्रुतस्य धारणं न संभवति । अतः धारणेनात्र श्रवणं लक्ष्यते । शृणोतीत्यर्थः । कः । अग्निः । वा इति पादपूरणः । किं पुनः शृणोत्यग्निः । उच्यते । यत् । ई अनु । द्वावपि पादपूरणौ । मदीयोऽन्तरात्मा वोचत् अवोचत् उक्तवान् । एतदुक्तं भवति । यदस्मदीयोऽन्तरात्मा स्तुतिरूपमुच्चारयति तदयमग्निः शृणोतीत्यर्थः । किं च ब्रह्म हविर्लक्षणान्यन्नानि । वेः । मध्यमपुरुषैकवचनमिदं प्रथमपुरुषैक-

वचनस्य स्थाने द्रष्टव्यम् । वेत्ति । जानातीत्यर्थः । उ तत् । अपि च परि । परीत्ययं अभुवदित्यनेन सम्बन्धयितव्यः । परिपूर्वश्च भवतिः परिग्रहे वर्तते । किं पुनः परिगृह्णाति । उच्यते । विश्वानि सर्वाणि । काव्या काव्यानि श्रुतिवचांसि हव्यानि वा । किमिव परिगृह्णाति । उच्यते । नेमिः चक्रमिव । रथचक्रस्य अन्त्याफलहकपाटिका नेमिरुच्यते । सा यथा रथचक्रं परिगृह्णाति तद्वत्परिगृह्णातीत्यर्थः ॥

भार्गवः सोमाहुतिः । दधन्वे धारयति हवींषि यजमानः । ईं एनम् । अनु उद्दिश्य । वाशब्दः समुच्चये । यच्च इद वचः वोचत् ब्रवीति । ब्रह्मा ब्रह्माणि स्तोत्राणि । शेः छन्दसि (पा. ६. १. ७०) इति शेः लुक् । इतिशब्दः प्रकारे । एवंप्रकाराणि अन्यान्यपि समिन्धनादीनि करोति इति यत् तत् सर्वं वेः वेत्ति । उ एव । अग्निः इति शेषः । किंच पर्यभुवत् । परिपूर्वो भवतिः परिग्रहार्थः । परिगृह्णाति व्याप्नोति । विश्वानि काव्यानि कवेः आत्मनः कृत्यानि । नेमिः चक्रमिव यथा चक्रस्य नेमिः बाह्यवलयं चक्रं परिगृह्णाति तद्वत् ॥ (४)

प्रत्यग्ने हरसा हरः शृणाहि विश्वतस्परि ।
यातुधानस्य रक्षसो बलं न्युब्ज वीर्यम् ॥

पायोरार्षम् । प्रतीत्ययं शृणाहीत्याख्यातेन सम्बन्धयितव्यः । हे अग्ने । हरसा स्वेन ज्योतिषा । यः अस्मान् हिनस्ति तस्य यत् हरः ज्योतिः । तत् प्रतिशृणाहि प्रहिंसेत्यर्थः । विश्वतः सर्वतः । परीति पादपूरणः । किं च यातुधानस्य यातुधाननाम्नः । रक्षसः स्वभूतम् । बलं सेनालक्षणम् । न्युब्ज आत्मीयेन बलेन ऋजुं कुरु । न केवलं बलम् । किं तर्हि । वीर्यं शारीरं च यद्बलं मन्त्रौषधिलक्षणं वा तदपि ऋजुं कुर्वित्यर्थः ॥

पायुः । प्रतिशृणाहि । शॄ हिंसायाम् । हे अग्ने हरसा बलेन स्वेन । हरः हरणशीलं रक्षः । विश्वतः सर्वतः । परि परिगतम् । यातुधानस्य ।

यातुर्हिंसा। हिंसाया निदानभूतस्य विधातुः वा। रक्षसः राक्षसस्य। रक्षित-व्यमस्मदादीनि इति रक्षः इति। बलं न्युब्ज नितरां बाधस्व। वीर्यं च तस्य न्युब्ज। उब्जतिर्वधकर्मा ॥ (५)

त्वमग्ने वसूँ रिह रुद्राँ आदित्याँ उत।
यजा स्वध्वरं जनं मनुजातं घृतप्रुषम् ॥

प्रस्कण्वस्यार्षम्। हे अग्ने। वसून् देवताविशेषान्। इह मम यज्ञे। रुद्रान् आदित्यान् उत अपि। यज। न केवलं एतानेव देवताविशेषान् यज। किं तर्हि। स्वध्वरं शोभनयज्ञम्। जनं देवजनम्। कीदृशं जनम्। उच्यते। मनुजातम्। मनुः प्रजापतिः। तस्य सकाशाद्यो जातः स मनुजातः। तं मनुजातम्। प्रजापतेः सकाशाज्जातमित्यर्थः। घृतप्रुषम्। घृतमुदकम्। तत् यः प्रुषति सिञ्चति रक्षति स घृतप्रुट्। तं गृतप्रुषम्। उदकस्य वर्षितारमित्यर्थः। अथवा आज्यं घृतम्। तेन यः प्रुष्यते सिच्यते इज्यते स घृतप्रुट्। तं घृतप्रुषम्। घृतेन यष्टव्यमित्यर्थः ॥

इति माधवाचार्यकृते छन्दसिकाभाष्ये प्रथमः प्रपाठकः

प्रस्कण्वः काण्वः। त्वं हे अग्ने वसून् देवान्। इह यज्ञे। रुद्रान् आदित्यान् उत अपि। यज प्रीणय हविर्भिः। स्वध्वरं शोभनैः यज्ञैः यजनीयम्। जनं जनसमूहम्। दैव्यं देवसंबन्धिनम्। मनुजातं मनुष्येषु प्रादुर्भूतम्। घृतप्रुषं घृतं प्रति क्षरन्तं गच्छन्तम्। प्रुषिः क्षरतिकर्मा। स्वध्वरं जनमिति स्वादीनामेव शब्दान्तरेण अभिधानम् ॥ (६)

प्रथमस्य दशमी दशत्या

प्रथमः प्रपाठकः

द्वितीयः प्रपाठकः

पुरु त्वा दाशिवां वोचेऽरिरग्ने तव स्विदा ।
तोदस्येव शरण आ महस्य ॥

दीर्घतमस आर्षम् । पुरु बहु हविः । त्वद्देवत्यं अन्यदेवत्यं च । दाशिवान् तुभ्यं ददत् । त्वां वोचे ब्रवीमि । सामर्थ्यादागच्छेति । आह्वयामीत्यर्थः । कस्मात्पुनः आह्वयामि । उच्यते । यस्मात्त्वं अरिः ईश्वरः सर्वहविषां त्वद्देवत्यानां अन्यदेवत्यानां च । त्वय्येव हूयमानत्वात् । अहमपि च दीर्घतमा नाम ऋषिः । हे अग्ने । तव । स्वित् आ इत्येतौ निपातौ एवशब्दस्यार्थे द्रष्टव्यौ । तवैव स्वभूतः । कथम् । उच्यते । तोदस्येव । तोदशब्देनात्र गृहस्थ उच्यते । गृहस्थस्येव । महस्य महतः स्वभूते । शरणे गृहे यावत् किंचित्सर्वस्वं भवति तद्वदहमपि तव स्वभूतः ॥

उष्णिहोऽष्टादशाग्नेय्यः पुरुत्वेत्यत्र पञ्चमी ।
पावमानी ततः पश्चादुतस्येत्यदितेः स्तुतिः ॥
अष्टान्या ककुभस्ता अप्युष्णिग्भेदा इति स्थितिः ।

दीर्घतमा औचथ्यः । पुरु बहु हविः । दाशिवान् । दाशतेः । दाशिवान् प्रयच्छन् । अहं त्वा त्वाम् । वोचे स्तौमि । वचेरिदं रूपम् । अर्तेररिः । गच्छन् अन्या देवताः । अन्यदेवताभ्य आहुतीः प्रयच्छन् इत्यर्थः । तव ।

स्वित् एवार्थे। तवैव दाशिवान् भवतीत्यर्थः। आ इति अभि इत्यर्थे। व्यवहितेनापि वोच इत्यनेन संबध्यते। अभिवोचे इति। तोदस्य। तोदो गृहस्थः। तुद्यते परिजनैरिति। यद्वा तुदति ददाति धनानि इति। तस्य इव शरणे गृहे। आ आगतः जनः। महस्य। महतेर्दानकर्मणः। महतो दातुर्गृहे आगतो धनार्थी यथा तं स्तौति तद्वत् त्वां वोचे॥ (१)

प्र होत्रे पूर्व्यं वचोऽग्नये भरता बृहत्।
विपां ज्योतींषि बिभ्रते न वेधसे॥

विश्वामित्रस्यार्षम्। प्रेत्ययमुपसर्गो भरत इत्याख्यातेन सम्बन्धयितव्यः। होतृशब्दः आह्वातृवचनः। तस्मादियं तादर्थ्यचतुर्थी। अग्नय इत्येतदपि तादर्थ्यचतुर्थ्यन्तं होत्रे इत्येतेन समानाधिकरणम्। तेनायमर्थः। देवानामाह्वातुरग्नेरर्थाय। पूर्व्यं पूर्वं चिरन्तनम्। अकृतकमित्यर्थः। वचः स्तुतिलक्षणं वचनम्। मदीया ऋत्विजः पुत्रादयो वा प्रभरतं प्रहरत प्रापयत। प्रोच्चारयतेत्यर्थः। कीदृशं पुनर्वचनं प्रोच्चारयामः। उच्यते। बृहत् दीर्घमित्यर्थः। विपां व्यापृणाम्। कस्य। सामर्थ्यात्तमसाम्। ज्योतींषि। द्वितीयाबहुवचनमिदं षष्ठीबहुवचनस्य स्थाने द्रष्टव्यम्। ज्योतिषाम्। बिभ्रते धारयित्रे। इदमपि तादर्थ्ये चतुर्थी। तमसां व्यापृणां ज्योतिषां धारयितुरर्थाय। ज्योतिष्मतः अग्नेरर्थायेत्यर्थः। न वेधसे। इयमपि तादर्थ्ये चतुर्थी। नकारः पादपूरणः। मेधाविनः अग्नेरर्थाय इत्यर्थः॥

विश्वामित्रः। प्रभरत प्रणयत। होत्रे अग्नये। पूर्व्यं पुरातनम्। वचः मन्त्ररूपम्। बृहत् महत्। विपां वाचां विप्राणां वा। ज्योतींषि बिभ्रते धारयते पोषयते। वेधसे विधात्रे। नेति सम्प्रत्यर्थे॥ (२)

अग्ने वाजस्य गोमत ईशानः सहसो यहो ।
अस्मे देहि जातवेदो महि श्रवः ॥

गौतमस्यार्षम् । हे अग्ने वाजस्य अन्नस्य । कीदृशस्यान्नस्य । उच्यते । गोमतः गोभिः सहितस्य । त्वं ईशानः ईश्वरः इत्यर्थः । हे सहसः यहो बलस्य पुत्र । यत एवमतो ब्रवीमि । अस्मे अस्मभ्यम् । देहि धेहि । हे जातवेदः जातप्रज्ञान उत्पन्नधन वा । किं पुनर्ददामि । उच्यते । महि महत् । श्रवः अन्नं कीर्तिं वा ॥

गौतमः । हे अग्ने वाजस्य अन्नस्य । गोमतः गोसहितस्य । ईशानः त्वम् । हे सहसो यहो बलस्य पुत्र । यहुः पुत्रः । बलान्मथ्यमानो विजायते (ऐ. ब्रा. ८. २८) इति हि ऐतरेयकम् । अस्मे अस्मभ्यम् । देहि प्रयच्छ । हे जातवेदः । महि महत् । श्रवः अन्नम् ॥ (३)

अग्ने यजिष्ठो अध्वरे देवान् देवयते यज ।
होता मन्द्रो विराजस्यति स्रिधः ॥

विश्वामित्रस्यार्षम् । हे अग्ने । यजिष्ठः इत्येतद्धोता मन्द्रो विराजति इत्यनेन सम्बन्धयितव्यः । अध्वरे यज्ञे । देवान् इन्द्रादीन् । देवयते । देवान् यष्टुमिच्छति यः स देवयतिः । तस्मै देवयते । तादर्थ्यलक्षणैषा चतुर्थी । देवान् यष्टुमिच्छतः ममार्थाय । यज । एवमयमर्धर्चः आमन्त्रण-योगान्मध्यमपुरुषयोगाच्च प्रत्यक्षकृतो मन्त्रः । न च यजिष्ठः होता मन्द्र इत्येवमादीनि आमन्त्रितानि । अतो यत्तच्छब्दावध्याहृत्यैकवाक्यतां नेयानि । यस्त्वं यजिष्ठः अतिशयेन यष्टा । यश्च होता आह्वाता । यश्च त्वं मन्द्रः स्तुत्यः । यश्च त्वं विराजसि विविधं दीप्यसे । कथं पुनः राजसि । उच्यते ।

अति सृधः अतीत्य शोषयितॄन् रक्षःपिशाचादीन् । स देवान् यष्टुमिच्छतो ममार्थाय देवान् यज ॥

विश्वामित्रः । हे अग्ने यजिष्ठः यष्टृतमः त्वम् । अध्वरे अस्मिन् । देवान् यज देवयते देवानिच्छते यजमानाय । होता आह्वाता देवानाम् । मन्द्रः । मदेः स्तुतिकर्मणः । स्तुत्यः त्वम् । सृधः हिंसकान् शत्रून् । अति अतीत्य विराजसि ॥ (४)

जज्ञानः सप्त मातृभिर्मेधामाशासत श्रिये ।
अयं ध्रुवो रयीणां चिकेतदा ॥

त्रितस्यार्षम् । जज्ञानः । प्रथमैकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् । जज्ञानस्य । यजमानस्येत्यर्थः । सप्त मातृभिः । तृतीयाबहुवचनमिदं प्रथमाबहुवचनस्य स्थाने द्रष्टव्यम् । सप्तसङ्ख्याकाः मातरः निर्मातारः आदित्याद्याः । अथवा सप्त मातरः सप्त छन्दांसि । अथवा सप्त होत्राः । अथवा सप्त सोमसंस्थाः । ताभिः सप्त मातृभिः । मेधां प्रज्ञाम् । आशासत प्रार्थितवन्त इत्यर्थः । किमर्थम् । उच्यते । श्रिये तस्यैवाग्नेः श्रियोऽर्थम् । न केवलं मेधां प्रार्थितवन्तः । किं तर्हि । अयमग्निः । ध्रुवः शाश्वतः । नित्य इत्यर्थः । रयीणां धनानां च । दाता भवत्विति वाक्यशेषः । किमेवमज्ञात्वैव दाता भवतु । उच्यते । आचिकेतत् आभिमुख्येन चिकेतत् । जानात्वित्यर्थः । यस्य यावद्दातव्यम् । अथवा यानि द्रव्याणि जानाति तेषां सर्वेषां दाता भवत्वित्येतत्प्रार्थयते ॥

त्रितः । जज्ञानः जनितः अभिष्टुतः । जनेर्लिटः कानचि रूपं जज्ञान इति । सप्त सप्तभिः सर्पणशीलाभिः । मातृभिः अद्भिः । वसतीवरीभिः संसृष्टाः अभिषूयन्ते सोमाः । मेधा प्रज्ञां यज्ञादिविषयाम् । आशासत आशास्ति विधत्ते ।

यजमानानां श्रिये श्र्यर्थम् । अयं ध्रुवो निश्चलः सोमः । रयीणां धनानाम् । धनानीत्यर्थः । आचिकेतत् । अभिज्ञापयतु प्रकाशयतु । प्राणा शिशुर्महीनाम् (सा. वे. ६. ८. ९) इति पावमानात् सूक्तात् एषा उद्धृता ॥ (५)

उत स्या नो दिवा मतिरदितिरूत्या गमत् ।
सा शंताता मयस्करदप स्रिधः ॥

इरिम्बिठिर्नाम ऋषिः । तस्येदमार्षम् । उत अपि अग्नेः प्रसादेन स्य स्यामः । नः अस्माकम् । षष्ठीनिर्देशाज्ज्ञे इति वाक्यशेषः । दिवा अहनि । मतिर्ज्ञात्री । अदितिर्देवमाता । कीदृशी देवमाता । उच्यते । ऊती पालयित्री । आगमत् आगच्छत् । एत्य च सा शंताता । शं सुखम् । तत् या करोतीति शिवशमरिष्टस्य करे (पा. ४. ४. १४३) इत्येवं तातिप्रत्ययः । शंताता सुखस्य कर्तृ इत्यर्थः । मयस्करत् सुखं करोतु । कथं पुनः सुखं करोतु । उच्यते । अप स्रिधः अप शोषयितॄन् रक्षःपिशाचादीन् । घ्नन्तीति वाक्यशेषः ॥

इरिम्बिठिः । उतेत्ययं दिवेत्यस्योपरि संबन्धनीयः स्यात् । त्यच्छब्दोऽपि तच्छब्देन समानार्थः । तस्य प्रथमैकवचने रूपं स्येति । प्रसिद्धा सा देवानां माता । नः अस्मान् । दिवा उत दिवापि । नक्तमपीति अपिशब्दात् ज्ञायते । अदितिर्नो दिवा पशुमदितिर्नक्तमद्वयाः (ऋ. वे. ८. १८. ६) इति पूर्वस्यामृचि विद्यते । मतिः मननीया स्तुत्या । अदितिः देवी । ऊती ऊत्या रक्षया सह । आगमत् आगच्छतु । सा अदितिः शंताता शंतातौ शंकरे यज्ञे । शिवशमरिष्टस्य करे (पा. ४. ४. १४३) इति शंशब्दात् तातिप्रत्ययः । मयः सुखम् । करत करोतु । अपबाधतां स्रिधः हिंसकान् शत्रून् ॥ (६)

ईडिष्वा हि प्रतीव्यं यजस्व जातवेदसम् ।
चरिष्णुधूममगृभीतशोचिषम् ॥

विश्वमनसः आर्षम् । हे मदीय अन्तरात्मन् । अग्निं ईडिष्व । स्तुहीत्यर्थः । हीति पादपूरणः । कीदृशमग्निम् । उच्यते । प्रतीव्यं महाभूतत्वात्सर्वगतम् । न केवलं स्तुह्येव । किं तर्हि । यजस्व यज च । कीदृशमग्निम् । उच्यते । जातवेदसमुत्पन्नज्ञानं उत्पन्नधनं वा । चरिष्णुधूमम् । चरणशीलः चरिष्णुर्धूमो यस्य स चरिष्णुधूमः । तं चरिष्णुधूमम् । अगृभीतशोचिषम् । हृग्रहोर्भश्छन्दसि हस्य (वा. ८. २. ३२) इति हकारस्य भकारः । अगृहीता अनिरुद्धा अप्रतिरुद्धा दीप्तिर्यस्य सोऽगृहीतशोचिः । तं अगृहीतशोचिषम् । अगृहीतदीप्तिमित्यर्थः ॥

द्वयोर्विश्वमना वैयश्वः । यजस्व जातवेदसमग्निमिति ऋषिरात्मानमेव प्रेषयते । चरिष्णुधूमं चरणशीलं धूमम् । अगृभीतशोचिषं अगृहीतार्चिषं कैश्चिदपि ॥ (७)

न तस्य मायया चन रिपुरीशीत मर्त्यः।
यो अग्नये ददाश हव्यदातये ॥

विश्वमनस आर्षम् । न तस्य यजमानस्य । मायया प्रज्ञया च । नशब्दः पादपूरणः । रिपुः शत्रुः ईशीत । लडर्थे लिङ्प्रत्ययः । ईशीत इशते । मर्त्यः मनुष्यः । यः किं करोति यजमानः । उच्यते । यः अग्नये ददाश ददाति । किम् । सामर्थ्याद्धवींषि । कथं पुनर्ददाति । उच्यते । हव्यदातये । चतुर्थ्येकवचनमिदं तृतीयाबहुवचनस्य स्थाने द्रष्टव्यम् । हव्यदातिभिः हविर्दानैः । एतदुक्तं भवति । हविषां यानि दानानि याज्यानुवाक्यवन्ति तैर्यो ददाति । यः अग्नये यागं करोतीत्यर्थः ॥

तस्य यजमानस्य । न ईशीत मर्त्यः नरः । न नियामको भवेत् । मायया वञ्चनेन । चनेति चार्थे । रिपुः शत्रुः मर्त्यः । यो जनः अग्नये च ददाश ।

दाशतिर्दानकर्मा प्रीणनकर्मा च । प्रीतिमुत्पादयति स्तोत्रैः । हव्यदातये हव्यदानार्थम् ॥ (८)

अप त्यं वृजिनं रिपुं स्तेनमग्ने दुराध्यम् ।
दविष्ठमस्य सत्पते कृधी सुगम् ॥

ऋजिश्वन आर्षम् । अपेत्युपसर्गश्रवणात् त्यमिति च कर्मश्रुतेः क्रियापदमध्याह्रियते । अपनय । त्यम् । त्यशब्दस्तच्छब्दपर्यायः । तच्छब्दश्रुतेश्च योग्यार्थसम्बन्धो यच्छब्दोऽध्याहर्तव्यः । यदस्मासु व्यवस्थितं तत् वृजिनं पापम् । रिपुं शत्रुं च । स्तेनं चोरं च । दुराध्यम् । कुत्सितं आभिमुख्येन ध्यानं यस्य स दुराध्यः । तं दुराध्यं कुत्सितध्यानम् । पापसङ्कल्पमित्यर्थः । किं च दविष्ठं अतिशयेन दूरवन्तम् । अत्यन्तं दूरस्थमित्यर्थः । अस्य च रिपोः स्तेनस्य च । सत्पते सतां पालयितः । कृधि कुरु । किं पुनर्दूरस्थं करोमि । उच्यते । सुगम् । सुगशब्दः सुखशब्दपर्यायः । अथवा सुगमिति सुगतिरुच्यते । सुगतिं स्वर्गप्राप्तिम् । यथा सुखं स्वर्गं वा न प्राप्नोति तथा कुर्वित्यर्थः ॥

ऋजिश्वा भारद्वाजः । अप इत्ययं अस्येत्युपरितनेन संबध्यते । अपास्य अपक्षिप । त्यं तम् । हे अग्ने वृजिनं कुटिलम् । रिपुं बाधकम् । स्तेनम् । स्त्यानमस्मिन्न इति स्त्येनः । तम् । दुराध्यं दुष्टा आधिराराधनं यस्य तम् । दविष्ठं दूरतमम् । अपास्य इति संबन्धः । हे सत्पते सतामार्याणां पालयितः । कृधि कुरु । सुगं सुखेन गम्यं पन्थानम् ॥ (९)

श्रुष्ट्यग्ने नवस्य मे स्तोमस्य वीर विश्पते ।
नि मायिनस्तपसा रक्षसो दह ॥

विश्वमनसः आर्षम् । श्रुष्टीति क्षिप्रनाम । क्षिप्रम् । हे अग्ने नवस्य अचिरकृतस्य । मे मम स्वभूतस्य । स्तोमस्य । बलेनेति वाक्यशेषः । वीर विक्रान्त । विश्पते । विशो मनुष्याः । तेषामधिपते । नि । नीत्ययं दहेत्यनेन सम्बन्धयितव्यः । मायिनः मायावन्तः । तपसा रक्षसः राक्षसान् । निदह नियमेन दह । विनाशयेत्यर्थः ॥

विश्वमना एव । श्रुष्टी प्रीत्या । हे अग्ने नवस्य अन्यैरकृतपूर्वस्य । मे मदीयस्य । स्तोमस्य स्तोत्रस्य । श्रुष्ट्या वृद्धः सन् इति शेषः । हे वीर हे विश्पते विशां पते । विश्वस्य पते (नि ९. २८) इति यास्कः । निदह मायिनः वञ्चनावतः । रक्षसः राक्षसान् । सपसा तापकेन तेजसा ॥ (१०)

द्वितीये प्रथमा दशत्या

प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे ।
उपस्तुतासो अग्नये ॥

सौभरेरार्षम् । प्रेत्ययमुपसर्गो गायत इत्याख्यानेन सम्बन्धयितव्यः । मंहिष्ठाय अतिशयेन दातुरर्थाय । प्रगायत प्रकर्षेण गायत । उच्चारयत स्तुतीः । ऋताव्ने । ऋतो यज्ञः उदकं वा । तद्यस्यास्ति स ऋतावान् उदकवान् यज्ञवान् वा । तस्मै ऋताव्ने । उदकवतो यज्ञवतो वा अर्थाय । बृहते महते । प्रवृद्धायेत्यर्थः । किंच शुक्रशोचिषे । शोचिर्दीप्तिः । शुक्रः शोचिर्यस्य स शुक्रशोचिः । तस्मै शुक्रशोचिषे । सुदीप्तेरर्थायेत्यर्थः । उपस्तुतासः । उपगम्य ये स्तुवन्ति ते उपस्तुतासः स्तोतारः । तेषां सम्बोधनं हे उपस्तुतासः । कस्य पुनरर्थाय । उच्यते । अग्नये अग्नेरर्थायेत्यर्थः ॥

सौभरिः । प्रगायत मंहिष्ठाय दानृतमाय । ऋताव्ने यज्ञपतये । बृहते महते । शुक्रचोचिषे शुभ्रदीप्तये । अग्नये उपस्तुतासः उपस्तोतारः ॥　　(१)

प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः ।
यस्य त्वं सख्यमाविथ ॥

सौभरेरार्षम् । प्रेत्ययमुपसर्गः तरतीत्याख्यातेन सम्बन्धयितव्यः । स यजमानः । हे अग्ने । तव स्वभूताभिः । ऊतिभिः पालनैः । तृतीयानिर्देशात्पाल्यमान इति वाक्यशेषः । कीदृशाभिरूतिभिः पाल्यमानः । उच्यते । सुवीराभिः शोभनैर्वीरैः पुत्रैः पौत्रैश्च उपेताभिः । प्रतरति । तरतिर्वृद्ध्यर्थः । प्रकर्षेण वर्धते इत्यर्थः । वाजकर्मभिः । वाजमन्नम् । तस्य कर्म उत्पत्तिः । अन्नस्योत्पादयितृभिरित्यर्थः । यः कीदृशो यजमानः । उच्यते । यस्य त्वं सख्यं स्तुत्यस्तोतृलक्षणम् । आविथ पालयसीत्यर्थः । एतदुक्तं भवति । यस्त्वां स्तौति स पालनैः पौत्रैः अन्नोत्पादैश्च वर्धते ॥

सौभरिर्द्वयोः । प्रतरति वर्धते । हे अग्ने तव ऊतिभिः रक्षोभिः । सुवीराभिः शोभनपुत्रपौत्रप्रदाभिः । वाजकर्मभिः । वाजमन्नं कर्म कार्यं यासां ताभिः । यस्य सख्यं सखित्वम् । आविथ ररक्षिथ रक्षसि । अवतिः गतिकर्मा वा । यस्य सख्यं त्वं आविथ प्राप्नोषि ॥　　(२)

तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे । देवत्रा हव्यमूहिषे ॥

सौभरेरार्षम् । हे मदीय अन्तरात्मन् । तं अग्निम् । गूर्धय । गूर्धयतीत्यर्चतिकर्मसु पठितत्वात् स्तुत्यर्थः । स्तुहीत्यर्थः । कमिव स्तौमि । उच्यते । स्वः । लुप्तोपममिदं द्रष्टव्यम् । स्वरिव । आदित्यमिवेत्यर्थः । नरं नराकारम् । तमिति तच्छब्दश्रुतेर्यच्छब्दोऽध्याहर्तव्यः । यं देवासः

देवाः । देवं दानादिगुणयुक्तम् । अरतिं अलमतिं पर्याप्तमतिम् । सर्वज्ञमित्यर्थः । अथवा देवान् यजमानांश्च प्रति गन्तारम् । दधन्विरे धारितवन्तः । स्थापितवन्त इत्यर्थः । क्व । सामर्थ्यात्पृथिवीलोके । यश्च देवत्रा । देवमनुष्यपुरुषपुरुमर्त्येभ्यः (पा. ५. ४. ५६) इत्येवमयं द्वितीयान्तात् त्राप्रत्ययः । देवान् प्रति । हव्यं ऊहिषे । वह प्रापण इत्येतस्यैतद्रूपं भवति । मध्यमपुरुषैकवचनं च प्रथमपुरुषैकवचनस्य स्थाने द्रष्टव्यम् । वहति ऊढवान्वा ॥

तं अग्निं गृधय स्तुहि हे सौभरे । स्वर्णरं सर्वस्य नेतारम् । स्वःशब्दः सर्वशब्दपर्यायः । अपि वा स्वर्गस्य नेतारम् । यजमानाना इति वा । तमेव देवं अरति गन्तारम् । देवासः स्तोतारः । दधन्विरे धारयन्ति । अथ प्रत्यक्षस्तुतिः । हे अग्ने देवत्रा देवेषु । हव्यं ऊहिषे हव्यं वहसि त्वम् ॥ (३)

मा नो हृणीथा अतिथिर्वसुरग्निः पुरुप्रशस्त एषः ।
यः सुहोता स्वध्वरः ॥

सौभरेरार्षम् । मा इत्ययं प्रतिषेधः हृणीथा इत्येतेन सम्बन्धयितव्यः । हे अग्ने । नः अस्माकम् । मा हृणीथाः । हृणिः क्रुध्यतिकर्मसु पाठात् क्रोधार्थः । मा क्रोत्सीः । मध्यमपुरुषयोगात्प्रत्यक्षकृतो मन्त्रः । न च अतिथिरित्यादीनि आमन्त्रितानि । अतो यत्तच्छब्दावध्याहृत्यैकवाक्यतां नेयानि । यस्त्वमतिथिस्थानीयः । यश्च वसुः प्रशस्तः धनवान्वा । अग्निः । यश्च पुरुप्रशस्तः बहुभिः स्तोतृभिः स्तुत इत्यर्थः । यश्च एषः । एषृ गतावित्यस्यैतद्रूपम् । गन्ता । यश्च सुहोता शोभनः आह्वाता । यश्च स्वध्वरः शोभनयज्ञः । सः अस्माकं मा क्रोत्सीः ॥

सौभरिः । मा हृणीथाः । हृणातिः क्रोधकर्मा । अन्तर्णीतण्यर्थोऽयम् । मा चुक्रुधः । अग्निं नः अस्माकं सर्वेषाम् । अतिथिं पूज्यम् । हे प्रयोग यथा

न क्रुध्येत् तथा परिचर इति । अथवा हृणीथा इति पुरुषव्यत्ययः । मास्मानग्निः हृणीथाः इति । अतिथिमिति विभक्तिव्यत्ययः । अतिथिः अग्निः इति । वसुः व्याप्तः । पुरुप्रशस्तः । बहुभिः स्तुतः एषः । यः सुहोता सुष्ठु ह्वाता देवानाम् । स्वध्वरः सुयज्ञश्च भवति । यः ईदृशः अग्निः तं मा हृणीथाः । सः मा हृणीतां इति वा ॥ (४)

भद्रो नो अग्निराहुतो भद्रा रातिः सुभगा भद्रो अध्वरः ।
भद्रा उत प्रशस्तयः ॥

सौभरेरार्षम् । भद्रः कल्याणः । नः अस्माकम् । अग्निः आहुतः आभिमुख्येन स्थित्वा हुतः मर्यादया वा हुतः । भवत्विति वाक्यशेषः । भद्रा रातिः यदप्येतत् हविर्दानं एतदपि भद्रं भवतु । हे सुभग शोभनधन अग्ने । भद्रो अध्वरः योऽप्ययं प्रक्रान्तो यज्ञः अयमपि भद्रो भवतु । उत अपि च भद्राः प्रशस्तयः स्तुतयो भवन्तु ॥

सौभरिरेव तिसृणाम् । भद्रो नः कल्याणकरो भवतु अस्माकम् । अग्निः आहुतः अभिहुतः हविर्भिः । अथ प्रत्यक्षस्तुतिः । भद्रा भवतु रातिः देवानां हविर्वा । सुभग सुधन अग्ने । भद्रो भवतु अध्वरो यज्ञः । उत अपि च भद्रा भवन्तु प्रशस्तयः स्तुतयः ॥ (५)

यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यम् ।
अस्य यज्ञस्य सुक्रतुम् ॥

सौभरेरार्षम् । हे अग्ने यजिष्ठं अतिशयेन यष्टारं देवानाम् । त्वा त्वाम् । ववृमहे प्रार्थयामः । देवं देवत्रा देवेषु । देवानां मध्ये इत्यर्थः । कीदृशं त्वां प्रार्थयामहे । उच्यते । होतारं आह्वातारं देवानाम् ।

अमर्त्यं मरणवर्जितम् । अस्य प्रकान्तस्य यज्ञस्य । परिसमाप्तिमिति वाक्यशेषः । कीदृशं त्वां परिसमाप्तिं प्रार्थयामहे । उच्यते । सुक्रतुं सुकर्माणं सुप्रज्ञं वा ॥

यजिष्ठं यष्टृतमम् । त्वा त्वाम । ववृमहे वृणीमहे । होतारं होतृत्वेन । देवं दीप्तम् । देवत्रा देवेषु दानादिगुणकेषु । अमर्त्यं अमरणधर्माणम् । अस्य यज्ञस्य होतारं वृणीमहे इति संबन्धः । सुक्रतुं सुकर्माणम् ॥ (६)

तदग्ने द्युम्नमाभर यत्सासाहा सदने कंचिदत्रिणम् ।
मन्युं जनस्य दूढ्यम् ॥

सौभरेरार्षम् । तत् हे अग्ने । द्युम्नं यशः अन्नं वा । आभर आनय । देहीत्यर्थः । कीदृशं पुनः अन्नं आभरामि । उच्यते । यत् सासाहा । षह मर्षणे इत्यस्याभिभवनार्थीयस्येदं रूपम् । अभिभवति । सदने यज्ञगृहे । किंचित् अत्रिणं अत्तारं विनाशयितारं रक्षःपिशाचादिकम् । न केवलं रक्षः-पिशाचादीन् यदभिभवति । किं तर्हि । मन्युं क्रोधं च । जनस्य । कीदृशस्य जनस्य । उच्यते । दूढ्यम् । द्वितीयैकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् । दूढ्यस्य दुर्धियः । पापबुद्धेरित्यर्थः ॥

तत् द्युम्नं तेजः । हे अग्ने आभर आहर अस्मभ्यम् । यत् द्युम्नं ससाह । सहेरभिभवार्थात् लिङर्थे लिट् । अभिभवेत् । सदने गृहे । किञ्चिदपि सर्वमपि । अत्रिणं अदनशीलं राक्षसम् । मन्युम् । मन्यते अभिमन्यते हन्तुमिति मन्युः । जनस्य प्राणिजातस्य मन्युम् । दूढ्यं दुर्धियं दुष्टाभिध्यानं वा ॥ (७)

यद्वा उ विश्पतिः शितः सुप्रीतो मनुषो विशे ।
विश्वेदग्निः प्रति रक्षांसि सेधति ॥

विश्वमनस आर्षम् । यत् । सप्तम्या अत्र लुक् द्रष्टव्यः । यदा । वा उ । द्वावपि पादपूरणौ । विशो मनुष्याः । तेषामधिपतिः स्वामी विश्पतिः । शितः । शो तनूकरणे इत्यस्यैतद्रूपम् । श्यतिश्च संस्कारार्थः । शितः संस्कृत इत्यर्थः । केन । सामर्थ्यात्स्तुतिभिर्हविर्भिश्च । सुप्रीतः सुष्ठु परितृप्त इत्यर्थः । मनुषः मनुष्यस्य मम विश्वमनसः । यदेति वचनात्तदेत्यध्याहर्तव्यम् । तदा विशे । विट् इति मनुष्यनाम । तस्मादियं तादर्थ्ये चतुर्थी । मम स्वभूतस्य मनुष्यस्य पुत्रस्यार्थाय । मम पुत्रादीन् पालयितुमित्यर्थः । विश्वा विश्वानि । इदिति पादपूरणः । अग्निः । प्रतिशब्दः पादपूरणः । रक्षांसि सेधति नाशयतीत्यर्थः ॥

विश्वमनाः । यत् यदा । वै उ इतीमौ पादपूरणौ । विश्पतिः विशां पतिः विश्वस्य पतिर्वा अग्निः । शितः तीक्ष्णीकृतस्सन्नाधानादिभिः । सुप्रीतो भवति । मनुषो मनुष्यस्य यजमानस्य । विशे परिजनाय । सुप्रीत इति सम्बन्धः । तदा विश्वा विश्वानि । रक्षांसि । प्रतिषेधति प्रतिषेधते । इत् एव । इति ॥

इत्थं चतुर्दशशतमृच आग्नेयपर्वणि ।
व्याख्यच्छ्रीभरतस्वामी श्रीरङ्गायतने वसन् ॥　　　　(८)

द्वितीये द्वितीया दशत्या
(आग्नेयं द्वादश ।)
आग्नेयपर्व समाप्तम्

तद्वो गाय सुते सचा पुरुहूताय सत्वने । शं यद्गवे न शाकिने ॥

इदानीमैन्द्रं उच्यते । भरद्वाजस्यार्षम् । तत् वः । द्वितीयाबहुवचनमिदं प्रथमैकवचनस्य स्थाने द्रष्टव्यम् । त्वम् । गाय । गायतीत्यर्चतिकर्मसु पाठात्

स्तुत्यर्थः । स्तुत्या चात्र उच्चारणं लक्ष्यते । अन्तरात्मन एवायं प्रैषः । हे मदीय अन्तरात्मन् । तत् त्वं स्तुतिरूपं उच्चारय । सुते अभिषुते सोमे । सचा सह अन्यैः ऋत्विग्भिः । कस्मै । उच्यते । पुरुहूताय बहुभिर्यजमानैः आहूतस्येन्द्रस्यार्थाय । कीदृशस्येन्द्रस्यार्थाय । सत्वने । षणु दाने इत्यस्यैतद्रूपम् । दात्रे । स्तोतृभ्यः शं यत् । शमिति सुखनाम । यदुच्चार्यमाणं इन्द्रस्य सुखं करोति तत् उच्चारयेत्यर्थः । कस्मै इव । उच्यते । गवे न । नशब्दः उपमार्थीयः । गवे इव । गोशब्देनात्र वृषभ उच्यते । वृषभाय इव । कीदृशाय । उच्यते । शाकिने । शकनं शाकः । शक्तिरित्यर्थः । तद्वान् शाकी । तस्मै शाकिने । शक्तिमते इत्यर्थः । यथा कश्चित्कृषीवलः शक्तिमतो वृषभस्य सुखकराः स्तुती उच्चारयति तद्वत्सुखकरमिन्द्रस्य स्तुतिरूपमुच्चारयेत्यर्थः ॥

ऐन्द्रे द्वितीये प्रमुखे शतं चाष्टादशाप्यृचः ।
अनुष्टुप्पान्तमित्येषा गायत्र्योऽन्या' समीरिताः ॥
अष्टादशशते त्वस्मिन् चतस्रो मरुतां स्तुतिः ।
इहेवोदुत्य इत्येते अथ गौर्धयतीत्यृचः ॥
वैश्वदेवी भवत्येषा देवानामिदवो महत् ।
सोमानां ब्राह्मणस्पत्या सदसस्सदसस्पतेः ॥
अद्या नो देव सावित्रो दोषो आगादिति तृचः ।
सोमापूष्णोः स्तुतिरियं सोमः पूषा च चेततुः ॥
एषो दूरादिहाश्विन्यौ वात आ वायुसंस्तवः ।
यं रक्षन्ति महि त्रीणां सुनीथो घा स इत्यृचः ॥
मित्रावरुणमुख्यानामादित्यानां तु संस्तवः ।
आ नो मित्रर्जुनीती नो मित्रावरुणयोः स्तुतिः ॥
इन्द्रा नु पूषणेत्यस्यामिन्द्रापूष्णोः सह स्तुतिः ।
सरस्वती पावका न इदं विष्णुर्हि वैष्णवी ।
ऐन्द्र्योऽन्याः सकला ऐन्द्रसमाख्या सृष्टिनीतितः ॥

भरद्वाजः । तत् स्तोत्रम् । वो यूयम् । गाय गायत । सुते अभिषुते सति सोमे । सचा सह । गायत प्रस्तोत्रादयः । पुरुहूताय बहुभिराहूताय । सत्वने । सनोतेर्दानार्थत्वात् सत्वने दात्रे धनानाम् । शाकिने शक्तिमते इन्द्राय । शं सुखकरं भवति । यत् स्तोत्रं इन्द्राय । गवे न गवे इव घासः । तद्यूयं गायत ॥ (१)

यस्ते नूनं शतक्रतविन्द्र द्युम्नितमो मदः । तेन नूनं मदे मदेः ॥

श्रुतकक्षस्यार्षम् । यः ते नूनं निश्चितम् । शतक्रतो । शतमिति बहुनाम । क्रतुरिति कर्मनाम । शतं क्रतूनां यस्य स शतक्रतुः । तस्य सम्बोधनं हे शतक्रतो । बहुकर्मन् । इन्द्र । द्युम्नितमः अतिशयेन दीप्तिमान् । मदः मत्तः सन् स्तोतृभ्यः यः स्तुतो धनं ददाति । तेन मदेन । नूनं निश्चयेन । मदे । सप्तम्येकवचनमिदं तृतीयैकवचनस्य स्थाने द्रष्टव्यम् । मदेन । मदेः माद्यस्वेत्यर्थः ॥

श्रुतकक्षः । यस्ते त्वदीयः । मदः सोमः । नूनमिति पूरणः । हे शतक्रतो बहुकर्मन् । इन्द्र । द्युम्नितमो दीप्तितमः । तेन नूनं संप्रति । मदेः मदस्व । मदे । मदति स्तौतीति मदः स्तोता । स्तोतरि मयि ॥ (२)

गाव उपवदावटे मही यज्ञस्य रप्सुदा । उभा कर्णा हिरण्यया ॥

हर्यतस्यार्षम् । गोशब्देनात्र वाचः उच्यन्ते । हे गावः मदीया वाचः । उपवद । एकवचनमिदं बहुवचनस्य स्थाने द्रष्टव्यम् । उपगम्य वदत । किं पुनर्वदामः । उच्यते । अवटे । सप्तम्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । अवटम् । अवट इति अपठितमपि मेघनाम द्रष्टव्यम् । मेघम् । किं पुनर्वदामः । उच्यते । ममार्थायोदकं पीतमित्येवम् । न केवलं मेघम् । मही मह्यौ द्यावापृथिव्यौ । कीदृशे । उच्यते ।

यज्ञस्य रप्सुदा। रप्स्विति रूपनाम। ये तद्दत्तः ते रप्सुदे। यज्ञस्य रूपदे इत्यर्थः। कीदृशं पुनर्ये उपवदामः। उच्यते। उभा कर्णा हिरण्यया उभौ कर्णौ हिरण्मयौ यस्य। अस्ति पुनः क्वचिदन्यत्रापि हिरण्यकर्णत्वं मेघस्य। अस्तीति ब्रूमः। हिरण्यकर्णं मणिग्रीवम् (ऋ. वे. १. १२२. १४) इत्यत्र॥

हर्यतः प्रागाथः। इयं प्रवर्ग्यसम्बन्धिनी स्तुतिः। इन्द्राश्विना मधुनस्सारस्य घर्मं पात वसवो यजता वट् इति मन्त्रे इन्द्रस्यापि घर्मे भागित्वदर्शनात् हविस्तुतिरिन्द्रस्यैव भवति। गाव इति जसि रूपम्। जसि वा व्यत्ययेन शसः। गावः गाः घर्मदोग्ध्रीः। उपवद उपस्तुहि हे अध्वर्यो। किमर्थम्। अवटे। अवटः रूपः। महावीरोऽत्रावट उच्यते। महावीरनिमित्ते। तदर्थं दोग्धुम्। मही महती भवति। यज्ञस्य यजमानस्य। रप्सुदा स्तोत्रेण स्थितिः। रपेः शब्दकर्मणो रपिः स्तुतिः। तत्र सदनं रप्सुदा। अकारस्योकारो व्यत्ययात्। उभा उभे कर्णा कर्णौ। कृणतेः कर्णः। कर्ण एव कर्णौ रुक्मौ रजतसुवर्णौ। हिरण्यया हिरण्मयौ। तद्रजतं हिरण्मयमभवत्। तत् सुवर्णं हिरण्यमभवत् इति रजतसुवर्णयोः हिरण्यशब्दो दृष्टः। तौ चोभौ निहितौ उपर्यधश्च महावीरस्य॥ (३)

अरमश्वाय गायत श्रुतकक्षारं गवे। अरमिन्द्रस्य धाम्ने॥

श्रुतकक्षस्यार्षम्। अरं अलम्। पर्याप्तमित्यर्थः। अश्वस्यार्थाय। गायत। गायतीत्यर्चतिकर्मसु पाठात् स्तुत्यर्थः। हे श्रुतकक्षा श्रुतकक्षस्य मम पुत्राः। अरं अलम्। पर्याप्तमित्यर्थः। गायतेत्येतदनुषज्यते। गवे गोरर्थाय। अरं इन्द्रस्य धाम्ने। धामशब्दः स्थानवचनः। तस्मादियं तादर्थ्यचतुर्थी। इन्द्रस्य यत्स्थानं स्वर्गाख्यं तस्य चार्थायेत्यर्थः॥

श्रुतकक्षो द्वयोः। अरं पर्याप्तम्। गायतेति वचनव्यत्ययः। गाय गीतिं कुरु। इन्द्रस्य। उत्तरार्धे स्थितमत्र सम्बध्यते। चतुर्थ्यर्थे षष्ठी। इन्द्रार्थं गाय।

किमर्थमिन्द्रोद्देशेन गीतिः क्रियते । तत्राह । अश्वायेति जातावेकवचनम् । अश्वान् लब्धुम् । हे श्रुतकक्षेति आत्मानमेव सम्बोधयत्यृषिः । अरं इन्द्रस्य गायत गवे गोलाभार्थं अरं गायत । धाम्ने स्थानाय गृहलाभार्थम् ॥ (४)

तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे । स वृषा वृषभो भुवत् ॥

श्रुतकक्षस्यार्षम् । य उक्तगुणः तं इन्द्रं वाजयामसि । वाजयतीत्यर्चतिकर्मसु पठितत्वात् स्तुत्यर्थः । वाजयामः पूजयामः । स्तुम इत्यर्थः । किमर्थं पुनः स्तुमः । उच्यते । महे वृत्राय हन्तवे महतो वृत्रस्य हननार्थमित्यर्थः । स इन्द्रः स्तुतः सन् । वृषा वर्षिता । भुवत् भवेत् । क इव । उच्यते । वृषभः । लुप्तोपममिदम् । वृषभ इव । यथा वृषभः रेतसः वर्षिता तद्वद्वर्षिता उदकस्य भवत्वित्यर्थः ॥

तमिन्द्रं वाजयामसि वाजिनं बलिनं कर्म स्तुतिभिः महे महते वृत्राय वृत्रं हन्तवे हन्तुम् । तुमर्थाच्च भाववचनात् (पा. २. ३. १५) इति चतुर्थी । स वृषा वर्षितेन्द्रः वृषभः वर्षिता कामानां भुवत् भवतु ॥ (५)

त्वमिन्द्र बलादधि सहसो जात ओजसः । त्वं सन् वृषन्वृषेदसि ॥

इन्द्रमातरो देवजामयः । तासां आर्षम् । त्वं हे इन्द्र । बलाज्जातः । बलस्य त्वयि दृश्यमानत्वात् । कारणानुविधायित्वस्य कार्याणामिष्यमाणत्वात् । कीदृशात् बलात् । उच्यते । सहसः । षह मर्षणे । अभिभवे छन्दसि इत्यस्यैतद्रूपम् । अभिभवितृतमादित्यर्थः । किमभिभवितुरेव केवलम् । उच्यते । ओजसः परकीयस्य च बलस्य ऋजुकरणस्वभावात् । किंच त्वं सन् प्रशस्त । हे वृषन् वर्षितः । वृषा वर्षिता । इदिति पादपूरणः । असि भवसि ॥

इन्द्रमातरो देवजामयोऽस्या ऋषयः । त्वं हे इन्द्र बलात् जातोऽसि । बिभर्तेः भरः बलम् । अधीति पञ्चम्यर्थानुवादकः । सहसो वेगाच्च जातोऽसि । ओजसस्तेजसश्च जातोऽसि । बलादिभिः गुणैः सर्वस्मादधिकत्वात् तदुपादान इवासीति स्तुतिः । त्वं सन् श्रेष्ठः हे वृषन् वृषेत् । इत् एव । वृषैव वर्षितैव कामानामसि ॥ (६)

यज्ञ इन्द्रमवर्धयद्यद्भूमिं व्यवर्तयत् । चक्राण ओपशं दिवि ॥

गोषूक्त्यश्वसूक्त्योरार्षम् । यज्ञः मदीयो यागः । इन्द्रमवर्धयत् वर्धितवान् । यः कीदृशः इन्द्रः । उच्यते । यत् । नपुंसकलिङ्गं पुंलिङ्गस्य स्थाने द्रष्टव्यम् । यः । भूमिं पृथिवीम् । व्यवर्तयत् विवर्तयति । विवर्तितवान्वा । सस्यसम्पत्तिद्वारेण अन्यरूपां करोतीत्यर्थः । किं पुनः कुर्वन् अन्यरूपां पृथिवीं करोति । उच्यते । चक्राणः कुर्वन् । ओपशं गर्जितलक्षणं शब्दम् । कुत्र । उच्यते । दिवि द्युलोके ॥

गोषूक्ताश्वसूक्तावृषी द्वृचस्य । यज्ञो यजमानः यज्ञ एव वा इन्द्रमवर्धयत् वर्धयति । यत् यदा भूमिं व्यवर्तयत् विवर्तयति प्रावृति वृष्ट्या । चक्राणः कुर्वन् । ओपशं मेघम् । दिवि अन्तरिक्षे । उपशेरतेऽस्मिन्नाप इति ओपशः ॥ (७)

यदिन्द्राहं यथा त्वमीशीय वस्व एक इत् । स्तोता मे गोसखा स्यात् ॥

गोषूक्त्यश्वसूक्त्योरार्षम् । यदि हे इन्द्र । यथा त्वं ईशिषे । एवमहं ईशीय । कस्य । उच्यते । वस्वः वसुनः । धनस्येत्यर्थः । एकः इत् । इच्छब्दः एवकारार्थः । एक एव । ततः किं स्यात् । उच्यते । स्तोता मे मम । गोसखा । गावः सखिभूता यस्य स गोसखा । मित्रलक्षणं चात्र सख्यं परिगृह्यते । बह्व्यो गावो यस्य स्वभूताः । एतदुक्तं भवति । योऽपि

अत्यन्तेश्वरः सोऽपि मे स्तोता भवेत् । अथवा तस्मै स्तोत्रे गावो ददतीत्यर्थः । किंतु अल्पपुण्यत्वाच्च ममैतत्सञ्जातम् ॥

यत् यदि अहं हे इन्द्र यथा त्वं ईशिषे वसुनः । तथा अहं वस्वः वसुनः ईशीय ईशः स्याम् । एक इत् एक एव । त्वमेक एव हीशिषे । तथा अहमेक एव यदीशीय तथा सति स्तोता मे मां स्तुवन् यजमानः गोसखा स्यात् । गावः सखायो यस्य सः गोसखा । गोभिः युक्तः स्यात् । इति प्रदाने विलम्बमानं इन्द्रं प्रति उच्यते ॥ (८)

पन्यं पन्यमित्सोतार आ धावत मद्याय । सोमं वीराय शूराय ॥

मेधातिथेरार्षम् । पन्यं पन्यम् । पनतिः स्तुत्यर्थः । तस्यायमभ्यासः । अभ्यासे च भूयांसमर्थं मन्यन्ते । पन्यं पन्यं अतिशयेन स्तुत्यमित्यर्थः । इदिति पादपूरणः । सोतारः मदीया ऋत्विजः सोमस्य अभिषोतारः । आधावत । सर्तेर्गत्यर्थस्य अन्तर्णीतण्यर्थस्य चेदं रूपम् । आसारयत । आभिमुख्येन गमयत । नयत इत्यर्थः । किं पुनर्नयत । उच्यते । सोमम् । वीराय शूराय विक्रान्ताय शूरायेत्यर्थः ॥

मेधातिथिः आङ्गिरसः प्रियमेधश्च काण्वः द्वौ अस्याः परस्याश्च ऋषी । पन्यं पन्यं अतिशयेन स्तुत्यम् । इत् एवं सोमं हे सोतारः अभिषोतारः अध्वर्यवः । आधावत आपुनीत । धावु गतिशुद्ध्योः । मद्याय स्तुत्याय वीराय वीरयित्रे शत्रूणां शूराय च इन्द्राय । शूरः शृणोतेः हिंसाकर्मणः श्यतेर्वा गतिकर्मणः । शूराणां शविष्ठो नोऽभिष्टुतं इति मन्त्रवर्णात् ॥ (९)

इदं वसो सुतमन्धः पिबा हे सुपूर्णमुदरम् । अनाभयिन् ररिमा ते ॥

मेधातिथेरार्षम् । इदं हे वसो प्रशस्त धनवन् वा । सुतमभिषुतम् । अन्धः सोमलक्षणमन्नं एतत्स्थितम् । पिब । कियत्पुनः पिवामि । उच्यते ।

यावत् सुपूर्णं उदरम् । यावदाध्यात इत्यर्थः । अनाभयिन् । आभिमुख्येन भयं यस्य नास्ति स अनाभयी । तस्य सम्बोधनं हे अनाभयिन् । भयवर्जितेत्यर्थः । स्यादेतत् । अदत्तं कथं पिबामीति अत उच्यते । ररिम । रमि चादान इति अस्यैतद्रूपम् । दद्मो वयम् । ते तुभ्यम् ॥

इदं सुतं अभिषुतम् । अन्धः अन्नं सोमं पिब । हे वसो प्रशस्य । सुपूर्णं कुरु उदरं सोमेन । अनाभयिन् । भयमस्यातीति आभयी । अनाभयिन् भयरहित । ररिमा दद्महि । ते तुभ्यं सोमम् ॥ (१०)

द्वितीये तृतीया दशत्या

उद्घेदभि श्रुतामघं वृषभं नर्यापसम् । अस्तारमेषि सूर्य ॥

सुकक्षस्यार्षम् । उदित्ययमुपसर्ग एषीत्यनेन सम्बन्धयितव्यः । घ इदिति द्वावपि पादपूरणौ । श्रुतामघम् । श्रुतं विख्यातम् । प्रभूतमित्यर्थः । मघं धनम् । श्रुतं मघं यस्य स श्रुतामघः । तं श्रुतामघम् । छान्दसं दीर्घत्वम् । विख्यातधनमित्यर्थः । वृषभं वर्षितारम् । नर्यापसम् । नृभ्यो हितं नर्यम् । अप इति कर्मनाम । नर्यं अपो यस्य स नर्यापसः । तं नर्यापसम् । नृभ्यो हितकारिणमित्यर्थः । अस्तारं क्षेप्तारं शत्रूणाम् । ईदृशमिन्द्रं प्रतीत्य उदेषि । हे सूर्य ॥

श्रुतकक्षः द्वयोः । अस्मिन् द्वृचे सूर्यरूपेण इन्द्रस्य स्तुतिः क्रियते । असौ आदित्य इन्द्र इति च हारिद्रवकम् । उदेषि उद्यतो भवसि । घेदितीमौ

पादपूरणौ। श्रुतामघं विश्रुतदानम्। वृषभं वर्षितारं कामानाम्। नर्यापसं नरहितकर्माणम्। अस्तारं क्षेप्तारं हवींषि वह्नौ जनमभिलषितसाधनाय हे सूर्य प्रेरक इन्द्र ॥ (१)

यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य। सर्वं तदिन्द्र ते वशे ॥

सुकक्षस्यार्षम्। यत् अद्य अस्मिन्नहनि। अद्यग्रहणं चात्र प्रदर्शनार्थम्। सर्वकालमित्यर्थः। यच्च किंचित् हे वृत्रहन्। उत् अगाः। मध्यमपुरुषैकवचनमिदं प्रथमपुरुषैकवचनस्य स्थाने द्रष्टव्यम्। अगात्। उद्गच्छति। ज्ञायत इत्यर्थः। अभिः पादपूरणः। सूर्य सुष्ठु ईरयिता भवेत्यर्थः। केषाम्। सामर्थ्याच्छत्रूणाम्। सर्वं तत्प्राणिजातम्। हे इन्द्र। ते तव। वशे। वर्तत इति वाक्यशेषः। एतदुक्तं भवति। यावत् किंचित्प्राणिजातं तस्य सर्वस्य त्वं ईशिषे इत्यर्थः ॥

अत्र शौनकः।

यदद्य कच्चेत्युदिते रवौ स्तुत्वा पुरन्दरम्।
गृह्णन्नपोहते शत्रुं वश्यं वा कुरुते जगत् ॥

इति। यदद्य कच्च। यत्किञ्चित् वस्तु स्थावरं जङ्गमं वा अद्य अस्मिन्नपि दिने अभि उदगाः उदितोऽसि। हे वृत्रहन् पापानां हन्तः सूर्य सर्वं तत् ते तव वशे अभिवर्तते हे इन्द्र ॥ (२)

य आनयत्परावतः सुनीती तुर्वशं यदुम्। इन्द्रः स नो युवा सखा ॥

भरद्वाजस्यार्षम्। यः इन्द्रः आ अनयत् आभिमुख्येन आनीतवान्। आत्मनः सकाशे कृतवानित्यर्थः। परावतः दूरात्। कथं पुनः आनीतवान्। उच्यते। सुनीती। सुपां सुलुक् (पा. ७. १. ३९) इत्यनेन पूर्वसवर्णः

इत्येवं सुनीती। एतदुक्तं भवति। शोभनया नीत्या नयेन आनीयमानो न केनचित् प्रतिविध्येत इत्यर्थः। कं पुनः आनीतवान्। उच्यते। तुर्वशं नाम राजपुत्रम्। यदुं च। किमर्थम्। पालनार्थम्। कुत एतत। त्वमाविथ नर्यं तुर्वशं यदुम् (ऋ. वे. १. ५४. ६) उत त्या तुर्वशायदू (ऋ. वे. ४. ३०. १७) इदमादिषु अनयोः पालनसम्बन्धस्य दर्शनात। दूरादात्मनः सकाशमानीय पालितवानित्यर्थः। इन्द्रः सः नः अस्माकम्। युवा तरुणः। सखा सखिभूतः। देवमनुष्ययोश्च स्तुत्यस्तोतृलक्षणं सख्यम्। स्तुत्य इत्यर्थः॥

भरद्वाजः। आनयत् आनीतवान् परावतो दूरात सुनीती शोभनेन नयेन तुर्वशं यदुं च राजानौ शत्रुभिः दूरेऽपास्तौ इन्द्रः। स युवा नः अस्माकं सखा भवतु॥ (३)

मा न इन्द्राभ्या दिशः सूरो अक्तुष्वायमत्। त्वा युजा वनेम तत्॥

श्रुतकक्षस्यार्षम्। मा नः। मा इत्ययं प्रतिषेधः आयमदित्याख्यातेन सम्बन्धयितव्यः। नः अस्माकम्। हे इन्द्र अभ्यादिशः। आभिमुख्येन युद्धार्थं ये आदिश्यन्ते ते अभ्यादिशः। आज्ञाकरा इत्यर्थः। सूरः। प्रथमैकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम्। सूरस्य सुष्ठु ईरयितुः शत्रोः स्वभूताः। अक्तुषु रात्रिषु। रात्रिग्रहणं चात्र प्रदर्शनार्थम्। सर्वकालमित्यर्थः। मा आयमत् मा आभिमुख्येन निर्यान्तु। सर्वदा युद्धे नश्यन्तामित्यर्थः। किंच त्वा त्वया। युजा। युज्यते इति युक् सहायः। त्वया सहायेनेत्यर्थः। वनेम। वनतिर्यद्यप्यन्यत्र सम्भजनार्थस्तथापीह हिंसार्थो द्रष्टव्यः। हिंस्यामः। तत्। नपुंसकमिदं पुंलिङ्गस्य स्थाने द्रष्टव्यम्। एकवचनं च बहुवचनस्य स्थाने द्रष्टव्यम्। तान्॥

श्रुतकक्षः। मा आयमत् नाभिगच्छेत् अयमित्यर्थः। हे इन्द्र नोऽस्मान् अभिआदिशः आदेष्टा। प्रवृत्तिरोधकः आदेशः। यो नः पूषन्नघो वृको दुश्शेव आदिदेशति। अप स्म तं पथो जहि (ऋ. वे. १. ४२. २) इति मन्त्रदर्शनात्। सूरः प्रेरकः शत्रुः। अक्तुषु गमनेषु प्रवृत्तिषु धनाद्यर्थासु त्वा त्वया युजा सहायेन वनेम लभेमहि। तत् वयं यदर्थं प्रवर्तेमहि तत्॥ (४)

एन्द्र सानसिं रयिं सजित्वानं सदासहम्। वर्षिष्ठमूतये भर॥

मधुच्छन्दस आर्षम्। आ इत्ययमुपसर्गो भरेत्याख्यातेन सम्बन्धयितव्यः। हे इन्द्र। सानसिम्। वन षण सम्भक्तौ इत्यस्येदं रूपम्। सम्भजनीयम्। रयिं धनम्। सजित्वानं सहभूतानां शत्रूणां जेतृ। सदा सर्वदा च सहं अभिभवितृ। वर्षिष्ठं अतिशयेन प्रवृद्धम्। ऊतये तर्पणाय। आभर देहीत्यर्थः॥

अस्याः परस्याश्च मधुश्छन्दाः। आभर आहर। अस्मभ्यं हे इन्द्र सानसिम्। सनोतेः इदं रूपम्। संभजनीयम्। रयिं धनम्। सजित्वानम्। सजित्वानो जयशीलाः पुरुषाः। तैः सहितम्। सदासहं सर्वदा अभिभवितारं आपदाम्। वर्षिष्ठं प्रवृद्धतमम्। ऊतये तर्पणार्थम्॥ (५)

इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे। युजं वृत्रेषु वज्रिणम्॥

मधुच्छन्दस आर्षम्। इन्द्रं वयं महाधने महति सङ्ग्रामे। इन्द्रमेव। अर्भे अल्पे सङ्ग्रामे। हवामहे। युजम्। युज्यत इति युक् सहायः। तम्। सहायमित्यर्थः। वृत्रेषु सङ्ग्रामव्यतिरेकेणान्येषु शत्रुषु हन्तव्येषु। आह्वयाम इत्यनुषज्यते। कीदृशमिन्द्रं आह्वयामः। उच्यते। वज्रिणं वज्रवन्तं इत्यर्थः॥

इन्द्रं वयं हवामहे आह्वयामहे । महाधने महान्ति धनानि जेतव्यानि यस्मिन् सङ्ग्रामे इन्द्रमेव हवामहे । अर्भे अल्पे अल्पधने च सङ्ग्रामे । युजं सहायम् । वृत्रेषु उपद्रवेषु सत्सु । वज्रिणम् ॥ (६)

अपिबत्कद्रुवः सुतमिन्द्रः सहस्रबाह्वे । तत्राददिष्ट पौंस्यम् ॥

त्रिशोकस्यार्षम् । अपिबत् पीतवान् । इन्द्रः । किं पीतवान् । उच्यते । कद्रुवः सुतम् । कद्रूर्नाम काश्यपस्य भार्या । तस्याः स्वभूतं सुतं अभिषुतं सोमम् । क्व पुनः पीतवान् । उच्यते । सहस्रबाह्वे । सहस्रमिति बहुनाम । बाहुशब्देनापि अवयवेन समुदायस्य सम्बन्धात्कर्ता उच्येत । सहस्रं बाहवः कर्तारो यत्र तत् सहस्रबाहु सत्रम् । तस्मिन् पीतवानित्यर्थः । किंच तत्र सत्रे । अददिष्ट अत्यर्थं दृश्यते । वर्ण्यते इत्यर्थः । केन । सामर्थ्यान्मन्त्रैः । पौंस्यं पुंसः इन्द्रस्य योग्यं बलं च ॥

त्रिशोकः । इन्द्रः सुतं अभिषुतं सोमं कद्रुवः कद्र्वाख्यस्य यजमानस्य । सहस्रबाह्वे । षष्ठ्यर्थे चतुर्थी । यः सहस्रं वहति प्रापयति ददातीति सहस्रबाहुः । तस्य कद्रुवः। सहस्रं बाहवो यस्य सन्तीत्यपरे। तत्र कद्रौ अददिष्ट । दिशतेर्वा ददातेर्वा रूपम् । अददिष्टेति अदिशदिति वा अददादिति वा । पौंस्यं वीर्यम् । दीप्यतेः दीप्तिकर्मणो रूपमेतदित्यपरे । अदीपयदिति वा । तत्रादेदिष्ट पौंस्यम् (ऋ. वे. ८. ४९. १६) इति बह्वृचाः ॥ (७)

वयमिन्द्र त्वायवोऽभि प्र नोनुमो वृषन् । विद्धी त्वस्य नो वसो ॥

वसिष्ठस्यार्षम् । वयं हे इन्द्र । त्वायवः त्वत्कामाः । त्वां यष्टुमिच्छव इत्यर्थः । अभि प्र नोनुमः । अभि प्र इति द्वावपि पादपूरणौ । अत्यर्थं स्तुमः । हे वृषन् वर्षितः । यत एवमतो ब्रवीमि । विद्धि विजानीहि।

ज्ञात्वा च यागं संपादयेत्यर्थः । तु इति पादपूरणः । कस्य पुनर्जानामि । अस्य सुतस्य । नः अस्माकं स्वभूतस्य । हे वसो प्रशस्त धनवन् वा ॥

वसिष्ठः । वयं हे इन्द्र त्वायवः त्वत्कामाः । अभिप्रनोनुमः आभिमुख्येन प्रकर्षेण भृशं स्तुमः । त्वामिति शेषः । हे वृषन् विद्धि अवधारयतु क्षिप्रं अस्य इदं स्तोत्रमित्यर्थः । नः अस्मदीयस्य हे वसो प्रशस्य । जानात्यर्थानां धातूनां प्रयोगे कर्मणि षष्ठी प्रायशो दृश्यते ॥ (८)

आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा ॥

त्रिशोकस्यार्षम् । आ इत्येष मर्यादायाम् । घ इति पादपूरणः । मर्यादया ये अग्निं इन्धते सन्दीपयन्ति । ये च स्तृणन्ति बर्हिः आनुषक् आनुपूर्व्येण । येषां च इन्द्रः युवा सर्वदा तरुणः । सखा स्तुत्यस्तोतृलक्षणेन सम्बन्धेन सखिभूतः । स्तुतस्तुत्य इत्यर्थः । यच्छब्दश्रुतेश्च तच्छब्दो योग्यार्थसम्बन्धोऽध्याहर्तव्यः । ते । पुण्यवन्त इति वाक्यशेषः ॥

द्वयोः त्रिशोकः । आ अभि इन्धते दीपयन्ति । समिद्भिः अग्निम् । घेति पादपूरणः । तस्य दीर्घश्च सांहितिकः । ये स्तृणन्ति च बर्हिः यज्ञे आनुषक् अनुषक्तं त्रिधातु पञ्चधातु वा बर्हिस्तीर्यते । परस्परानुषक्ताश्च धातवो भवन्ति । येषां सखा भवति युवा इन्द्रः तेषामिध्मो बृहत् भवति । स्तुतशस्त्रं च तेषां समृध्यते । यूपादयश्च तेषां समृद्धानि भवन्ति । इत्युत्तरयर्चा समाप्तिः वाक्यस्य । बृहन्निदिध्म एषां भूरि शस्तं पृथुः स्वरुः (ऋ. वे. ८. ४९. २) ॥ (९)

भिन्धि विश्वा अप द्विषः परिबाधो जही मृधः । वसु स्पार्हं तदाभर ॥

त्रिशोकस्यार्षम् । भिन्धि विदारय । मारयेत्यर्थः । विश्वाः सर्वाः । अप । उपसर्गश्रुतेः क्रियापदमध्याह्रियते । अपेत्य । अस्मत्तः अपनीय

इत्यर्थः। द्वेष्टीति द्विट्। तान् द्विषः। शत्रूनित्यर्थः। परिबाधः। परीति सर्वतो भावे। बाधा पीडा। सर्वतो यो बाधां करोति सः। बाधयति बाधयते। क्विप्। बाधः। तान् सर्वतः पीडाकरानित्यर्थः। भिन्धीत्येत-दनुषज्यते। जहि मृधः मारय मृधः। सङ्ग्रामनाम। मृधं करोति मृधयति मृधयते। क्विप्। मृधः। तान् मृधः। सङ्ग्रामकारिण इत्यर्थः। दत्वा च। तदाभरेति परस्तात्तच्छब्दश्रुतेः योग्यार्थसम्बन्धो यच्छब्दोऽध्याहर्तव्यः। यद्देयं वसु धनम्। स्पार्हम् स्पृहणीयम्। सारव-दित्यर्थः। तत् अस्मभ्यं आभर आहर। देहीत्यर्थः॥

अपेत्युपसर्ग उपरि श्रूयमाणो भिन्धीत्यनेन सम्बध्यते। छन्दसि परेऽपि (पा. १. ४. ८१) व्यवहिताश्च (पा. १. ४. ८२) इति स्मरणात्। अपभिन्धि विश्वाः द्विषः द्वेष्ट्रीः प्रजाः सेना वा। परिजहि परितो बाधस्व। बाधः बाधकान्। बाधतेः क्विप्। मृधः हिंसकांश्च परिजहि। वसु धनं स्पार्हं स्पृहणीयं यत् शत्रुभिः गृहीतं तदाभर आहर अस्मभ्यम्॥ (१०)

द्वितीये चतुर्थ्यां दशत्या

इहेव श्रृण्व एषां कशा हस्तेषु यद्वदान्। नि यामं चित्रमृञ्जते॥

कण्वस्यार्षम्। इह पृथिव्याम्। इवशब्द एवार्थे। इहैव पृथिव्यां स्थितैः। श्रृण्वे श्रूयते शब्दः। एषां मरुताम्। कशाः हस्तेषु व्यवस्थिताः अश्वानां सारथयः। यत्। सप्तम्या अत्र लुक्। यदा। वदान् वदन्ति शब्दं कुर्वन्ति। यद्वदानिति परस्तात् यच्छब्दश्रुतेः पूर्वत्र तच्छब्दमध्याहृत्यै-कवाक्यता योज्या। एषां कशा हस्तेषु व्यवस्तिता यदा शब्दं कुर्वन्ति

तदा इहैव श्रूयते शब्दः । न केवलं तदैव । किं तर्हि । यदा च । नि इत्ययमुपसर्गः ऋञ्जते इत्याख्यातेन सम्बन्धयितव्यः । यान्ति येन स यामो रथः । तं यामं रथम् । कीदृशम् । चित्रं विचित्रं पूज्यं वा । नि ऋञ्जते नियमेन गमयन्ति । तदा च इहैव शब्दः श्रूयत इति ॥

कण्वः । इह अस्मिन् लोके शृण्वे श्रूयते । यक्स्थाने श्नुः । लोपस्त आत्मनेपदेषु (पा. ७. १. ४१) इति तकारलोपः । एषां मरुतां शब्द इति शेषः । इवेति संप्रत्यर्थे । इवशब्द उपमानार्थः संप्रत्यर्थोऽवधारणार्थः पादपूरणार्थश्च भवति । अत्र उपमार्थव्यतिरिक्तानां त्रयाणामन्यतमो ग्राह्यः । कशाः अश्वघात्यः हस्तेषु स्थिताः । यत् यदा वदान् शब्दायेरन् तदा गर्जितशब्दः शृण्वे । नि यामन् नितरा गच्छेयुः । ऋञ्जते अलङ्कुर्वन्ति मरुत इति शेषः । चित्रं विचित्रं रथं स्वकीयं स्वकीयैरायुधालङ्करणैः । अंसेषु व ऋष्टयः पत्सु खादयो वक्षस्सु रुक्मा मरुतो रथे शुभः । अग्निभ्राजसो विद्युतो गभस्त्योः शिप्राः शीर्षसु वितता हिरण्ययी (ऋ. वे. ५. ५४. ११) इति हि भवति ॥ (१)

इमा उ त्वा विचक्षते सखाय इन्द्र सोमिनः । पुष्टावन्तो यथा पशुम् ॥

त्रिशोकस्यार्षम् । इमे मदीया ऋत्विजः । उ इति पादपूरणः । त्वा त्वाम् । विचक्षते विविधं पश्यन्ति । सखायः स्तुत्यस्तोतृलक्षणेन सख्येन सखिभूताः । स्तुवन्त इत्यर्थः । हे इन्द्र । सोमिनः सोमवन्तः । कथं पुनः पश्यन्ति । उच्यते । पुष्टावन्तो यथा पशुम् । पोषणं पुष्टम् । तद्वन्तः पुष्टावन्तः । पोषणवन्त इत्यर्थः । एतदुक्तं भवति । यथा घासहारिणो घासेन गृहीतेन पशोस्तर्पणार्थं परमया प्रीत्या युक्तास्तमेव पशुं पश्यन्ति तद्वन्मदीया ऋत्विजः सोमवन्तस्तेनैव सोमेन गृहीतेन तर्पणार्थं त्वां पश्यन्तीत्यर्थः ॥

त्रिशोकः । इमे सखायः स्तोतारः विचक्षते । त्वां प्रतिपालयन्ति । उ इति पूरणः । हे इन्द्र सोमिनः सोमवन्तः । पुष्टावन्तः पोषकघाससंयुक्ताः जनाः यथा पशुं विचक्षते घासं प्रदातुं तद्वत् त्वां सोमं प्रदातुं विचक्षते ॥ (२)

समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः । समुद्रायेव सिन्धवः ॥

वत्सस्यार्षम् । समित्ययमुपसर्गः नमत इत्याख्यातेन सम्बन्धयितव्यः । अस्येन्द्रस्य स्वभूताय । मन्यवे क्रोधाय । विशः । यद्यपि विश इति मनुष्यनाम तथापि कृष्टय इत्यनेन पौनरुक्त्यप्रसङ्गात्क्रियानिमित्तं द्रष्टव्यम् । विष्लृ व्याप्तावित्यस्येदं रूपम् । स्तुतिभिर्हविर्भिश्च व्याप्तारः । विश्वाः सर्वाः । सन्नमन्त प्रह्वीभवन्तीत्यर्थः । के पुनः प्रह्वीभवन्ति । उच्यते । कृष्टयः यजमानमनुष्या इत्यर्थः । कथं पुनः सन्नमन्त । उच्यते । समुद्रायेव सिन्धवः । यथा समुद्राय सिन्धवः नद्यः प्रह्वीभवन्ति तद्वदित्यर्थः ॥

वत्सः । सन्नमन्त प्रह्वीभवन्ति । अस्य इन्द्रस्य मन्यवे क्रोधाय । विशः निविष्टाः । विश्वाः कृष्टयः प्रजाः । समुद्रायेव सिन्धवः नद्यः ॥ (३)

देवानामिद्वो महत्तदा वृणीमहे वयम् । वृष्णामस्मभ्यमूतये ॥

कुसीदिन आर्षम् । देवानां स्वभूतम् । इदिति पादपूरणः । तदावृणीमह इति परस्तात्तच्छब्दश्रुतेः यच्छब्दोऽध्याहर्तव्यः । यत् अवः पालनं तर्पणं वा महत् तत् आवृणीमहे आभिमुख्येन प्रार्थयामः वयम् । कीदृशानां देवानाम् । उच्यते । वृष्णां वर्षितॄणाम् । किमर्थं पुनः प्रार्थयामः । उच्यते । नः अस्मभ्यम् । ऊतये पालनार्थमित्यर्थः ॥

कुसीदी काण्वः । देवानामित् देवानामेव अवो रक्षणं महत् विद्यते । वृष्णां वर्षितॄणाम् । तत् रक्षणं आवृणीमहे प्रार्थयामो वयं अस्मभ्यं उतये रक्षणार्थम् ॥ (४)

सोमानां स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजः ॥

मेधातिथेरार्षम् । सोमानाम् । अभिषोतारमिति वाक्यशेषः । स्वरणम् । स्वृ शब्दोपतापयोरित्येतस्यैतद्रूपम् । शब्दयितारं स्तुतीनामुच्चारयितारम् । स्तोतारं यष्टारं चेत्यर्थः । मां कृणुहि कुरु । हे ब्रह्मणस्पते । कमिव । उच्यते । कक्षीवन्तम् । लुप्तोपममिदं द्रष्टव्यम् । कक्षीवन्तमिव । यः कतमः कक्षीवान् । उच्यते । य औशिजः य उशिजः पुत्रः । तमिव ॥

मेधातिथिः । सुनोति अभिषुणोति सोममिति सोमानां तद्वतां स्वरणम् । स्वृ शब्दोपतापयोः इति । शब्दवन्तं कीर्तिमन्तं कृणुहि कुरु हे ब्रह्मणस्पते । कक्षीवन्तमिति लुप्तोपमा । कक्षीवन्तमिव । यः कक्षीवानौशिजः उशिजः पुत्रः । उशिजा नाम कक्षीवतो जनीति । दीर्घतमा हि तस्य पिता ॥ (५)

बोधन्मना इदस्तु नो वृत्रहा भूर्यासुतिः । शृणोतु शक्र आशिषम् ॥

श्रुतकक्षस्यार्षम् । बोधन्मनाः । बुध्यति मनो यस्य स बोधन्मनाः । इदिति पादपूरणः । अस्तु भवतु । नः अस्माकम् । वृत्रहा वृत्रस्य हन्ता इन्द्रः । भूर्यासुतिः । भूरीति बहुनामधेयम् । अत्र आसुतिशब्दो रसवचनः । ता सम्राजा धृतासुती (ऋ. वे. १. १३६. १) इति यथा । भूरि आसुतिर्यस्य स भूर्यासुतिः । बहुरस इत्यर्थः । शृणोतु शक्र आशिषं प्रार्थनाम् । एतदुक्तं भवति । यद्यदहं प्रार्थयामि तच्छृणोतु शक्रः । श्रुत्वा च बुध्यतु । बुद्ध्वा च सम्पादयतु ॥

श्रुतकक्षः । बोधन्मनाः बुध्यमानचित्तः स्तोत्रावधारणपरचित्तः । इत् एव । बोधन्मना एव अस्तु । नः अस्माकं इन्द्रः भूर्यासुतिः बह्वन्नसोमपान इत्यर्थः ।

अथवा बोधन्मना इति विशेषणम् । भूर्यासुतिः बह्वन्नप्रदः अस्माकं इति । वृत्रहा शक्रः इन्द्रः शृणोतु नः आशिषं आशासनं अस्माकम् ॥ (६)

अद्य नो देव सवितः प्रजावत्सावीः सौभगम् । परा दुःष्वप्न्यं सुव ॥

श्यावाश्वस्यार्षम् । अद्य नः अस्मभ्यम् । देव सवितः । सविता आदित्यः । तस्य सम्बोधनं हे सवितः । प्रजावत् प्रजासहितम् । सावीः अभ्यनुजानीहि । देहीत्यर्थः । सौभगम् । भगमिति धननाम । शोभनं भगं सुभगम् । सुभगमेव सौभगम् । स्वार्थिकस्तद्धितः । शोभनं धनमित्यर्थः । किञ्च परा दुःष्वप्न्यं सुव । परा इत्ययमुपसर्गः सुवेत्याख्यातेन सम्बन्धयितव्यः । सुवेति षू प्रेरणे इत्यस्येदं रूपम् । दुःष्वप्न्यम् । अनिष्टस्य कस्यचित्सूचकः स्वप्नः दुःस्वप्नः । तस्मिन्भवं दुःष्वप्न्यं मरणादि । तत्परासुव प्रेरय । अपनयेत्यर्थः ॥

श्यावाश्वः । अद्य अस्मिन्नपि दिने नः अस्मभ्यं हे देव सवितः प्रजावत् प्रजाभिः सहितं सौभगं सुभगत्वं सुधनत्वं सावीः प्रसुव प्रेरय । परासुव पराणुदः दुःष्वप्न्यं दुःस्वप्नम् ॥ (७)

क्व स्य वृषभो युवा तुविग्रीवो अनानतः । ब्रह्मा कस्तं सपर्यति ॥

प्रगाथस्यार्षम् । क्व स्य सः । तच्छब्दश्रुतेर्यच्छब्दो योग्यार्थसम्बन्धोऽध्याह्रियते । य उक्तगुण इन्द्रः क्व सः वृषभः वर्षिता अपाम् । युवा तरुणः । तुविग्रीवः पुरुग्रीवः । बहुग्रीव इत्यर्थः । कथमिन्द्रो बहुग्रीवः । उच्यते । परमात्मस्वरूपत्वात् ।

सर्वतः पाणिपादान्तः सर्वतोऽक्षिशिरोमुखः ।
सर्वतः श्रुतिमँल्लोके सर्वमावृत्य तिष्ठति ॥

इत्येवं तुविग्रीवः । अनानतः शत्रुं प्रति अप्रह्वीभूत इत्यर्थः । किमर्थं पुनः पृच्छ्यते । उच्यते । ब्रह्मा कः प्रजापतिः भूतानां निर्माता । अध्वर्युरपि यज्ञस्य निर्माता । अतो निर्मातृत्वसामान्यात्कःशब्देनात्राध्वर्युरुच्यते । ब्रह्मा च अध्वर्युश्च । तं सपर्यति परिचरतीत्यर्थः । पूजयति वा । यतः एवमतः पृच्छ्यते । अथवा एतस्मात्कारणादनानतः यतः ब्रह्मा प्रजापतिः तं परिचरति । क स इति ॥

प्रगाथः काण्वः । क इत्यत्र कम्पो न दीर्घः । क कस्मिन् यजमाने च भवति । स्य सः । वृषभः वर्षिता । युवा तुविग्रीवः प्रवृद्धकन्धरः । अनानतः अप्रणतः कस्मैचिदिन्द्रः । ब्रह्मा परिबृढः श्रुत्यादिभिः । कः स्तोता । तं सपर्यति परिचरति स्तुतिभिः ॥ (८)

उपह्वरे गिरीणां संगमे च नदीनाम् । धिया विप्रो अजायत ॥

वत्सस्यार्षम् । उपह्वरे गह्वरे प्रदेशे । गिरीणां मेघानां सम्बन्धिनि । बहुमेघप्रदेशे इत्यर्थः । सङ्गमे च नदीनां शब्दकारिणीनामपाम् । बहूदके प्रदेशे इत्यर्थः । धिया प्रज्ञया । विप्रः मेधावी । अजायत जायते । एतदुक्तं भवति । यत्र प्रदेशे बहवो मेघा यत्र च बहूदकं तत्र तेषां हवनार्थं तस्य चोदकस्य पानार्थं इन्द्र इति ॥

वत्सः । उपह्वरे समीपे गिरीणां मेघानां शैलानाम । संगमे च नदीनां अजायत प्रादुर्भवति इन्द्रः धिया कर्मणा युक्तः विप्रः प्राज्ञः ॥ (९)

प्र सम्राजं चर्षणीनामिन्द्रं स्तोता नव्यं गीर्भिः । नरं नृषाहं मंहिष्ठम् ॥

इरिम्बिठिर्नाम ऋषिः । तस्येदमार्षम् । प्रेत्ययमुपसर्गः स्तोतेत्याख्यातेन सम्बन्धयितव्यः । सम्राजं सम्यगीशानम् । चर्षणीनां

मनुष्याणाम् । इन्द्रं प्रस्तोता प्रकर्षेण स्तुवत हे मदीया ऋत्विजः । कीदृशं पुनः इन्द्रं स्तुमः । उच्यते । नव्यं नवतरम् । तरुणमित्यर्थः । अथवा नु स्तुतावित्यस्येदं रूपम् । यदि प्रत्यये कर्मणि कारके रूपम् । एतदुक्तं भवति । स्तोतव्यमिन्द्रं प्रकर्षेण स्तुत । केन पुनः स्तुमः । उच्यते । गीर्भिः स्तुतिलक्षणाभिर्वाग्भिरित्यर्थः । कीदृशं पुनरिन्द्रं स्तुमः । उच्यते । नरं नराकारम् । नृषाहम् । नरो मनुष्याः । तान् यः सहते अभिभवति स नृषाट् । तं नृषाहम् । शत्रुमनुष्याणामभिभवितारमित्यर्थः । मंहिष्टं अतिशयेन स्तोतृभ्यः यष्टृभ्यश्च दातृतमम् ॥

इरिम्बिठिः । प्रस्तोत प्रकर्षेण स्तुत हे यजमानाः । तप्तनप्तनथनाश्च (पा. ७. १. ४५) इति तस्य तपादेशः । सम्राजं ईश्वरम् । चर्षणीनां प्रज्ञानाम् । इन्द्रं नव्यं स्तुत्यम् । गीर्भिः स्तुतिभिः । प्रस्तोतेति समन्वयः । कम् । नरं नेतारम् । नृषाहं नृणामभिभवितारम् । मंहिष्ठं दातृतमम् ॥ (१०)

द्वितीये पञ्चम्या दशत्या

अपादु शिप्र्यन्धसः सुदक्षस्य प्रहोषिणः । इन्दोरिन्द्रो यवाशिरः ॥

श्रुतकक्ष्यस्यार्षम् । अपात् पीतवान् । उः पादपूरणः । इन्द्रः । कीदृशः । उच्यते । शिप्री । शिप्रे हनू नासिके वा । तद्वान् शिप्री । कस्य पुनः पीतवान् । उच्यते । अन्धसः अन्नस्य । षष्ठीनिर्देशात् सोपलक्षणम् । एकदेशम् । कीदृशस्य अन्धसः । उच्यते । सुदक्षस्य सुष्ठु उत्सादितस्येत्यर्थः । प्रहोषिणः । जुहोतेर्दानार्थस्येदं रूपम् । सुष्ठु मया

दत्तस्येत्यर्थः । किंलक्षणस्य पुनरन्धसः पीतवान् । उच्यते । इन्दोः सोमस्य । यवाशिरः । यवशब्देनात्र यवविकाराः सक्तवः उच्यन्ते । तेषां मिश्रणं यस्य स यवाशिरः । प्रथमा च षष्ठ्यर्थे द्रष्टव्या । यवमिश्रितस्येत्यर्थः । मन्थी च नाम ग्रहः । स सक्तुभिर्दृश्यते । मन्थिनं सक्तुभिः इति वचनम् । तमेवेक्षित्वैतदुच्यते यवाशिर इति ॥

श्रुतकक्षः । अपात् पिबतु शिप्री सुहनुः इन्द्रः । उ इति पूरणः । अन्धसः अन्नस्य । सुदक्षस्य सुबलस्य । प्रहोषिणः स्तुतिमतः । स्तुतो ह्यार्भवपवमानेन । इन्दोः दीप्तस्य । यवाशिरः यवविकाराः सक्तवः आशिश्रयणं यस्य तस्य । तदन्धः सोममित्यर्थः ॥ (१)

इमा उ त्वा पुरूवसोऽभि प्र नोनवुर्गिरः । गावो वत्सं न धेनवः ॥

मेधातिथेरार्षम् । इमाः । उ इति पादपूरणः । त्वा त्वाम् । पुरूवसो । पुर्विति बहुनाम । वसु इत्यपि धननाम । पुरु वसु यस्य सः पुरुवसुः । तस्य सम्बोधनं हे पुरूवसो । वोरुपधाया दीर्घः (पा. ८. २. ७६) इति । पुरुवसो बहुधन । अभिप्रनोनवुः । आभिमुख्येन स्थित्वा अत्यर्थं पुनःपुनर्वा स्तुतवत्यः । गिरः । अस्मदीया वाचः । कथं पुनः स्तुतवत्यः । उच्यते । गावो वत्सं न । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । वत्समिव । यथा गावः वत्समभिनन्दन्ति तद्वदित्यर्थः । कीदृश्यो गावः । उच्यते । धेनवः अचिरप्रसूता इत्यर्थः ॥

मेधातिथिः । इमाः गिरः । गृणन्ति स्तुवन्तीति गिरः प्रजाः । उः पूरणः । त्वा अभिप्रनोनवुः प्रणुवन्ति प्रकर्षेण स्तुवन्ति । हे पुरूवसो बहुधनेन्द्र । गावो धेनवो दोग्ध्र्य् इव वत्सम् । नः इवार्थे । हिंकुर्वन्ति हि वत्सं गावः ॥ (२)

अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो गृहे ॥

गौतमस्यार्षम् । अत्रेत्यनेन चन्द्रमसः गृहं प्रतिनिर्दिश्यते । चन्द्रमसो मण्डलं गृहम् । अत्र चन्द्रमसो गृहे । गोशब्देनापि । सुषुम्ना नाम आदित्यरश्मिः चन्द्रमसं प्रति गतः । अल्पत्वाच्चन्द्रमण्डलस्य रश्मिः प्रतिगतः ततः परावृत्य पृथिव्यां ज्योत्स्नारूपेण दीप्यते । सोऽत्र गोशब्देनोच्यते । तस्य चन्द्रमसं प्रति गता रश्मयः । अमन्वत । अनुमन्यन्ते । नाम नमनं प्रह्वीभावम् । त्वष्टुः आदित्यस्य । अपीच्यं अपगतं अपिहितमन्तर्हितं वा । क्व अनुमन्यन्ते । इत्था अमुत्र । चन्द्रमसो गृहे मण्डले ॥

गौतमः । दुर्ज्ञेयत्वात् अस्याः ऋचः यास्कनिरुक्तं तावत् लिख्यते । आदित्योऽपि गौः उच्यत इति प्रकृत्या । अथाप्यस्य एको रश्मिः चन्द्रमसं प्रति दीप्यते । तत् एतेन उपेक्षितव्यम् । आदित्यतोऽस्य दीप्तिः भवति इति । सुषुम्नः सूर्यरश्मिश्चन्द्रमा गन्धर्वः इति अत्र निगमो भवति । सोऽपि गौरुच्यते । अत्राह गोरमन्वत इति । तदुपरिष्टात् व्याख्यास्याम इति । तथान्यत्र गौर्व्याख्यातः । अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो गृहे । अत्राह गोः सममंसतादित्यस्य रश्मिभिः स्वं नामापीच्यं अपगतं अपहृतं अपचितं अन्तर्हितं वा अमुत्र चन्द्रमसो गृहे इति । अस्याश्च इन्द्र एव सूर्यात्मना स्तूयत इति ऐन्द्रसूक्तसङ्गतिः । अयमृचोऽर्थः । अत्रान्तरिक्षे । अहेति विनिग्रहार्थ एवशब्दपर्याय । गोः सुषुम्नाख्यस्य सूर्यरश्मेः । नाम नमनं अवस्थानम् । अमन्वत अमंस्त । अनुजानन्तीत्यर्थः । के । आदित्यरश्मयः । त्वष्टुरादित्यस्य अपीच्यं अन्तर्हितम् । इत्था अमुत्र । चन्द्रमसो गृहे मण्डले अन्तरिक्षे । त्वष्टुर्यो गौः सुषुम्नाख्यो रश्मिः तस्य मण्डलेऽन्तर्गता आदित्यस्य रश्मयः ॥ (३)

यदिन्द्रो अनयद्रितो महीरपो वृषन्तमः । तत्र पूषा भुवत्सचा ॥

भरद्वाजस्यार्षम् । यत् मेघस्थानम् । इन्द्रो रितः गतः । प्राप्तः सन्नित्यर्थः । अनयत् नयति । पृथिव्यां पातयतीत्यर्थः । महीरपः महान्ति

वृष्टिलक्षणान्युदकानि । कीदृश इन्द्रः । उच्यते । वृषन्तमः अतिशयेन वर्षिता । तत्र तत्स्थाने । पूषा भुवत् भवति । सचा सह । पूष्णा सहितो वर्षति । न केवलं वर्षतीत्यर्थः ॥

भरद्वाजः । यत् यदा इन्द्रः अनयत् गमयति । रितः गन्त्र्यः । रियतेर्गतिकर्मणः क्विपि रूपं रिदिति । महीः महतीः अपः । वृषन्तमः वर्षितृतमः । तत्र तदा पूषा देवः भुवत् भवति । सचा सहायः इन्द्रस्य ॥ (४)

गौर्धयति मरुतां श्रवस्युर्माता मघोनाम् । युक्ता वह्नी रथानाम् ॥

बिन्दोर्वा पूतदक्षस्य वा आर्षम् । गौःशब्देनात्र माध्यमिका वाक् उच्यते । सा धयति पानार्थमुदकं रक्षति । वर्षतीत्यर्थः । मरुतां माता । श्रवस्युः । श्रवःशब्देन कीर्तिरुच्यते । तामिच्छति श्रवस्यति श्रवस्यते । उप्रत्ययः । श्रवस्युः । कीर्तिकाम इत्यर्थः । कीदृशानां पुनर्मरुतां माता । उच्यते । मघोनाम् । मघं धनम् । तद्येषामस्ति ते मघवानः । तेषां मघोनाम् । धनवतामित्यर्थः । किं केवलैव गौर्वर्षति । नेत्युच्यते । युक्ता तैरेव पुत्रैः । मरुद्भिः सहितेत्यर्थः । वह्निः मातृत्वात्तेषामेव मरुतां वोढ्री । कीदृशानां पुनर्मरुतां वोढ्री । उच्यते । रथानां रथस्वभावकानामित्यर्थः ॥

बिन्दुः पूतदक्षः वा । गौः वाक् माध्यमिका । धयति पिबति सोमम् । मरुतां मघोनां धनवतां माता श्रवस्युः अन्नकामा । श्रवोऽन्नम् । युक्ता उद्युक्ता वह्निः वोढ्री विश्वस्य । रथानां रंहणानां गन्तॄणामिति मरुतां विशेषणम् ॥ (५)

उप नो हरिभिः सुतं याहि मदानां पते । उप नो हरिभिः सुतम् ॥

श्रुतकक्षस्यार्षम् । उपेत्ययमुपसर्गः आ इत्येतस्य स्थाने द्रष्टव्यः याहीत्याख्यातेन सम्बध्यते । आयाहीति । केन पुनरागच्छामीति । उच्यते ।

हरिभिः अश्वैरित्यर्थः । किं पुनः प्रति आगच्छामि । उच्यते । नः सुतमस्माकं स्वभूतमभिषुतं सोमं प्रति । मदानां पते । मदाः गर्वाः । तेषामधिपतिः । अथवा मादयन्तीति मदाः सोमाः । तेषामधिपतिभूताः । उप नो हरिभिः सुतं इत्यभ्यासः । अभ्यासेन च भूयानर्थः प्रतीयते । अस्माकं स्वभूतमभिषुतं सोमं प्रति शीघ्रमागच्छेत्यर्थः ॥

श्रुतकक्ष एव द्वयोः । उप याहि उपगच्छ । नः अस्माकम् । सुतं सोमम् । हरिभिः जवाश्वैः । हे मदानां पते सोमानां स्वामिन्निन्द्र । उप इति पुनर्वचनमादरार्थम् ॥ (६)

इष्टा होत्रा असृक्षतेन्द्रं वृधन्तो अध्वरे । अच्छावभृथमोजसा ॥

श्रुतकक्षस्यार्षम् । ऋषिरात्मीयान् ऋत्विजः आह । इष्टाः प्रियाः । होत्राः । हूयन्त इति होत्राः । आहुतय इत्यर्थः । ता असृक्षत विसृजत । दत्त इत्यर्थः । कथं पुनर्विसृजामः । उच्यते । इन्द्रं वृधन्तः वर्धयन्तः । अध्वरे यज्ञे । केन । सामर्थ्यात्स्तुतिभिः स्तुवन्तः इत्यर्थः । क्व पुनर्विसृजामः । उच्यते । अच्छा अवभृथं आप्तुमवभृथमित्यर्थः । प्रधानाहुतिषु कृतासु अवभृथसंज्ञकं कर्म करिष्यते । एवमवभृथमित्यर्थः । ओजसा स्वेन कर्मणा सामर्थ्येन वा ॥

इष्टा इति यजेः कर्तरि क्तः । इष्टवत्यः । इन्द्रं होत्राः वषट्कर्तारः । होत्राशब्दः स्त्रीलिङ्गः । सप्त होत्राः प्राचीर्वषट्कुर्वन्तीति । असृक्षत । सृष्टिरुद्योगः । उद्युक्ता भवन्ति । अवभृथं अच्छ अभि वृधन्तो वृद्धाः सोमपानेन । अध्वरे यज्ञे । ओजसा च युक्ताः । ये यज्ञं समाप्य अवभृथं अभिगच्छन्ति ते प्राधान्येन इन्द्रं यजन्तीत्यर्थः ॥ (७)

अहमिद्धि पितुः परिमेधामृतस्य जग्रह । अहं सूर्य इवाजनि ॥

वत्सस्यार्षम् । अहम् । इत् हि द्वावपि पादपूरणौ । पितुः कण्वस्य सकाशात् । परीत्ययं जग्रहे इत्याख्यातेन सम्बन्धयितव्यः । मेधां प्रज्ञाम् । कीदृशस्य पितुः सकाशात् । उच्यते । ऋतस्य सत्यस्य । परिजग्रह परिगृहीतवान् । तया च गृहीतया अहं सूर्य इव अजनि । यथा सूर्यः सर्वार्थानां द्रष्टा तद्वदहमपि सर्वार्थानां सन्द्रष्टा सञ्जात इत्यर्थः ॥

वत्स एव । अहं पितुः मम कण्वात् परि । परीति पञ्चम्यर्थानुवादकः । मेधां बुद्धिं ऋतस्य यज्ञस्य इन्द्रविषयस्य स्तोत्रस्य । तद्विषयामित्यर्थः । जग्रह गृहीतवान् अस्मि । हि इति हेतौ । यस्मात् गृहीतविद्यः अहं ततः अहं सूर्य इव अजनि अभूवं तेजसा इति इन्द्रस्तुतिः ॥ (८)

रेवतीर्णः सधमाद इन्द्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम ॥

शुनःशेपस्यार्षम् । रयिरिति धननाम । तद्यासां विद्यते ता रेवतीः । द्वितीयाबहुवचनमिदं प्रथमाबहुवचनस्य स्थाने द्रष्टव्यं सन्त्वित्याख्यातेन सम्बध्यते । धनवत्यो भवन्त्वित्यर्थः । काः । सामर्थ्यात्स्तुतयः । कस्य सम्बन्धिन्यः । उच्यते । सधमादे इन्द्रे । द्वेऽप्येते सप्तम्येकवचने षष्ठ्येकवचनस्य स्थाने द्रष्टव्ये । अस्माकं सहभूतानां महनीयस्य स्तुत्यस्य इन्द्रस्य सम्बन्धिन्यः । न केवलं धनवत्यो भवन्त्विति । किं तर्हि । तुविवाजाः । तुवि इति बहुनाम । वाज इति अन्ननाम । तुवि बहु वाजोऽन्नं यासां ता तुविवाजाः । प्रभूतान्नाः । एतदुक्तं भवति । धनस्य साधका भवन्त्वित्यर्थः । क्षुमन्तः । क्षु । क्षु शब्दे इत्यस्येदं रूपम् । शब्दवन्तः कीर्तिमन्तः । याभिर्मदेम मोदेमेत्येतदाशास्महे ॥

शुनश्शेपः । रेवतीः । रयिमत्यः । जसि पूर्वसवर्णदीर्घः वा छन्दसि (पा. ६. १. १०६) इति । रेवत्यः । गाव इत्यर्थः । पशवो वै रेवत्यः इति

श्रुत्यन्तरम् । नः अस्माकम् । सधमादे । सह माद्यति इति सधमादः । इन्द्रे अस्माभिः सङ्गमादौ सति इति एतत् । सन्तु भवन्तु । तुविवाजाः बह्वन्नाः । याभिः रेवतीभिः वयं क्षुमन्तः कीर्तिमन्तः मदेम हृष्येम । क्षु शब्दे इत्यस्मात् क्षु ॥ (९)

सोमः पुषा च चेततुर्विश्वासां सुक्षितीनाम् । देवत्रा रथ्योर्हिता ॥

वामदेवस्यार्षम् । सोमः पूषा च चेततुः जानीतः विश्वासां सुक्षितीनाम् । एते द्वितीयार्थे षष्ठ्यौ । विश्वाः सुक्षितीः सर्वान्सुनिवासान् । क्व । देवत्रा । देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् । (पा. ५. ४. ५६) इत्येवमत्र सप्तम्यास्त्रा । तेन देवेषु चेततुः । रथ्योः । रथशब्देनात्र यज्ञ उच्यते । रंहतेर्गतिकर्मणः । रथ्योः । रथस्य यज्ञस्य यौ वोढारौ तौ पत्नीयजमानावत्र रथ्यावुच्येते । तयोः । यज्ञस्य देवान् प्रति प्रापयित्रोः पत्नीयजमानयोः । हिता । द्विवचनस्यायमाकारः । हितौ ॥

वामदेवः । सोमः च पूषा च उभौ देवौ चेततुः जानीतः । विश्वासां सुक्षितीनां शोभनानां क्षितीनां प्रजानाम् । कर्मणि षष्ठी । सुकृतः प्रजा जानीत इत्यर्थः । देवत्रा देवेषु । रथ्योः । रथनेता रथिः । रथनायकयोः । हिता निहितौ प्रजापतिना ॥

(१०)

द्वितीये षष्ठ्या दशत्या

पान्तमा वो अन्धस इन्द्रमभि प्र गायत ।
विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनाम् ॥

श्रुतकक्षस्यार्षम् । पान्तं पिबतम् । आकारः पादपूरणः । वः । द्वितीयाबहुवचनमिदं प्रथमाबहुवचनस्य स्थाने द्रष्टव्यम् । यूयं हे ऋत्विजः । किं पुनः पिबतम । उच्यते । अन्धसः । अन्धः अन्नं सोमलक्षणम् । तस्मादियं षष्ठी । षष्ठीनिर्देशाच्च एकदेशमिति वाक्यशेषः । सोमलक्षणस्यान्नस्य एकदेशं पान्तम् । इन्द्रमभि प्रगायत । गायतीत्यर्चतिकर्म । प्रशब्दः प्रकर्षे । अभिः आभिमुख्ये । आभिमुख्येन स्थित्वा प्रकर्षेण स्तुतेत्यर्थः । कीदृशं पुनरिन्द्रं स्तुमः । उच्यते । विश्वासाहं सर्वेषां शत्रूणामभिभवितारं विश्वसहं वा । शतक्रतुम् । शतमिति बहुनाम । क्रतुरित्यपि कर्मनाम प्रज्ञानाम वा । बहूनि कर्माणि प्रज्ञा वा यस्य स शतक्रतुः । बहुकर्माणं बहुप्रज्ञं वेत्यर्थः । मंहिष्ठम् । मंहतिर्दानकर्मा । तस्मात्कर्तरि तृच् । तृजन्तादिष्ठन् । अतिशयेन दातारमित्यर्थः । कस्मै पुनर्दातारम् । उच्यते । चर्षणीनाम् । चर्षणयो मनुष्याः । षष्ठीबहुवचनं चतुर्थीबहुवचनस्य स्थाने द्रष्टव्यम् । यजमानमनुष्येभ्य इत्यर्थः ॥

श्रुतकक्षः । एतदाद्याः प्रायशः रात्रिपर्यायाणां स्तोत्रीयाः । सुबन्तैरपि उपसर्गाणां असमस्तानां आख्यातैः इव सम्बन्धा दृश्यन्ते । अप विश्वा दुरिता बाधमानः (ऋ. वे. १. ३९. ३) आपान्तं आपिबन्तं आपास्यन्तं अन्धसः अन्नस्य । सोममित्यर्थः । इन्द्रं अभि प्रगायत । वो यूयं हे सपापाः । विश्वासाहं विश्वस्मै अभिभवितारम् । शतक्रतुम् । क्रतुः कर्म प्रज्ञा वा । मंहिष्टं दातृतमम् चर्षणीनां जनानां यज्वनां स्तोतॄणां च ॥ (१)

प्र व इन्द्राय मादनं हर्यश्वाय गायत । सखायः सोमपाव्ने ॥

वसिष्ठस्यार्षम् । प्रेत्ययमुपसर्गः गायतेत्याख्यातेन सम्बन्धयितव्यः । प्रगायत प्रकर्षेण स्तुतेत्यर्थः । वः । द्वितीयाबहुवचनमिदं प्रथमाबहुवचनस्य

स्थाने द्रष्टव्यम् । यूयं हे ऋत्विजः । कं पुनः स्तुमः । इन्द्राय । चतुर्थ्येकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् । इन्द्रस्य । मादनं सोममित्यर्थः । कीदृशस्येन्द्रस्य । उच्यते । हर्यश्वाय । इदमपि चतुर्थ्येकवचनं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् । हरितवर्णावश्वौ यस्य स हर्यश्वः । तस्य हर्यश्वस्य । सखायः ऋत्विजः । सोमपाव्ने । इयमपि चतुर्थी षष्ठ्यर्थे । सोमपातुरिन्द्रस्य मदकरं सोमं स्तुतेत्यर्थः ॥

वसिष्ठः । वः यूयं इन्द्राय इन्द्रार्थं मादनं मदकरं स्तोत्रं हर्यश्वाय इन्द्राय हे सखायः प्रस्तोत्रादयः सोमपाव्ने सोमानां पात्रे । यद्यपि अन्यासामपि देवतानां सोमपानं विद्यते तथापि अतिशयेन इन्द्रस्य अस्ति । त्रिष्वपि सवनेषु प्रस्थितयाज्यानां मुख्याः ऐन्द्र्यः । प्रातस्सवने होतुः शस्त्रयाज्यासु ऐन्द्रावारुणी ऐन्द्राबार्हस्पत्या ऐन्द्रावैष्णवी इति च विद्यते । उक्थ्येऽपि शस्त्रयाज्याः तद्देवत्या एव ऐन्द्रावारुणी ऐन्द्राबार्हस्पत्या ऐन्द्रावैष्णवी इति । षोडशिस्तोत्रशस्त्रे ऐन्द्रे । रात्रिपर्यायाः सर्वे ऐन्द्राः ॥ (२)

वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः । कण्वा उक्थेभिर्जरन्ते ॥

मेधातिथेरार्षम् । वयम् । उ इति पादपूरणः । त्वा त्वाम् । कीदृशा वयम् । उच्यते । तदिदर्थाः । इच्छब्दः पादपूरणः । यस्तवार्थो यागादिः स अर्थो येषां ते तदर्थाः । यागपरा इत्यर्थः । हे इन्द्र त्वायन्तः त्वां यष्टुमिच्छन्तः । सखायः सखिभूताः तव । कण्वाः कण्वस्य पुत्राः मेधातिथिप्रभृतयः । उक्थेभिः स्तोत्रैः । जरन्ते स्तुवन्तीत्यर्थः ॥

मेधातिथिः प्रियमेधश्च द्वावृषी । वयं त्वां स्तुमः इति शेषः । उः पूरणः । तदिदर्थाः स एवार्थः प्रयोजनं येषां ते तदिदर्थाः स्तुत्येकपरार्थाः । उक्तमेव आपरोक्ष्येण कीर्तयति आदरार्थम् । हे इन्द्र त्वायन्तः त्वत्कामाः

सखाय: स्तोतार: कण्वा: कण्वपुत्रा: उक्थेभि: स्तोत्रै: जरन्ते स्तुवन्ति त्वाम् ॥ (३)

इन्द्राय मद्वने सुतं परिष्टोभन्तु नो गिरः । अर्कमर्चन्तु कारवः ॥

श्रुतकक्षस्यार्षम् । इन्द्राय । तादर्थ्ये चतुर्थी । इन्द्रार्थम् । कीदृशाय इन्द्राय । उच्यते । मद्वने । इयमपि तादर्थ्ये चतुर्थी । मदवत इन्द्रस्यार्थाय । सुतं अभिषुतं सोमम् । परिष्टोभन्तु सर्वतः स्तुवन्तु । नः अस्माकं स्वभूताः । गिरः स्तुतिलक्षणा वाचः । अर्कं देवं सोमम् । अर्चन्तु पूजयन्त्वित्यर्थः । मदीयाः कारवः स्तोतारः । ऋत्विज इत्यर्थः ॥

श्रुतकक्षः । इन्द्राय मद्वने मदनशीलाय । तदर्थं सुतं सोमं परिष्टोभन्तु परि अभिस्तुवन्तु । नः अस्मदीया गिरः वाचः । अर्कं अर्चनीयं इन्द्रं त्वां अर्चन्तु कारवः स्तोतारः ॥ (४)

अयं त इन्द्र सोमो निपूतो अधि बर्हिषि । एहीमस्य द्रवा पिब ॥

इरिम्बिठिर्नाम ऋषिः । तस्येदमार्षम् । अयं सोमः । ते इति तादर्थ्ये एषा चतुर्थी । त्वदर्थमित्यर्थः । हे इन्द्र निपूतः नियमेन दशापवित्रशोधित इत्यर्थः । क्व पुनर्निपूतः । उच्यते । अधि बर्हिषि । बर्हिष उपरि । एतत् ज्ञात्वा आ आभिमुख्येन । इहि द्रव इति द्वावपि गत्यर्थौ । अभ्यासे च भूयांसमर्थं मन्यन्ते । शीघ्रमेहीत्यर्थः । ईमिति पादपूरणः । एत्य च अस्य सोमस्य । षष्ठीनिर्देशात्स्वाङ्गं पिब ॥

इरिम्बिठिः । अयं सोमः हे इन्द्र ते त्वदर्थं निपूतः नितरां शोधितः अधि बर्हिषि स्थितः । अतः एहि आगच्छ । ईं एनम् । अस्य इमं पिब । अस्य द्रव त्वरितमागच्छ ॥ (५)

सुरूपकृत्नुमूतये सुदुघामिव गोदुहे । जुहूमसि द्यवि द्यवि ॥

मधुच्छन्दस आर्षम् । सुरूपकृत्नुं शोभनस्य वृत्रवधादेः कर्मणः कर्तारमिन्द्रम् । ऊतये आत्मनः पालनार्थं तस्यैव तर्पणार्थं वा । सुदुघामिव सुदोहनामिव । गोदुहे तस्या एव गोदोहनार्थम् । एतदुक्तं भवति । यथा कश्चिद्गोदोहकर्मा तस्या एव गोदोहनार्थमाह्वयति तद्वत् जुहूमसि आह्वयामः । द्यवि द्यवि अहन्यहनीत्यर्थः ॥

मधुच्छन्दाः । सरूपकृत्नुं सुरूपाणां कर्मणां कर्तारं इन्द्रं जुहूमसि । पुनः पुनराह्वयामः । द्यवि द्यवि दिने दिने । ऊतये रक्षणार्थं तर्पणाय वा । सुदुघामिव दोग्धुं सुशकामिव गा गोदुहे गोदोहनाय । गोशब्दोऽनुवादः । दोहनाय इत्यर्थः ॥ (६)

अभि त्वा वृषभा सुते सुतं सृजामि पीतये । तृम्पा व्यश्नुही मदम् ॥

त्रिशोकस्यार्षम् । अभीत्ययमुपसर्गः सृजामीत्याख्यातेन सम्बन्धयितव्यः । अभिसृजामि । आभिमुख्येन ददामीत्यर्थः । किं तत् । पुरोडाशादिलक्षणं हविः । त्वा । प्रथमैकवचनमिदं चतुर्थ्येकवचनस्य स्थाने द्रष्टव्यम् । ते । हे इन्द्र । वृषभः वर्षितः । कस्मिन् काले हविर्विसृजामि । सुते अभिषुते सोमे । न केवलं सुते सोमे हविरेव ददामि । किं तर्हि । सुतं सृजामि । अभिषुतं च सोमं ते ददामीत्यर्थः । पीतये पानार्थम् । दत्तं च सत् तृम्प भक्षय तर्पय आत्मानं वा । यद्भक्षयितव्यं तद्भक्षय । यत्पातव्यं तत्पिब । पीत्वा च व्यश्नुहि प्राश्नुहि । मदम् ॥

त्रिशोकः । अभि उद्दिश्य त्वा त्वां हे वृषभ वर्षितः कामानां इन्द्र सुते । भावे निष्ठा । अभिषवे सति । सुतं सोमं सृजामि पीतये तव । तृम्पा तृप्य तेन सोमेन व्यश्नुहि व्याप्नुहि मदं हर्षं तृप्त्यर्थम् ॥ (७)

य इन्द्र चमसेष्वा सोमश्चमूषु ते सुतः । पिबेदस्य त्वमीशिषे ॥

कुसीदिन आर्षम् । हे इन्द्र । चमसेष्वा सोमः । आकारः पादपूरणः । चमसेषु व्यवस्थितः सोम इत्यर्थः । चमूषु अभिषवणफलकेषु । ते त्वदर्थम् । सुतः अभिषुतः सोमः । पिब । इत् इति पादपूरणः । अथवा चमु भक्षणे । भक्षणीयेषु ग्रहचमसादिषु । अथवा बहुवचनं बहुयज्ञापेक्षम् । बहुषु यज्ञेष्वधिषवणफलकेषु । अस्य सोमस्य । षष्ठीनिर्देशात् एकदेशमिति वाक्यशेषः । कस्मात्पुनरहं पिबामि । उच्यते । यस्मात्त्वं ईशिषे सर्वस्य ईश्वरः ॥

कुसीदी । यः सोमः चमसेषु आ आसिक्तः चमूषु अधिषवणफलकयोः । द्विवचने बहुवचनं व्यत्ययात् । चम्वोः सुतः पिब तं सोमम् । इदिति पूरणः । अस्य सोमस्य त्वं ईशिषे ईशः भवसि ॥ (८)

योगे योगे तवस्तरं वाजे वाजे हवामहे । सखाय इन्द्रमूतये ॥

शुनःशेपस्यार्षम् । योगः नियोगः व्यापारः कर्म वृत्रवधादि । तस्मिन् सर्वस्मिन् । तवः इति बलनाम । तवस्तरं अतिशयेन बलवत् । वाजे वाजे अन्ने अन्ने हविर्लक्षणे उपकल्पिते । हवामहे आह्वयाम इत्यर्थः । हे सखाय ऋत्विजः । इन्द्रं ऊतये तर्पणाय । अथवा योगः अलब्धस्यार्थस्य लाभः । अस्मिन् सर्वस्मिन् । लाभार्थमित्यर्थः । अतिशयेन बलवन्तम् । वाजे वाजे सर्वस्मिन् सङ्ग्रामे । हवामहे हे सखायः । इन्द्रमूतये तर्पणाय आत्मनः पालनार्थम् ॥

शुनश्शेपः । योगे योगे सर्वेषु योगेषु । अप्राप्तानां प्राप्तिर्योगः । तदर्थं तवस्तरं प्रवृद्धतरं इन्द्रम् । वाजे वाजे सर्वेषु युद्धेषु अन्येषु वा निमित्तेषु

हवामहे आह्वयामः स्तुमः इति वा । सखायः स्तोतृत्वेन सहायभूताः वयं इन्द्रम् । ऊतये रक्षणार्थम् ॥ (९)

आ त्वेता निषीदतेन्द्रमभि प्र गायत । सखायः स्तोमवाहसः ॥

मधुच्छन्दस आर्षम् । आ तु इति पादपूरणौ । आ इत क्षिप्रमागच्छत । एत्य च निषीदत । निषद्य च इन्द्रमभिप्रगायत आभिमुख्येन स्तुतेत्यर्थः । हे सखाय ऋत्विजः । स्तोमवाहसः स्तोमानां प्रापयितारः । स्तोतार इत्यर्थः ॥

मधुच्छन्दाः । आ इत्ययं उपसर्गः इतेत्यनेन सम्बन्धनीयः । तु क्षिप्रं आ इत आगच्छत । उपसर्गाभ्यां च आख्यातावृत्तिं सूचयति । हे प्रस्तोत्रादयः आगच्छतागच्छत इति प्रत्येकं स्तोतॄन् आह्वयति । निषीदत उपविशत स्तोतुम् । निषद्य इन्द्रं अभि प्रगायत । हे सखायः प्रस्तोत्रादयः । हे स्तोमवाहसः । स्तोमान् त्रिवृदादीन् स्तोत्राणि वा वहन्ति इति स्तोमवाहसः ॥ (१०)

द्वितीये सप्तम्या दशत्या

इदं ह्यन्वोजसा सुतं राधानां पते । पिबा त्वस्य गिर्वणः ॥

विश्वामित्रस्यार्षम् । इदम् । नपुंसकलिङ्गं व्यत्ययेन पुंलिङ्गं द्रष्टव्यम् । इमम् । हि अनु । द्वावपि पादपूरणौ । ओजसा बलेन । सुतं अभिषुतं सोमं ज्ञात्वा । हे राधानां पते धनानामधिपते । पिब । तु इति पादपूरणः । अस्य । षष्ठीनिर्देशात् एकदेशमिति वाक्यशेषः । हे गिर्वणः ।

गिरः स्तुतयः । ताभिर्यो वन्यते सम्भज्यते स गिर्वणाः । तस्य सम्बोधनं हे गिर्वणः । स्तुतिभिः सम्भजनीय ॥

विश्वामित्रः । इदं अन्नम । हि इति पूरणः । अनु आनुपूर्व्येण ओजसा बलेन सुतं अभिषुतं अस्माभिः अन्नं सोमम् । त्वदर्थं इति शेषः । राधानां पते धनानां स्वामिन् पिब तु क्षिप्रं अस्य । इदं अन्नं इत्यर्थः । हे गिर्वणः गीर्भिः वननीय । गिरा वा भर्तः ॥　　　　　　　　　　　　　　　　　　　(१)

महाँ इन्द्रः पुरश्च नो महित्वमस्तु वज्रिणे । द्यौर्न प्रथिना शवः ॥

मधुच्छन्दस आर्षम् । महान् इन्द्रः पुरश्च परश्चेत्यर्थः सर्वस्मात् । नो इति पादपूरणः । महित्वं माहात्म्यं च । अस्तु भवतु । वज्रिणे । चतुर्थ्येकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् । वज्रिणः वज्रवतः । इन्द्रस्येत्यर्थः । अतिभक्ततया एतदाशास्महे । किंच द्यौर्न । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । द्यौरिव । प्रथिना पृथुत्वेन । शवः बलं सेनालक्षणम् । अस्त्वित्येतदनुषज्यते ॥

मधुच्छन्दाः । महान् भवति इन्द्रः पुरन्दरः । पुरश्च पुरस्तात् च नः अस्माकं आगच्छतु रक्षणार्थम् । महित्वं महत्वं अस्तु पुनश्च वज्रिणे इन्द्राय । इन्द्रस्येत्यर्थः । द्यौर्न अन्तरिक्षमिव भवतु । प्रथिना प्रथिम्ना पृथुत्वेन । शवः बलं इन्द्रस्य इति इन्द्रभक्त्या आशास्ते । वृद्धस्य चिद्वर्धतामस्य तनूः (ऋ. वे. ६. २४. ७) इति यथा ॥　　　　　　　　　　　　　　　　　　　(२)

आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं संगृभाय । महाहस्ती दक्षिणेन ॥

कुसीदिन आर्षम् । आ तू इति द्वावपि पादपूरणौ । नः अस्माकं स्वभूतं सोमम् । हे इन्द्र । क्षुमन्तम् । क्षु । क्षु शब्द इत्येतस्येदं रूपम् ।

कीर्तिमन्तम् । चित्रं विचित्रं पूज्यं वा । ग्राभं ग्राह्यं ग्रहणयोग्यम् । अभिसंस्कारैः संस्कृतमित्यर्थः । संगृभाय सम्यक् गृहाण । गृहीत्वा च पिबेत्यभिप्रायः । केन पुनः गृह्णामि । महाहस्ती । महांश्चासौ हस्तश्च महाहस्तः । तस्मादिदं तृतीयैकवचनम् । महता हस्तेनेत्यर्थः । कतमेन । उच्यते । दक्षिणेन ॥

कुसीदी । आ इत्युपसर्गदर्शनात् योग्यक्रियापदाध्याहारः । आहर नः अस्मभ्यं तु क्षिप्रं हे इन्द्र । ग्राभं इति वक्ष्यमाणं इहापि सम्बध्यते । क्षुमन्तं कीर्तिमन्तं कीर्तिसहितं ग्राभम् । तदर्थं चित्रं विचित्रं ग्राभं धनम् । गृह्यते संगृह्यते सर्वैः इति ग्राहः । तं संगृभाय संगृहाण । छन्दसि शायजपि (पा. ३. १. ८४) इति हलः श्नः शानजादेशः । महाहस्ती महान् हस्तो महाहस्तः । महाहस्तवान् त्वं दक्षिणेन हस्तेन ॥ (३)

अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे । सूनुं सत्यस्य सत्पतिम् ॥

प्रियमेधस्य आर्षम् । अभीत्ययमुपसर्गः अर्चेत्याख्यातेन सम्बन्धयितव्यः । प्रेति पादपूरणः । गोपतिम् । गोशब्देनात्र सोम उच्यते । तस्य पतिः स्वामी । तं गोपतिम् । सोमस्य स्वामिनमित्यर्थः । गिरा स्तुतिलक्षणया वाचा । इन्द्रमभ्यर्च । मध्यमपुरुषैकवचनमिदं उत्तमपुरुषैकवचनस्य स्थाने द्रष्टव्यम् । लोट् लडर्थे द्रष्टव्यः । अभ्यर्चामि । आभिमुख्येन स्तौमीत्यर्थः । कथं पुनः स्तौमि । उच्यते । यथा विदे जानामीत्यर्थः । कीदृशं पुनरिन्द्रं स्तौमि । उच्यते । सूनुं सत्यस्य सत्यस्य पुत्रमित्यर्थः । कथं पुनरिन्द्रः सत्यस्य पुत्रः । उच्यते । त्रैविद्यलक्षणं ब्रह्म सत्यम् । तेन यानि हवींषि हूयन्ते तैर्जन्यते यस्मात्तस्मात्सत्यस्य सूनुः । अथवा सत्यमन्नमुच्यते हविर्लक्षणम् । तेन संजायते आप्यायते वा । तस्मात्सत्यस्य सूनुः । सत्पतिं सतां यजमानानां पतिं पालयितारम् ॥

प्रियमेधः । अभिप्रार्च अभिप्रगाय हे स्तोतः गोपतिं गवां पतिं गवां सोमानां अपां तेजसा गवामेव वा पतिं इन्द्रं गिरा स्तुत्या यथा विदे ज्ञायते त्वया सूनुं सत्यस्य प्रजापतेः सत्पतिं श्रेष्ठानामधिपतिम् । इन्द्रो ज्येष्ठानामधिपतिः इति निगमः ॥ (४)

कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥

वामदेवस्यार्षम् । कया नः अस्माकम् । चित्रो विचित्रः पूज्यो वा इन्द्रः । आभुवत आभिमुख्येन भवति । ऊती । तृतीयैकवचनस्यायं सुपां सुलुक् (पा. ७. १. ३९) इति पूर्वसवर्णः । ऊत्या तर्पणेन प्रीणनेन वा । कीदृशस्य मम । उच्यते । सदावृधः । सदा यः स्तुतिभिर्हविर्भिश्च देवान्वर्धयति स सदावृत् । तस्य सदावृधः । सर्वदा वर्धयितुर्ममेत्यर्थः । अथवा सदावृधः नित्यवर्धितः इन्द्रः । कया ऊत्या पालनेन । सखा भवति । कया शचिष्ठया । शचीति कर्मनाम । अतिशयेन शची शचिष्ठा । तया शचिष्ठया । अतिशयवत्या यागक्रियेत्यर्थः । वृता । वर्ततेऽसाविति वृत् । तया वृता । वर्तमानयेत्यर्थः ॥

वामदेवः । कया ऊती ऊत्या तर्पणेन नः अस्मान् आभुवत् अभिमुखो भवेत् । चित्रः चायनीयः पूज्यः सदावृधः सखा च इन्द्रः । कया च आवृता आवर्तमानेन कर्मणा शचिष्ठया । शचीति प्रज्ञाकर्मणोर्नाम । प्रज्ञावत्तमया । प्रज्ञासहितमनुष्ठीयमानया इत्यर्थः ॥ (५)

त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतम् । आ च्यावयस्यूतये ॥

श्रुतकक्षस्यार्षम् । श्रुतकक्षः पुत्रपौत्रानाह । त्यशब्दः तच्छब्दपर्यायः । तच्छब्दश्रुतेश्च योग्यार्थसम्बन्धो यच्छब्दोऽध्याहर्तव्यः । य उक्तगुण

इन्द्रः तम् । उ इति पादपूरणः । वः । षष्ठीबहुवचनमेतत् ऊतय इत्येतेन सम्बन्धयितव्यः । सत्रासाहम् । सत्राशब्दः सत्यवचनः सदाशब्दपर्यायो वा । सहिः अभिभवे मर्षणे च । अत्र सहिः अभिभवार्थः । सत्येन सर्वदा वा शत्रूणामभिभवितारम् । विश्वासु गीर्षु । सप्तमीबहुवचनमिदं तृतीयाबहुवचनस्य स्थाने द्रष्टव्यम् । विश्वाभिर्गीर्भिः । सर्वाभिः ऋग्यजुस्सामलक्षणाभिर्वाग्भि-रित्यर्थः । आयतं निबद्धम् । स्तुतमित्यर्थः । आच्यावयसि । च्यवतिर्गत्यर्थः । मध्यमपुरुषैकवचनमिदं उत्तमपुरुषस्य स्थाने द्रष्टव्यम् । आभिमुख्येन च्याव-यामि । गमयामीत्यर्थः । ऊतये युष्माकं पालनार्थमित्यर्थः ॥

श्रुतकक्षः । त्यं तं इन्द्रम् । उः पूरणः । सत्रासाहं विश्वस्याभिभवितारं सर्वदा अभिभवितारं इति वा । विश्वासु गीर्षु स्तुतिषु आयतं अभिगतम् । वः । त्वमित्यर्थः । हे स्तोतः आच्यावयसि गमय ऊतये रक्षणाय तर्पणाय च ॥ (६)

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषम् ॥

मेधातिथेरार्षम् । सदः यज्ञगृहम् । तस्य पतिं स्वामिनम् । अद्भुतं महान्तम् । प्रियं इन्द्रस्य । षष्ठ्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । इन्द्रम् । कीदृशम् । काम्यं कमनीयं यष्टॄणाम् । सनिं निधानम् । कस्य । सामर्थ्यात् धनस्य । मेधां प्रज्ञां च । अयासिषं याचे इन्द्रम् ॥

मेधातिथिः । सदसस्पतिर्नाम देवः । अग्निविशेषः इति केचित् । तं अद्भुतं महान्तम् । अत्पूर्वात् भवतेरद्भुतः । प्रियं सखायं इन्द्रस्य काम्यं कमनीयम् । सनिं संभवनीयां दात्रीं फलानां मेधां बुद्धिं अयासिषं अयाचिषं याचामि । लङर्थे लुङ । सनिमिति मेधाविशेषणम् । सन्या मेधया इति बहुशः, दर्शनात् ॥ (७)

ये ते पन्था अधो दिवो येभिर्व्यश्वमैरयः । उत श्रोषन्तु नो भुवः ॥

वामदेवस्यार्षम् । ये ते तव स्वभूताः । पन्थाः । एकवचनमिदं बहुवचनार्थे भवति । पन्थानः । क्व । अधो दिवः द्युलोकस्य अधस्तात् । अन्तरिक्षलोके इत्यर्थः । येभिः यैः पथिभिः । व्यश्वं वेगिताश्वम् । शीघ्रमित्यर्थः । ऐरयः पूर्वकालमपि आगतवानसि । ये ते पन्था इति पूर्वस्मिन्नर्धर्चे यच्छब्दस्य श्रुतत्वात् परस्मिन्नर्धर्चे तच्छब्दो योग्यार्थ-सम्बन्धोऽध्याहर्तव्यः । तैरेत्य उत अपिच । श्रोषन्तु । बहुवचनमिदमेक-वचनस्य स्थाने द्रष्टव्यम् । श्रोषतु शृणोतु भवान् । किम् । सामर्थ्यात्स्तुतीः । नः अस्माकं सम्बन्धिनीः । अस्मत्कर्तृका इत्यर्थः । क्व पुनः शृणोतु स्तुतीः । उच्यते । भुवः । भूशब्दः पृथिवीनाम्नां मध्ये पठ्यते । तस्मादियं अवयवलक्षणा षष्ठी । पृथिव्या अवयवे वेद्याख्ये प्रदेशे इत्यर्थः ॥

वामदेवः । ये ते त्वदीयाः पन्थाः पन्थानः सन्ति । अधः अधस्तात् दिवः द्युलोकात् तत्प्राप्तिहेतवः । येभिः यैः पथिभिः व्यश्वं ऋजुकं ऐरयः प्रापयः दिवम । उत अपिच श्रोषन्तु ते पन्थानः शृण्वन्तु नः अस्मदीयाः भुवः भावयित्रीः सतीः । द्युलोकप्रापकाः देवा यज्ञाद्यभिमानिनः वा अत्र विवक्षिताः ॥ (८)

भद्रं भद्रं न आभरेषमूर्जं शतक्रतो । यदिन्द्र मृडयासि नः ॥

श्रुतकक्षस्यार्षम् । भद्रंशब्दः शोभनवचनः । तस्यायमभ्यासः भद्रं भद्रमिति । अभ्यासे च भूयांसमर्थं मन्यन्ते यथा अहो दर्शनीया अहो दर्शनीया इति अतिशयेन दर्शनीया इति गम्यते एवमिहापि भद्रं भद्रं अतिशयेन शोभनमित्यर्थः । नः । चतुर्थीबहुवचनमिदम् । अस्मभ्यम् । आभर । हरेरिदं रूपं हकारस्य भकारापत्त्या । आभर आहर आनय ॥

देहीत्यर्थः। किं पुनराहरामि। उच्यते। इषमूर्जम्। द्वे अप्येते अन्ननामनी। अतः पौनरुक्त्यप्रसङ्गात् ऊर्जशब्दोऽत्र रसवचनो द्रष्टव्यः। अन्नं च रसं चेत्यर्थः। हे शतक्रतो। शतमिति बहुनाम। क्रतुरित्यपि कर्मनाम प्रज्ञानाम वा। बहूनि कर्माणि यस्य बह्व्यो वा प्रज्ञाः यस्य स शतक्रतुः। तस्य सम्बोधनं हे शतक्रतो बहुकर्मन् बहुप्रज्ञ वा। कीदृशं च पुनः अन्नं च रसं च भरामि। उच्यते। यत्। तृतीयाया अत्र लुक्। येन अन्नेन रसेन च। मृडयसि सर्वदा सुखयसि। जीवयसीत्यर्थः। नः अस्मान्। परस्ताद्यच्छब्दश्रुतेः पूर्वार्धर्चे तच्छब्दमध्याहृत्य एकवाक्यता नेया। येन अन्नेन रसेन च हे इन्द्र मृडयसि नः तद्भद्रं भद्रं न आभरेति॥

श्रुतकक्षः। भद्रं भद्रं सर्वं कल्याणं नः अस्मभ्यं आभर इषं पुष्टिं ऊर्जं रसं च आभर हे शतक्रतो। यत् यदि हे इन्द्र मृडयासि सुखय दयां कुर्याः नः अस्मभ्यम्॥ (९)

अस्ति सोमो अयं सुतः पिबन्त्यस्य मरुतः। उत स्वराजो अश्विना॥

पूतदक्षस्य बिन्दोः वा इदमार्षम्। अस्ति विद्यते इत्यर्थः। सोमः अयं सुतः अभिषुतः इत्यर्थः। पिबन्ति। लडयं लोडर्थे द्रष्टव्यः। पिबन्तु। अस्य। षष्ठीनिर्देशात् एकदेशमिति वाक्यशेषः। अथवा षष्ठ्येकवचनं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्। पिबन्तु एतम्। मरुतः। न केवलं मरुत एव। किं तर्हि। उत अपिचेत्यर्थः। स्वराजम्॥

बिन्दुः पूतदक्षः वा। इयं च गौर्धयतीति च प्रातस्सवने सोमातिरेके स्तोत्रीये विकल्पेन भवतः। अस्ति विद्यते सुतः अयं सोमः। पिबन्ति पिबन्तु

अस्य चमसमित्यर्थः। मरुतः स्वराजः स्वयं दीप्ताः। उत अपि च अश्विना अश्विनौ च पिबतम् ॥ (१०)

द्वितीयेऽष्टम्या दशत्या

बहु सान्ति षट् ।.

ईङ्खयन्तीरपस्युव इन्द्रं जातमुपासते। वन्वानासः सुवीर्यम् ॥

इन्द्रमातरो देवजामयः। तासां आर्षम्। ईङ्खयन्तीः। द्वितीया-बहुवचनमिदं प्रथमाबहुवचनम्। ईङ्खयन्त्यः गच्छन्त्यः। अपस्युवः स्तुतयः। कं प्रति गच्छन्त्यः। प्रकृतत्वादिन्द्रं प्रति गच्छन्त्यः। इन्द्रं जातं जातमेव उपासते। उपगम्येन्द्रं तस्येव समीपे व्यवतिष्ठन्त इत्यर्थः। वन्वानासः। वनु याचने इत्यस्येदं रूपम्। याचमानाः। किं याचमानाः। उच्यते। तस्यैवेन्द्रस्य शोभनं वीर्यम् ॥

इन्द्रमातरः देवजामयः। ईङ्खयन्तीः प्रेरयन्त्यः इन्द्रं इतस्ततः चालयन्त्यः। अपस्युवः अपांसि कर्माणि इन्द्रस्य कामयमानाः इन्द्रमातरः इति आत्मन एव ऋषीणां वचनम्। इन्द्रं जातं उपासते प्रादुर्भूतमुपासते। वन्वानासः संभजमानाः। सुवीर्यं शोभनवीर्ययुक्तं इन्द्रम् ॥ (१)

नकि देवा इनीमसि नक्यायोपयामसि। मन्त्रश्रुत्यं चरामसि ॥

गोधाया आर्षम्। नकि देवा इनीमसि। नेति प्रतिषेधः। कीति निपातोऽनर्थकः। इनीमसि। मिनातेर्हिंसार्थस्य मकारलोपः। तेनैतदुक्तं भवति। हे देवाः न इनीमसि। प्राणिबन्धनकर्म। पश्वादियागं न कुर्म

इत्यर्थः । नक्यायोपयामसि । योपयतिर्विमोहनकर्मा । स इह निखननार्थे द्रष्टव्यः । यूपनिखननमपि न कुर्मः । वृक्षौषध्यादिहिंसामपि न कुर्मः । किं तर्हि । मन्त्रश्रुत्यं मन्त्रश्रवणीयं जपाख्यं चरामसि । जपं कुर्वन्तश्चरामः । प्राणिवधं न कुर्मः । जपमेव कुर्म इत्यर्थः । उक्तं च—

जप्येनैव तु संसिद्ध्येद्ब्राह्मणो नात्र संशयः ।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ।

इति ॥

गोधा । नकि नकिः नकि इति त्रीणि नार्थे वर्तन्ते । नकि इनीमसि । इनातिर्मिनातिना समानार्था हिंसाकर्मा । न हिंस्मः युष्माकं परिचरणादीनि हे देवाः इति पूजायां बहुवचनम् । ऐन्द्रं हीदं सूक्तम् । हे देवेन्द्र नकि आयोपयामसि न मिश्रयामः । सुष्टुतीर्दुष्टुतींश्च न मिश्रयामः । सुकृतानि दुष्कृतानि च साधून्येव आचरामः । मन्त्रश्रुत्यं स्तोत्रश्रवणं चरामसि चरामः कुर्मः ॥ (२)

दोषो आगाद्बृहद्गाय द्युमद्गामन्नाथर्वण । स्तुहि देवं सवितारम् ॥

वामदेवस्यार्षम् । दोषा रात्रिः । उ इति पादपूरणः । आगात् मर्यादया आगच्छति प्रभातम् । यागकालो वर्तत इत्यर्थः । अतो ब्रवीमि । बृहत गाय उच्चारयेत्यर्थः । किं पुनः उच्चारयामि । सामर्थ्यात्स्तुतिरूपम् । कीदृशं स्तुतिरूपम् । उच्यते । द्युमत् स्वरसौष्ठवयुक्तमित्यर्थः । गामन् । गामान् गाता उच्चारयिता स्तोता । तस्य सम्बोधनं हे गामन् । स्तोतरित्यर्थः । आथर्वण । थर्वतिर्गत्यर्थः । थर्वा गन्ता । न थर्वा अथर्वा । अगन्तेत्यर्थः । अथर्वा यजमानः प्राक् प्रयोगपरिसमाप्तेः वेदिदेशान्नान्यत्र गच्छति । अतोऽसौ अथर्वेत्युच्यते । तस्यायं स्वभूतः स्तोता । तेन स आथर्वणः । तस्य सम्बोधनं हे आथर्वण । मम वामदेवस्य स्वभूत इत्यर्थः । स्तुहि देवं सवितारं सर्वस्य प्रसवितारं बृहता साम्ना । सवितृदेवत्यं च बृहत् ॥

वामदेवः। दोषो आगादिति सन्धिश्छान्दसः। दोषः। दूषयति नाशयति तमांसीति वा दुनोति उपतपति रक्षांसि इति वा दोषः सविता। स आगात् आगतः। बृहत् महत् महाफलं स्तोत्रं गाय उच्चारय द्युमत् दीप्तिमत् स्तोत्रं हे गामन्। गायतीति गामान् स्तोता। हे स्तोतः आथर्वण अथर्वणः पुत्र इत्येवमात्मानमेव अभिमन्त्रयते। स्तुहि देवं सवितारं इति पुनरुक्तिरादरार्था॥ (३)

एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः। स्तुषे वामश्विना बृहत्॥

प्रस्कण्वस्यार्षम्। एषा। उकारः पादपूरणः। उषा अपूर्व्या। यतः पूर्वं नास्ति सा अपूर्वा। अपूर्वा एव अपूर्व्या। स्वार्थिकस्तद्धितः। प्रथमेत्यर्थः। व्युच्छति। उच्छ विवासे। विवासयति। किम्। सामर्थ्यात्तमांसि। न चानुदिता तमांसि शक्नोति विवासयितुम्। अतो विवासनेनात्र उदितत्वं लक्ष्यते। उदितेत्यर्थः। प्रिया दिवः। साहचर्यात् प्रियत्वव्यपदेशः। प्रभातसमयो वर्तते। यत एवमतो ब्रवीमि। स्तुषे स्तौम्यहं वां युवां हे अश्विनौ। कथं पुनः स्तौमि। उच्यते। बृहत् महत् अस्त्वित्यर्थः॥

प्रस्कण्वः। एषो उषाः। उ इत्यनर्थकम्। एषा उषाः अपूर्व्या। पूर्वकालभवाः यस्मान्न सन्तीति। सर्वासां हि देवतानां प्रथमा उषाः। एते वा देवाः प्रातर्यावाणो यदग्निरुषा अश्विनौ (ऐ. ब्रा. २. १५) इति ऐतरेयकम्। व्युच्छति विवासयति तमांसि- प्रिया दिवः आदित्यस्य। अतः स्तुषे स्तौमि। वां युवां हे अश्विना अश्विनौ बृहत् बृहन्तौ महान्तौ वाम्। औटो लुक्॥ (४)

इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः। जघान नवतीर्नव॥

गोतमस्यार्षम्। अत्रेतिहासमाचक्षते। कालकञ्जा नाम असुराः। तैरसुरैर्बाध्यमाना देवा ब्रह्माणमुपगम्योक्तवन्तः। भगवन् कालकञ्जैरसुरैर्बा-

ध्यामहे । तेषां मारणोपायं विधस्वेति । तच्छ्रुत्वा स तानुवाच । दधीचिर्नाम ऋषिः । तमुपगम्य ब्रूत । स मारणोपायं विधास्यतीति । ते तच्छ्रुत्वा तथेत्यङ्गीकृत्य तं दधीचमुपगम्य उक्तवन्तः । भगवन्नस्मदीयान्यस्त्राणि शुक्रस्तेषां पुरोधा अपहरति । तानि रक्षस्व ततः । स ऋषिस्तानुवाच । मम मुखे प्रक्षिपध्वम् । तत इन्द्रादिभिर्देवैः समरुद्गणैस्तस्य मुखे प्रक्षिप्तानि । पुनः कालेन देवासुरसङ्ग्रामे पर्युपस्थिते एत्य देवा ऊचुः । भगवन् तान्यस्त्राणि प्रयच्छस्वास्माकम् । ततस्तेनोक्तम् । तानि मे जीर्णानि । न तानि पुनः प्राप्तुं शक्यानि । ततः प्रजापतिमुखा देवा ऊचुः । भगवन् प्राणत्यागं कुरुष्वेति । तच्छ्रुत्वा पुनः कृतश्च तेन प्राणत्यागः । तस्य दधीचः स्वभूतैरस्थिभिरिन्द्रो वृत्राणि जघान इति । इन्द्रः दधीचः अस्थभिः वृत्राणि । वृत्राणीति नपुंसकलिङ्गमिदं व्यत्ययेन पुंलिङ्गस्य स्थाने द्रष्टव्यम् । वृत्रान् शत्रूनित्यर्थः । अप्रतिष्कुतः अप्रतिस्खलितः तैः । असुरान् जघान हतवान् । कियन्तः पुनरसुरान् जघान । उच्यते । नवतिर्नव दशोत्तराणि अष्टौ शतानीत्यर्थः ॥

गौतमः । ऋषिराथर्वणो दध्यङ्ङिन्द्रेणास्थीनि याचितः । अस्थीनि प्रददौ तस्मै योगेन स्वां तनुं त्यजन् । तैरस्याकल्पयद्वज्रं त्वष्टा नेता सुरानहन् । इन्द्रो बहून् कालकञ्जान् । तदिह कीर्त्यते । इन्द्रः दधीचः ऋषेः अस्थभिः अस्थिभिः वृत्राणि शत्रून् असुरान् जघान घातितवान् । नवतीः नव । दशाधिकानि अष्टौ शतानि । अप्रतिष्कुतः । ष्कुञ् आद्रवणे । अप्रत्यागतः केनापि ॥ (९)

इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः । महाꣳ अभिष्टिरोजसा ॥

मधुच्छन्दस आर्षम् । हे इन्द्र आ इहि आगच्छेत्यर्थः । एत्य च मत्सि हृष्यस्व । अन्धसः । षष्ठ्येकवचनमिदं तृतीयैकवचनस्य स्थाने द्रष्टव्यम् । अन्धसा अन्नेन पुरोडाशादिलक्षणेन । विश्वेभिः सर्वैः सोमपर्वभिः । पर्वाणि

अवयवाः । सोमस्य पर्वाणि सोमपर्वाणि । तैः सोमपर्वभिः । तदर्थमभिषुतैः सोमावयवैस्तृप्यस्वेत्यर्थः । कस्मात् । उच्यते । यस्मान्महान् त्वं अभिष्टिः आभिमुख्येन यष्टव्यश्च । अभ्येषणशीलो वा शत्रूणाम् । ओजसा बलवत्त्वादित्यर्थः ॥

मधुच्छन्दाः । हे इन्द्र आ इहि एहि आगच्छ । मत्सि माद्यस्व अन्धसः अन्नस्य सोमस्य रसेनेत्यर्थः । विश्वेभिः विश्वैः सोमपर्वभिः सोमांशुभिः अभिष्टुतस्य । महान् त्वं अभिष्टिः अभिष्टोता अभिगन्ता शत्रूणाम् । अभिपूर्वादिषेः गतिकर्मणोऽभिष्टिः । ओजसाभिष्टिः इति सम्बन्धः ॥ (६)

आ तू न इन्द्र वृत्रहन्नस्माकमर्द्धमा गहि । महान्महीभिरूतिभिः ॥

वामदेवस्यार्षम् । आ तु इति द्वावपि पादपूरणौ । नः अस्माकं हे इन्द्र वृत्रहन् । वृत्रहा वृत्रशत्रुः वृत्रस्य हन्ता । तस्य सम्बोधनं हे वृत्रहन् । अस्माकं शत्रोर्हन्तरित्यर्थः । अस्माकं स्वभूतं अर्धं वेद्याख्यं स्थानमागच्छ । कस्मात्पुनरेवमुच्यते । यस्मात्त्वं महान् तस्मादित्यर्थः । कथं पुनरागच्छामि । उच्यते । महीभिरूतिभिर्महद्भिः पालनैस्तर्पणैर्वा सह । अस्मान् यैः पालनैस्तर्पणैर्वा पास्यति तर्पयिष्यसि वा तैः सहेत्यर्थः ॥

वामदेवः । आगहि आगच्छ तु क्षिप्रं नः अस्मान् प्रति हे इन्द्र वृत्रहन् । उक्तमेव पुनराह आदरार्थम् । अस्माकमर्धं समीपं आगहि । महान् त्वं महीभिः महतीभिः ऊतिभिः रक्षाभिः सार्धम् ॥ (७)

ओजस्तदस्य तित्विष उभे यत्समवर्तयत् । इन्द्रश्चर्मेव रोदसी ॥

वत्सस्यार्षम् । ओजः बलं तत् अस्येन्द्रस्य स्वभूतं तित्विषे । त्विष दीप्तावित्यस्येदं रूपम् । दीप्यत इत्यर्थः । कतमत् । उच्यते । अपि यत् । तृतीयाया अत्र लुक् । येन बलेन समवर्तयत् संवेष्टयति इन्द्रः । कथं पुनः

संवेष्टयति । उच्यते । चर्मेव । यथा कश्चित् चर्म वेष्टयति तद्वदित्यर्थः । किं पुनः संवेष्टयति । उच्यते । उभे रोदसी द्यावापृथिव्याविन्यर्थः ॥

वत्सः । ओजो बलं अस्य इन्द्रस्य तित्विषे दीप्यते । यत् येन उभे रोदसी द्यावापृथिव्यौ समवर्तयत् संवर्तयेत् । इन्द्रः समवर्तयत् इति पञ्चम-लकारान्तम् । छन्दस्यपि दृश्यते (पा. ६. ४. ७३) इति अडागमः । चर्मेव यथा चर्म संवेष्टयति चर्मकारः तद्वत् ॥ (८)

अयमु ते समतसि कपोत इव गर्भधिम् । वचस्तच्चिन्न ओहसे ॥

शुनःशेपस्यार्षम् । अयम् । उ इति पादपूरणः । ते तव स्वभूतः अभिषुतः सोमः । कीदृशः । यं प्रति समतसि सम्यक् सततं वा गच्छसि । कथं पुनर्गच्छसि । उच्यते । कपोत इव गर्भधिम् । गर्भं धीयते यस्यां सा गर्भधिः कपोतिका । यथा कामार्तः कपोतः हृष्टमनाः कपोतिकां गच्छति तद्वत्त्वमपि तं समतसीत्यर्थः । एतज्ज्ञात्वा वचः तत् । उत्तरत्र तच्छब्द-श्रवणात् पूर्वत्र योग्यार्थसम्बन्धो यच्छब्दोऽध्याहर्तव्यः । यद्यूपे नियुक्तं स्वं वचनं तत् । चिदिति पादपूरणः । नः । बहुवचनमिदं एकवचनस्य स्थाने द्रष्टव्यम् । तन्मम स्वभूतं वचः । ऊहसे । वहेरिदं रूपम् । वहस्व आत्मानं प्रति प्रापय । शृण्वित्यर्थः । ममायमभिप्रायः । सोम एवास्तु । मुञ्च मामिति ॥

शुनश्शेपः । अयं सोमः । उः पूरणः । ते तुभ्यं कल्पितः । यस्मात् अयं ते अतः समतसि । अत सातत्यगमने । सम्यक् आगच्छ । कपोत इव गर्भधिं गर्भस्य धात्रीं कपोतीम् । वचः स्तोत्रं तच्चित् तदेव नः अस्मदीयं ओहसे वहसे हृदयेन ॥ (९)

वात आ वातु भेषजं शंभु मयोभु नो हृदे । प्र न आयूंषि तारिषत् ॥

उलो वातायनः । तस्यार्षम् । वातः आवातु । कीदृशम् । उच्यते । भेषजम् । पथ्यमित्यर्थः । शंभु सुखस्य भावयितृ । इदानीं सुखकरमित्यर्थः । मयोभु । कालान्तरे च सुखस्य भावयितृ इत्यर्थः । अथवा मयो बलम् । तस्य भावयितृ । नो हृदे अस्माकं हृदयस्य । प्रेत्ययमुपसर्गः तारिषदित्याख्यातेन सम्बन्धयितव्यः प्रतारिषत् । प्रवर्धयत्वित्यर्थः । नः अस्माकं आयूंषि । जीवितानीत्यर्थः ॥

वातायन उलः । वातो वायुः आवातु आगमयतु । वातेः अन्तर्भावितण्यर्थः । भेषजं रोगनाशनम् । शंभु । शं शान्तिरुपद्रवाणाम् । तस्य भावयितृ । मयोभु । मयः सुखम् । तस्य भावयितृ । नः अस्माकं हृदे हृदयाय । शंभु मयोभु च इति सम्बन्धः । प्रतारिषत् वर्धयतु नः अस्माकं आयूंषि ॥ (१०)

द्वितीये नवम्या दशत्या

यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा । नकिः स दभ्यते जनः ॥

कण्वस्यार्षम् । यं रक्षन्ति प्रचेतसः प्रवृद्धज्ञानाः । वरुणः मित्रः अर्यमा । न इत्ययं प्रतिषेधे वर्तते । किः इति पादपूरणः । दभ्यते । सः इति निर्देशे । दभ्नोतिर्वधकर्मा । न स दभ्यते न सः हिंस्यते केनचित् । जनः मनुष्यः ॥

कण्वः । यं जनं रक्षन्ति प्रचेतसः प्रकृष्टज्ञाना देवाः वरुणः मित्रः अर्यमा च स जनः नकिः दभ्यते न हिंस्यते केनापि ॥ (१)

गव्यो षु णो यथा पुराश्वयोत रथया । वरिवस्या मघोनाम् ॥

वत्सस्यार्षम् । गोषु इच्छा गव्या । तस्मात् तृतीयैकवचनम् । तस्य सुपां सुलुक् इति पूर्वसवर्णः । गव्या गव्यया गवीच्छयेत्यर्थः । उ सु इति द्वावपि पादपूरणौ । नः द्वितीयाबहुवचनमिदं प्रथमाबहुवचनस्य स्थाने द्रष्टव्यम् । वयं त्वां स्तुम इति वाक्यशेषः । कथं पुनः स्तुमः । उच्यते । यथा पुरा यथा पूर्वस्मिन् काले अस्तुवन् तद्वत् इत्यर्थः । अश्वया अश्वेच्छया स्तुमः । उत अपिच रथया रथेच्छया स्तुमः । वरिवस्या । वरिवस्यः परिचरणीयः । तस्मात्सम्बुद्ध्येकवचनम् । तस्य स्थाने सुपां सुलुक् इति आकारः । वरिवस्या । परिचरणीय इत्यर्थः । कस्य पुनः परिचरणीयः । उच्यते । मघोनाम् । मघं धनं हविर्लक्षणम् । तद्येषामस्ति ते मघवानः हविष्मन्तो यजमानाः । तेषामित्यर्थः ॥

वत्सः । गव्यो । गव्या उ इति समुदायो गव्यो इति । गवादिशब्देभ्यः शसो यादेशः सुपां सुलुक् इत्यादिना । गव्या गाः । सु सुष्ठु नः अस्मभ्यं वरिवस्य प्रयच्छ । यथा पुरा दत्तवानसि । अश्वया अश्वान् । उत अपिच रथया रथान् । वरिवस्य महोनाम् । महो धनं हविर्लक्षणम् । तद्वताम् । महोनां इति चतुर्थ्यर्थे षष्ठी । हविष्मद्भ्यः अस्मद्भ्यम् ॥ (२)

इमास्त इन्द्र पृश्नयो घृतं दुहत आशिरम् । एनामृतस्य पिप्युषीः ॥

वत्सस्यार्षम् । इमाः ते तव सम्बन्धिन्यः । हे इन्द्र पृश्नयः स्तुतयः । घृतं दुहते घृतं दुह्यन्ते । घृतं क्षरन्ति घृतसहिताः क्रियन्ते इत्यर्थः । न केवलं घृतं दुह्यन्ते । किं तर्हि । आशिरं च । सोममिश्रं यत् दधि तत् आशिरम् । तत् दुह्यन्ते । तेन च सह क्रियन्त इत्यर्थः । एनाम् । द्वितीयैकवचनमिदं प्रथमाबहुवचनस्य स्थाने द्रष्टव्यम् । एनाः । ऋतस्य यज्ञस्य पिप्युषीः

ओप्यार्यौ वृद्धावित्यस्येदं रूपम् । द्वितीयाबहुवचनं च प्रथमाबहुवचनस्य स्थाने द्रष्टव्यम् । पिप्युष्य: वर्धयित्र्य: इत्यर्थ: ॥

वत्स: । इमा: पृश्नयो गाव: ते तुभ्यं घृतं दुहते । आशिरञ्च । सोममिश्रं दधि आशिरम् । तच्च । एनां भूमिम् । ऋतस्य ऋतेन उदकेन पिप्युषी: पूरयन्त्य: यज्ञसाधनद्वारेण वृष्टिं उत्पादयन्त्य: ॥ (३)

अया धिया च गव्यया पुरुणामन् पुरुष्टुत: । यत्सोमे सोम आभुव: ॥

श्रुतकक्षस्यार्षम् । अया अनया धिया । धीरिति प्रज्ञानाम । प्रज्ञया । त्वां स्तुम इति वाक्यशेष: । अथवा धीरिति कर्मनाम । अनेन यागाख्येन कर्मणा । त्वां यजाम इति वाक्यशेष: । किमर्थं पुन: स्तुम: । उच्यते । गव्यया गविच्छया । पुरुनामन । पुर्विति बहुनाम । नमति: प्रह्वीभावे । बहव: शत्रव: यं प्रति नमन्ति स पुरुनामा । तस्य सम्बोधनं हे पुरुनामन । बहूनां शत्रूणां प्रह्वीकर्तरित्यर्थ: । अथवा बहवो यजमाना: प्रह्वीभूता: । पुरुष्टुत: । बहुभि: स्तोतृभि: स्तुत: । कस्मात् पुनस्त्वां स्तुम: । उच्यते । यत् । पञ्चम्या अत्र लुक् । यस्मात्त्वं सोमे सोमे सर्वसोमयागेष्वित्यर्थ: । आभुव: आभिमुख्येन भवसि । यस्मात्त्वं सर्वेषु सोमयागेषु ईश्वरो भवसि तस्मादित्यर्थ: ॥

श्रुतकक्ष: । अया अनया धिया स्तुत्या । त्वां स्तुम इति शेष: । च इति पूरण: । गव्यया गोकामनया । हे पुरुनामन् बहुरूप बहुनामेत्येव वा । पुरुष्टुत बहुभि: स्तुत । यत् यस्मात् त्वं सोमे सोमे सर्वेषु सोमेषु आभुव: अभिमुख: भवसि । तस्मात् तं त्वाम ॥ (४)

पावका न: सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसु: ॥

मधुच्छन्दस आर्षम्। पापस्यापनयनं पावनं कर्म। तस्य कर्त्री पावका। शोधयित्री इत्यर्थः। अथवा पवतिः क्षरणार्थः। उदकानां क्षरित्री। नः अस्माकं स्वभूता सरस्वती माध्यमिका वाक्। कीदृशी। उच्यते। वाजेभिर्मदीयैरन्नैः हविर्लक्षणैर्वा अन्नैः वाजिनीवती। अन्नवती इत्यर्थः। अथवा वाजेभिरित्यनेन यज्ञस्य विशेषणम्। हविर्लक्षणैरन्नैर्युक्तं यज्ञमित्यर्थः। वाजिनीवती। वाजः बलं वेगो वा। तद्यस्यां विद्यते सा वाजिनी सेना। तद्वती या सा वाजिनीवती। अथवा वाजः अन्नं हविर्लक्षणम्। तद्यस्यामस्ति सा वाजिनीवती। यज्ञं वष्टु कामयतु धियावसुः। धीरिति कर्मनाम प्रज्ञानाम वा। वस्वित्यपि धननाम। धीः वसुभूता यस्यां सा धियावसुः कर्मधना प्रज्ञाधना वा। अथवा वसुरित्येतत् वस आच्छादने इत्येतस्येदं रूपम्। प्रज्ञया आच्छादयित्री सर्वस्य जगतः ॥

मधुच्छन्दाः। पावका शोधयित्री सरस्वती वाक् नः अस्माकं यज्ञं वष्टु इति समन्वयः। वाजेभिः अन्नैः वाजिनीवती। वाजसमूहः वाजिनी। तद्वती। अन्नैः तद्वतीत्यर्थः। यज्ञं इमं वष्ट्विति वहतेः रूपम्। वाचा हि यज्ञ उह्यते। धियावसुः। धिया प्रज्ञया वासयति व्यापयति जनान् इति धियावसुः। यज्ञं वष्ट्विति यदाह यज्ञं वहतु इत्येव तदाह इत्यैतरेयकम् ॥ (९)

क इमन्नाहुषीष्वा इदं सोमस्य तर्पयात्। स नो वसून्या भरात् ॥

वामदेवस्यार्षम्। कः मां मुक्त्वा अन्यः इमं इन्द्रं नाहुषीषु। नहुष इति मनुष्यनाम। तेषु भवाः ज्योतिष्टोमाद्याः क्रिया नाहुष्यः। तासु नाहुषीषु। ज्योतिष्टोमादिषु क्रियास्वित्यर्थः। इन्द्रं सोमस्य आ आभिमुख्येन तर्पयात्। तर्पयतीत्यर्थः। अहमेव तर्पयामीत्यभिप्रायः। यत एवमतो ब्रवीमि। स इन्द्रः नः अस्मभ्यं वसूनि धनानि आभरात् आहरतु। ददात्वित्यर्थः ॥

वामदेवः । को जनः अस्माकं सम्बन्धी नाहुषीषु । नहुष इति मनुष्यनाम । मानुषीषु प्रजासु । तासां मध्ये क इमं इन्द्रं सोमस्य । सोमेनेत्यर्थः । आतर्पयात् आतर्पयेत् । किमर्थं इन्द्रस्य तर्पणं आशास्यते तत्राह । स इन्द्रः तर्पितस्सन् नः अस्मभ्यं वसूनि धनानि आभरात् आभरतु ॥ (६)

आ याहि सुषमा हि त इन्द्र सोमं पिबा इमम् । एदं बर्हिः सदो मम ॥

इरिम्बिठेरार्षम् । आयाहि आगच्छ । कस्मात् । उच्युते । सुषुमा हि । हिशब्दो हेतौ । यस्मात्सुषुमः अभिषुणुमः सोमं तस्मादित्यर्थः । ते त्वदर्थं हे इन्द्र । एत्य च पिब इमम् । क्व पुनरभिषुणुमः । उच्यते । इदं बर्हिः । द्वे अप्येते सप्तम्येकवचनान्ते द्रष्टव्ये । अस्मिन् बर्हिषि । क्व पुनर्यत् बर्हिः । उच्यते । सदः । इदमपि सप्तम्येकवचनान्तं द्रष्टव्यम् । सदसि । मम स्वभूते वेद्याख्ये स्थाने इत्यर्थः ॥

इरिम्बिठिः । आयाहि अस्मिन् यज्ञे सुषुमा अभिषुतवन्तः हि ते तुभ्यं वयं सोमं हे इन्द्र मम मदीयम् । पिबा इमं इति दीर्घः गुणाभावश्च छान्दसः । आसदः आसीद । इदं बर्हिः अस्मिन् बर्हिषि स्तीर्णे ॥ (७)

महि त्रीणामवरस्तु द्युक्षं मित्रस्यार्यम्णः । दुराधर्षं वरुणस्य ॥

सत्यधृतेरार्षम् । महि महत् । त्रीणां त्रयाणां स्वभूतमवः पालनं तर्पणं वा अस्तु भवतु । त्रयः मां पालयन्त्वित्यर्थः । कीदृशं पुनस्त्रयाणां सम्बन्धि पालनमस्तु । उच्यते । द्युक्षं दुराधर्षम् । द्वे अप्येते पालनस्य विशेषणे । द्युशब्दः दीप्तिवचनः । क्षि निवासगत्योः । तस्मिन् यत् क्षियति तत् द्युक्षम् । दीप्तमित्यर्थः । दुराधर्षं अन्येन कृच्छ्रेण धार्यते यत् तद्दुराधर्षम् । अन्येनाभिभवितुं न शक्यते इत्यर्थः । केषां पुनस्त्रयाणां पालनं एवंगुणविशिष्टमस्तु । उच्यते । मित्रस्य अर्यम्णः वरुणस्य च ॥

वारुणिः सत्यधृतिः । महि महत त्रीणां त्रयाणा देवानां अवः रक्षणं अस्तु भवतु । अस्मभ्यं अवोऽस्तु इति बह्वचाः । द्युक्षं दीप्तम् । प्रसिद्धं सर्वत्र इत्यर्थः । दुराधर्षं अन्यैः । केषा त्रयाणाम् । मित्रस्य अर्यम्णः वरुणस्य च ॥ (८)

त्वावतः पुरूवसो वयमिंद्र प्रणेतः । स्मसि स्थातर्हरीणाम् ॥

वषस्यार्षम् । त्वावतः । वतुप्रकरणे युष्मदस्मभ्यां छन्दसि सादृश्य-उपसङ्ख्यानम (वा. ५. २. ३९) इत्यौपसङ्ख्यानिको वतुप्रत्ययः । त्वावत त्वत्सदृशः । त्वत्सदृशस्य । हे पुरूवसो । पुर्विति बहुनाम । वस्विति धननाम । पुरु वसु यस्य सः पुरुवसुः । तस्य सम्बोधनं हे पुरुवसो । बहुधन इत्यर्थः । वयं हे इन्द्र प्रणेतः । प्रपूर्वस्य नयतेः इदं रूपं प्रणेता । तस्य सम्बोधनं प्रणेतः इति भवति । प्रकर्षेण नेतः प्रणेतः प्रकर्षेण नाशयितः शत्रूणाम । स्मसि भवामः । के भवामः । सामर्थ्यात् स्तोतारः यष्टारश्च । हे स्थात अधिष्ठातः । हरीणामात्मीयानां अश्वानाम् । एतदुक्तं भवति । त्वत्सदृशस्यापि वयं स्तोतारः । किं पुनः तवैव भवामः ।

इति माधवाचार्यकृते छन्दसिकाभाष्ये द्वितीयः प्रपाठकः

वषः । त्वावतः युष्मदस्मद्भ्यां छन्दसि सादृश्ये इति वतुप् । त्वावतः स्वभूतः । स्मसि भवामः वयं हे पुरूवसो बहुधन इन्द्र प्रणेतः विश्वस्य । हरीणां तव वाहनानां स्थातः अधिष्ठातः । हर्योः स्थाता पृश्नेः प्रेता (तै. सं. १. ४. २८. १) इति हि निवित् ॥ (९)

द्वितीयस्य दशमी दशत्या

द्वितीयः प्रपाठकः

तृतीयः प्रपाठकः

उ त्वा मन्दन्तु सोमाः कृणुष्व राधो अद्रिवः । अव ब्रह्मद्विषो जहि ॥

प्रगाथस्यार्षम् । उदिति पादपूरणः । त्वा त्वां मन्दन्तु । मदी हर्षे मदतृप्तावित्यस्य वेदं रूपम् । मदिश्चान्तर्णीतण्यर्थो द्रष्टव्यः । मदयन्तु हर्षयन्तु तर्पयन्तु वेत्यर्थः । सोमाः अभिषवादिभिः संस्कारैः संस्कृताः । त्वमपि तैर्हृष्टः तर्पितो वा कृणुष्व राधः । करोतिः क्रियासामान्यवचनो दानार्थो द्रष्टव्यः । देहि धनमित्यर्थः । हे अद्रिवः । आदरणयोगात् अद्रिः वज्रः । तद्वान् अद्रिवान् । तस्य सम्बोधनं हे अद्रिवः । वज्रिन्नित्यर्थः । न केवलं धनमेव देहि । किं तर्हि । अव ब्रह्मद्विषो जहि । अवेत्ययमुपसर्गो जहीत्याख्यातेन सम्बन्धयितव्यः । जहीति च हन्तेर्गत्यर्थस्येदं रूपम् । अवजहि अधो गमय । नरकं नयेत्यर्थः । कान् । उच्यते । ब्रह्मद्विषः अस्मदीयान् ब्राह्मणान् ये द्विषन्ति ते ब्रह्मद्विषः । तान् । ब्राह्मणद्वेषकानित्यर्थः ॥

प्रगाथः । उत् अधिकं मन्दन्तु मोदयन्तु त्वां सोमाः मदीयाः । तैः कृतमोदः त्वं कृणुष्व देहि । राधः धनं अस्मभ्यं हे अद्रिवः अद्रिवन् । अद्रिः वज्रः । अवजहि अधरात् कृत्वा जहि । ब्रह्मद्विषः असुरान् राक्षसान् ॥ (१)

गिर्वणः पाहि नः सुतं मधोर्धाराभिरज्यसे । इन्द्र त्वादातमिद्यशः ॥

विश्वामित्रस्यार्षम् । गिरः स्तुतिलक्षणा वाचः । ताभिर्यो वन्यते सम्भज्यते स गिर्वणाः । तस्य सम्बोधनं हे गिर्वणः । स्तुतिभिः सम्भजनीय । पाहि रक्ष नः अस्मान् । कस्मात् । उच्यते । सुतम् । द्वितीयैकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् । सुतस्य सोमस्य । मधोः मधुस्वादुयुक्तस्य । अवयवभूताभिः धाराभिः अज्यसे । प्रथमपुरुषैकवचनमिदं मध्यमपुरुषैकवचनस्य स्थाने द्रष्टव्यम् । अज्यते भक्ष्यते । यस्मात्त्वं पिबसीत्यर्थः । यस्माच्च हे इन्द्र त्वादातं त्वया दत्तम् । इदिति पादपूरणः । यशः अन्नं कीर्तिर्वा । तस्मादपि पाहीत्यर्थः ॥

विश्वामित्रः । हे गिर्वणः गीर्भिः वननीय गिरां वा संभक्तः इन्द्र । पाहि पिब नः अस्मदीयं सुतं अभिषुतं सोमं मधोः मादयितुः सोमस्य धाराभिः अज्यसे सिच्यसे त्वम् । त्वादातमित् त्वया दत्तमेव यशो नमस्कारमस्तु । नान्यदत्तं कामयामहे वयम् ॥ (२)

सदा व इन्द्रश्चर्कृषदा उपो नु स सपर्यन् । न देवो वृतः शूर इन्द्रः ॥

वामदेवस्यार्षम् । आत्मीयान् पुत्रपौत्रानाह । सदा सर्वदा वः युष्माकं इन्द्रः चर्कृषत् अत्यर्थं करोति पुनः पुनर्वा करोति । किम् । उच्यते । बलं पुष्टिं धनं हिरण्यं दीर्घं च जीवितम् । आ उप उ नु चत्वारोऽप्येते पादपूरणाः । सशब्दः यच्छब्दमन्तरेण निराकाङ्क्षी न किंचित्प्रतिपद्यते । अतो योग्यार्थसम्बन्धो यच्छब्दोऽध्याहर्तव्यः । यः अधस्तादुक्तगुण इन्द्रः सः । कथं पुनः बलपुष्ट्यादीन् करोति । उच्यते । सपर्यन् । सपर्यतिः परिचरणकर्मा । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । परिचरन्निव । यथा कश्चित् कस्मैचित्परिचरन् प्रीतिमुत्पादयति तथेत्यर्थः । देवः दानादिगुणयुक्तः । वृतः अभ्यर्थितः । शूरः विक्रान्तः । इन्द्रः ईश्वरः इत्यर्थः ॥

वामदेवः । सदा सर्वदा वः युष्मभ्यं हे जनाः मदीयाः इन्द्रः आचर्कृषत् आकरोतु भृशं करोतु । करोतेः यङ्लुकि पञ्चमलकारान्तः चर्कृषदिति । आकरणं आनयनम् । उपो उप समीपे । नु क्षिप्रं स इन्द्रः सपर्यन् परिचर्यमाणः । परस्मैपदं व्यत्ययात् । न वृतः न वारितः केनचित् । देवः दाता शूरः इन्द्रः । नहि त्वा शूर देवा न मर्तासो दित्सन्तम् । भीमं न गां वारयन्ते (ऋ. वे. ८. ८१. ३) इति निगमः ॥　　(३)

आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः । न त्वामिन्द्रातिरिच्यते ॥

श्रुतकक्षस्यार्षम् । आ इत्येष प्रेत्येतस्य स्थाने विशन्त्वित्याख्यातेन सम्बन्ध्यते । त्वा प्रविशन्तु । त्वया पीयतामित्यभिप्रायः । केन पुनः प्रविशन्तु । उच्यते । समुद्रमिव सिन्धवः । नद्यो यथा समुद्रं प्रविशन्ति तद्वदित्यर्थः । कस्मात् । उच्यते । यस्मात्त्वाम् । द्वितीयैकवचनमिदं पञ्चम्येकवचनस्य स्थाने द्रष्टव्यम् । यस्मात्त्वत्तः हे इन्द्र अन्यद्देवान्तरं नातिरिच्यते । सर्वेषां देवतानां यस्मात् त्वमुत्कृष्टतरस्तस्मादित्यर्थः ॥

श्रुतकक्षः । आविशन्तु त्वा इन्दवः सोमाः समुद्रमिव सिन्धवः । न त्वां कश्चित् अतिरिच्यते हे इन्द्र ॥　　(४)

इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः । इन्द्रं वाणीरनूषत ॥

मधुच्छन्दस आर्षम् । इन्द्रं इत । इच्छब्दः अवधारणे । इन्द्रमेव गाथिनः । गाथानि सामानि । तद्वतो गाथिनः उद्गातारः । बृहत् । प्रथमैकवचनमिदं तृतीयैकवचनस्य स्थाने द्रष्टव्यम् । बृहता बृहन्नाम्ना महता वा । इन्द्रं अनूषतेत्येतत् परस्ताच्छ्रुतम् । अभिष्टुवन्तीत्यर्थः । इन्द्रमेव अर्केभिः । अर्काः मन्त्राः । तैः अर्केभिः । मन्त्रैरित्यर्थः । अर्किणः मन्त्रवन्तः

स्तोतारः । अभिष्टुवन्तीत्यनुषज्यते । इन्द्रमेव वाणीः । द्वितीयाबहुवचनमिदं तृतीयाबहुवचनस्य स्थाने द्रष्टव्यम् । वाणीभिः यज्ञलक्षणाभिर्वाग्भिः अभिष्टुवन्ति अध्वर्यवः ॥

मधुच्छन्दाः । इन्द्रमित् इन्द्रमेव गाथिनः । गाथा गीतिः । तद्वन्तः उद्गातारः अनूषत । णु स्तवने । स्तुवन्ति । बृहत् बृहन्तमिति वा बृहता साम्ना इति वा । इन्द्रं अर्केभिः शस्त्रैः अर्किणः शस्त्रिणः होतारः अनूषत । किं बहुना इन्द्रमेव वाणीः वाण्यः सर्वाः अनूषत ॥ (५)

इन्द्र इषे ददातु न ऋभुक्षणमृभुं रयिम् । वाजी ददातु वाजिनम् ॥

श्रुतकक्षस्यार्षम् । इन्द्रः ईश्वरः इषे । चतुर्थ्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । इषमन्नं ददातु नः अस्मभ्यं । न केवलमन्नमेव । किं तर्हि । ऋभुक्षणं महान्तं ऋभुं मेधाविनं रयिं पुत्रलक्षणं च धनं ददत्वित्यर्थः । किं च वाजी वेगवानिन्द्रः ददातु वाजिनमश्वम् ॥

श्रुतकक्षः । इयं ऐन्द्री । आर्भवीत्येके । सुधन्वनः त्रयः पुत्राः ऋभुः विभ्वा वाजी इति । ते त्रयोऽपि क्वचिदृभव इत्युच्यन्ते । क्वचित् वाजा इति । तेषामाद्यन्तयोर्नाम दृश्यन्ते बहुवत् स्तुतिः (बृ. दे. ३. ८९) इति बह्वृचानां बृहद्देवताख्ये ग्रन्थे विद्यते । आर्भवीति पक्षे तावत् योज्यते । इन्द्र इषे अन्नाय अन्नसिध्यर्थं ददातु । नः अस्मभ्यं ऋभुक्षणं महान्तं ऋभुं सौधन्वनं रयिं रयिमन्तं वाजी वाजिनं सौधन्वनं ददातु । अस्मदभिमुखं करोतु । ऐन्द्रपक्षेऽपि इन्द्र इषे इति वचनव्यत्ययः । इषं नः अस्मभ्यं ददातु ऋभुक्षणं ऋभुक्षयं उरुनिवासं ऋभुं महान्तं रयिं धनं वाजिनं अन्नयुक्तं रयिं वाजी इन्द्रः ॥ (६)

इन्द्रो अङ्ग महद्भयमभीषदप चुच्यवत् । स हि स्थिरो विचर्षणिः ॥

गृत्समदस्यार्षम् । गृत्समदः बहूनुत्पातान् दृष्ट्वा इन्द्रमनया ऋचा स्तौति । इन्द्रः अङ्ग क्षिप्रं महत् भयं अभि सत् आभिमुख्येन सीदत् । पर्युपस्थितम् । वातादय उत्पाताः भयसूचकाः । तान् अपचुच्यवत् अपच्यावयति । अपगमयतीत्यर्थः । कस्मात्पुनः अपनयति । उच्यते । यस्मात स हि स्थिरः अविचलो नित्यः । विचर्षणिः लोकपालत्वात्सर्वत्र मनुष्याणां शुभस्य अशुभस्य च कर्मणो द्रष्टा ॥

गृत्समदः । इन्द्रः अङ्ग क्षिप्रं महत् भयं भयकारणं अभिषदभितः सम्भवदिति वा अभिभवदिति वा । अपचुच्यवत् अपच्यावयतु । स हि इन्द्र स्थिरो विचर्षणिः विद्रष्टा च भवति भक्तक्लेशानाम् ॥ (७)

इमा उ त्वा सुते सुते नक्षन्ते गिर्वणो गिरः । गावो वत्सं न धेनवः ॥

शंयोरार्षम् । इमाः उ इति पादपूरणः । त्वा त्वां सुते सुतेऽभिषुते सोमे । यागकाले इत्यर्थः । नक्षन्ते । व्याप्नुवन्ति । हे गिर्वणः गीर्भिर्वननीय स्तुतिभिः संभजनीय । काः पुनर्व्याप्नुवन्ति । उच्यते । गिरः स्तुतिलक्षणा वाचः । कथं पुनर्व्याप्नुवन्ति । उच्यते । गावो वत्सं न । नशब्द उपरिष्टादुपाचारत्वादुपमार्थीयः । वत्सं गाव इव । कीदृश्यो गावः । उच्यते । धेनवः । अचिरप्रसूताः । यथा अचिरप्रसूता गावः स्नेहार्द्रेण मनसा वत्सं व्याप्नुवन्ति तद्वत्त्वां हे इन्द्र अस्मदीयाः स्तुतयः व्याप्नुवन्तीत्यर्थः ॥

शंयुः भारद्वाजः । इमाः गिरः त्वा त्वां नक्षन्ते व्याप्नुवन्ति सुते सुते सोमेषु सोमेषु सुतेषु हे गिर्वणः गाव इव धेनवः वत्सम ॥ (८)

इन्द्रा नु पूषणा वयं सख्याय स्वस्तये । हुवेम वाजसातये ॥

भरद्वाजस्यार्षम् । इन्द्रापूषणा नु क्षिप्रं वयम् । बहुवचनमिदं एकवचनस्य स्थाने द्रष्टव्यम् । अहम् । सख्याय स्तुत्यस्तोतृलक्षणाय सखिभावाय । स्तोतुमित्यर्थः । स्वस्तये अविनाशाय । आत्मनः पालनाय चेत्यर्थः । हुवेम । इदमपि बहुवचनमेकवचनस्य स्थाने द्रष्टव्यम् । आह्वयामि । वाजसातये । वाजः अन्नम् । तस्य च सातये सम्भजनाय । तस्य लाभार्थमित्यर्थः ॥

भरद्वाजः । इन्द्रापूषणा इति परस्परापेक्षया द्वित्वम् । इन्द्रं च पूषणं च । नु अद्धा । वयं हुवेम । सख्याय स्वस्तये सखिभावाय च अविनाशाय । वाजसातये अन्नलाभाय च ॥ ९ ॥

नकि इन्द्र त्वदुत्तरं न ज्यायो अस्ति वृत्रहन् । नक्येवं यथा त्वम् ॥

वामदेवस्यार्षम् । नकि । न कश्चिदित्यर्थः । हे इन्द्र त्वत् । पञ्चम्या अत्र लुक् द्रष्टव्यः । त्वत्तः । अन्यो देवः उत्तरं उत्तरः उत्कृष्टतरः । न ज्यायान् न प्रशस्ततरः वृद्धतरो वा अस्ति हे वृत्रहन् । नकि न कश्चित् एवं सर्वोपकारप्रवृत्तः यथा त्वम् ॥

वामदेवः । नकि न भवति किंचित् । त्वत् त्वत्तः । उत्तरं उत्कृष्टं हे इन्द्र । नास्ति ज्यायः प्रशस्ततरः च त्वत्तः हे वृत्रहन् । यथा यथाविधस्त्वं भवसि । एवं एवंविधः नकि नास्ति ॥ १० ॥

तृतीये प्रथमा दशत्या

तरणिं वो जनानां त्रदं वाजस्य गोमतः। समानमु प्रशंसिषम् ॥

त्रिशोकस्यार्षम् । तरणिं क्षिप्रम् । वः । द्वितीयाबहुवचनमिदमेकवचनस्य स्थाने द्रष्टव्यम् । त्वाम् । जनानां असुरजनानाम् । त्रदं तर्दयितारम् । हिंसितारमित्यर्थः । वाजस्य गोमतः अन्नस्य गोसहितस्यार्थाय । समानं सदृशम् । योग्यमित्यर्थः । उ इति पादपूरणः । प्रशंसिषं प्रकर्षेण स्तौमीत्यर्थः ॥

त्रिशोकः। तरणिं तारकं आपद्भ्यः। जनानां स्तोतॄणाम्। वः। त्वमित्यर्थः। त्रदं तर्दनं प्रकाशयितारं दातारं वा। वाजस्य गोमतः। वाजस्य अन्नस्य गोमतः गोसहितस्य। समानं साधारणं सर्वेषाम्। उः पूरणः। प्रशंसिषं प्रशंसामि ॥ १ ॥

असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत। सजोषा वृषभं पतिम् ॥

मधुच्छन्दस आर्षम् । असृग्रं विसृष्टवानहम् । हे इन्द्र ते तव गिरः स्तुतीः । विसृष्टाश्च ताः गच्छन्तु त्वां प्रति । उदहासत । ओहाङ् गतावित्यस्येदं रूपम् । ऊर्ध्वं गच्छन्तु इत्यर्थः । कीदृशं त्वां प्रति गच्छन्तु । उच्यते । वृषभं वर्षितारं पतिं स्वामिनम् । गताः च ताः सजोषाः । जुषी प्रीतिसेवनयोरित्यस्येदं रूपम् । सेवितवानसि ॥

मधुच्छन्दाः। असृग्रं असृज्यन्त सृज्यन्ते उच्यन्ते। हे इन्द्र ते त्वदर्थम्। गिरः स्तुतयः। ताश्च सृष्टाः त्वां प्रति उदहासत उद्गच्छन्तु। लोडर्थे व्यत्ययेन लङ्। ओहाङ् गतौ। सजोषाः सजोषसः हे सेव्यमानाः। वृषभं वर्षितारं पतिं विबुध्य त्वां प्रति ॥ २ ॥

सुनीथो घा स मर्त्यो यं मरुतो यमर्यमा। मित्रस्पान्त्यद्रुहः ॥

वत्सस्यार्षम् । सुनीथः सुप्रशस्तः । घ इति पादपूरणः । स मर्त्यः मनुष्यः यं मरुतः यं अर्यमा यं मित्रः च । त्रयोऽप्येते यं पान्ति रक्षन्ति अद्रुहः अद्रोग्धारः सः सुनीथ इति ॥

वत्सः । सुनीथः सुमार्गः स भवति मर्त्यः यं मरुतः पान्ति रक्षन्ति । यं अर्यमा मित्रश्च पात इति विपरिणामेन सम्बन्धः । अद्रुहः अद्रोग्धारः स्तोतॄणाम् । मरुतां वा विशेषणम् । इतरयोश्च विपरिणामेन ॥ ३ ॥

यद्वीडाविन्द्र यत्स्थिरे यत्पर्शाने पराभृतम् । वसु स्पार्हं तदाभर ॥

त्रिशोकस्यार्षम् । यत् वीडौ दृढे । यत्स्थिरे पर्वतादौ । पर्शाने कूपादौ पराभृतं सम्भृतम् । संस्थापितमित्यर्थः । वसु धनं स्पार्हं स्पृहणीयम् । तत् अस्मभ्यं आभर । आनयेत्यर्थः ॥

त्रिशोकः । यत् वसु धनं वीडौ दृढे पुरुषे । यच्च स्थिरे यच्च पर्शाने निश्चले पराभृतं संभृतम् । स्पार्हं स्पृहणीयं तदाभर आहर ॥ ४ ॥

श्रुतं वो वृत्रहन्तमं प्र शर्द्धं चर्षणीनाम् । आशिषे राधसे महे ॥

सुकक्षस्यार्षम् । श्रुतं विख्यातम् । वः । बहुवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । त्वाम् । वृत्रहन्तमं अतिशयेन शत्रूणां हन्तारम् । प्रेति पादपूरणः । शर्धं उत्साहिनं बलवत्तरम् । चर्षणीनां मनुष्याणां मध्ये । आशिषे अधिगच्छामि । प्रार्थये इत्यर्थः । राधसे महे । द्वे अप्येते चतुर्थ्येकवचने द्वितीयैकवचनस्य स्थाने द्रष्टव्ये । राधः महत् । महद्धनं इत्यर्थः ॥

सुकक्षः। श्रुतं विश्रुतम्। वः त्वाम्। वृत्रहन्तमं अतिशयेन वृत्रहणम्। शर्धं वर्धयितारं चर्षणीनाम्। प्र प्रकर्षेण। आशिषे इति श्वयतेरर्थकर्मणः शवतेः श्रयतेः वा लटि रूपम्। अभिगच्छामि। राधसे धनार्थम्। महे महते। तत् लब्धुम्॥ ५॥

अरं त इन्द्र श्रवसे गमेम शूर त्वावतः। अरं शक्र परेमणि॥

वामदेवस्यार्षम्। अरं अलम्। प्रभूतमित्यर्थः। ते तव हे इन्द्र श्रवसे। चतुर्थ्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्। श्रवः अन्नं सोमलक्षणम्। गमेम गमयेम। दधामि इत्येतदाशास्महे। हे शूर त्वावतः। मतुप्प्रकरणे युष्मदस्मभ्यां छन्दसि सादृश्य उपसङ्ख्यानात् वत्प्रत्ययः। त्वावतः त्वत्सदृशस्येत्यर्थः। अतिभक्ततया ब्रूमः। त्वत्सदृशस्यापि श्रवः गमेमः। किं पुनः सूत्वेत्यभिप्रायः। अरं अलम्। अभ्यासेन भूयानर्थः प्रतीयते। सुष्ठु प्रभूतं दधामीत्यर्थः। हे शक्र। क्व पुनः दद्याम्। उच्यते। परेमणि। परं उत्कृष्टं स्वर्गाख्यं स्थानम्। तत्र गम्यते येन सः परेमा यज्ञः ज्योतिष्टोमादिः। तत्रेत्यर्थः॥

वामदेवः। अरं पर्याप्तं गमेम उपगच्छामः। त्वां ते त्वदीयाय। श्रवसे अन्नाय। हे इन्द्र हे शूर। त्वावतः त्वत्सदृशस्य। परेमणि। पॄ पालनपूरणयोः इत्यस्मात् परेमा। तस्मिन्निमित्ते। तद्रक्षणार्थं च। अरं गमेमहि॥ ६॥

धानावन्तं करम्भिणमपूपवन्तमुक्थिनम्। इन्द्र प्रातर्जुषस्व नः॥

विश्वामित्रस्यार्षम्। धानाः सन्ति यस्य स धानावान्। तं धानावन्तम्। करम्भिणम्। करम्भश्च दधिसक्तवः उच्यन्ते। सः अस्मिन्नस्तीति करम्भी। तं करम्भिणं सोमम्। अपूपवन्तम्। अपूपा

अस्मिन् सन्तीति अपूपवान्। तमपूपवन्तम्। उक्थिनम्। उक्थानि स्तोत्राणि। तानि यस्मिन् सन्ति स उक्थी। तमुक्थिनम्। स्तोत्रवन्तं इत्यर्थः। एवंगुणविशिष्टं सोमं हे इन्द्र प्रातः प्रातःसवने। जुषस्व सेवस्व। नः अस्माकं स्वभूतम्॥

विश्वामित्रः। इयं प्रातस्सवने सवनीयपुरोडाशानां पुरोनुवाक्या बह्वृचानाम्। प्रस्तोतुरपि साम अस्यां गीयमानं यत्र क्वचित् ब्राह्मणेन नूनं विनियुज्यते पुरोडाशयागे। धानावन्तम। धानाः भ्रष्टयवाः। तद्वन्तम्। ताभिः सहितम्। करम्भिणम्। धानाः पिष्टाः आज्येन संयुक्ताः करम्भः। तद्वन्तम्। अपूपवन्तम्। अपूपः पुरोडाशः। तद्वन्तम्। उक्थिनं स्तुतशस्त्रसहितं सोमम्। हे इन्द्र प्रातः प्रातस्सवने जुषस्व सेवस्व नः अस्मदीयम्॥ ७॥

अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः। विश्वा यदजयः स्पृधः॥

गोषूक्ती चाश्वसूक्ती च इमामृचं दृष्टवान्। अत्रेतिहासमाचक्षते। इन्द्रश्च वै नमुचिश्चासुरः समदधाताम्। न नो नक्तं न दिवाहनं नार्द्रेण न शुष्केणेति। तस्य व्युष्टायामनुदित आदित्येऽपां फेनेन शिरोऽछिनत्। एतद्वै न नक्तं न दिवा। यद्व्युष्टायामनुदित आदित्ये। एतन्न आर्द्रं न शुष्कं यदपां फेनः। तदेनं पापीयां वाचं वदद्न्ववर्तत वीरहन् न द्रुहो द्रुह इति। तं नर्चा न साम्ना अपाहन्तुमशक्नोत्। तत् हारिवर्णस्यैव निधनेनापाहत। अप शुचं हते हारिवर्णस्य निधनेन श्रियं च हरश्चोपैति तुष्टुवानः। एतदनयोच्यते। अपामुदकानां फेनेन नमुचेः असुरस्य शिरः हे इन्द्र उदवर्तयः उदवर्तितवान्। छिन्नवानित्यर्थः। कदा। उच्यते। विश्वाः सर्वाः यत्। सप्तम्या अत्र लुक् द्रष्टव्यः। यदा अजयः जितवानसि। स्पृधः। स्पृध इति सङ्ग्रामनाम। तं

स्पृधयति इति क्विप् । स्पृधातोः स्पृधः । सङ्ग्रामकारिणीः । स्त्रीलिङ्गनिर्देशात्सेनाः ॥

गोषूक्त्यश्वसूक्तिनौ । अपां फेनेन अतिलघुना । नमुचेः असुरस्य । शिरः उदवर्तयः उद्वर्तितवान् असि । उद्वर्तनं विशरणम् । हे इन्द्र विश्वाः स्पृधः स्पर्धमानाः सेनाः । यत् यदा अजयः तदा शिर उदवर्तयः ॥ ८ ॥

इमे त इन्द्र सोमाः सुतासो ये च सोत्वाः । तेषां मत्स्व प्रभूवसो ॥

वामदेवस्यार्षम् । इमे ते तव इन्द्र सोमाः सुतासः सुताः । अभिषुता इत्यर्थः । कतमाः । उच्यते । ये सोत्वाः सोतव्याः । अभिषवार्हा इत्यर्थः । तेषां मत्स्व । मद तृप्तावित्यस्येदं रूपम् । तृप्यस्व । तर्पणेनात्र पानं लक्ष्यते । तान् पिबेत्यर्थः । प्रभूवसो । प्रभु बहु वसु धनं यस्य स प्रभुवसुरेव प्रभूवसुः । छान्दसं दीर्घत्वम् । तस्य सम्बोधनं हे प्रभूवसो । प्रभूतधन इत्यर्थः ॥

वामदेवः । हे इन्द्र इमे सोमाः ते त्वदर्थं सुतासः अभिषुतास्तिष्ठन्ति हे इन्द्र । ये च सोमाः सोत्वाः । सुनोतेः कृत्यार्थे तवैकेन्केन्यत्वनः (पा. ३. ४. १४) इति त्वन्प्रत्यये रूपं सोत्वा इति । सोतव्याः । तेषाम् । तैः इत्यर्थः । मत्स्व तृप्तो भव हे प्रभुवसो प्रभूतधन ॥ ९ ॥

तुभ्यं सुतासः सोमाः स्तीर्णं बर्हिर्विभावसो । स्तोतृभ्य इन्द्र मृडय ॥

सुकक्षस्यार्षम् । तुभ्यं त्वदर्थम् । हे इन्द्र सुतासः सुताः । अभिषुता इत्यर्थः । सोमाः । न केवलं सोमाः अभिषुताः । स्तीर्णं च वेद्याख्ये प्रदेशे बर्हिः हे विभावसो । विविधं भाति दीप्यते वसुर्यस्य सः विभावसुः ।

तस्य सम्बोधनं हे विभावसो। दीप्तधन इत्यर्थः। एतत् ज्ञात्वा स्तोतृभ्यः। चतुर्थीबहुवचनमिदं द्वितीयाबहुवचनस्य स्थाने द्रष्टव्यम्। अस्मत्प्रभृतीन् स्तोतॄन्। हे इन्द्र मृडय सुखय। स्तोतृभ्यः धनं देहीत्यर्थः॥

सुकक्षः। तुभ्यं त्वदर्थं सुतासः अभिषुताः सोमाः। स्तीर्णं च बर्हिः त्वदर्थं हे विभावसो दीप्तधन। दीप्तिभिः व्यापक इति वा। ततो बर्हिषि निषद्य सोमान् पीत्वा स्तोतृभ्यः अस्मभ्यं मृडय उपदयां कुरु हे इन्द्र॥ १०॥

तृतीये द्वितीया दशत्या

आ व इन्द्रं क्रिविं यथा वाजयन्तः शतक्रतुम्। मंहिष्ठं सिञ्च इन्दुभिः॥

शुनःशेपस्यार्षम्। आ इत्ययमुपसर्गः सिञ्चे इत्याख्यातेन सम्बन्धयितव्यः। वः इति द्वितीयाबहुवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्। त्वां इन्द्रम्। क्रिविं यथा। क्रिविरिति कूपनाम। तत्सामीप्यात् आवाहकोऽपि क्रिविरुच्यते। यथाशब्द उपमावाची। आवाहकमिव। यथा कश्चित् आवाहकमुदकेन आसिञ्चति तद्वदित्यर्थः। वाजयन्तः पूजयन्त इत्यर्थः। अथवा वाजः अन्नम्। तदिच्छन्त इत्यर्थः। कीदृशं त्वाम्। उच्यते। शतक्रतुम्। शतमिति बहुनाम। क्रतुरित्यपि कर्मनाम यज्ञनाम वा। बहुकर्माणं बहुयज्ञं वेत्यर्थः। मंहिष्ठं अतिशयेन दातारम्। अथवा पूजनीयतमम्। आसिञ्चे। एकवचनमिदं बहुवचनस्य स्थाने द्रष्टव्यम्। आसिञ्चामः इत्येतदाशास्महे॥

शुनश्शेपः । आसिञ्चे इन्दुभिः सोमैः वः त्वां इन्द्रम् । मंहिष्ठं दातृतमम् । शतक्रतुं शतकर्माणं शतप्रज्ञं वा । वाजयन्तः इति वचनव्यत्ययः । वाजं अन्नं इच्छन् अहम् । अथवा आसिञ्चे इत्यत्र वचनव्यत्ययः । आसिञ्चामः इति । क्रिविं कूपं यथा अद्भिः आसिञ्चति कृत्रिमं तद्वत् इन्दुभिः त्वां आसिञ्चामि ॥ १ ॥

अतश्चिदिन्द्र न उप याहि शतवाजया । इषा सहस्रवाजया ॥

श्रुतकक्षस्यार्षम् । अतः स्वर्गाख्यात् स्थानात् । चिदिति पादपूरणः । हे इन्द्र नः उपयाहि अस्मत्समीपमागच्छ । केन पुनरागच्छामि । उच्यते । शतवाजया । शतमिति बहुनाम । वाजः वेगः । बहुर्वेगो यस्याः सा शतवाजा । तया शतवाजया बहुवेगया । शीघ्रया गत्या उपयाहीत्यर्थः । इषा । इषेत्यन्ननाम । तया इषा अन्नेन च । अस्मदीयेन सहान्नेनेति वाक्यशेषः । कीदृश्या इषा । उच्यते । सहस्रवाजया । तया बहुभिरवयवैरुपेतया । नः अस्मकीयेनान्नेन गृहीतेनेत्यर्थः ॥

श्रुतकक्षः । अतः एतस्मात् द्युलोकात् उपयाहि उपगच्छ । चिदिति पूरणः । हे इन्द्र नः अस्मान् । शतवाजया सहस्रवाजया इति च बहुलयुक्तया इत्यर्थः । इषा अन्नेन सह ॥ २ ॥

आ बुन्दं वृत्रहा ददे जातः पृच्छाद्वि मातरम् । क उग्राः के ह शृण्विरे ॥

त्रिशोकस्यार्षम् । आ इत्ययमुपसर्गः । ददे इत्याख्यातेन सम्बन्धयितव्यः । बुन्दं इषुम् । वृत्रहा मेघस्य हन्ता इन्द्रः । आददे आदत्तवान् । जातः जातमात्र एव । आदाय च पृच्छात् । वि इत्ययं छन्दसि परेऽपि (पा. १. ४. ८१) इति परप्रयुक्तः सन् पूर्वो द्रष्टव्यः । विपृच्छात् ।

विविधं पृष्टवानित्यर्थः । कं पृष्टवान् । उच्यते । मातरं जनयित्रीं अदितिम् । किं पृष्टवान् । उच्यते । के उग्राः अप्रसह्याः अस्मच्छत्रवः के वा स्फुटं ह शृण्विरे श्रूयन्ते विख्याता इति शीघ्रमाचक्ष्व यानहं हन्मीति ॥

त्रिशोकः । आददे आदत्तवान् इन्द्रः वृत्रहा जातः जातमात्र एव । बुन्दम् । वृन्देन समानार्थः । दृढम् । वज्रमित्यर्थः । जातमात्र एव विपृच्छात् पप्रच्छ । मातरं स्वाम् । कथं विपृच्छात् । के उग्राः उद्गीर्णाः ओजस्विन इति वा । के ह के च शृण्विरे श्रूयन्ते बलादिभिः ३ ॥

बृबदुक्थं हवामहे सृप्रकरस्नमूतये । साधु कृण्वन्तमवसे ॥

मेधातिथेरार्षम् । बृबत् । बृहच्छब्दः । हकारस्य वकारापत्त्या रूपम् । उक्थ्यशब्दः स्तोत्रवचनः । बृबत् उक्थं यस्य स बृबदुक्थः । तं बृबदुक्थम् । बृहत्स्तोत्रमित्यर्थः । वक्तव्यमस्मै उक्तमिति वा । इन्द्रं हवामहे आह्वयामः । सृप्रकरस्नम् । करस्नू बाहू । सृप्रौ गतौ प्रलम्बौ बाहू यस्य स सृप्रकरस्नुः । सृप्रकरस्नुरेव सृप्रकरस्नः । उकारस्याकारापत्त्या रूपम् । तं सृप्रकरस्नम् । प्रलम्बबाहुमित्यर्थः । किमर्थं पुनराह्वयामः । उच्यते । ऊतये तस्यैव तर्पणार्थम् । किं पुनः कुर्वाणं आह्वयामः । उच्यते । साधु कृण्वन्तं वृत्रवधादिकर्म कुर्वन्तम् । अवसे आत्मनः पालनार्थं च ॥

मेधातिथिः । बृबदुक्थं बृहद्भिः महद्भिः स्तोतव्यम् । हकारस्य बकारः । अथवा ब्रवीतेर्धातोः कर्मणि बृबत् । वक्तव्यं उच्चारणीयं स्तोत्र अस्येति । बृबदुक्थो महदुक्थः । वक्तव्यमस्मै उक्तमिति वा इति यास्कः (नि. ६. ४) । अस्य च व्याख्या कृतैव भवति अस्माभिः । हवामहे आह्वयामः । सृप्रकरस्नम् । कर एव करस्नः । सृप्रः सृप्तः करः दानार्थम् । ऊतये तर्पणाय । साधु साधकं धनं कृण्वन्तं प्रयच्छन्तं अवसे रक्षणाय हवामहे ॥ ४ ॥

ऋजुनीती नो वरुणो मित्रो नयति विद्वान्। अर्यमा देवैः सजोषाः ॥

गौतमस्यार्षम्। नीतिर्मार्गः। ऋज्वी नीतिर्यस्य स ऋजुनीतिः। ऋजुमार्ग इत्यर्थः। नः अस्मान्। वरुणः मित्रश्च नयति। यत्रास्माभिः स्वकर्मवशात गन्तव्यं शुभे अशुभे वा स्थाने तत्र नयतु। कीदृशः पुनर्वरुणः नयतु। उच्यते। विद्वान् जानन् स्वमधिकारम्। अर्यमा च नयतु। देवैरन्यैः सह सजोषाः सह प्रीणयमाणः। त्रयोऽप्येते अस्मान् नयन्त्वित्यर्थः ॥

गौतमः। ऋजुनीती ऋजुनीत्या सम्यक् मार्गेण। नयतीति पञ्चमलकारान्तम्। नयतु। नः अस्मान्। वरुणः मित्रश्च विद्वान्। ऋजुनीतिः नयति अर्यमा च देवैः सजोषाः सह प्रीणयमाणः ॥ ९ ॥

दूरादिहेव यत्सतोऽरुणप्सुरशिश्वितत्। वि भानुं विश्वथा तनत् ॥

ब्रह्मातिथेरार्षम्। उषाः देवता। दूरात् द्युलोकात् इहेव। इवशब्दः उपमार्थीयः। अस्त्युपमार्थस्य संप्रत्यर्थे प्रयोग इति पादपूरणः। इह पृथिव्याम्। यत्। नपुंसकलिङ्गमिदं व्यत्ययेन स्त्रीलिङ्गे द्रष्टव्यम्। या उषाः सतः प्रशस्ता यजमानान् प्रति। कीदृशी उषाः। उच्यते। अरुणप्सुः अरुणरूपाः। अशिश्वितत्। श्वितितिर्गतिकर्मा। आगच्छतीत्यर्थः। पुरस्ताद्यच्छब्दश्रुतेर्योग्यार्थसम्बन्धस्तच्छब्दोऽध्याहर्तव्यः। एत्य च सा। वीति पादपूरणः। भानुं दीप्तिं विश्वथा सर्वप्रकारं मृदुमध्यतीव्रलक्षणं सर्वदा अतनत् तनितवती। उद्यतं कृतवतीत्यर्थः ॥

ब्रह्मातिथिः। दूरात् दूरे। सतः। तिरः सत इति प्राप्तस्य नामनी। दूरे अन्तरिक्षे प्राप्ता इहैव अत्र विद्यमानेव यत् या उषाः। अरुणप्सुः।

प्सुः इति रूपनाम। अरुणरूपा। अशिश्वितत् श्वेतते दीप्यते। सा उषाः वितनत् वितनोति। भानुं दीप्तिम्। विश्वथा सर्वत्र। इति अश्विनोरागमनकाल इति वेदयति ॥ ६ ॥

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। मध्वा रजांसि सुक्रतू ॥

जमदग्नेर्विश्वामित्रस्य वा आर्षम्। आ इत्ययमुपसर्गः उक्षतमित्याख्यातेन सम्बन्धयितव्यः। अस्माकं स्वभूतां हे मित्रावरुणौ। घृतैरुदकैर्वृष्टिलक्षणैः। गव्यूतिम्। गावो यत्र चरन्ति सा गव्यूतिरुच्यते। तां गव्यूतिम्। आ उक्षतमाभिमुख्येन सिञ्चतमित्यर्थः। न केवलं गव्यूतिम्। किं तर्हि। मध्वा उदकेन रजांसि त्रीनपि लोकान् आभिमुख्येन सिञ्चतम्। सुक्रतू। क्रतुरिति कर्मनाम प्रज्ञानाम वा। सुशब्दः शोभनवचनः। सुकर्माणौ सुप्रज्ञौ वा ॥

विश्वामित्रः जमदग्निः वा। आ समन्तात् सर्वतः। उक्षतं सिञ्चतम्। नः अस्मदीयाम्। गव्यूतिं गोसञ्चारदेशम्। घृतैः उदकैः हे मित्रावरुणा मित्रावरुणौ। किं विशेषेण। मध्वा उदकेन रजांसि लोकान् सर्वान् उक्षतं हे सुक्रतू सुकर्माणौ ॥ ७ ॥

उदु त्ये सूनवो गिरः काष्ठा यज्ञेष्वत्नत। वाश्रा अभिज्ञु यातवे ॥

हिरण्यस्तूपस्यार्षम्। मारुती ऋक्। उत् इति उपसर्गः अत्नतेत्यनेन आख्यातेन सम्बन्धयितव्यः। उकारः पादपूरणः। त्ये ते। सूनवः। सूनुरित्यपत्यनाम। अपत्यभूता मरुतः। कस्य। पृश्नेः रुद्रस्य वा। काः। गिरः गर्जितलक्षणा वाचः। काष्ठाश्च वृष्टिलक्षणा आपः। यज्ञेषु। सप्तमीबहुवचनमिदं तृतीयाबहुवचनस्य स्थाने द्रष्टव्यम्। यज्ञैः। मेघं प्रतिगम्य

उदन्नत ऊर्ध्वं विस्तारयन्ति। ऊर्ध्वं क्षिपन्तीत्यर्थः। कीदृशो मरुतः विक्षिपन्ति। उच्यते। वाश्राः। वाशनस्वभावकाः। कथं पुनः विक्षिपन्ति। उच्यते। अभिज्ञु। अभिनिपात्य जानुनी। महतादरेणेत्यर्थः। किमर्थं पुनर्विक्षपन्ति। उच्यते। यातवे पृथिवीं प्रति गमनायेत्यर्थः॥

हिरण्यस्तूपः। उत् ऊर्ध्वं अधिकं अत्नत आतन्वत काष्ठाः अपः। उ इति पूरणः। त्ये ते सूनवः प्रेरका विश्वस्य। षू प्रेरणे। गिरः इति गृणातेः धातोः कर्मणि गिरतेः वा कर्तरि रूपम्। स्तूयमानाः इति वा गिरन्त उदकानि इति वा गिरः। अथवा सूनवः रुद्रस्य इति। यथा रुद्रस्य सूनवः (ऋ. वे. ८. २०. १७) इति हि निगमः। यज्ञेषु यजमानेषु यज्ञेष्वेव वा। काष्ठा अत्नन इति। वाश्राः शब्दायमानाः इति काष्ठाविशेषणम्। अभिज्ञु अभिज्मां पृथिवीमभि। यातवे यातुं गमनार्थम्। अस्मान्। अकर्तृकेष्वपि छन्दसि तुमर्थीयाः दृश्यन्ते॥ ८॥

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूढमस्य पांसुले॥

मेधातिथेरार्षम्। वैष्णवी ऋक्। इदं त्रैलोक्यं बलिबन्धनकाले विष्णुर्विचक्रमे विविधं चक्रमे क्रान्तवान्। विक्रममाणः स्वस्थानभेदेन त्रिधा त्रिप्रकारं निदधे निहितवान्। कतमेषु त्रिषु स्थानेषु। पृथिव्यामन्तरिक्षे दिवीति शाकपूणिः। समारोहणे विष्णुपदे गयशिरसीत्यौर्णवाभः। तच्च पदत्रयमपि समूढमस्य। वहेरिदं रूपम्। सम्यक् स्थापितं सुप्रतिष्ठापितम्। कथं सुप्रतिष्ठापितम्। उच्यते। पांसुरे। लुप्तोपममेतत् द्रष्टव्यम्। पांसुरे इव देशे। अथ पांसुलत्वयोगात् पांसुलशब्देन पृथिव्युच्यते। तेषां त्रयाणां पृथिव्यां यत्पदं तत्समूढम्। अथवा विष्णुरादित्यः। स इदं सर्वं अहरहर्विक्रमन् त्रिधा निदधे पदं उदयगिरौ मध्ये च नभसः अस्तगिरौ च। अथवा त्रिधा निदधे पदं पृथिव्यामग्न्यात्मना अन्तरिक्षे वैद्युता-

त्मना दिवि आदित्यात्मना। तच्च पदत्रयमस्य समूढं पांसुरे इव देशे। अथवा समूढमिति मुहेर्मोहनार्थस्य रूपम्। संमूढं संछन्नम्। यदस्य वैद्युतात्मना पदं तत् संमूढं संछन्नम्॥

मेधातिथिः। इदं जगत् विचक्रमे विक्रान्तवान् विष्णुः। व्यचेर्व्याप्तिकर्मणो विशेर्वा प्रवेशकर्मणः व्यश्नोतेः व्याप्तिकर्मणोः वा विष्णुः। कथं विचक्रमे। त्रेधा त्रिधा पृथिव्यां अन्तरिक्षे दिवि इति। निदधे निहितवान् पदं स्वम्। तदानीं समूढं अन्तर्गतं इत्यर्थः। अस्य पांसुले प्रदेशे। इदं त्रैलोक्यं इति शेषः। लोकेभ्योऽपि महत् आसीत् त्रिविक्रमेण महतः पदम्॥ ९॥

इति तृतीये तृतीया दशत्या

अतीहि मन्युषाविणं सुषुवांसमुपैरय। अस्य रातौ सुतं पिब॥

मेधातिथेरार्षम्। इन्द्रो देवता। अति इहि अतीत्य आगच्छेत्यर्थः। मन्युषाविणं दीप्तस्य सोमस्य अभिषोतारं मेधातिथिं मां प्रति। कथं पुनरागच्छामि। उच्यते। यथा सुषुवांसं अभिषुतवन्तं अङ्गिरःप्रभृतिं अन्यमृषिं। उप ईरय उपगतवानसि तद्वदागच्छ। एत्य च अस्य। षष्ठीनिर्देशात् एकदेशमिति वाक्यशेषः। रातौ दाने सति। दत्तं सदित्यर्थः। सुतम्। द्वितीयैकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम्। सुतस्य एकदेशं पिब॥

मेधातिथिः। अति इहि अतीत्य गच्छ। मन्युषाविणं मन्युना क्रोधेन अभिषवं कुर्वन्तम्। सुषुवांसं अभिषुवन्तम्। उपैरय त्वं समीपं

प्रेरय। अस्य यजमानस्य। मम इत्यर्थः। सुतं सोमं पिब रातौ दाने सति इन्द्राय इति त्यागे कृते सति ॥ १ ॥

कदु प्रचेतसे महे वचो देवाय शस्यते। तदिद्धचस्य वर्धनम् ॥

वामदेवस्यार्षम्। कत। किमः उत्तरस्य पञ्चम्याः अत् आदेशः। कस्मात् कारणात्। उ इति पादपूरणः। प्रचेतसे महे देवाय। त्रीण्यप्येतानि तादर्थ्यचतुर्थ्यन्तानि। प्रवृद्धज्ञानस्य महतो देवस्यार्थायेत्यर्थः। वचः स्तुतिलक्षणं वचनम्। शस्यते उच्चार्यत इत्यर्थः। उच्यते तत्। इत् इति पादपूरणः। हीति यस्मादर्थे। यस्मात् अस्य वर्धनं वृद्धिकरं तस्मादित्यर्थः। स्तूयमाना हि देवता वीर्येण वर्धन्ते। अतस्तस्य वृद्ध्यर्थं स्तुतिलक्षणं वचनं उच्चार्यत इत्यर्थः ॥

वामदेवः। कत् कदा। उः पूरणः। प्रचेतसे प्रकृष्टज्ञानाय। महे महते। देवाय इन्द्राय। वचः स्तोत्रं शस्यते उच्चार्यते। तदित् तत् स्तोत्रं एव हि। अस्य देवस्य वर्धनं वृद्धिकरं भवति ॥ २ ॥

उक्थं च न शस्यमानं नागो रयिरा चिकेत। न गायत्रं गीयमानम् ॥

मेधातिथेः प्रियमेधस्य चार्षम्। उक्थं स्तोत्रम्। चेति पादपूरणः। नेत्ययं प्रतिषेधः आचिकेतेत्याख्यातेन सम्बन्धयितव्यः। शस्यमानं उच्चार्यमाणमित्यर्थः। नागोः। कुङ् गुङ् अव्यक्ते शब्दे। गुः अव्यक्तभाषी। न गुः अगुः व्यक्तभाषी। न अगुः न व्यक्तभाषी नागुः। तस्य नागोः। अव्यक्तभाषिण इत्यर्थः। रयिः। अन्तर्णीतमत्वर्थमिदं द्रष्टव्यम्। रयिमान् मघवानिन्द्रः। न आचिकेत न जानाति। न शृणोतीत्यर्थः। न गायत्रं गीयमानम्। न च गायत्रसंज्ञकं साम गीयमानं शृणोतीत्यर्थः ॥

मेधातिथिप्रियमेधौ। उक्थं शस्त्रं शस्यमानं न आचिकेत न बुद्ध्येत। चन इति अपि इत्यस्यार्थे। अगोः गोरहितस्य गोभिः हीनस्य अदक्षिणस्य यजमानस्य। रयिः धनवान् इन्द्रः। न च गायत्रं स्तोत्रं गीयमानं अगोः आचिकेत ॥ ३ ॥

इन्द्र उक्थेभिर्मन्दिष्ठो वाजानां च वाजपतिः। हरिवान्त्सुतानां सखा॥

वामदेवस्यार्षम्। इन्द्रः उक्थेभिः स्तोत्रैरित्यर्थः। कीदृश इन्द्रः। मंहिष्ठः अतिशयेन स्तुत्य इत्यर्थः। वाजानामन्नानाम्। दातेति वाक्यशेषः। चशब्दः पादपूरणः। वाजपतिः अन्नानां स्वामीत्यर्थः। हरिवान्। हरयः अश्वाः। तद्वान्। अश्ववानित्यर्थः। सुतानामभिषुतानां सोमानां सखा सखिभूतः। पातेत्यर्थः॥

विश्वामित्रः। इन्द्रः उक्थेभिः स्तुतशस्त्रैः। मन्दिष्ठः अतिशयेन मदिता। वाजानां अन्नानां च। वाजपतिः इत्यत्र वाजशब्दोऽनुवादमात्रपरः। वाजानां पतिः इत्यर्थः। वसूयवो वसुपते वसूनाम्। (ऋ. वे. १०. ४७. १) विद्मा हि त्वा गोपतिं शूर गोनाम् (ऋ. वे. ३. ३६. ९) इतिवत्। हरिवान्। हरयः इन्द्रवाहनाः। तद्वान्। सुतानां सोमानां सखा नित्यावियुक्त इत्यर्थः। एवमेवं च भवति इन्द्रः ॥ ४ ॥

आयाह्युप नः सुतं वाजेभिर्मा हृणीयथाः। महाँ इव युवजानिः॥

श्रुतकक्षस्यार्षम्। आयाह्युप। उपशब्दः छन्दसि परेऽपि (पा. १. ४. ८१) व्यवहिताश्च (पा. १. ४. ८२) इत्येवं परप्रयुक्तः सन् पूर्वो द्रष्टव्यः। उपायाहि। समीपे आगच्छेत्यर्थः। नः सुतं अस्माकमभिषुतं सोमं प्रति। कथं पुनरायाहि। उच्यते। वाजेभिः अन्नैरस्मदीयैर्गृहीतैः इत्यर्थः। एत्य च स्तोकेन अपराधेन मा हृणीयथाः मा क्रोधं गमः।

मा रोषीरित्यर्थः । कथं पुनः मा हृणीयथाः । उच्यते । महानिव युवजानिः । युवतिर्जाया यस्य स युवजानिः । तरुणभार्य इत्यर्थः । स यथा तरुण्या भार्यायाः अपराधेऽपि तस्या न रुष्यति तद्वन्मा रोषीरित्यर्थः ॥

मेधातिथिप्रियमेधौ । उपायाहि नः अस्मदीयम् । सुतं सोमम् । वाजेभिः अन्नैः अस्मभ्यं देवैः सार्धम् । मा हृणीयथाः मा क्रुद्धोऽसि । महान् प्रवृद्धः इव युवजानिः । युवतिर्जाया यस्य स युवजानिः । स यथा जायामभिगच्छति न च तामभिक्रुध्यति तद्वत् ॥ ९ ॥

कदा वसो स्तोत्रं हर्यत आव श्मशा रुधद्वाः । दीर्घं सुतं वाताप्याय ॥

दुर्मित्रस्य सुमित्रस्य वार्षम् । कदा इत्येतत् रुधदित्यनेन सम्बन्धयितव्यः । वसो प्रशस्तधनवन् । यदिदं स्तोत्रं हर्यते कामयमानाय तुभ्यं कृतं अस्माभिः । आकारः पदपूरणः । अवेत्ययमुपसर्गः व्यवहितोऽपि रुधदित्याख्यातेन सम्बध्यते । कदा अवरुधत् कस्मिन् काले अवरोत्स्यति । श्मशा वाः । वाःशब्देन उदकमुच्यते । श्मशाशब्देनापि कुल्योच्यते । लुप्तोपमं चेदं द्रष्टव्यम् । श्मशेव कुल्येवोदकम् । एतदुक्तं भवति । यथा कुल्या उदकमवरुणद्धि तद्वत्कदा स्तोत्रं अवरोत्स्यति । श्रोप्यसीत्यर्थः । कीदृशं स्तोत्रम् । दीर्घम् । सुतं अभिषुतं सोमं प्रति । अथवा सुतमिति सप्तम्यर्थे द्वितीया । सुते अभिषुते सोमे । वाताप्याय । वाताप्या उदकम् । तस्य अर्थाय । उदकार्थमित्यर्थः ॥

दुर्मित्रः सुमित्रो वा । कदा श्मशा वायुः । शु आशु अश्नुत इति श्मशा वायुः इति यास्कः । आ अभिमुखं अवारुधत् अवरुन्धीत । वाः उदकम् । तव स्तोत्रं हर्यते काममानाय यजमानाय । हे वसो प्रशस्य

इन्द्र। दीर्घं दीर्घकालम्। सुतं अभिषवणं सोमस्य। वाताप्याय उदकाय भवति इति। स्तोत्रैः यज्ञैश्च प्रीतः देवः वर्षति। वातं प्राणं आप्याययति इति वाताप्यं उदकम्। आपोमयः प्राणः इति श्रुतेः॥ ६॥

ब्राह्मणादिन्द्र राधसः पिबा सोममृतूꣳरनु। तवेदं सख्यमस्तृतम्॥

मेधातिथेरार्षम्। ब्राह्मणात् ब्रह्मणः स्वभूतात्। हे इन्द्र राधसः। राध इति धननाम। तच्चात्र सोमपात्रं परिगृह्यते। एतदुक्तं भवति। ब्रह्मणः प्राक् स्वभूतात् सोमपात्रात्पिब सोमम्। ऋतून् अनु ऋतूनां पश्चात्। कस्मात् पिबामि। उच्यते। यस्मात्तवेदं सख्यं यष्टृयष्टव्यलक्षणम्। अस्तृतं अहिंसितम्। यस्मात्त्वं सर्वदा यष्टव्यः तस्मात् पिबेत्यर्थः॥

मेधातिथिः। इयं ब्राह्मणाच्छंसिन ऋतुयाज्येति कौषीतकिनः। प्रस्तोतुश्च तदानीं क्वचिदपि विहितं संभाव्येत्। ब्राह्मणात् ब्राह्मणाच्छंसिनो यागात्। राधसः राधकान्। पिब सोमं ऋतून् अनु। तृतीयार्थे (पा. १.४.८९) इति अनुः कर्मप्रवचनीयः। तद्योगात् ऋतूनिति द्वितीया। ऋतुनेत्यर्थः। बहुवचनं व्यत्ययात्। ऋतुना नभस्संज्ञेन सह पिब सोमम्। तव इदं सख्यं अस्माभिः जातं अस्तृतं अहिंसितं भवति॥ ७॥

वयं घा ते अपि स्मसि स्तोतार इन्द्र गिर्वणः। त्वं नो जिन्व सोमपाः॥

मेधातिथेरार्षम्। वयम्। घ इति पादपूरणः। ते तव। अपीति पादपूरणः। स्मसि भवामः। कः। उच्यते। स्तोतारः वयं त्वां स्तुम इत्यर्थः। हे इन्द्र गिर्वणः। गिरः स्तुतिलक्षणा वाचः। ताभिर्यः वन्यते संभज्यते स गिर्वणाः। तस्य सम्बोधनं हे गिर्वणः। वाग्भिः संभजनीय इत्यर्थः। एतत् ज्ञात्वा त्वं नः अस्माकं जिन्व प्रीणय। एतेन तर्पयेत्यर्थः। हे सोमपाः सोमानां पातः॥

मेधातिथिः । वयं स्तोतारः । घेति पूरणः । ते तव स्वभूताः । अपि स्मसि अपि भवामः । किमस्मान् त्वदीयत्वेन नाङ्गीकरोषि इत्यर्थः । हे इन्द्र गिर्वणः गीर्भिः वननीय । त्वं वो जिन्व पूरय कामैः हे सोमपाः ॥ ८ ॥

एन्द्र पृक्षु कासु चिन्नृम्णं तनूषु धेहि नः । सत्राजिदुग्र पौंस्यम् ॥

वामदेवस्यार्षम् । आ इत्ययमुपसर्गो धेहीत्याख्यातेन सम्बन्धयितव्यः । हे इन्द्र पृक्षु । पृची सम्पर्के इत्यस्येदं रूपम् । सम्पृच्यन्ते यस्यां यागक्रियायां यजमाना देवैः सह सा पृक् । तासु पृक्षु । यागक्रियासु इत्यर्थः । कासुचित् नृम्णं धनम् । तनूषु शरीरेषु । आधेहि नः । आ इत्ययं निशब्दस्य स्थाने द्रष्टव्यः । निधेहि । स्थापयेत्यर्थः । कस्य पुनः तनूषु । उच्यते । नः अस्माकं स्वभूतासु तनूषु । किंच सत्राजित् । सत्राशब्दः यद्यपि सत्यनाम तथापीह सदाशब्दस्यार्थे द्रष्टव्यः । सदाजिदिति सत्राजित् । सदा शत्रूणां जेता इत्यर्थः । हे उग्र अप्रसह्य । पौंस्यं बलम् । द्वितीयानिर्देशान्निधेहीत्येतदनुषज्यते । बलं च तनूषु निधेहीत्यर्थः ॥

वामदेवस्यार्षम् । हे इन्द्र पृक्षु सङ्ग्रामेषु कासुचित् यासु कासुचित । सर्वासु इत्यर्थः । पौंस्यमिति व्यवहितमपि अत्र सम्बध्यते योग्यत्वात् । पौंस्यं आधेहि संग्रामेषु प्रवृत्तेषु । नृम्णं सुखं च आधेहि । नः तनूषु अङ्गेषु । हे सत्राजित् सर्वस्य जेतः । उग्र ओजस्विन् ॥ ९ ॥

एवा ह्यसि वीरयुरेवा शूर उत स्थिरः । एवा ते राध्यं मनः ॥

श्रुतकक्षस्यार्षम् । एवशब्दः पदपूरणः । हिशब्दो यस्मादर्थे । यस्मात्त्वं असि भवसि वीरयुः । वीरा यजमानपुरुषाः । तान् कामयते यः सः वीरयुः । वीरयतेः युप्रत्ययः । वीरयुः यजमानकाम इत्यर्थः । यस्मात्त्वं

शूरः । उत अपि च स्थिरः । यस्मादिति वचनात्तस्मादित्यध्याहार्यम् । तस्मात् ते तव यागादिभिः राध्यं आराधनीयं मनः । तस्मात्त्वं यष्टव्य इत्यर्थः ॥

श्रुतकक्षः । एवं पूर्वैः स्तुत इन्द्रः स्तोत्रैः कामान् प्रयच्छन् तेन तुष्टः ब्रवीति । एव एवम् । हि इति प्रसिद्धौ । त्वं वीरयुः स्तोत्रकामः असि । एवं च शूरः असि । उत अपिच । स्थिरः असि । एवं च ते तव मनः अन्नं राध्यं संग्रामधनयोग्यं भवति हे इन्द्र ॥ १० ॥

तृतीये चतुर्थी दशत्या

एक सामि षट् ।

अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥

वसिष्ठस्यार्षम् । इन्द्रो देवता । बृहती छन्दः । अभीत्ययमुपसर्गः नोनुम इत्याख्यातेन सम्बन्धयितव्यः । त्वा त्वां हे शूर विक्रान्त अभिनोनुमः । नु स्तुतावित्यस्येदं रूपम् । आभिमुख्येन अत्यर्थं पुनः पुनर्वा स्तुमः । कथं पुनः स्तुमः । उच्यते । अदुग्धा इव धेनवः । अचिरप्रसूता गावः धेनुशब्देनोच्यन्ते । ताः यथा आत्मीयं वत्सं स्नेहार्द्रेण मनसा हुंकारादिभिरभिनन्दन्ति तद्वत्स्तुम इत्यर्थः । कीदृशं स्तुमः । उच्यते । ईशानमीश्वरं अस्य जगतः । स्वर्दृशम् । स्वः आदित्यः । तमिव यः पश्यति सः स्वर्दृक् । आदित्यमिव सर्वस्य जगतः द्रष्टारमित्यर्थः । ईशानमीश्वरं तस्थुषः स्थावरस्य । स्थावरग्रहणं प्रदर्शनार्थम् । जङ्गमस्य चेत्यर्थः ॥

ऋचोऽशीतिरभित्वेति बृहत्यः सकला अपि ।
न हि वो मारुती तत्र प्रति त्वाद्येति संस्तुतिः ॥
आदित्यानामथेन्द्राग्नी अपादिन्द्राग्निसंस्तुतिः ।
आश्विन्युक्ता शचीभिर्नो द्वृयचं चेमा उ मामिति ॥
यदा कदा वरुणस्य त्वष्टा नो बहुदेवता ।
उषस्या प्र त्यु इत्येषा बण्महाँ सूर्यसंस्तवः ॥
इत्येकादश ताभ्योऽन्या ऐन्द्रय ऐकोनसप्ततिः ॥

वसिष्ठः । अभिनोनुमः भृशं अभिष्टुमः त्वा त्वां वयं हे शूर । अदुग्धा इव धेनवः सन्तः सोमपूर्णचमसत्वेन । ईशानं अस्य जगतः जङ्गमस्य । स्वर्दृशं सर्वदृशम् । ईशानं तस्थुषः स्थावरस्य च हे इन्द्र । तिष्ठतेर्लिटः क्वसुः । तस्थिवच्छब्दात् वसोस्संप्रसारणम् (पा. ६. ४. १३१) इति षष्ठ्यां संप्रसारणे तस्थुष इति रूपम् ॥ १ ॥

त्वामिद्धि हवामहे सातौ वाजस्य कारवः ।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥

शंयोरार्षम् । इत् हि । द्वावपि पदपूरणौ । हवामहे । सातिर्लाभः । तस्मादियं निमित्तसप्तमी । निमित्तं च प्रयोजनम् । धनलाभार्थमित्यर्थः । कस्य पुनर्लाभार्थम् । उच्यते । वाजस्य अन्नस्य । के पुनः सन्तः हवामहे । उच्यते । कारवः स्तोतार इत्यर्थः । किंच त्वाम् । द्वितीयानिर्देशात् ह्वयतिरनुषक्तव्यः । त्वां ह्वयन्ति वृत्रेषु शत्रुषु । यस्य च भावेन भावलक्षणम् (पा. २. ३. ३७) इति सप्तमी । तच्छ्रुतेश्च लक्षणभूतं योग्यक्रियापदमध्याहर्तव्यम् । शत्रुषु हन्तव्येषु । हे इन्द्र सत्पतिं सतां पालयितारम् । नरः अन्येऽपि मनुष्याः । त्वां काष्ठासु । काष्ठाशब्देन वृष्टिलक्षणाः आपः उच्यन्ते । तस्मादियं निमित्तसप्तमी । अप्सु च निमित्तभूतासु । तदर्थं त्वामाह्वयन्तीत्यर्थः । कस्य पुनः सम्बन्धिनीष्वप्सु निमित्तभूतासु । उच्यते ।

अर्वतः । ऋ गतावित्यस्य वनिप्रत्ययान्तस्य अवर्णः त्रादेशेनैतद्रूपम् । गन्तुर्मेघस्य स्वभूतास्वित्यर्थः । अथवा काष्ठाशब्देन सङ्ग्राम उच्यते । अर्वशब्देनापि अश्व उच्यते । अन्तर्णीतमत्वर्थमेतद्द्रष्टव्यं प्रथमाबहुवचनान्तं च । सङ्ग्रामेषु सङ्ग्रामभूमिषु वा स्थिताः अर्वतः अश्ववतः आत्मनो जयार्थं त्वामाह्वयन्तीत्यर्थः ॥

शंयुः भारद्वाजः । त्वामित् त्वामेव वयं हवामहे आह्वयामः । हि इति पूरणः । सातौ लाभे निमित्ते । वाजस्य अन्नस्य । कारवः स्तोतारः । त्वां हवामहे वृत्रेषु उपद्रवेषु सत्सु हे इन्द्र । सतां प्रभवतां श्रेष्ठः सत्पतिः । तं नरः मनुष्याः वयं त्वां हवामहे । काष्ठासु युद्धेषु अर्वतः अश्वस्य । अश्वार्थम् ॥ २ ॥

अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे ।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥

वालखिल्यानामार्षम् । अभि प्र इत्युपसर्गौ अर्चेत्याख्यातेन सम्बन्धयितव्यौ । वः । द्वितीयाबहुवचनमिदं एकवचनस्य स्थाने द्रष्टव्यम् । त्वाम् । सुराधसं शोभनधनं इन्द्रम् । अर्च इति प्रथमपुरुषैकवचनमिदमुत्तमपुरुषैकवचनस्य स्थाने द्रष्टव्यम् । अभिप्रार्चामि । आभिमुख्येन स्थित्वा प्रकर्षेण पूजयामीत्यर्थः । कीदृशमिन्द्रं पूजयामि । उच्यते । यः जरितृभ्यः स्तोतृभ्यः । मघवान् धनवान् । पुरूवसुः । पुर्विति बहुनाम । वस्वित्यपि धननाम । पुरु धनं यस्य सः पुरुवसुः । पुरुवसुरेव पुरूवसुः । बहुधन इत्यर्थः । सहस्रेणेव प्रकारेणेति वाक्यशेषः । बहुभिः प्रकारैरित्यर्थः । शिक्षति ददातीत्यर्थः । किं पुनर्ददाति । सामर्थ्याद्धनम् ॥

वालखिल्या ऋषयः । अभि उद्दिश्य इन्द्रं प्रार्च प्रगाय हे स्तोतः । वः । त्वमित्यर्थः । सुराधसं सुधनं इन्द्रम् । यथा विदे विद्यते ज्ञायते यथा

तथा प्रार्च। यः मघवा। मघं दानं मंहतेः। दानवान् नित्यदानः। पुरूवसुः बहुधनः। जरितृभ्यः स्तोतृभ्यः। शिक्षति प्रयच्छति। पुरूवसुः इति विशेषण-बलात् वसूनि सिध्यन्ति। सहस्रेण इति विभक्तिव्यत्ययः। सहस्रं धनानि। इव इति पूरणः ॥ ३ ॥

तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः।
अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥

नोधस आर्षम्। तं वः। द्वितीयाबहुवचनमिदमेकवचनस्य स्थाने द्रष्टव्यम्। त्वाम्। इन्द्र दस्मम्। तसु दसु उपक्षये इत्यस्येदं रूपम्। उपक्षयितारं शत्रूणाम्। ऋतीषहम्। ऋतयः सेनाः गन्तृत्वात्। ता योऽभि-भवति स ऋतीषाट्। तं ऋतीषहम्। परकीयानां सेनानामभिभवितारं इत्यर्थः। वसो प्रशस्तधन। अन्धसः सोमलक्षणस्यान्नस्य। मन्दानम्। मदि मुदि मोदे इत्यस्येदं रूपम्। अत्तारम्। भक्षयितारमित्यर्थः। अभीत्य-यमुपसर्गः नवामहे इत्याख्यातेन सम्बन्धयितव्यः। वत्सं न वत्समिव। यथा वत्सं धेनवः अचिरप्रसूता गावः तद्वदित्यर्थः। स्वस्वरेषु यागगृहेषु। इन्द्रं गीर्भिर्नवामहे। नु स्तुतावित्यस्येदं रूपम्। अभिनवामहे। आभि-मुख्येन स्तुम इत्यर्थः ॥

नोधाः। तं प्रसिद्धम्। दस्मं दर्शनीयम्। ऋतीषहम्। अर्तेः ऋतिः अरिः। अरीणामभिभवितारम। वसोः प्रशस्यस्य अन्धसः अन्नस्य। तृतीयार्थे षष्ठी। मन्दानं मोदमानम्। अभिनवामहे अभिष्टुमः। इन्द्रं ईश्वरम्। गीर्भिः स्तुतिभिः। वत्सं न वत्समिव स्वसरेषु गोष्ठेषु धेनवः। इति सोमपूर्णतां आत्मनः द्योतयति ॥ ४ ॥

तरोभिर्वो विदद्वसुमिन्द्रं सबाध ऊतये।
बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥

कलेः प्रगाथस्य आर्षम् । तरोभिरात्मीयैर्बलैः । वः । द्वितीयाबहुवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । त्वाम् । विदद्वसुम् । विद्लेर्लाभार्थस्येदं रूपम् । वस्वित्यपि धननाम । विदितं धनं येन स विदद्वसुः । तम् । आत्मीयैर्बलैः शत्रुधनानामपहर्तारमित्यर्थः । इन्द्रं सबाधः मदीया ऋत्विजः । ऊतये तर्पणार्थं आत्मनः पालनार्थं वा । बृहद्गायन्तः सुष्ठु अर्चयन्तः । स्तुवन्त इत्यर्थः । सुतसोमे । सुतः अभिषुतः सोमो यस्मिन् स सुतसोमः ज्योतिष्टोमादिसोमयागः । तस्मिन् सुतसोमे । अध्वरे यज्ञे ज्योतिष्टोमादौ । हुवे । उत्तमपुरुषैकवचनमिदं प्रथमपुरुषबहुवचनार्थे द्रष्टव्यम् । आह्वयन्ति । कथं पुनराह्वयन्ति । उच्यते । भरं न द्वितीयैकवचनं सप्तम्येकवचनस्य स्थाने द्रष्टव्यम् । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । भरे इव । सङ्ग्रामे इवेत्यर्थः । कारिणम् । करोतीति सन्निधानात् सङ्ग्रामम् । एतदुक्तं भवति । यथा सङ्ग्रामे योद्धा प्रतियोद्धारं महता यत्नेन आह्वयति तद्वदाह्वयन्तीत्यर्थः ॥

कलिः प्रगाथः । तरोभिः वेगैः युक्तः । वः । त्वामित्यर्थः । विदद्वसुं लब्धवन्तं धनानि । इन्द्रं ईश्वरम् । सबाधः संबाधमानाः परस्परम् । यद्वा बाधसहिताः शत्रुभिः बाध्यमानाः । ऊतये रक्षणाय । हुवे इति वचनव्यत्ययः । ह्वयामहे । बृहत् परिवृढं गुणैः । साम गायन्तः सुतसोमे अध्वरे यज्ञे । भरं न भरन्तमिव बलवन्तमिव । कारिणं उपकारिणं योद्धारम् ॥ ९ ॥

तरणिरित्सिषासति वाजं पुरन्ध्या युजा ।
आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रुवम् ॥

वसिष्ठस्यार्षम् । तरणिः क्षिप्रकारी इन्द्रः । इदिति पदपूरणः । सिषासति संभक्तुमिच्छति । किम् । उच्यते । वाजं अन्नम् । पुरन्ध्या

पत्न्या । युजा युक्तेन । आकारः पदपूरणः । वः । युष्मच्छब्दोऽत्र व्यत्ययेन अस्मच्छब्दस्य स्थाने द्रष्टव्यः । बहुवचनमेकवचनस्य स्थाने द्रष्टव्यम् । मम वसिष्ठस्य स्वभूतम् । यत एवमतः इन्द्रं पुरुहूतं बहुभिर्यजमानैः यज्ञेष्वाहूतम् । नमे प्रह्वीकरोमि । ऋजुं करोमीत्यर्थः । केन पुनर्ऋजुं करोमि । उच्यते । गिरा स्तुतिलक्षणया वाचा । स्तुत्वेत्यर्थः । कथं ऋजुं करोमि । उच्यते । नेमिं तष्टेव सुद्र्वं शोभनकाष्ठम् । एतदुक्तं भवति । यथा शोभनं काष्ठं तक्षणादिभिः तष्टा वर्धकिः वक्रं करोति तद्वत् स्तुतिभिः ऋजूकरोमीत्यर्थः ॥

वसिष्ठः । तरणिरित् त्वरित एव । स्तुत्यादिषु सिषासति संभजति । वाजं अन्नम् । पुरन्ध्या बुद्ध्या । युजा सहायभूतया । सिषासति इत्यत्र सनोतेः स्वार्थिकस्सन् । आनमे वशं नयामि । वः त्वाम् । इन्द्रं ईश्वरम् । पुरुहूतं बहुभिराहूतम् । गिरा स्तुत्या । नेमिं चक्रस्य बाह्यवलयम् । तष्टेव तक्षेव । यथा नेमिं तष्टा आनमते सुद्र्वं शोभनदारुकं तथा त्वां आनमे ॥ ६ ॥

तृतीये पञ्चम्या दशत्या

नकिष्टं कर्मणा नशद्यश्चकार सदावृधम् ।
इन्द्रं न यज्ञैर्विश्वगूर्तमृभ्वसमधृष्टं धृष्णुमोजसा ॥

पुरुहन्मन आर्षम् । नकिः न कश्चित् रक्षःपिशाचादि वा । तं यजमानम् । कर्मणा मारणात्मकेन । नशत् । शुद्धोऽप्ययं नशिः विपूर्वो द्रष्टव्यः अन्तर्णीतश्च । विनाशयतीत्यर्थः । यो यजमानः किं कृतवान् ।

उच्यते । यश्चकार करोति । सदा सर्वदा वृधं वर्धयितारम् । इन्द्रं न । न-शब्द उपरिष्टादुपचारत्वादुपमार्थीयः । अस्त्युपमार्थस्य संप्रत्यर्थे प्रयोग इति पादपूरणः । यः सर्वदा वर्धयितारं आत्मनः इन्द्रं करोतीत्यर्थः । कैः पुनर्वर्धयितारमिन्द्रं करोति । उच्यते । यज्ञैरग्निष्टोमादिभिः । कीदृशमिन्द्रम् । उच्यते । विश्वगूर्तं सर्वशत्रूणां वधाय आधूतम् । ऋभ्वसं महान्तम् । अधृष्टमधर्षितम् । अनभिभूतपूर्वं केनचिदित्यर्थः । धृष्णुं शत्रूणामभिभवितारम् । ओजसा स्वेन बलेन ॥

पुरुहन्मा । नकिः नशत् न व्याप्नुयात् । नानुगच्छेत् । तं जनं कर्मणा स्तुतिभिः । यः कश्चन इन्द्रं सदावृधं सर्वदा वृद्धं चकार कुर्यात् यज्ञैः । नेति पूरणः । विश्वगूर्तं विश्वैः स्तुतम् । गृणातेर्गूर्तः । ऋभ्वसं महान्तम् । ऋभु भवति इति ऋभ्वसः । अधृष्टं अनभिभूतम् । धृष्णुं धर्षकम् । ओजसा बलेन । सकललोकधृष्णुं बलेनापि अधृष्यम् ॥ १ ॥

य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः ।
संधाता संधिं मघवा पुरूवसुर्निष्कर्ता विह्रुतं पुनः ॥

प्रगाथस्यार्षम् । भग्नस्य महावीरस्याभिमर्शनमनया ऋचा क्रियते । य इन्द्रः । ऋते यज्ञे । चिदिति पादपूरणः । अभिश्लिषः अभिराभिमुख्ये । श्रिषतिः श्रयणार्थः । आभिमुख्येन श्रितः अभिश्रितः । तस्य । अभिश्रिषः । यज्ञे आश्रितस्य महावीरस्येत्यर्थः । पुरा प्राक् । जत्रुभ्यः ग्रीवानाडीभ्य इत्यर्थः । आतृदः आतर्दनात् । प्राक् ग्रीवानाडीभ्यो हिंसाया इत्यर्थः । सन्धाता सन्धिं इति षष्ठ्यर्थे द्वितीया । सन्धेः भग्नस्यापि महावीरस्य य इन्द्रः सन्धाता । मघवान् पुरूवसुः बहुधनः । निष्कर्ता संस्कर्तेत्यर्थः । कीदृशस्य पुनर्महावीरस्य संस्कर्ता । उच्यते । विह्रुतम् । इदमपि षष्ठ्यर्थे द्वितीया ।

विह्रुतस्य इतश्चेतश्च विक्षिप्तावयवस्य । भग्नस्येत्यर्थः । किं सकृदेव संस्कर्ता । उच्यते । पुनः पुनः । य ऋते चिदिति यच्छब्दश्रुतेः साकाङ्क्षत्वात् तं वयं स्तुम इति वाक्यशेषः ॥

मेधातिथिः मेध्यातिथिश्च अस्याः परस्याः चर्षी । यो मघवा इन्द्रः ऋते चित् विनापि अभिश्लिषः अभिश्लेषकात् श्लेष्मणः । येन छिन्नं संश्लिष्यते तत् श्लेष्म । पुरा पुरस्तादेव । जतृभ्यः अंसग्रीवाभ्यां मध्ये नाडीभ्यः । आतृदः आतर्दनात् लोहितनिस्सारणात् । पुरा छिन्नमात्र एव सन्धि सन्धातव्यम् । सन्धाता संधातुं शक्तः । पुरूवसुः बहुधनः । स इन्द्रः विह्रुतं विच्छिन्नम् । पुनः निष्कर्ता संस्कर्ता भवति ॥ २ ॥

आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये ।
ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥

प्रगाथस्यार्षम् । आ इत्ययमुपसर्गः वहन्त्वित्येतेन सम्बध्यते । आवहन्तु । त्वा त्वां सहस्रम् । आ इत्युपसर्गाभ्यासात् क्रियापदाभ्यासः । आवहन्तु त्वां सहस्रसङ्ख्याकाः । शतसङ्ख्याकाश्च आवहन्तु । हरय अश्वाः । कीदृशाः सन्तः आवहन्तु । उच्यते । युक्ताः नियुक्ता इत्यर्थः । क्व पुनर्नियुक्ताः । उच्यते । रथे हिरण्यये हिरण्मये । ब्रह्मयुजः । एतदपि अश्वानामेव विशेषणम् । ब्रह्म अन्नम् । तेन निमित्तभूतेन ये युज्यन्ते ते ब्रह्मयुजः । हविर्लक्षणस्यान्नस्य भक्षणाय गन्तुं ये रथे नियुज्यन्त इत्यर्थः । अथवा अन्नैर्विद्यमानलक्षणं ब्रह्म । तेन निमित्तभूतेन ये युज्यन्ते ते ब्रह्मयुजः । अथवा ब्रह्मणा प्रजापतिना अनुज्ञातस्येन्द्रस्य ये युज्यन्ते ते ब्रह्मयुजः । हे इन्द्र केशिनः केशवन्तः । किमर्थं पुनरावहन्तु । उच्यते । सोमपीतये सोमपानार्थमित्यर्थः ॥

आवहन्तु त्वां सहस्रं हरयः। आवहन्तु शतम्। युक्ताः सन्तः। रथे हिरण्यये हिरण्मये। ब्रह्मयुजः मन्त्रैर्युज्यमानाः। केशिनः प्रशस्तकेशाः। हे इन्द्र सोमपीतये सोमपानार्थम्॥ ३॥

आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः।
मा त्वा केचिन्नियेमुरिन्न पाशिनोऽति धन्वेव ताँ इहि॥

विश्वामित्र आह। आ इत्ययमुपसर्गः याहीत्याख्यातेन सम्बध्यते। आयाहि अस्मद्यज्ञं हे इन्द्र। कैः पुनरागच्छामि। उच्यते। मन्द्रैर्मन्द्रस्वरैः गम्भीरस्वरैः हरिभिः। मयूररोमभिः मयूरशब्दसदृशैर्हेषितशब्दैरित्यर्थः। अथवा मयूरपक्षसदृशैः रोमभिः। मा इत्ययमुपसर्गः नियेमुरित्यनेन सम्बध्यते। यमिश्चात्र बन्धनार्थः। मा नियेमुस्त्वां केचित्। मा निबध्नन्त्वित्यर्थः। इदिति पादपूरणः। न पाशिनः। नशब्दः पुरस्तादुपचारोऽपि इह उपमार्थीयः। पाशिन इव। एतदुक्तं भवति। यथा केचित्पाशिनः लुब्धकाः शकुनिं निबध्नन्ति तद्वत् त्वां आगच्छन्तं मा केचिन्निरुध्यन्तु इत्यर्थः। यद्यपि च केचिन्निरुध्यन्ति तथापि। अति इत्ययमुपसर्गः। उपसर्गाश्च पुनरेवमात्मकाः। यत्र क्रियावाची कश्चिच्छब्दः प्रयुज्यते तत्र विशेषमाहुः। यत्र तु न प्रयुज्यते तत्र ससाधनां क्रियामाहुः। न चात्र क्रियावाची कश्चिच्छब्दः प्रयुज्यते। अत उपसर्गः एवं क्रियां ब्रवीति। अतीत्य तान् धन्वेव। इवशब्दः उपमार्थस्यासंभवात्पादपूरणः। धन्वेत्यत्र च तृतीयायाः लुग्द्रष्टव्यः। धन्वना अन्तरिक्षेण। अथवा धन्वना धनुषा। अस्त्रैर्विजित्य तान् इह आगच्छ। एतदुक्तं भवति। यद्यप्यतीत्य तान् अन्तरिक्षेण धनुषा वा विजित्य आगच्छेत्यर्थः॥

विश्वामित्रः। आयाहि मन्द्रैः मदनशीलैः स्तुत्यैर्वा हरिभिः। मयूररोमभिः श्यामवर्णैः। हे इन्द्र मा नियेमुः मा निरोत्सिषुः त्वां केचित् अन्ये स्तोत्रस्तु-

तिभिः । इत् एव । न पाशिनः । नेति पुरस्तादुपचारोऽपि उपमार्थीयः । पाशिनः इव पक्षिणं पाशैः अति अतीत्य तान् अन्यान् इहि गच्छ अस्मान् । धन्वेव मरुदेशमिव पिपासितः ॥ ४ ॥

त्वमङ्ग प्रशंसिषो देवः शविष्ठ मर्त्यम् ।
न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥

गौतम आह । त्वं हे इन्द्र अङ्ग क्षिप्रम् । प्रशंसिषः । प्रशस्तं करोषि । देवः दानात् द्योतनात् द्युस्थानात् शत्रूणां दमनाच्च । हे शविष्ठ अतिशयेन बलवन् । कं पुनः क्षिप्रं प्रशस्तं करोषि । उच्यते । मर्त्यं स्तोतारं मनुष्यम् । किंच न त्वदन्यः हे मघवन् धनवन् अस्ति विद्यते । मर्डिता सुखयिता हे इन्द्र । यत एवमतो ब्रवीमि उच्चारयामि । ते तव । वचः स्तुतिलक्षणं वचनम् । एतदुक्तं भवति । यत एवमतोऽहमपि गौतमः त्वां स्तौमीत्यर्थः ॥

गौतमः । प्रशंसिष इति अन्तर्णीतण्यर्थः । प्रशंसयः । प्रशस्तं कुरु । मर्त्यं स्तोतारम् । अङ्ग क्षिप्रम् । देवः त्वं शविष्ठ अतिशयेन बलयुक्त । न त्वदन्योऽस्ति मर्डिता सुखयिता । हे मघवन् इन्द्र । अतो ब्रवीमि ते तुभ्यं वचः स्तुतिरूपम् ॥ ५ ॥

त्वमिन्द्र यशा अस्यृजीषी शवसस्पतिः ।
त्वं वृत्राणि हंस्यप्रतीन्येक इत् पुर्वनुत्तश्चर्षणीधृतिः ॥

नृमेधसः पुरुमेधसश्च आर्षम् । हे इन्द्र यशाः यशः अन्नं कीर्तिर्वा । अन्तर्णीतमत्वर्थं चेदं द्रष्टव्यम् । यशस्वी अन्नवान्वा कीर्तिमान्वा । असि भवसीत्यर्थः । ऋजीषी । सोमस्य पूयमानस्य यदतिरिच्यते तत् ऋजीषम् ।

तेन तद्वान् । कथं पुनरसौ तेन तद्वान् । उच्यते । शवसः पतिः । शवः बलम् । तस्याधिपतिभूतः । किंच त्वं वृत्राणि हंसि शत्रुकुलानि मेघवृन्दानि वा । कीदृशानि पुनर्वृत्राणि हंसि । उच्यते । अप्रतीनि अप्रतिकुर्वन्ति । प्रतिबन्धं कर्तुं न शक्नुवन्तीत्यर्थः । एक इत् । इच्छब्द एवशब्दस्यार्थे । एक एव हंसि । केन पुनः हंसि । उच्यते । पुरु बहुरूपः । अनुत्तः । चर्षणीधृतिः । चर्षणयो मनुष्याः । तैर्यो धार्यते स चर्षणीधृत् । तेन चर्षणीधृता । एतदुक्तं भवति । तव पश्चाद्यः मनुष्यैः धार्यते वज्रः तेन हंसीत्यर्थः । कथं च मनुष्यैः धार्यते वज्रः । प्रभूणां येऽनुचरास्ते धारयन्त्यायुधम् । अथवा यजमानस्य चर्षणयः स्वभूता ऋत्विजः । तैर्धार्यते यः स वज्रोऽभिधीयते । अथवा चर्षणीधृतिरिन्द्रः । मनुष्याश्चर्षणयः । तं धारयति इति वा ॥

नृमेधाः पुरुमेधाः च । त्वं हे इन्द्र यशाः यशस्वी असि । यशश्शब्दान्मत्वर्थीयलोपः । ऋजिषी । ऋजीषं गतरसमपि सोमं न त्यजसि सोमेच्छया । ऋजीषं हि तृतीयसवनेऽभिषुण्वन्ति । शवसो बलस्य पतिः । त्वं वृत्राणि शत्रून् हंसि । अप्रतीनि अप्रतिद्वन्द्वीनि । एक इत् एक एव । पुरू पुरूणि बहूनि । शेश्छन्दसि (पा. ६. १. ७०) इति शेर्लोपः । अनुत्तः अप्रेरितः केनापि । चर्षणीधृतिः चर्षणीनां जनानां धारकः त्वम् ॥ ६ ॥

इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे ।
इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥

मेधातिथिराह । इन्द्रं इत् । इच्छब्दः एवशब्दस्यार्थे । इन्द्रमेव । देवतातये यज्ञे इत्यर्थः । इन्द्रमेव प्रयति प्रोत्सरति । अध्वरे यज्ञे । इन्द्रमेव समीके सङ्ग्रामे । वनिनः । वनमुदकं सोमलक्षणम् । तेन तद्वन्तः ।

सोमवन्त इत्यर्थः । इन्द्रमेव धनस्य सातये लाभार्थमित्यर्थः । हवामहे इत्येतत्सर्वत्रानुषक्तव्यम् ॥

मेधातिथिः तिसृणामृषिः । इन्द्रमित् इन्द्रमेव देवतातये यज्ञाय यज्ञलाभार्थं हवामहे । इन्द्रमेव प्रयति प्रयच्छति क्रियमाणे अध्वरे हवामहे । इन्द्रं समीके सङ्ग्रामे । वनिनः संभजनवन्तः हवामहे । इन्द्रं हवामहे धनस्य सातये लाभाय ॥ ७ ॥

इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम ।
पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥

मेधातिथेरार्षम् । इमाः । उ इति पदपूरणः । त्वा त्वाम् । पुरूवसो । पुर्विति बहुनाम । वस्वित्यपि धननाम । पुरु वसु यस्य सः पुरुवसुः । पुरुवसुरेव पुरूवसुः । छान्दसो दीर्घः । तस्य सम्बोधनं हे पुरूवसो । बहुधन । गिरः स्तुतयः वर्धन्तु । वृधिरन्तर्णीतण्यर्थो द्रष्टव्यः । वर्धयन्तु । कतमाः । उच्यते । याः मम मेधातिथेः स्वभूताः । सत्कर्तृका इत्यर्थः । किंच येऽप्येते मदीया ऋत्विजः पावकवर्णाः पावक इव वरणीयाः । शुचयः दीप्ताः । विपश्चितः मेधाविनः । एतेऽपि स्तोमैः स्तोत्रैस्त्वां अभि अनूषत आभिमुख्येन अस्तुवत स्तुवन्ति वा । एतत्कर्तृका अपि स्तुतयः त्वां वर्धयन्तीत्यर्थः ॥

इमा गिरः स्तुतयः । त्वा त्वां वर्धन्तु हे पुरूवसो बहुधन । याः मम मदीया गिरः ता इमा इति समन्वयः । पावकवर्णाः शुचयः विपश्चितः विद्वांसः अभ्यनूषत अभिष्टुवन्ति स्तोमैः त्वाम् ॥ ८ ॥

उदु त्ये मधुमत्तमा गिरस्तोमास ईरते ।
सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव ॥

मेधातिथेरार्षम् । उदित्ययमुपसर्गः ईरते इत्याख्यातेन सम्बन्धयितव्यः । त्येशब्दस्तवशब्दपर्यायः । त्ये तव । मधुमत्तमाः अत्यन्तमधुराः । प्रीतिकरा इत्यर्थः । गिरः स्तुतयः स्तोत्रलक्षणाः । स्तोमासः स्तोत्राणि च । उदीरते शस्त्राणि ते ऊर्ध्वं गच्छन्ति । भवन्तं इन्द्रं प्रतिगच्छन्तीत्यर्थः । कथं पुनः उदीरते । उच्यते । यथा सत्राजितः । सदा ये जयन्ति शत्रून् ते सत्राजितः । सदा शत्रूणां जेतारः । धनसाः परकीयानां धनानां सम्भक्तारः । आहर्तार इत्यर्थः । अक्षितोतयः । अक्षीणा ऊतिः पालनं येषां ते अक्षितोतयः । अक्षीणपालना इत्यर्थः । वाजयन्तः पूजयन्तः । अथवा वाजशब्दो वेगवचनः । वेगवन्तः रथा इव । एतदुक्तं भवति । यथा एवंगुणविशिष्टा रथाः गच्छन्ति तद्वत् त्वां प्रति मदीयानि शस्त्राणि स्तोत्राणि च गच्छन्तीत्यर्थः ॥

उदीरते उदीरयन्ते । त्ये ते इमे स्तोमासः स्तोतारः । मधुमत्तमाः रसवत्तमाः । गिरः स्तुतीः । सत्राजितः सर्वदा जेतारः इन्द्रप्रसादात् । धनसाः धनानां संभक्तारः । अक्षितोतयः अक्षीणरक्षाः । वाजयन्तः युद्धमिच्छन्तः रथा इव अकृतनेमिस्वनाः ॥ ९ ॥

यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम् ।
अपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ॥

देवातिथेरार्षम् । यथा गौरः गौरमृगः सिंहो व्याघ्रो वा । अपा उदकेन कृतं प्रदेशं तडागादिकं प्रति । तृष्यन् एति आगच्छति । अव इत्युपसर्गश्रुतेः क्रियापदमध्याह्रियते । अवहाय । इरिणं प्रदेशम् । एवं त्वां हे इन्द्र अपित्वे अपगमनकाले । प्रपित्वे प्राप्ते । नः अस्माकम् । तूयं तूर्णां क्षिप्रं आगहि आगच्छेत्यर्थः । एत्य च कण्वेषु । सप्तमीबहुवचनमिदं

तृतीयाबहुवचनस्य स्थाने द्रष्टव्यम् । कण्वैर्मेधाविभिरस्मदीयैः ऋत्विग्भिः सह पिब सोमम् ॥

देवातिथिः काण्वः । यथा गौरः गौरमृगः । तृष्यन् पिपासुः । अपा कृतं वर्जितं उदकेन । इरिणं ऊषरं क्षेत्रम् । अवैति गच्छति अभिगच्छति । उदकभ्रान्त्या । इरिणमिति निदर्शनं उदकाभावात् तृष्णातिशयनिदर्शनार्थम् । तथा त्वं अपित्वे आगमने दिवसस्य । प्रातः । प्रपित्वे प्रगमने अपराह्णे । नः अस्मान् अभि । तूयं क्षिप्रम् । आगहि आगच्छ । आगत्य च कण्वेषु कण्वपुत्रेषु अस्मासु यजमानेषु । सु सुष्ठु त्वं पिब सोमं सचा सहास्माभिः ॥१०॥

तृतीये षष्ठया दशत्या

शग्ध्यू षु शचीपत इन्द्र विश्वाभिरूतिभिः ।
भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥

भर्गस्यार्षम् । शग्धि साधय । ऊ सु इति द्वावपि पदपूरणौ । हे शचीपते । शचीति कर्मनाम । शच्याः पतिः स्वामी शचीपतिः । तस्य सम्बोधनं हे शचीपते । सर्वकर्मणां ज्योतिष्टोमादीनां अधिपतिभूत इन्द्र । किं पुनर्याचामहे । विश्वाभिः ऊतिभिः । सहयोगलक्षणा एषा तृतीया । विश्वैः पालनैः सह । भगं न । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । अस्त्युपमार्थस्य संप्रत्यर्थे प्रयोग इति पदपूरणः । पालनसहितं धनमित्यर्थः । हीति पदपूरणः । कं पुनर्याचामहे । उच्यते । त्वा त्वां इन्द्रम् । कीदृशं त्वाम् ।

उच्यते । यशसम् । अन्तर्णीतमत्वर्थमिदं द्रष्टव्यम् । यशस्विनमन्नवन्तं त्वामित्यर्थः । वसुविदम् । वसु धनम् । तत् यः विन्दति लभते स वसुवित् । तं वसुविदम् । शत्रुवस्त्रार्थानां लब्धारमित्यर्थः । कस्मात्पुनस्त्वां प्रार्थयामहे । उच्यते । अनु शूर चरामसि । अन्वित्ययमुपसर्गः परिशब्दस्य पर्यायः । यस्मात्त्वां हे शूर परिचरामः तस्मात्प्रार्थयामः ॥

भर्गः । शग्धि देहि यदभिलषितं अस्माकं तत् । उ षु इतीमौ पूरणौ । हे शचीपते । शचीति प्रज्ञाकर्मणोः नाम । हे इन्द्र विश्वाभिः ऊतिभिः मरुद्भिः सह । भर्गं न भगमिव देवम् । हि यस्मात् त्वा त्वाम् । यशसं यशस्विनम् । वसुविदं धनलम्भनम् । अनुचरामसि परिचरामः हे शूर ॥ १ ॥

या इन्द्र भुज आभरः स्वर्वाँ असुरेभ्यः ।
स्तोतारमिन्मघवन्नस्य वर्धय ये च त्वे वृक्तबर्हिषः ॥

रेफ आह । यास्त्वं हे इन्द्र भुजः । भुज्यन्ते ताः इति भुजः अन्नानि । आभरः आहृतवानसि । केभ्यः सकाशात् । उच्यते । स्वर्वान् । स्वर्शब्दो धनवचनः । तद्यस्यास्ति सः स्वर्वान् । प्रथमैकवचनमिदं पञ्चमीबहुवचनस्य स्थाने द्रष्टव्यम् । स्वर्वद्भ्यः धनवद्भ्यः । केभ्यः पुनः स्वर्वद्भ्यः । उच्यते । असुरेभ्यः सकाशादित्यर्थः । स्तोतारं इत् स्तोतारमेव । हे मघवन् धनवन् । अस्य । षष्ठ्येकवचनमिदं तृतीयाबहुवचनस्य स्थाने द्रष्टव्यम् । एभिरन्नैर्वर्धय पुष्टान् कुर्वित्यर्थः । न केवलं माम् । ये च त्वे । यस्य च भावेन भावलक्षणम् (पा २. ३. ३७) इत्येवमियं सप्तमी । तच्छब्दश्रुतेश्च लक्षणभूतक्रियापदाध्याहारः । ये च त्वे त्वयि । त्वयीष्टव्ये सति । वृक्तबर्हिषः आस्तीर्णबर्हिषः त्वां ये व्यञ्जन्ते तानपि तैरन्नैः पोषयेत्यर्थः ॥

रेफः काश्यपः। याः भुजः भोजनानि धनानि। आभरः आहरः असुरेभ्यः। हे इन्द्र स्वर्वान् सर्वधनवान् त्वम्। तान् अस्मभ्यं प्रयच्छ इति शेषः। स्तोतारमित् स्तोतारमेव वर्धय। अस्य कर्मणः स्तोतारं इति सम्बन्धः। अथवा करणे षष्ठी। तव स्तोतारं अनेन धनेन वर्धय इति। ये च त्वे अन्ये वृक्तबर्हिषः स्तीर्णबर्हिषः यज्वानः तांश्च वर्धय हे मघवन्॥ २॥

प्र मित्राय प्रार्यम्णे सचथ्यमृतावसो।
वरूथ्ये वरुणे छन्द्यं वचः स्तोत्रं राजसु गायत॥

जमदग्निः आत्मीयान् ऋत्विजः आह। प्रेत्ययमुपसर्गः गायत इत्यनेन सम्बन्धयितव्यः। मित्राय अर्यम्णे। द्वे अप्येते तादर्थ्यचतुर्थ्यौ। मित्रस्य अर्यम्णश्चार्थायेत्यर्थः। ऋतावसो। ऋतो यज्ञः। स वसुभूतो यस्य सः ऋतवसुः इन्द्रः। ऋतवसुरेव ऋतावसुः। छान्दसं दीर्घत्वम्। सम्बुध्येकवचनं चतुर्थ्यर्थे द्रष्टव्यम्। ऋतवसवे इन्द्रस्य चार्थायेत्यर्थः। वरुणे। सप्तम्येकवचनमिदं चतुर्थ्यर्थे द्रष्टव्यम्। वरुणस्य चार्थायेत्यर्थः। सचथ्यं सचनीयम्। सम्भजनीयमित्यर्थः। वरूथ्ये। सप्तम्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्। वरूथ्यं वरणीयम्। छन्द्यम्। छन्दशब्देन स्तुतिरुच्यते। तस्यां स्तुतौ भवसीत्यर्थः। किं पुनस्तत्। वचः वचनं स्तोतृलक्षणं स्तोत्रं च। राजसु। सप्तमीबहुवचनमिदं चतुर्थी-बहुवचनस्य स्थाने द्रष्टव्यम्। राजभ्य ईश्वरेभ्यः दीप्तेभ्यो वा मित्रादिभ्यः। तेषां अर्थाय। प्रगायत हे मदीया ऋत्विज इत्यर्थः॥

जमदग्निः। प्र प्रकर्षेण गायत इत्युपरितनं विपरिणतं अत्र सम्बद्ध्यते। गायत गीतं कुरु हे स्तोतः। मित्राय प्रगायत। अर्यम्णे च प्रगायत। सचथ्यं सचथस्य सेवायाः योग्यं स्तोत्रम्। हे ऋतावसो यज्ञधन। अथ जमदग्निः बहुवदात्मानं आह। वरूथ्ये वरूथ्यं वरूथाय गृहाय हितम्।

छन्द्यं कमनीयम् । वचः स्तोत्रम् । वरुणे वरुणमुद्दिश्य गायत । अथ सर्वान् आदित्यान् उद्दिश्य आह । स्तोत्रं गायत जमदग्नयः राजसु नियन्तृषु आदित्येषु । तान् उद्दिश्य ॥ ३ ॥

अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः ।
समीचीनास ऋभवः समस्वरन् रुद्रा गृणन्त पूर्व्यम् ॥

मेधातिथेरार्षम् । अभीत्ययमुपसर्गः गृणन्त इत्याख्यातेन सम्बध्यते । त्वा त्वाम् । पूर्वपीतये अनादिकालप्रवृत्ताय सोमपानाय । हे इन्द्र स्तोमेभिः स्तोमैः । आयवः ऋत्विग्लक्षणा मनुष्याः । कीदृशा मनुष्याः । उच्यते । समीचीनासः सङ्गताः । सहभूता इत्यर्थः । ऋभवः महान्तः । समस्वरन् पूर्वकालेऽपि स्तुतिमुच्चारितवन्तः । रुद्राः रोदनस्वभावकाः । स्तुत्युच्चारणशीला इत्यर्थः । अभिगृणन्ते आभिमुख्येन स्तुवन्तीत्यर्थः । कीदृशं त्वां स्तुवन्ति । उच्यते । पूर्व्यं पूर्वतनमित्यर्थः ॥

मेधातिथिः । अभिसमस्वरन् अभिसंस्तुवन्ति । त्वा त्वाम् । पूर्वपीतये प्रथमपानाय । हे इन्द्र स्तोमेभिः स्तोत्रैः । आयवो मनुष्याः । समीचीनासः सङ्गताः । ऋभवः दीप्ताः । रुद्राः स्तोतारः अन्ये गृणन्त अस्तुवन् । पूर्व्यं पुरातनं इन्द्रम् । रुद्राः रुवन्तः शब्दायमानाः । रुवन्ति उपगायन्ति इति रुद्राः ॥ ४ ॥

प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत ।
वृत्रं हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा ॥

पुरुमेधाः आत्मीयान् ऋत्विजः आह । प्रेत्ययमर्चतेत्यनेन सम्बन्धयितव्यः । वः । द्वितीयाबहुवचनमिदं प्रथमाबहुवचनस्य स्थाने द्रष्टव्यम् । यूयम् । इन्द्राय बृहते इन्द्रस्य बृहतोऽर्थाय । हे मरुतः

मदीया ऋत्विजः । ब्रह्म सोमलक्षणमन्नम् । प्रार्चत प्रकर्षेण स्तुतेत्यर्थः । स इन्द्रः कीदृशः यस्यार्थाय स्तुमः । उच्यते । यः वृत्रं मेघं हनति हन्ति । वृत्रहा पूर्वकालमपि शत्रूणां हन्ता । शतक्रतुः बहुप्रज्ञः बहुकर्मा वा । कथं पुनर्यो वृत्राणि हन्ति । उच्यते । वज्रेण । कीदृशेन वज्रेण । शतपर्वणा । पर्वशब्देन सन्धिरुच्यते । शतसन्धिना । बहुसन्धिनेत्यर्थः ॥

अस्याः परस्याश्च नृमेधपुरुमेधौ द्वावृषी । प्रार्चत प्रकुरुत इत्यर्थः । वः यूयम् । इन्द्राय बृहते हे मरुतः स्तोतारः । महत् रुवन्तीति मरुतः । ब्रह्म स्तोत्रम् । स्तुतश्च शतक्रतुः शतकर्मा शतप्रज्ञो वा इन्द्रः । वृत्रं शत्रुं युष्माकम् । हनतीति पञ्चमलकारान्तम । वृत्रहा वृत्राणां हन्ता । वज्रेण शतपर्वणा ॥ ९ ॥

बृहदिन्द्राय गायत मरुतो वृत्रहन्तमम् ।
येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि ॥

मेधातिथिः आत्मीयान् ऋत्विज आह । बृहत् महत् । सुष्ठ्वित्यर्थः । इन्द्राय गायत उच्चारयत । किं तत् । सामर्थ्यात् स्तुतिरूपम् । हे मरुतः मदीया ऋत्विजः । कीदृशं पुनः स्तुतिरूपमुच्चारयामः । उच्यते । वृत्रहन्तमं अतिशयेन वृत्रस्य हन्तृ । येनासौ स्तुतः वृत्रं हन्तुं शक्नोतीत्यर्थः । येन च ज्योतिरादित्याख्यं अजनयत् आरोपितवानित्यर्थः । हे ऋतावृधः । ऋतो यज्ञः । तं ये वर्धयन्ति ते ऋतावृधः । तेषां सम्बोधनं हे ऋतावृधः । यज्ञस्य वर्धयितारः । उपरि समीपयितार इत्यर्थः । कीदृशं पुनः स्तुतिरूपमुच्चारयामः । उच्यते । देवं । द्वितीया तृतीयार्थे द्रष्टव्या । देवेन सोमेन संयुक्तम् । कीदृशस्येन्द्रस्यार्थाय । उच्यते । देवाय । दानादिगुणयुक्तस्येन्द्रस्यार्थाय । कीदृशं पुनः स्तुतिरूपमुच्चारयामः । उच्यते । जागृवि अतिप्रीतिकरमित्यर्थः ॥

बृहत् महत् स्तोत्रं बृहदाख्यमेव वा साम । इन्द्राय गायत हे मरुतः स्तोतारः । वृत्रहन्तमं वृत्राणां पापाना अतिशयेन हन्तृ । येन साम्ना ज्योतिः यशः अजनयन् । ऋतावृधः यज्ञस्य वर्धयितारः अङ्गिरसः । देवं दीप्तज्योतिषम् । देवाय इन्द्राय । जागृवि प्रबुद्धं अतिरोहितम् ॥ ६ ॥

इन्द्र क्रतुं न आभर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥

शक्तिरिन्द्रमाह । हे इन्द्र क्रतुं प्रज्ञानम् । नः अस्माकम् । आभर आहर । आनयेत्यर्थः । शिक्ष देहि । कथं वा देहि । पिता पुत्रेभ्यो यथा यथा पिता पुत्रेभ्यो ददाति तद्वदित्यर्थः । क्व पुनर्ददामि । उच्यते । अस्मिन् यामनि । यान्ति देवा यस्मिन् सः यमा यज्ञः । तस्मिन् यामनि । यज्ञे इत्यर्थः । हे पुरुहूत पुरुभिर्यजमानैः आहूत । त्वद्दत्तया च प्रज्ञया जीवा जीवन्तो वयम् । ज्योतिः ज्ञानं अशीमहि प्राप्नुयामेत्यर्थः ॥

वसिष्ठः । हे इन्द्र क्रतुं कर्म प्रज्ञानं वा । नः अस्मभ्यम् । आभर आहर । पिता पुत्रेभ्यः यथा धनम् । शिक्षा देहि नः अस्मभ्यं धनं हे पुरुहूत । अस्मिन् यामनि यज्ञे । जीवा वयम् । ज्योतिः सूर्यम् । अशीमहि प्राप्नुयाम प्रतिदिनम् ॥ ७ ॥

मा न इन्द्र परावृणग्भवा नः सधमाद्ये ।
त्वं न ऊती त्वमिन्न आप्यं मा न इन्द्र परावृणक् ॥

रेफो नाम ऋषिः इन्द्रमाह । मा नः अस्मान् । हे इन्द्र परावृणक् । वृजी वर्जने इत्यस्येदं रूपम् । मा अस्मान् परावर्जीः । भव नः अस्माकम् । सधमाद्ये इत्येषा सप्तमी प्रथमैकवचनस्य स्थाने द्रष्टव्या । सहभूतानां

मदनीयः । किंच त्वं नः अस्माकम् । ऊती अविता रक्षिता तर्पयिता वा । त्वं इत त्वमेव न· आप्यं ज्ञातव्यमित्यर्थः । यतश्चैवमतः पुनरपि ब्रवीमि मा न इन्द्र परावृणक् ॥

रेफः । हे इन्द्र मा परावृणक् मा त्याक्षीः । नः अस्मान् हे इन्द्र । भव नः अस्माकं असाधारणः सधमाद्ये यज्ञे । त्वं नः ऊती ऊतये रक्षायै भव । त्वमित त्वमेव हि नः आप्यं ज्ञातेयम् । बन्धुः इत्यर्थः । पुनरुक्तिः आदरार्था ॥ ८ ॥

वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।
पवित्रस्य प्रस्रवणेषु वृत्रहन् परि स्तोतार आसते ॥

मेधातिथेरार्षम् । घ इति पदपूरणः । त्वा त्वाम् । परि इत्येतत् आसत इत्येतेन सम्बन्धयितव्यम् । कीदृशा वयम् । उच्यते । सुतावन्तः सोममभिषुतवन्तः । कृतसोमाभिषवा इत्यर्थः । न केवलं सुतावन्तः । वृक्तबर्हिषश्च आस्तीर्णबर्हिष इत्यर्थः । पर्यास्महे त्वां परिवार्य व्यवतिष्ठामहे । न केवलं वयम् । येऽप्येते मदीया ऋत्विजः पवित्रस्य भवतः इन्द्रस्य स्तोतारः एतेऽपि त्वां हे वृत्रहन् पर्यासते । कथं पुनः पर्यासते । आपो न । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । आप इव प्रस्रवणेषु । एतदुक्तं भवति । यथा आपः नद्यः निम्नस्थानेषु द्वीपं परिवार्य व्यवतिष्ठन्ते तद्वत् वयं स्तोतारश्च त्वां परिवार्य व्यवतिष्ठाम इत्यर्थः ॥

मेधातिथिः । वयं सुतवन्तः अभिषुतवन्तः सोमम् । वृक्तबर्हिषः स्तीर्णबर्हिषः । त्वा त्वां उपगच्छामः इति शेषः । घेति पूरणः । आपो न आप इव प्रवणाः । पवित्रस्य सोमस्य । प्रस्रवणेषु सवनेषु । हे वृत्रहन् स्तोतारः इमे पर्यासते स्तोतुं त्वाम् ॥ ९ ॥

यदिन्द्र नाहुषीष्वाँ ओजो नृम्णं च कृष्टिषु ।
यद्वा पञ्च क्षितीनां द्युम्नमाभर सत्रा विश्वानि पौंस्या ॥

शंयुराह । हे इन्द्र नाहुषीषु । नहुष इति मनुष्यनाम । तेषु भवा नाहुष्यः । मनुष्यजातीयाः । ताश्चावान्तरजातीया अभिप्रेताः । या यक्ष-रक्षोगन्धर्वादयः तासु । यत् ओजः बलम् । नृम्णं धनं च । तत् मम शंयोः आभर आनय । न केवलं यक्षरक्षोगन्धर्वादिष्वेव यत ओजो नृम्णं च तत् आभर । किं तर्हि । कृष्टिषु मनुष्येषु च । रक्षःपिशाचादिषु मनुष्येषु च यद्धनं बलं च तदपि आभर । यद्वा वाशब्दश्चशब्दस्यार्थे । यच्च पञ्च क्षितीनाम् । क्षितय इत्यपि मनुष्यनाम । पञ्च च ते क्षितयश्च । कतमे पुनस्ते । चत्वारो वर्णाः निषादाः पञ्चमः । तेषां क्षितीनां द्युम्नं यशः अन्नं वा तत् आभर । न सकृदेव । किं तर्हि । सत्रा । यद्यपि सत्राशब्दः सत्यनामसु पठितः तथापीह सर्वदाशब्दपर्यायो द्रष्टव्यः । सर्वदा इत्यर्थः । विश्वानि सर्वाणि पौंस्यानि बलानि आभरेत्यर्थः ॥

शंयुः । यत् ओजो बलं हे इन्द्र । नाहुषीषु मानुषीषु । कृष्टिषु प्रजासु विद्यते । आ इति चार्थे । नृम्णं धनं च विद्यते । यद्वा यच्च द्युम्नं अन्नम् । पञ्च पञ्चानाम् । विभक्तेर्लुक् । क्षितीनां जनानाम् । निषादपञ्चमा वर्णाः पञ्च क्षितयः । तदाभर आहर अस्मभ्यम् । सत्रा महान्ति । विश्वानि पौंस्यानि वीर्याणि चाहर ॥ १० ॥

तृतीये सप्तम्या दशत्या

सत्यमित्था वृषेदसि वृषजूतिर्नोऽविता ।
वृषा ह्युग्र शृण्विषे परावति वृषो अर्वावति श्रुतः ॥

मेध्यातिथिरिन्द्रमाह । सत्यं इत्था अनेन प्रकारेण । वृषा वर्षिता । दातेत्यर्थः । इत् इति पदपूरणः । असि भवसि । वृषजूतिः । जूतिर्गमनम् । जवर्तिर्गत्यर्थः । वृषस्येव गमनं यस्य स वृषजूतिः । तत्र तत्र वृषवद्गन्तेत्यर्थः । नः अस्माकम् । अविता रक्षितेत्यर्थः । किंच वृषा त्वम् । हीति पदपूरणः । हे उग्र अप्रसह्य । शृण्विषे श्रूयसे । परावति दूरे । वृषा अर्वावति सन्निकृष्टे च । सर्वत्र वर्षितेत्यर्थः । श्रुतः विख्यात इत्यर्थः ॥

मेध्यातिथिः । सत्यमित्थेति च सत्यमित्यर्थे वर्तते । सत्यं सत्यमेव वृषेदसि वर्षितैव भवसि । वृषजूतिः वृषभिः सोतृभिः सोमरसस्य सोतृभिः प्रेषितः । नः अस्माकं अविता रक्षिता । वृषा हि हे उग्र त्वं शृण्विषे श्रूयसे । परावति दूरे स्थितः । वृषा उ वृषो । वृषैव श्रुतोऽसि अर्वावति अन्तिके ॥ (१)

यच्छक्रासि परावति यदर्वावति वृत्रहन् ।
अतस्त्वा गीर्भिर्द्युगदिन्द्र केशिभिः सुतावाँ आ विवासति ॥

रेभस्यार्षम् । यत् यदि हे शक्र इन्द्र । असि परावति दूरे । द्युलोके इत्यर्थः । यत् यदि अर्वावति सन्निकृष्टे । अन्तरिक्षे इत्यर्थः । हे वृत्रहन् वृत्रस्य हन्तः । अतः उभयप्रकारात् स्थानात् । पञ्चमीनिर्देशात् आगतमिति वाक्यशेषः । आगतं त्वाम् । केन पुनरागतम् । उच्यते । केशिभिः । केशा येषां सन्ति ते केशिनः अश्वाः । तैः केशिभिः । बालवद्भिरित्यर्थः । गीर्भिः स्तुतिभिः । द्युगत् क्षिप्रम् । हे इन्द्र सुतावान् । सुतः अभिषुतः सोमो यस्यास्ति स सुतावान् । अभिषुतेन सोमेन

तद्वानित्यर्थः । आविवासति । रेभः आत्मानमेव परोक्षरूपेण प्रतिनिर्दिशति । रेभो नामायं ऋषिः परिचरतीत्यर्थः ॥

रेभः । यत् यदि हे शक्र असि भवसि । परावति दूरे । यद्वा अर्वावति अन्तिके हे वृत्रहन् । अतो देशात् त्वा त्वां आविवासति आह्वयति । गीर्भिः स्तुतिभिः हे इन्द्र । केशिभिः अश्वैः । द्युगत् दिवं स्तुतिं गच्छन् स्तुतवान् यजमानः ॥ (२)

अभि वो वीरमन्धसो मदेषु गाय गिरा महा विचेतसम् ।
इन्द्रं नाम श्रुत्यं शाकिनं वचो यथा ॥

वषो नाम ऋषिः अन्तरात्मानमाह । अभीत्ययमुपसर्गः गायेत्याख्यातेन सम्बन्धयितव्यः । वः । द्वितीयाबहुवचनमिदं प्रथमैकवचनस्य स्थाने द्रष्टव्यम् । हे मदीय अन्तरात्मन् त्वम् । वीरं विक्रान्तं इन्द्रम् । अन्धसः सोमलक्षणस्य अन्नस्य सम्बद्धेषु मदेषु । सप्तमीनिर्देशात् प्राप्तेष्विति वाक्यशेषः । सोमेषु देवेषु सन्निधानभूतेष्वित्यर्थः । अभिगाय अभिस्तुहीत्यर्थः । कथं पुनः स्तुहि । उच्यते । गिरा महा महत्या गिरेत्यर्थः । कीदृशं च पुनरिन्द्रं स्तुहि । उच्यते । विचेतसं विविधप्रज्ञमित्यर्थः । कं पुनः स्तुहि । उच्यते । इन्द्रं नाम । नामशब्दो निपातः पादपूरणः । कीदृशं पुनरिन्द्रं स्तुहि । शाकिनम् । शाकनं शाकः । शक्तिरित्यर्थः । सा यस्यास्ति स शाकी । तं शाकिनम् । शक्तिमन्तमित्यर्थः । किमिव स्तुहि । उच्यते । श्रुत्यं वचो यथा । श्रुतौ भवं श्रुत्यम् । वचः वचनम् । यथा कश्चित् श्रुतौ भवं वचनं सत्यार्थत्वेन स्तौति तद्वत् स्तुहीत्यर्थः ॥

वषः । इयं पिपीलिकमध्या बृहतीति बह्वृचाः । आद्यन्तौ पादौ त्रयोदशाक्षरौ । मध्यमोऽष्टाक्षर इति त्रिपदा । अभिगाय हे स्तोतः वः त्वम् । गिरा

स्तुत्या । महा महत्या । वीरं वीरयितारं शत्रूणाम् । अन्धसः सोमस्य मदेषु जातेषु । विचेतसं विशिष्टज्ञानम । इन्द्रम । नामेति पूरणः । श्रुत्यं श्रवणीयम् । शाकिनम् । शाकः शक्तिः । तद्वन्तं शक्तम् । वचः त्वदीयं यथा प्रवर्तते तथाभिगाय । न पुनरिन्द्रस्य गुणानुगुण्येन । तथा स्तोतुमशक्तेः ॥ (३)

इन्द्र त्रिधातु शरणं त्रिवरूथं स्वस्तये ।
छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च यावया दिद्युमेभ्यः ॥

शंयुराह । हे इन्द्र त्रिधातु । धातुशब्देन रसा उच्यन्ते । त्रयो रसाः देवपितृमनुष्योपभोग्याः । अपिवा धातवः कामक्रोधलोभादयः । तैर्युक्तम् । अथवा सुवर्णरजतमाणिक्यैः त्रिभिर्धातुभिर्युक्तम् । यत् त्रिधातु शरणं गृहम् । त्रिवरूथं वरणीयम् । ग्रीष्मवर्षाहेमन्तेषु चन्दनागरुकुङ्कुमादिविलेपनं त्रिप्रकारमपि यस्मिन् तत् त्रिवरूथम् । अथवा त्रिभिरग्निभिर्युक्तम् । वेदैस्त्रिभिर्देवैर्वा ब्रह्मविष्णवीशैः सवनैर्वा त्रिभिः उपेतमित्यर्थः । स्वस्तये अविनाशाय । छर्दिः इति यद्यपि गृहनामसु पठितं तथापि शरणमित्यनेन पौनरुक्त्यप्रसङ्गात् क्रियानिमित्तं द्रष्टव्यम् । उछन्दिरुद्दीप्तिदेवनयोरित्येतस्य दीप्त्यर्थस्येदं रूपम् । समृध्या दीप्तमित्यर्थः । यच्छ देहि । मघवभ्यश्च येऽप्येते मघवन्तः अनेन सोमलक्षणेन धनेन धनवन्तः तेभ्यश्च । मह्यं च । किंच यावय पृथक्कुरु । यावत्प्रमाणकं दिद्युं देयमस्मभ्यम् । अथवा दिद्युदिति वज्रनाम । तस्यायं छान्दसः तकारलोपः । दिद्युतम् । पृथक्कुरु वज्रं एभ्यः । मा एतैर्वज्रसंसर्गं कार्षीः । मा एतान् हिंसीः इत्यर्थः ॥

भरद्वाजः । हे इन्द्र त्रिधातु त्रिभूमिकम् । शरणं गृहम् । त्रिवरूथं त्रयाणां वारकं वर्षवातातपानाम । स्वस्तये अविनाशाय । अस्माकं छर्दिः छादनयुक्तम् ।

यच्छ प्रयच्छ । मघवद्भ्यः हविष्मद्भ्यः अस्मत्पुरुषेभ्यः । मह्यं च भरद्वाजाय । यावय पृथक्कुरु । दिद्युं आयुधं शत्रुभिः प्रहितम् । एभ्यः अस्मभ्यम् ॥ (४)

श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत ।
वसूनि जातो जनिमान्योजसा प्रति भागं न दीधिमः ॥

नृमेधस आर्षम् । श्रायन्त इव यथा सूर्यं रश्मयः संश्रयन्ते तद्वत् इन्द्रं मरुतः संश्रयन्ते । विश्वा विश्वानि । इदिति पदपूरणः । इन्द्रस्य स्वभूतानि । भक्षत । शुद्धोऽप्ययं भक्षिर्विपूर्वो द्रष्टव्यः । विभक्षत । विभजत इत्यर्थः । किं पुनर्विभजत । उच्यते । वसूनि उदकलक्षणानि धनानि । जातो जनिमान् । द्वे अप्येते प्रथमैकवचने चतुर्थ्येकवचनस्य स्थाने द्रष्टव्ये । जाताय जनिष्यमाणाय च । भूतग्रामस्यार्थायेत्यर्थः । केन पुनर्विभजन्त । उच्यते । ओजसा स्वेन सामर्थ्येन । तानि च विभज्यमानानि प्रति । प्रतीत्ययं अन्वित्येतस्य स्थाने दीधिम इत्याख्यातेन सम्बन्धयितव्यः । भागं न । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । भागमिव । यथा कश्चित् पित्र्यस्य चार्थस्य साधारणस्य भागं अनुध्यायति तद्वद्वयं तानि विभज्यमानानि उदकानि अनुध्यायामः ॥

नृमेधाः । श्रायन्तः समाश्रिता यूयम् । इव इति संप्रत्यर्थे । सूर्यं प्रेरकं इन्द्रं सूर्यमिति वा । विश्वेत् विश्वान्येव । वसूनि इन्द्रस्य स्वभूतानि । भक्षत भजत । जातो ह्येष इन्द्र ओजसा सह । जनिमानि जन्मानि जनान् सर्वान् । रक्षितुं इति शेषः । वयं च प्रतिदीधिमः प्रतिधारयामः वसूनि । अनुध्यायाम इति यास्कः (नि. ६. ८.) । भागं न भागमिव पितुः पुत्राय ॥ (५)

न सीमदेव आपतदिषं दीर्घायो मर्त्यः ।
एतग्वा चिद्य एतशो युयोजत इन्द्रो हरी युयोजते ॥

पुरुहन्मन आर्षम् । नेत्ययं प्रतिषेधः आपतदित्याख्यातेन सम्बन्धयितव्यः । सीमिति पदपूरणः । अदेवः । देवो दानवान् । न देवः अदेवः । अदानवानित्यर्थः । देवपितृमनुष्येभ्यः यो न ददातीत्यर्थः । असौ न आपतत् न प्राप्नोतीत्यर्थः । किं पुनर्न प्राप्नोति । उच्यते । इषं अन्नम् । हे दीर्घायो दीर्घजीवित मदीय अन्तरात्मन् । मर्त्यः मनुष्यः । वसुदाता सः एतग्वा एतग्वौ अश्वौ । चिदिति पदपूरणः । एतशः । प्रथमैकवचनमिदं द्विवचनस्य स्थाने द्रष्टव्यम् । एतद्वर्णौ गन्तारौ वा । युयोजते स्वे रथे । अत्यर्थं नियुङ्क्ते इत्यर्थः । एतदुक्तं भवति । अश्वैः रथैरसौ गच्छतीत्यर्थः । क इव अश्वान् नियुङ्क्ते । उच्यते । इन्द्रः । लुप्तोपममेतद्द्रष्टव्यम् । इन्द्र इव । हरी हरितवर्णौ अश्वौ युयोजते । एतदुक्तं भवति । यथा इन्द्रः स्वे रथे अश्वान्नियुङ्क्ते तद्वद्दाता स्वे रथे अश्वान्नियुङ्क्ते इत्यर्थः ॥

पुरुहन्मा । न आपतत् नाप्नुयात् । सीं एनं इन्द्रम् । इषं एषणीयम् । अदेवः अस्तोता मर्त्यः । अथवा सीमिति पूरणः । इषं अन्नं अस्तोता मर्त्यः नाप्नुयात् इति । हे दीर्घायो पुरुहन्मन् । आयुज्ञान दीर्घदर्शिन् । अतः तं स्तुहि तत्प्रीत्यर्थं अन्नलाभाय इति वा । य इन्द्रः एतशः । एत इति श्वेतनाम । शकार उपजनः । श्वेतौ शुक्लौ गुणैः । एतग्वा एतव्यस्य गन्तारौ । चित् इति पूरणः । हरी स्वीयौ वाहौ । युयोजते युङ्क्ते स्वे रथे स्तोतॄन् अभिगन्तुम् । युयोजत इति पुनरुक्तिः पूरणार्था ॥ (६)

आ नो विश्वासु हव्यमिन्द्रं समत्सु भूषत ।
उप ब्रह्माणि सवनानि वृत्रहन् परमज्या ऋचीषम ॥

नृमेधपुरुमेधौ आत्मीयान् पुत्रपौत्रानाह । आ इत्ययमुपसर्गः परीत्येतस्य स्थाने भूषतेत्याख्यातेन सम्बन्धयितव्यः । नः अस्माकम् । हव्यम् ।

आह्वातव्यं इन्द्रम्। विश्वासु समत्सु सङ्ग्रामभूमिषु। सङ्ग्रामेष्वित्यर्थः। परिभूषतः परिगृह्णीत आश्रयत्वेन। किंच उप। उपेत्ययमुपसर्गः। तच्छ्रुतेश्चात्र क्रियापदमध्याह्रियते। उपगच्छ ब्रह्माणि अन्नानि पुरोडाशादीनि। सवनानि च प्रातःसवनादीनि हे वृत्रहन्। परमज्याः परमा उत्कृष्टा ज्या यस्य स परमज्याः। परमो वा शत्रूणां जेता परमज्याः। ऋचीषमः। ऋचीत्यनेन शब्देन स्तुतिरुच्यते। ऋच स्तुतावित्येतस्य स्तुत्यर्थत्वात्। यावन्तः स्तुतौ गुणाः तैः सर्वैर्युक्त इत्यर्थः। परमज्या ऋचीषम इत्येते यत्तच्छब्दावध्याहृत्य एकवाक्यतां नेये। यस्त्वं परमज्याः ऋचीषमः स ब्रह्माणि अन्नानि त्रैविद्यलक्षणानि वा सवनानि च उपगच्छ इत्येवमेकवाक्यता॥

नृमेधपुरुमेधौ। पूर्वार्धर्चः परोक्षस्तुतिः। परः प्रत्यक्षस्तुतिः। अभूषत अभिप्रापयत। नः अस्माकं हे मदीया ऋत्विजः। विश्वासु समत्सु संग्रामेषु। हव्यं ह्वातव्यं इन्द्रम्। उप उपगच्छ। ब्रह्माणि स्तोत्राणि। सवनानि। सूयन्ते इति सवनानि सोमाः। तांश्च अभिगच्छ हे वृत्रहन्। परमज्याः परमं अत्यर्थं क्षपयिता शत्रूणाम्। ज्या वयोहानौ। हे ऋचीषम ऋचा स्तुत्या सदृश। सर्वासां स्तुतीनां योग्य॥ (७)

तवेदिन्द्रावमं वसु त्वं पुष्यसि मध्यमम्।
सत्रा विश्वस्य परमस्य राजसि नकिष्ट्वा गोषु वृण्वते॥

वसिष्ठ इन्द्रमाह। तव इत् तवैव हे इन्द्र। अवमं निकृष्टम्। वसु धनं पुष्यसि पुष्णासि। मध्यमं रूप्यादि। मध्यममपि तवैवेत्यर्थः। सत्रा सर्वदा। विश्वस्य सर्वस्य परमस्य सुवर्णादेः। त्वमेव राजसि ईशिषे इत्यर्थः। नकिः न कश्चित् त्वा त्वां गोषु ईशानमीश्वरं कुर्वन्तं वृण्वते वारयतीत्यर्थः।

एतदुक्तं भवति । सर्वप्रकारस्य त्वमीशिषे । अतः अस्माकमपि ततः किंचन देहीत्यभिप्रायः ॥

वसिष्ठः । तवेत् तवैव स्वं भवति । हे इन्द्र अवमं त्रपुसीसादिकं वसु त्वमेव पुष्यसि । मध्यमं रजतहिरण्यादिकं वसु । सत्रा सत्यमेव विश्वस्य परमस्य श्रेष्ठस्य रत्नादिकं वसु नः । राजसि ईशिषे । नकिः वृण्वते न वारयति । त्वा त्वाम् । गोषु निमित्तेषु । यद्वा अवमं वसु पार्थिवं मध्यमं आन्तरिक्ष्यं परमं दिव्यम् ॥ (८)

क्वेयथ क्वेदसि पुरुत्रा चिद्धि ते मनः ।
अलर्षि युध्म खजकृत्पुरंदर प्र गायत्रा अगासिषुः ॥

प्रगाथः इन्द्रमाह । क्व इयथाः क्व गच्छसीत्यर्थः । क्व । इदिति पदपूरणः । असि भवसि इत्यर्थः । कस्मात्पुनरेवं पृच्छामि । उच्यते । पुरुत्रा बहुधा । चिदिति पदपूरणः । हिशब्दो यस्मादर्थे । यस्माद्बहुधा ते तव मनः तस्मात् पृच्छामीत्यर्थः । किंच अलर्षि गच्छसि शत्रून्प्रति । हे युध्म योद्धः । हे खजकृत् । खज इति सङ्ग्रामनाम । तस्य कर्ता खजकृत् । तस्य सम्बोधनं हे खजकृत् । असुरैः सह सङ्ग्रामकर्तरित्यर्थः । हे पुरन्दर असुरपुराणां विदारयितः । किंच गायत्राः मन्त्राः त्वामयासिषुः अस्मदुच्चारितमन्त्राः त्वां प्रकर्षेण स्तुवन्तीत्यर्थः ॥

मेधातिथिः मेध्यातिथिश्च । क्व इयथ गन्तासि । क्वासि भवसि । इदिति पूरणः । पुरुत्रा बहुषु देशेषु यज्ञभूमिषु । ते तव मनो भवति । चिदिति पूरणः । हि इति प्रसिद्धौ । अलर्षि इति वैदिको धातुः हिंसाकर्मा । अलर्षि हिंसि शत्रून् । त्वं हे युध्म । युद्धकुशल । हे खजकृत् युद्धकर्तः । हे पुरन्दर पुराणामासुरीणां दारयितः । प्रागासिषुः प्रगायन्ति त्वाम् । गायत्राः गानकुशलाः स्तोतारः ॥ (९)

वयमेनमिदा ह्योऽपीपेमहे वज्रिणम् ।
तस्मा उ अद्य सवने सुतं भरा नूनं भूषत श्रुते ॥

कलिराह । वयं एनं इन्द्रं इदा इदानीम् । ह्यः पूर्वस्मिंश्चाहनि । अपीपेमहे । ओप्यायी वृद्धावित्यस्येदं रूपम् । स्तुतिभिर्हविर्भिश्च आप्याययामः । एतदाशास्महे । इह यज्ञे वज्रिणम् । वज्रवन्तमित्यर्थः । यूयमपि हे मदीया ऋत्विजः तस्मै इन्द्राय । उ इति पदपूरणः । अद्य अस्मिन्नहनि । सवने माध्यन्दिनसवने इत्यर्थः । आ नूनं भूषत आभिमुख्येन क्षिप्रं भवत । श्रुते । सप्तम्येकवचनमिदं चतुर्थ्येकवचनस्य स्थाने द्रष्टव्यम् । श्रुताय । विख्यातायेत्यर्थः ॥

कलिः । वयं एनं वज्रिणम् । इदा इदानीं अस्मिन् अहनि । ह्यः अतीते अह्नि अपीपेमहे आप्याययामः इह अत्राहर्गणे । तस्मा उ तस्मै एव इन्द्राय । अद्य च अस्मिन् दिनेऽपि । सवने यज्ञे । सुतं सोमं भर हे अध्वर्यो । अभि अनूषत अभिगायत । वर्धयत स्तुतिभिः । हे उद्गातारः । नूनं अद्य श्रुते विश्रुते अहर्गणे । अथवा श्रुत् श्रवः । श्रवसे कीर्त्यै युष्माकम् ॥ (१०)

तृतीयेऽष्टम्या दशत्या

यो राजा चर्षणीनां याता रथेभिरध्रिगुः ।
विश्वासां तरुता पृतनानां ज्येष्ठं यो वृत्रहा गृणे ॥

पुरुहन्मन आर्षम् । य इन्द्रः राजा ईश्वरः । चर्षणीनां मनुष्याणाम् । याता रथेभिः । यत्र गन्तव्यं तत्र याता रथैः । अध्रिगुः । अधृतं

गमनकर्म यस्य स अध्रिगुः । अप्रतिविध्यगमन इत्यर्थः । विश्वासां तरुता पृतनानां सर्वासां निस्तारिता जेता सङ्ग्रामभूमीनाम् । ज्येष्ठम् । द्वितीयैकवचनमिदं प्रथमैकवचनस्य स्थाने द्रष्टव्यम् । ज्येष्ठः अतिशयेन प्रशस्यः वृद्धो वा । यश्च वृत्रहा । यच्छब्दश्रुतेस्तच्छब्दमध्याहृत्य क्रियापदं योजयितव्यम् । तमहं पुरुहन्मा गृणे गृणामि । स्तौमीत्यर्थः ॥

पुरुहन्मा । यो राजा भवति चर्षणीनां प्रजानां सर्वासाम् । याता गन्ता रथेभिः रथैः । यजमानानां गन्तव्योऽभूः । यः त्वं अध्रिगुः अधृतगमनः । विश्वासा पृतनानां सेनानाम् । तरुता हन्ता । ज्येष्ठमिति क्रियाविशेषणम् । अधिकतरमित्यर्थः । यः वृत्रहा इन्द्रः । गृणे स्तूयते अन्येभ्यः अधिकतरम् ॥ (१)

यत इन्द्र भयामहे ततो नो अभयं कृधि ।
मघवञ्छग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि ॥

भर्गः इन्द्रमाह । यतः यस्मात् हे इन्द्र भयामहे बिभेमः । ततः तस्मात् । नः अस्माकम् । अभयं कृधि कुरु । हे मघवन् धनवन् शग्धि याचामहे । तव स्वभूतं तत् अभयम् । किंच नः अस्माकं ऊतये पालनाय । वि इत्ययमुपसर्गः जहीत्याख्यातेन संबध्यते । विजहि । द्विषः द्वेष्टॄन् । वीति पदपूरणः । मृधः । मृध इति सङ्ग्रामनाम । मृधं करोति । तत्करोतीति णिच् । मृधयति । तदन्तात् क्विप् । मृधः । तान् मृधः । सङ्ग्रामकारिण इत्यर्थः । अस्माभिः सह सङ्ग्रामं कर्तुमिच्छन्तीत्यभिप्रायः । विजहि विविधं जहि मारय विनाशयेत्यर्थः ॥

भर्गः । यतः भयामहे इन्द्र । ततः नः अस्माकम् । अभयं कृधि कुरु । हे मघवन् शग्धि देहि । तव त्वया देयं यत् धनं तत धनम । नः अस्मभ्यम् । ऊतये तर्पणाय । विजहि द्विषः द्वेष्टॄन् । विजहि मृधः हिंसकांश्च ॥ (२)

वास्तोष्पते ध्रुवा स्थूणा सत्रं सोम्यानाम् ।
द्रप्सः पुरां भेत्ता शश्वतीनामिन्द्रो मुनीनां सखा ॥

इरिम्बिठिर्नाम ऋषिः । तस्येदमार्षम् । वास्तु गृहम् । तस्य पतिः वास्तोष्पतिः । गृहस्य स्वामीत्यर्थः । तस्य सम्बोधनं हे वास्तोष्पते गृहस्य स्वामिन् । ध्रुवा स्थूणा । लुप्तोपममेतद्द्रष्टव्यम् । ध्रुवा स्तूणा इव । यथा गृहस्य ध्रुवा स्थूणा आश्रयभूता तद्वत् त्वं आश्रयभूत इत्यर्थः । अंसत्रम् । एतदपि लुप्तोपमम् । अंसत्रमिव । अंसत्रं धनुः कवचं वा । तत् यथा शत्रूणां जेतृ पालयितृ वा तद्वत् त्वं जेता पालयिता वेत्यर्थः । केषां पुनः पालयिता । उच्यते । सोम्यानां सोमसंपादिनाम् । यजमानानामित्यर्थः । द्रप्सः सोमरसः । अन्तर्णीतमत्वर्थं चेदं द्रष्टव्यम् । द्रप्सवान् । सोमरसवानित्यर्थः । पुरां भेत्ता असुरपुराणां भेत्ता । विनाशयितेत्यर्थः । शश्वतीनां बह्वीनाम् । इन्द्रः ईश्वरः । मुनीनां सखा मुनीनां सखिभूतः । ज्येष्ठ इत्यर्थः ॥

इरिम्बिठिः । वास्तोः पते गृहस्य पते यजमान । ध्रुवा स्थूणा इत्युपमा । स्थूणावद्धारकः विश्वस्य । अंसत्रं कवचम् । सोम्यानां सोमार्हाणां विप्राणां । द्रप्सः गन्ता सर्वत्र । भेत्ता पुरां पुरीणाम् । शश्वतीनां बह्वीनाम् । इन्द्रः मुनीनां स्तोतॄणां सखा च भवति । मननात् स्तोतॄणां मुनीनाम् ॥ (३)

बण्महाँ असि सूर्य बडादित्य महाँ असि ।
महस्ते सतो महिमा पनिष्टम मह्ना देव महाँ असि ॥

जमदग्निराह । बट् सत्यं महान् असि भवसि । वीर्येण । सूर्य । सुष्ठु ईरयिता नाशयिता शत्रूणां सूर्यः । सुष्ठु नाशयितः शत्रूणामित्यर्थः । बट् सत्यं आदित्य अदितेः पुत्र । महान् असि भवसि । महान् शरीरेण

वीर्येण चेत्यर्थः । महस्ते सतो महिमा माहात्म्यम् । पनिष्टम । पनतेः स्तुत्यर्थस्येदं रूपम् । स्तुत्यतम इत्यर्थः । मह्ना महत्वेन ऐश्वर्यादिना । देव दानादिगुणयुक्त । महान् असि भवसीत्यर्थः ॥

जमदग्निः । ऋग्विधानम्—

बण्महानिति दृष्ट्वार्कमुपतिष्ठेदृचं जपन् ।
वदन्नप्यनृतां वाणीं नानृतेन स लिप्यते ॥

इति । अत्र पुनरुक्तयोऽर्थभूयस्त्वद्योतकाः । बट् सत्यमेव । महानसि हे सूर्य । बण्महान् असि हे आदित्य । महः महतः । ते सतः श्रेष्ठस्य । महिमा महित्वं पनिष्टम स्तुत्यतमः । सोरकारादेशः । मह्ना महिम्ना । त्वं महानसि देव । सूर्यः सरणात् आदानात् रसानाम् । आदित्यः अदितेः पुत्रः ॥ (४)

अश्वी रथी सुरूप इद्गोमाँ यदिन्द्र ते सखा ।
श्वात्रभाजा वयसा सचते सदा चन्द्रैर्याति सभामुप ॥

देवातिथिरिन्द्रमाह । अश्वी । अश्वा यस्य सन्ति सः अश्वी । अश्ववानित्यर्थः । मदीयः अन्तरात्मा । रथी रथवान् । सुरूपः शोभनरूपः । इदिति पदपूरणः । गोमान् हे इन्द्र । ते तव सखा सखिभूतश्च । एवं-गुणविशिष्टो मदीयः अन्तरात्मा श्वात्रभाजा । श्वात्रमिति क्षिप्रनाम । क्षिप्रं यत् सम्भजते तत् श्वात्रभाक् । तेन श्वात्रभाजा । क्षिप्रं सम्भजतेत्यर्थः । वयसा अन्नेन । सचते सेवते । सदा नित्यमित्यर्थः । त्वाम् । यः कीदृशो मदीयः अन्तरात्मा । उच्यते । चन्द्रैः श्वेतैः अश्वैः उपयाति सभां त्वदीयाम् ॥

देवातिथिः । अश्वी रथी सुरूपश्च भवति । गोमांश्च भवति स जनः । यत् य इत्यर्थः । यस्ते सखा यस्स्तोता हे इन्द्र । श्वात्रभाजा । श्वात्रं

सुखम् । तद्भाजा वयसा अन्नेन । सचते संगच्छते । सदा सर्वदा । शरीरावस्थाविशेषो वा यौवनं वयः । चन्द्रैः हिरण्यैः युक्तः सन् । उपयाति सभां संसदं तव सखा ॥ (९)

यद्द्याव इन्द्र ते शतं शतं भूमीरुत स्युः ।
न त्वा वज्रिन् सहस्रं सूर्या अनु न जातमष्ट रोदसी ॥

पुरुहन्मन आर्षम् । यदित्ययं यद्यपि इत्येतस्यार्थे । यद्यपि द्यावः द्युलोकाः । शतम् । स्युरित्येतत् परस्ताच्छ्रुतं अपकृष्यते । यद्यपि शतं द्युलोकाः स्युः । तथा शतं भूमीः । भूमिः पृथ्वी । द्वितीयाबहुवचनमिदं प्रथमाबहुवचनस्य स्थाने द्रष्टव्यम् । उतशब्दः अपिशब्दस्यार्थे । एतदुक्तं भवति । यद्यपि शतं पृथिव्यः स्युः । यद्यपीति वचनात्तथापीत्येतदध्याहार्यम् । हे इन्द्र ते तव । अन्वित्येतत् तृतीयपादस्थमिहापकृष्टव्यम् । तथापि हे इन्द्र ते तवैतत् द्वयमपि अनु पश्चात् । न्यूनमित्यर्थः । किंच । नेत्ययं प्रतिषेधः प्रवृत्तिवचनेन सह संबद्ध्यते । प्रवृत्तिवचनश्च अष्टेति परस्ताच्छ्रूयते । स अपकृष्यते । न अष्ट । न व्याप्नोतीत्यर्थः । त्वा त्वां हे वज्रिन् । किं पुनस्त्वां न व्याप्नोति । उच्यते । सहस्रं सूर्याः । सूर्यसहस्रमपि त्वां न व्याप्नोतीत्यर्थः । जातं जातमात्रम् । न च त्वां जातमात्रं अश्नुवाते रोदसी द्यावापृथिव्यौ । एतदुक्तं भवति । मिश्रीभूते अपि द्यावापृथिव्यौ त्वां न व्याप्नुतः । द्वे अपि मिश्रिते तव न्यूने इत्यर्थः ॥

पुरुहन्मा । यत् यदि । द्यावो द्युलोकाः । शतं ते तव प्रतिमात्वेन स्युः हे इन्द्र । शतं भूमीः भूमयः । उत अपिच स्युः । यदि च सहस्रं सूर्याः स्युः । ते सर्वे न त्वा अनु अष्ट न अन्वश्नुवते । अश्नोतेर्व्यत्ययेन लट्प्रथमपुरुषबहुवचनस्य एकवचने रूपं अष्टेति । नैवानुव्याप्नुवन्ति । रोदसी जातं जातमात्रं त्वाम् ॥ (६)

यदिन्द्र प्रागपागुदङ् न्यग्वा हूयसे नृभिः ।
सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्द्ध तुर्वशे ॥

देवातिथेरार्षम् । यत् यद्यपि हे इन्द्र । प्राक् अपाक् उदक् न्यक् न्यूने अधस्तात् । हूयसे आहूयसे । नृभिर्मनुष्यैः । सिम सर्वरूप । पुरु । तृतीयायाः अत्र लुक् । पुरुभिः । नृभिर्मनुष्यैः सूतः । षू प्रेरणे इत्येतस्य कृतादिसत्वं रूपं । सूतः । दानाय प्रेरितः । प्रथमैकवचनं सम्बुद्ध्येकवचनस्य स्थाने द्रष्टव्यम् । पुरुभिर्नृभिः दानाय प्रेरित । यद्यपीति वचनात्तथापि दातेत्येतदध्याह्रियते । तथापि दाता असि भवसीत्यर्थः । कस्मै । उच्यते । आनवे । अनुर्मनुष्यः । तस्यापत्यमानवः । तस्मै । इदं सप्तम्येकवचनं चतुर्थ्येकवचनस्य स्थाने द्रष्टव्यम् । आनवाय । मनुष्यापत्यभूताय मह्यं देवातिथये इत्यर्थः । न केवलं मह्यमेव दाता असि । किं तर्हि । असि भवसि । हे प्रशर्ध प्रकर्षेण उत्साहिन् । तुर्वशे । इदमपि सप्तम्येकवचनं चतुर्थ्येकवचनस्य स्थाने द्रष्टव्यम् । तुर्वशाय राज्ञे । एतदुक्तं भवति । न केवलं मह्यं दाता भवसीत्यर्थः ॥

देवातिथिः । यत् यदि हे इन्द्र । प्राक् पुरस्तात् । अपाक् पश्चात् । उदक् उत्तरतः । न्यक् दक्षिणतो वा विद्यमानैः नृभिः हूयसे । सिम बध्नीम त्वां स्तुतिभिः । तान् परिहाय अस्मास्वेव पुरु बहु इत्यर्थः । नृषूतः नृभिः स्तोतृभिः प्रेरितः त्वम् । षू प्रेरणे । असि भवसि । आनवे अनोर्वंशजे । असि च तुर्वशे तुर्वशस्य वंशजे । हे प्रशर्ध प्रकृष्टोत्साह । यस्मात् त्वं आनवे तुर्वशे च भवसि स्तोतॄन् अन्यान् परित्यज्य त्वां भक्तानुग्राहकं बुध्वा बध्नीमः ॥ (७)

कस्तमिन्द्र त्वावसवा मर्त्यो दधर्षति ।
श्रद्धा हि ते मघवन् पार्ये दिवि वाजी वाजं सिषासति ॥

वसिष्ठस्यार्षम् । कस्तं यजमानम् । हे इन्द्र त्वावसो । त्वमेव वसु धनं यस्य स त्वावसुः । हे त्वद्धन । सम्बुद्ध्येकवचनं च द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । त्वावसुम् । त्वद्धनमित्यर्थः । आ इत्ययं दधर्षतीत्याख्या-तेन सम्बन्धयितव्यः । मर्त्यः मनुष्यः । शत्रुरित्यर्थः । आदधर्षति अभि-भवति । न कश्चित्तमभिभवतीत्यर्थः । तच्छब्दश्रुतेर्यच्छब्दोध्याहर्तव्यः । यः श्रद्धा सत्यमित्यर्थः । हीति पादपूरणः । ते तव सन्निधौ । हे मघवन् धनवन् । पार्ये दिवि पारयितव्ये द्युलोके । द्युलोकं प्राप्तव्यस्यार्थायेत्यर्थः । वाजी अन्नवान् । वाजमन्नं सोमलक्षणम् । सिषासति सोमलक्षणमन्नं संस्करोति । सोमयागं करोतीत्यर्थः ॥

वसिष्ठः । को मर्त्यः तं प्रसिद्धम् । त्वा त्वाम् । आदधर्षति आधर्षयेत् । हे वसो व्यापक इन्द्र । श्रद्धा श्रद्धया । इत्थंभूतो वाजी हविष्मान् । हि ते तुभ्यम् । सिषासति दातुमिच्छति । वाजं हविः । हे मघवन् पार्ये अन्त्ये सौत्ये । दिवि दिवसे । यद्वा ते इति पञ्चम्यर्थे व्यत्ययात् चतुर्थी । त्वत्तो वाजं अन्नं लिप्सति ॥ (८)

इन्द्राग्नी अपादियं पूर्वागात् पद्वतीभ्यः ।
हित्वा शिरो जिह्वया रारपच्चरत्त्रिंशत् पदान्यक्रमीत् ॥

भरद्वाजस्यार्षम् । हे इन्द्राग्नी अपात् पादवर्जिता । इयमुषाः । पूर्वा प्रथमा । आ अगात् आगता । उदितेत्यर्थः । कुतः पूर्वा । उच्यते । पद्वतीभ्यः । पादवतीभ्यो मनुष्यजातिभ्यः सकाशात् । यावन्मनुष्या न प्रबुद्ध्यन्ते तावत्तेभ्योऽपि प्रथमतरमित्यर्थः । हित्वा । ओहाङ् त्यागे इत्यस्येदं रूपम् । त्यक्त्वा । शिरः आदित्यम् । विना आदित्येन । आदित्यादपि पूर्वमुदितेत्यर्थः । उदिता च सती जिह्वया । जिह्वेति वाङ्नाम । तया

जिह्वया । वाचेत्यर्थः । रारपत् । नपुंसकलिङ्गमिदं स्त्रीलिङ्गस्य स्थाने द्रष्टव्यम् । रारपती । अत्यर्थं शब्दं कुर्वन्तीत्यर्थः । यथाग्रे उषउदयवेलायां पक्षिणः शब्दं कुर्वन्ति तदा उषस्युपचर्यते । चरत् । इदमपि स्त्रीलिङ्गं द्रष्टव्यम् । चरन्ती । आदित्योदयं प्रति गच्छन्तीत्यर्थः । त्रिंशत्पदानि त्रिंशन्मुहूर्ताख्यानि स्थानानि अक्रमीत् । अ इत्येष आ इत्येतस्य स्थाने द्रष्टव्यः । आक्रमीत् । आक्रान्तवतीत्यर्थः । एतदुक्तं भवति । उषा उदिता । आदित्यश्च । यागकालो वर्तते । अतस्तत्र प्रकाशध्वमिति ॥

भरद्वाजः । हे इन्द्राग्नी अपात् पादरहिता । इयं उषाः । पद्वतीभ्यः प्रजाभ्यः पूर्वा सती आगात् आगता । हित्वा शिरः हीनापि शिरसा जिह्वया प्राणिनां रारपत् भृशं रपन्ति । रप व्यक्तायां वाचि । चरत् । चरन्ती । त्रिंशत्पदानि मुहूर्तान् अक्रमीत् क्रामन्ति एकेन अह्वा । एवं च युवयोः कर्मेति स्तुतिः ॥ (९)

इन्द्र नेदीय एदिहि मितमेधाभिरूतिभिः ।
आ शंतम शंतमाभिरभिष्टिभिरा स्वापे स्वापिभिः ॥

वालखिल्यस्यार्षम् । हे इन्द्र नेदीयः । अतिशयेन सन्निकृष्ट इत्यर्थः । आ इत् एदित्येषः आ इत्यस्यार्थे । आ इहि आगच्छेत्यर्थः । मितमेधाभिः । मितः प्रक्षिप्तो मेधो यज्ञो यासु ऊतिषु ताः मितमेधाः । ताभिः । यज्ञसहितैः । ऊतिभिः पालनैर्निमित्तभूतैः । यज्ञान् पालनानि च अस्माकं संपादयितुमित्यर्थः । आ इत्ययमुपसर्गश्रुतेः इहीत्याख्यातमनुषज्यते । आगच्छ । हे शंतम अतिशयेन सुखतम । शंतमाभिः अभिष्टिभिः । आभिमुख्येन इज्यन्ते यासु देवतास्ताः अभिष्टयः । इष्टय इत्यर्थः । ताभिश्च निमित्तभूताभिः । ताश्च संपादयितुमित्यर्थः । आगच्छ हे स्वापे अस्माकं

ज्ञातिभूत । स्वापिभिः शोभनैश्च ज्ञातिभिरस्माभिर्निमित्तभूतैः । अस्माकं स्तुत्यस्तोतृलक्षणं ज्ञातित्वं संपादयितुमित्यर्थः ॥

वालखिल्यः । हे इन्द्र नेदीयः अन्तिकतरः । आ इत् इहीति त्रीणि पदानि । इदिति पूरणः । एहि आगच्छ । मितमेधाभिः निर्मितयज्ञाभिः निर्मितयज्ञभागाभिः । ऊतिभिः मरुद्भिः सह । ऊतिशब्दः स्त्रीलिङ्गः । वृत्रवधे सहायभूतेभ्यः मरुद्भ्यः प्रीतः इन्द्रः मध्यन्दिने आत्मनः साधारणे शस्त्रे मरुत्वदीये भागं अकल्पयत्—इति हि ऐतरेयके श्रूयते । आ इहि हे शंतम सुखकृत्तम । शंतमाभिः अभिष्टिभिः त्वां अभिगच्छन्तीभिः ऊतिभिः सह । आगच्छ हे स्वापे शोभनबन्धो । स्वापिभिः सुबन्धुभिः ऊतिभिः सह ॥ (१०)

तृतीये नवम्या दशत्या

इत ऊती वो अजरं प्रहेतारमप्रहितम् ।
आशुं जेतारं हेतारं रथीतममतूर्तं तुग्रियावृधम् ॥

नृमेध इन्द्रमाह । इतो द्युलोकात् । आह्वयतीति वाक्यशेषः । ऊती ऊत्यै । पालननिमित्तायेत्यर्थः । वः । द्वितीयाबहुवचनमिदमेकवचनस्य स्थाने द्रष्टव्यम् । त्वाम् । अजरं जरावर्जितम् । प्रहेतारं प्रकर्षेण गमयितारम् । शत्रूणां नाशयितारमित्यर्थः । अप्रहितं अप्रतिगतं केनचिच्छत्रुणा । आशुं शीघ्रम् । जेतारं शत्रूणाम् । हेतारं यष्टॄणाम् । रथीतमं अतिशयेन रथवन्तम् । अतूर्तं अहिंसितं केनचित् । तुग्रियावृधम् । तुग्रिया इत्युदकनाम । तस्य संवर्धनम् । उदकस्य वर्धयितारमित्यर्थः ॥

नृमेधाः । इतः इतोमुखः । हवामहे इति शेषः । ऊती ऊतये रक्षणार्थं तर्पणार्थं वा । वः त्वाम् । अजरं जरारहितम् । प्रहेतारं प्रेरकं विश्वस्य । अप्रहितं केनापि । आशुं क्षिप्रकारिणम् । जेतारं शत्रूणाम् । हेतारं गन्तारम् । रथीतमं नेतृतमम् । अतूर्तं अहिंसितारम् । तुग्रियावृधं उदकस्य वर्धकम् ॥ (१)

मो षु त्वा वाघतश्च नारे अस्मन्निरीरमन् ।
आरात्ताद्वा सधमादं न आगहीह वा सन्नुपश्रुधि ॥

वसिष्ठस्यार्षम् । मा इत्ययं प्रतिषेधो निरीरमन्नित्याख्यातेन सम्बन्धयितव्यः । लुट् लोडर्थे द्रष्टव्यः । मा नियमेन रमयन्तु । उ सु इति पदपूरणौ । त्वा त्वाम् । वाघतः अस्मदीयेभ्यः ऋत्विग्भ्यः अन्ये । च न इति पदपूरणौ । ऋत्विजः । आरे अदूरे । अस्मत् अस्माकम् । इन्द्र मा नियमेन रमयन्तु । आरात्तात् वा दूरादपि द्युलोकात् वा । सधमादम् । सह माद्यन्ते यत्र देवताः स सधमादः यज्ञः । संप्रति नः अस्माकं स्वभूतं आगच्छेत्यर्थः । इह वा पृथिवीलोके सन् वा उपश्रुधि । उपश्रुत्या च आगच्छेत्यर्थः ॥

अस्याः परस्याश्च वसिष्ठः । मा निरीरमन् मा नितरां रमयन्तु । त्वा त्वाम् । वाघतो यजमानाः अन्ये च । चन अपि च । आरे दूरे । अस्मत् अस्मत्तः । अस्मानवच्छिद्य । मा निरीरमन् यजमाना अप्यन्ये । आरात्ताद्वा दूरे वा सन् । सधमादं यज्ञम् । नः अस्मदीयम् । आगहि आगच्छ । इह वा सन् उपश्रुधि उपशृणु स्तोत्रम् ॥ (२)

सुनोत सोमपाव्ने सोममिन्द्राय वज्रिणे ।
पचता पक्तीरवसे कृणुध्वमित्पृणन्नित्पृणते मयः ॥

वसिष्ठस्यार्षम् । सुनोत हे मदीया ऋत्विजः सुनोत अभिषुणुत । सोमपाव्ने । सोमं पिबतीति सोमपावा । तस्मादियं तादर्थ्ये चतुर्थी ।

सोमपानसक्तायेत्यर्थः । सोममिन्द्राय वज्रिणे । इन्द्रस्य वज्रवतोऽर्थायेत्यर्थः । किंच पचता पक्तीः पक्तव्यानि सवनीयादीनि हवींषि । अवसे तर्पणार्थमिन्द्रस्य । पक्त्वा च कृणुध्वं अलंकरणादिभिः संस्कारैः संस्कुरुध्वम् । इदिति पदपूरणः । पृणन् । प्रथमपुरुषबहुवचनमिदं मध्यमपुरुषबहुवचनस्य स्थाने द्रष्टव्यम् । पूरयत । सोमलक्षणाभिरद्भिः । इदिति पदपूरणः । पृणते पूरयित्रे । उदकेनापूरयतः इन्द्रस्यार्थायेत्यर्थः । मयः सुखम् ॥

सुनोत अभिषुणुत । सोमं सोमपात्रे सोमस्य पात्रे इन्द्राय वज्रिणे । पचता । दीर्घः सांहितिकः । पक्तीः पक्तव्यानि पुरोडाशादीनि । अवसे तर्पयितुम् । इन्द्र कृणुध्वमित् कुरुतैव कर्माणि । पृणन्नित् प्रयच्छन्नेवाभिभवति इन्द्रः । मयः सुखम् । पृणते हवींषि दत्तवते यजमानाय ॥ (३)

यः सत्राहा विचर्षणिरिन्द्रं तं हूमहे वयम् ।
सहस्रमन्यो तुविनृम्ण सत्पते भवा समत्सु नो वृधे ॥

शंयोरार्षम् । य इन्द्रः सत्राहा । सत्राशब्दः सत्यनामा सदाशब्दपर्यायो वा । सत्येन हन्ता सर्वदा वा हन्ता शत्रुम् । विचर्षणिः विविधं द्रष्टा सर्वस्य जगतः । इन्द्रं तं हूमहे वयं आह्वयामः । सहस्रमन्यो । सहस्रमिति बहुनाम । मन्युर्मन्यतेर्दीप्तिकर्मणः क्रोधकर्मणो वा । सहस्रं मन्यूनां यस्य सः सहस्रमन्युः । तस्य सम्बोधनं हे सहस्रमन्यो । बहुदीप्ते बहुक्रोध वा इत्यर्थः । तुविनृम्ण । नृम्णमिति बलनाम । बहुबल इत्यर्थः । सत्पते सतां पालयितः । भव समत्सु सङ्ग्रामेषु । नः अस्माकम् । वृधे वर्धनाय । जयलक्षणाय । वृद्धेः कर्ता भवेत्यर्थः ॥

शंयुः । यः सत्राहा सर्वेषां शत्रूणां हन्ता । विचर्षणिः विद्रष्टा । तमिन्द्रं हूमहे ह्वयामः वयम् । अथ प्रत्यक्षस्तुतिः । हे सहस्रमन्यो बहुकर्मन् ।

तुविनृम्ण प्रवृद्धबल। सत्पते सतां पालयितः। भव नः अस्माकम्। वृधे वृद्धये। समत्सु संग्रामेषु॥

ब्रह्मर्षीणां तु याः काश्चित् संग्रामविषयाशिषः।
येषां पुरोहिता एते तेषां ता इति गृह्यताम्॥ (४)

शचीभिर्नः शचीवसू दिवा नक्तं दशस्यतम्।
मा वां रातिरुप दसत् कदा चनास्मद्रातिः कदा चन॥

पुरुच्छेपस्यार्षम्। अश्विनौ देवता। शचीभिः। शचीति कर्मनाम। तस्मादियं हेतौ तृतीया। यागाख्यैः स्तुत्याख्यैर्वा कर्मभिः हेतुभूतैः। यस्माद्यजामहे स्तुमश्च तस्मादित्यर्थः। नः अस्मभ्यम्। हे शचीवसू कर्मधनौ अश्विनौ। दिवा अहनि। नक्तं रात्रौ च। दशस्यतम्। दाशतेर्दानकर्मणः एतद्रूपम्। दत्तमित्यर्थः। यद्यद्द्रव्यं प्रार्थयामस्तत्तद्दत्तमित्यर्थः। सा च वां युवयोः रातिः दानम्। यद्यत् युवामस्मभ्यं दानं कुर्वाथां तत् मा उपदसत्। दसु उपक्षये इत्येतस्य रूपम्। मा उपक्षैषीदित्यर्थः। कदाचन कदाचिदपि। अस्मत्। पञ्चम्येकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम्। अस्माकमपि। रातिर्दानम्। अस्मत्कर्तृकं यद्यत् ब्राह्मणेभ्यो दानं तदपि न कदाचित् उपदसत् उपक्षैषीदित्यर्थः॥

पुरुच्छेपः। शचीभिः प्रज्ञाकर्मभिः। नः अस्मभ्यम्। हे शचीवसू शचीभिः शक्तिभिः वासयन्तौ। अश्विनोरेतत् सम्बोधनम्। दिवा दिवसे। नक्तं रात्रौ। दशस्यतं प्रयच्छतं धनानि। मा उपदसत् नोपक्षीयेत। वां युवयोः। रातिः दानम्। कदाचन कदाचिदपि। अस्मत् अस्मत्तः। रातिः कदाचनेति पुनरुक्तिः पुरुच्छेपस्य पुनरुक्तिशीलत्वात्॥ (५)

यदा कदा च मीढुषे स्तोता जरेत मर्त्यः।
आदिद्वन्देत वरुणं विपा गिरा धर्तारं वि व्रतानाम्॥

वामदेवस्यार्षम् । यदा कदा च यस्मिन् कस्मिन् कालेऽपि । मीढुषे उदकदातुरिन्द्रस्यार्थाय । स्तोता जरेत स्तुतिं कुर्यादित्यर्थः । मर्त्यः मनुष्यः । आदिद्वन्देत । आत् इत् इति पदपूरणौ । वरुणं वरणीयमिन्द्रम् । कथं पुनर्वन्देत । उच्यते । विपा गिरा विविधमिन्द्रगुणान् प्रति प्राप्तया गिरा । इन्द्रगुणप्रकाशिकया गिरेत्यर्थः । तदा अहमपि तं यजेयमित्येतदाशास्महे । कीदृशं पुनस्तं यजेम । उच्यते । धर्तारम् । विशब्दः छन्दसि परेऽपि (पा. १. ४. ८१) इत्येवं परः प्रयुक्तः पूर्वो द्रष्टव्यः । विविधं धारयितारमित्यर्थः । केषाम् । व्रतानां कर्मणाम् ॥

वामदेवः । यदा कदाचित् स्तोता स्तुतिशीलः मर्त्यः । मीढुषे सेक्त्रे वर्षित्रे कामानाम् । जरेत स्तुवीत स्तोतुमिच्छेत् । कामप्रदां देवतां स्तुवीत इति यदा इच्छेत् इत्यर्थः । आदित तदैव । वन्देत स्तुवीत वरुणमेव । नान्यां देवतामित्यर्थः । विपा । विप्रा इति वा गिरो वा विशेषणम । वेपयन्त्या कम्पयन्त्या दुःखानि । गिरा स्तुत्या । धर्तारं धारयितारम् । विव्रतानां विविधयज्ञादिकर्मणां जनानाम् ॥ (६)

पाहि गा अन्धसो मद इन्द्राय मेध्यातिथे ।
यः संमिश्लो हर्योर्यो हिरण्यय इन्द्रो वज्री हिरण्ययः ॥

मेध्यातिथिः इन्द्रमाह । पाहि रक्ष गाः । अन्धसः सोमलक्षणस्यान्नस्य । मदे । यस्य च भावेन भावलक्षणम् (पा. २. ३. ३७) इतीयं सप्तमी । तच्छ्रुतेश्च योग्यक्रियापदाध्याहारः । सोमलक्षणस्यान्नस्य मदे प्राप्ते । सोमैः रमयन्नित्यर्थः । इन्द्राय । चतुर्थ्येकवचनमिदं सम्बुद्ध्येकवचनस्य स्थाने द्रष्टव्यम् । हे इन्द्र । मेध्यातिथे । मेधो यज्ञः । तस्मिन् भवः मेध्यः । मेध्यश्चासावतिथिश्च मेध्यातिथिः । तस्य सम्बोधनं हे मेध्यातिथे । यज्ञेन च अतिथिभूत

इत्यर्थः। यस्त्वं संमिश्लः संमिश्रयिता आत्मना। स हर्योः अश्वयोरधिष्ठातेत्यर्थः। यश्च त्वं हिरण्ययः हिरण्यसदृशः। दीप्त इत्यर्थः। यश्च त्वं इन्द्रः। यश्च त्वं वज्री वज्रवान्। हिरण्ययः सर्वजनेभ्यो हितः रमणीयश्च। परस्ताद्यच्छब्दश्रुतेः पूर्वार्धर्चे तच्छब्दमध्याहृत्य एकवाक्यता नेया। सः पाहि गा अन्धसो मदे इति ॥

मेध्यातिथिः। पाहि पिब इन्द्रोच्छिष्टसोमम्। गा इति गायतेः पञ्चमलकाररूपम्। गाय गीतिं कुरु इन्द्राय। अन्धसः सोमस्य। मदे मदं जनयितुं हे मेध्यातिथे। यः इन्द्रः संमिश्लः हर्योः संयोजकः। यः हिरण्ययः वज्री वज्रहस्तः। हिरण्ययः हिरण्यसदृशसर्वाङ्ग इत्यर्थः ॥ (७)

उभयं शृणवच्च न इन्द्रो अर्वागिदं वचः।
सत्राच्या मघवान्त्सोमपीतये धिया शविष्ठ आ गमत् ॥

भर्गस्यार्षम्। उभयं स्तुतिं प्रार्थनां च शृणवत्। चशब्दः पदपूरणः। नः अस्माकं इन्द्रः। कियन्तं पुनः कालं शृणोतु। उच्यते। अर्वाक् अभिलषितफलप्रदानात् प्राक्। शृणोतु। यावदभिलषितोऽर्थः अस्मभ्यं ददाति इत्यर्थः। इदं वचः श्रुतेः प्रार्थनायाश्च प्रतिपादकमित्यर्थः। श्रुत्वा च सत्राच्या सदागत्या अस्मदनुग्रहार्थम्। मघवान् धनवान् इन्द्रः। सोमपानार्थं धिया प्रज्ञया। शविष्ठः अतिशयेन बलवान्। आगमत् आगच्छतु। एत्य च अभिलषितमर्थं ददात्वित्यभिप्रायः ॥

भर्गः। उभयं स्तोत्रशस्त्रात्मकं इदं वचः। शृणवत् शृणोतु। नः अस्मदीयं इन्द्रः। अपर आह। उभयं अस्मिन् अहनि क्रियमाणं पूर्वेद्युः कृतं च वचः अहर्गणेषु शृणवदिति। यच्चेदमद्य यदु च ह्य आसीत् (ऐ. ब्रा. ४. ३१. ९. १८) इति हि ऐतरेयकम्। अर्वाक् अस्मदभिमुखम्। च इति चणो रूपम्। स च समुच्चये

चेदर्थे च वर्तते। च चण्योगात् शृणवत् इत्याख्यातस्य यद्यदि (पा. ८. १. ३०) इत्यादिना उदात्तत्वम्। अत्र समुच्चये च वर्तते। शृणोतु वचः आगमत् चेति समुच्चयः। सत्राच्या वह्वश्चन्त्या बहुविषयया धिया युक्तः। शविष्ठः शूरतमः। मघवान् धनवान् दानवान् वा। सोमपीतये आगमत् आगच्छतु॥ (८)

महे च न त्वाद्रिवः परा शुल्काय दीयसे।
न सहस्राय नायुताय वज्रिवो न शताय शतामघ॥

प्रगाथ इन्द्रमाह। महे। चतुर्थ्येकवचनमिदं तृतीयैकवचनस्य स्थाने द्रष्टव्यम्। चशब्द अपिशब्दस्यार्थे। महतापि। नशब्दः दीयसे इत्याख्यातेन सम्बन्धयितव्यः। त्वां हे अद्रिवः। अद्रिर्वज्रः। तद्वान् अद्रिवान्। तस्य सम्बोधनं हे अद्रिवः। वज्रवन्नित्यर्थः। शुल्काय। इयमपि चतुर्थी तृतीयार्थे द्रष्टव्या। शुल्केन। मूल्येनेत्यर्थः। न दीयसे। महतापि मूल्येन परेभ्यः त्वं न दीयस इति समस्तार्थः। न सहस्राय नायुताय। द्वे अप्येते तृतीयैकवचनस्य स्थाने द्रष्टव्ये। न च सहस्रेणायुतेन दशभिः सहस्रैः परेभ्यः त्वं दीयसे इत्यर्थः। वज्रिवः वज्रवान्। न शताय नापि शतेन। बहुना धनेनेत्यर्थः। हे शतामघ। शतमिति बहुनाम। मघ इत्यपि धननाम। बहु धनं यस्य स शतमघः। तस्य सम्बोधनं हे शतमघ। बहुधन इत्यर्थः॥

द्वयृचस्य मेधातिथिमेध्यातिथी। महे महते। चनेति नेत्यर्थे। पदद्वयं वा च नेति। चेत्यपीत्यर्थे। महतेऽपि। शुल्काय फलभूताय धनाय। नाहं त्वां च परा दीयसे परा दद्याम्। दीयसे इति ददातेरुत्तमपुरुषस्य कर्तर्येव व्यत्ययेन रूपम्।

परा शुल्काय देयाम् (ऋ. वे. ८. १. ५)

इति बह्वृचा आमनन्ति। हे अद्रिवः वज्रिन्। उक्तमेव स्पष्टयति। न सहस्राय न सहस्रसङ्ख्याय शुल्काय त्वां परादद्यां हे वज्रिवः वज्रिन्। वज्रशब्दात् मत्वर्थीय इनिः मतुप् च। नैव शताय परादद्यां हे शतमख बहुधन ॥ (९)

वस्याँ इन्द्रासि मे पितुरुत भ्रातुरभुञ्जतः।
माता च मे छदयथः समा वसो वसुत्वनाय राधसे ॥

प्रगाथ इन्द्रमाह। वस्यान् पितुः सकाशात्। सर्वो हि पितुः सकाशे वसति। त्वं तु ततोऽपि वसीयान् हे इन्द्र असि भवसि। मे मम। उत अपिच। भ्रातुः सकाशात् त्वमेव वसीयान्। कीदृशस्य भ्रातुः। उच्यते। अभुञ्जतः न्यायेन अपरिपालयमानादित्यर्थः। माता च। चशब्दात् त्वं च। कीदृशी माता। उच्यते। समा। केन। सामर्थ्यात् त्वया समा। त्वत्सदृशीत्यर्थः। छदयथः वसो वासयितरित्यर्थः। वसुत्वनाय अस्माकम्। धनवन्तो वयं स्याम इत्यर्थः। केन धनवन्तः। राधसे। चतुर्थ्येकवचनमिदं तृतीयैकवचनस्य स्थाने द्रष्टव्यम्। राधसा ॥

इति माधवाचार्यकृते छन्दसिकाभाष्ये तृतीयः प्रपाठकः

हे इन्द्र वस्यान् वसीयान् अधिकः असि मे त्वम्। पितुः जनकात्। उत अपिच भ्रातुः वस्यानसि। अभुञ्जतः अरक्षतः। माता च त्वं च मे छदयथः उपछन्दयथः। समा समौ। पुमांस्त्रिया (पा. १. २. ६७) इति पुंलिङ्गता। मात्रा समः त्वं पितृभ्रातृभ्यां अधिकः च असीत्यर्थः। हे वसो वासक। वसुत्वनाय प्रशस्यभावाय। राधसे धनाय। उभयोः लाभाय मे छन्दयथः ॥ (१०)

तृतीयस्य दशमी दशत्या

तृतीयः प्रपाठकः

चतुर्थः प्रपाठकः

इम इन्द्राय सुन्विरे सोमासो दध्याशिरः ।
ताँ आ मदाय वज्रहस्त पीतये हरिभ्यां याह्योक आ ॥

वसिष्ठस्यार्षम् । इन्द्राय इन्द्रार्थम् । सुन्विरे अभिषुता इत्यर्थः । सोमासः सोमाः । कीदृशाः सोमाः । उच्यते । दध्याशिरः दधिमिश्रा इत्यर्थः । एतत् ज्ञात्वा तान् । तच्छब्द एतच्छब्दस्यार्थे द्रष्टव्यः । एतान् प्रति । आ इत्ययमुपसर्गः याहीत्याख्यातेन सम्बन्धयितव्यः । मदाय मदार्थम् । वज्रहस्त पीतये पानार्थम् । हरिभ्यामश्वाभ्याम् । आयाहि । किम् । ओकः यज्ञगृहम् । तस्मिन् । आकारः पदपूरणः ॥

वसिष्ठः । इमे सोमासः सोमाः । दध्याशिरः दधि आशिः मिश्रणं येषां ते । इन्द्राय । त्वदर्थं इत्यर्थः । सुन्विरे अभिषुता आसन् । तान् सोमानभि । हरिभ्यामायाहि आगच्छ । मदाय मदार्थम् । पीतये । मदार्थं या पीतिः तदर्थम । हे वज्रहस्त ओको गृहं यज्ञगृहं आयाहि ॥ (१)

इम इन्द्र मदाय ते सोमाश्चिकित्र उक्थिनः ।
मधोः पपान उप नो गिरः शृणु रास्व स्तोत्राय गिर्वणः ॥

वामदेवस्यार्षम् । इमे सोमाः । हे इन्द्र मदाय मदार्थम् । ते तव । कीदृशाः सोमाः । उच्यते । उक्थिनः । उक्थानि स्तोत्राणि ।

तद्वन्तः । स्तोत्रवन्त इत्यर्थः । मधोः । षष्ठ्येकवचनमिदं द्वितीयाबहुवचनस्य स्थाने द्रष्टव्यम् । मधून् । स्वादुयुक्तानित्यर्थः । पपानः पिबन् । उपेत्ययमुपसर्गः शृण्वित्याख्यातेन सम्बन्धयितव्यः । नः अस्माकं स्वभूताः । गिरः स्तुतीः । उपशृणु । श्रुत्वा च रास्व देहीत्यर्थः । स्तोत्राय स्तोत्रे मह्यम् । हे गिर्वणः । गिरः स्तुतयः । ताभिर्यो वन्यते सम्भज्यते स गिर्वणः । तस्य सम्बोधनं हे गिर्वणः । स्तुतिभिः सम्भजनीय इत्यर्थः ॥

वामदेवः । विश्वामित्र इत्येके । इमे सोमाः । उक्थिनः स्तुतिमन्तः पवमानस्तोत्रेण स्तुताः । हे इन्द्र ते तव । मदाय हर्षार्थम् । चिकित्रे ज्ञायते दृश्यते । मधोः मादयितुः सोमस्य । सोममित्यर्थः । पपानः पिपासन्नित्यर्थः । उपशृणु गिरः स्तुतीः । नः अस्मदीयाः । रास्व देहि कामान् । स्तोत्राय स्तोत्रे । मह्यं इत्यर्थः । हे गिर्वणः गिरां संभक्तः इत्यर्थः ॥　　　　　(२)

आ त्वाद्य सबर्दुघां हुवे गायत्रवेपसम् ।
इन्द्रं धेनुं सुदुघामन्यामिषमुरुधारामरंकृतम् ॥

मेधातिथेरार्षम् । आ इत्ययमुपसर्गः हुवे इत्याख्यातेन सम्बन्धयितव्यः । तु इति पदपूरणः । अद्य अस्मिन्नहनि यागाहनि । सबर्दुघाम् । सबरित्यमृतनाम । सबः अमृतं या दुह्यति सा सबर्दुघा । ताम् । अमृतदोग्ध्रीमित्यर्थः । आहुवे । यद्यप्यन्यत्राह्वयतिः अर्चतिकर्मा तथापीह याच्ञार्थो द्रष्टव्यः । आभिमुख्येन याचे । प्रार्थयामीत्यर्थः । किं पुनः प्रार्थयामि । उच्यते । इन्द्रम् । कीदृशमिन्द्रम् । उच्यते । गायत्रवेपसम् । गायत्रं स्तोत्रम् । तस्य वेपसं कर्मभूतम् । स्तुत्यमित्यर्थः । त्वं काममृतदोग्ध्रीं प्रार्थयसि । उच्यते । धेनुं अचिरप्रसूतां गां इत्यर्थः । कीदृशीं धेनुम् । उच्यते । सुदुघां सुदोहनाम् । न केवलममृतदोग्ध्रीं धेनुं प्रार्थयामि ।

किं तर्हि । अन्यामिषं उरुधारां बहुधारामित्यर्थः । कीदृशं पुनरिन्द्रं प्रार्थयामि । उच्यते । अरंकृतं सर्वदा विभूषितमित्यर्थः ॥

मेधातिथिः । मेधातिथिः अनया धेनुरूपेण वृष्टिरूपेण च इन्द्रं निरूपयन् स्तौति । आहुवे अभिष्टौमि । तु क्षिप्रम् । अद्य अस्मिन् अहनि । सबर्दुघाम् । सबरमृतम् । तस्य दोग्ध्रीम् । गायत्रवेपसं गायत्रं स्तुत्यं वेपः कर्म यस्य तम् । इन्द्रं धेनुं सुदुघां दोग्धुं सुशकाम् । अन्यां व्यतिरिक्तां प्रसिद्धायाः धेनोः । इषं वृष्टिम् । उरुधारां बहुधाराम् । अरंकृतं पर्याप्तकारिणम् ॥ (३)

न त्वा बृहन्तो अद्रयो वरन्त इन्द्र वीडवः ।
यच्छिक्षसि स्तुवते मावते वसु न किष्टदा मिनाति ते ॥

नोधा इन्द्रमाह । नेत्ययं प्रतिषेधो वरन्ते इत्याख्यातेन सम्बन्धयितव्यः । त्वा त्वां हे इन्द्र । पुरस्ताच्च यच्छब्दश्रुतेस्तच्छब्दोऽध्याहर्तव्यः । तत् बृहन्तः महान्तोऽपि अद्रयः पर्वताः । वीडवः दृढा अपि त्वां न वरन्ते । शुद्धोऽप्ययं वृणोतिः आवरणार्थो द्रष्टव्यः । न आवृणन्ति । प्रभूतत्वान्न आवरीतुं शक्नुवन्तीत्यर्थः । किं पुनस्तत् । उच्यते । यच्छिक्षसि ददासि । स्तुवते स्तोत्रकर्म साधयते । मावते मत्सदृशाय । वसु धनम् । नकिः न कश्चित् । तद्धनं त्वया दत्तमामिनाति आभिमुख्येन हिनस्तीत्यर्थः । ते तव । प्रसादेनेति वाक्यशेषः ॥

नोधाः । न त्वा त्वां प्रयान्तं वरन्ते वारयेयुः । बृहन्तः अद्रयः पर्वताः । वीडवः दृढाः हे इन्द्र । किंच यत् यदा शिक्षसि । शिक्षतिः दानकर्मा । दित्ससि । स्तुवते मावते मत्सदृशाय । वसु धनम् । तत् तदा नकिः आमिनाति न हि बाधते न वारयति कश्चन ते त्वाम् ॥ (४)

क ईं वेद सुते सचा पिबन्तं कद्वयो दधे ।
अयं यः पुरो विभिनत्योजसा मन्दानः शिप्र्यन्धसः ॥

मेध्यातिथिरिन्द्रमाह । कः । ईमिति एनं इत्येतस्यार्थे द्रष्टव्यम् । एनं इन्द्रं वेद जानाति । स्तोतुमिति वाक्यशेषः । एतदुक्तं भवति । मत्तोऽन्यो यजमानः कः इन्द्रं स्तोतुं जानाति । न कश्चिज्जानातीत्यर्थः । सुते । सप्तम्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । सुतं अभिषुतं सोमम् । सचा मरुद्भिः सह पिबन्तम् । कत् । प्रथमाया अयमदादेशः । को वा अस्मै इन्द्राय मत्तोऽन्यः वयः हविर्लक्षणमन्नम् । दधे ददातीत्यर्थः । यः कतम इन्द्रः । उच्यते । अयं यः पुरः असुरपुरः । असुरदुर्गाणीत्यर्थः । विभिनत्ति विविधं भिनत्ति । ओजसा स्वेन बलेन । मन्दानः । मद तृप्तावित्यस्येदं रूपम् । तृप्यन्नित्यर्थः । शिप्री । शिप्रे हनू नासिके वा । तद्वान् शिप्री । कस्य पुनर्मन्दानः । उच्यते । अन्धसः हविर्लक्षणस्यान्नस्येत्यर्थः ॥

मेध्यातिथिः । को वेद को वेत्ति । ईं एनमिन्द्रम् । सुते सोमे सति । सचा सह ऋत्विग्भिः । सोमं पिबन्तम् । कत् किं वयः आयुः इन्द्रो दधे धारयति इति च कः वेद । नित्यमेव यौवनं अस्येति न कश्चिद्वेद इति । अयं इन्द्रः पुरः नगरीः । विभिनत्ति व्यभिनत् । ओजसा बलेन । यः इन्द्रः मन्दानः हृष्यन् । अन्धसः सोमेन । शिप्री सुहनुः । तं कः वेद ॥ (५)

यदिन्द्र शासो अव्रतं च्यावया सदसस्परि ।
अस्माकमंशुं मघवन् पुरुस्पृहं वसव्ये अधि बर्हय ॥

वामदेवस्यार्षम् । यस्मादिन्द्र शासः शासयितः । अव्रतं व्रतरहितं यज्ञे अप्रवृत्तम् । च्यावय । सदसस्परि सदसः सकाशात् । अस्माकं

अंशुं सोमं हे मघवन् । पुरुस्पृहं बहुभिः स्पृहणीयम् । वसव्ये यजमाने यज्ञानां वासयितरि । अधि उपरि बर्हय संपादयेत्यर्थः ॥

वामदेवः । यत् यः त्वं हे इन्द्र । शासः शासिता । अव्रतं अकर्माणं अस्तोतारं अयज्वानं च । च्यावय च्यावयेः । सदसः स्थानात् । परीति पञ्चम्यर्थानुवादकः । स त्वमिति शेषः । हे मघवन् अस्माकं वसव्ये वास्तुनि यज्ञगृहे । अंशुं सोमम् । अशितः शं सुखं करोतीति अंशुः । पुरुस्पृहं बहुभिः स्पृहणीयम् । बर्हय बृंहय । पिब इत्यर्थः । अधीति सप्तम्यर्थानुवादकः ॥ (६)

त्वष्टा नो दैव्यं वचः पर्जन्यो ब्रह्मणस्पतिः ।
पुत्रैर्भ्रातृभिरदितिर्नु पातु नो दुष्टरं त्रामणं वचः ॥

तौरश्रवस आर्षम् । त्वष्टा नः अस्मभ्यं दैव्यं देवानां भवम् । वचः वाक्यम् । पर्जन्यः ब्रह्मणस्पतिः बृहस्पतिः पुत्रैः भ्रातृभिः अदितिः । नु इति पदपूरणः । पातु रक्षतु । नः अस्मान् । दुष्टरं त्रामणम् । द्वितीयैकवचने द्वे पञ्चम्येकवचनस्य स्थाने द्रष्टव्ये । दुष्टरात् त्रामणात् च वचसः सकाशाद्रक्षत्वित्यर्थः ॥

तौरश्रवाः । त्वष्टा देवः । नः अस्माकम् । वचः स्तुतिरूपम् । दैव्यं देवेभ्यो योग्यम् । पातु रक्षतु । प्रत्येकमभिसम्बन्धात् पात्वित्येकवचनम् । पर्जन्यश्च अस्मदीयं वचः पातु । ब्रह्मणस्पतिः बृहस्पतिश्च । अदितिर्देवमाता । पुत्रैः आदित्यैः भ्रातृभिः प्रजापतिसृष्टैः देवैश्च सह । नु अद्य पातु । नः वच इत्यर्धर्चभेदात् पुनरुक्तिः । दुष्टरमहिंस्यं रक्षःप्रभृतिभिः । त्रामणं रक्षासाधनम् । इति वचसो विशेषणे । रक्षणं फलप्रदानम् ॥ (७)

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते ॥

वालखिल्यानामार्षम् । चनशब्द अपिशब्दस्यार्थे । कदाचिदपि । स्तरीरसि । न स्तरी पयः ददौ । अतः स्तरीरिति अभागा उच्यते । यादृशी स्तरीरभागा तादृशं त्वां हे इन्द्र कदाचिदपि न अभिभवतीत्यर्थः । किं तर्हि सश्चसि । यद्यपि सश्चतिर्गतिकर्मसु पठितः तथापि दाशुषे इति संप्रदान-श्रुतेर्दानार्थो द्रष्टव्यः । ददासि । कस्मै । उच्यते । दाशुषे यजमानाय । किंच उपोप । पादपूरणार्थं द्विर्वचनम् । उपेत्ययं पृच्यते इत्याख्यातेन सम्बन्धयितव्यः । इत् नु इति द्वावपि पदपूरणौ । हे मघवन् धनवन् । भूयः बहुतरम् । इत् नु इति द्वावपि पादपूरणौ । ते तव दानम् । कीदृशस्य तव । उच्यते । देवस्य दानादिगुणयुक्तस्य । उपपृच्यते । उपेत्य भवति । यावत्पूर्वदानं नैव क्षीयते तावदेव ददासीत्यर्थः ॥

वालखिल्याः । कदाच कदाचिदपि न स्तरीरसि । स्तरीरिति निवृत्त-प्रसवा गौः । तन्न भवसि । धुक्षसे एव सदा कामानिति । न सश्चसि न सज्यसे । दाशुषे यजमानाय । धनानि प्रयच्छन् हे इन्द्र । उपोप इति द्विरुक्तिः पादपूरणार्थः । प्रसमुपोदः पादपूरणे (पा. ८. १. ६) इति । उपपृच्यते न वियुज्यते । इत् एव । नुः पूरणः । हे मघवन् देवस्य ते तव दानम् । भूयः इत् भूयोभूय एव उपपृच्यते ॥ (८)

युक्ष्वा हि वृत्रहन्तम हरी इन्द्र परावतः ।
अर्वाचीनो मघवन् सोमपीतय उग्र ऋष्वेभिरा गहि ॥

मेधातिथिरिन्द्रमाह । युङ्क्ष्व । शुद्धोऽप्ययं युञ्जतिर्निपूर्वार्थे द्रष्टव्यः । नियुङ्क्ष्व । वृत्रहन्तम । वृत्रः शत्रुः मेघो वा । तस्य हन्ता वृत्रहा । अतिशयेन वृत्रहा वृत्रहन्तमः । तस्य सम्बोधनं हे वृत्रहन्तम । शत्रोर्मेघस्य वा अतिशयेन हन्तरित्यर्थः । केन पुनर्नियुङ्क्ष्व । उच्यते । हरी यावात्मीयौ ।

क्ष । सामर्थ्यात् स्वरथे । त्वं इन्द्र नियुङ्क्ष्व परावतः दूरात् स्वर्गाख्यात् स्थानादित्यर्थः । अर्वाचीनः अस्मदभिमुखः । हे मघवन् सोमपीतये सोमपानार्थम् । उग्रः । प्रथमैकवचनान्तमेतत् । प्रत्यक्षकृतश्च मन्त्रः युङ्क्ष्वेति मध्यमपुरुषयोगात् वृत्रहन्तम इति च सम्बोधनश्रुतेः । अतो यत्तच्छब्दावध्याहृत्यैकवाक्यतां नेया । यः त्वं उग्रः अप्रसह्यः स आगहि आगच्छ । ऋष्वेभिः महद्भिः । प्रयाणकैरिति वाक्यशेषः । शीघ्रमागच्छेत्यर्थः ॥

मेधातिथिः । युङ्क्ष्व योजय । हीति पूरणः । हे वृत्रहन्तम हरी युङ्क्ष्व रथे । हे इन्द्र परावतः दूरात् गन्तुम् । युक्त्वा च हरी ऋष्वेभिः दर्शनीयैः तैः हरिभिः । द्वयोरपि हर्योः विभूतिभेदात् बहुत्वमपि भवति । अर्वाचीनः अस्मदभिमुखः । आगहि आगच्छ । हे मघवन् सोमपीतये उग्र त्वम् ॥ (९)

त्वामिदा ह्यो नरोऽपीप्यन् वज्रिन् भूर्णयः ।
स इन्द्र स्तोमवाहस इह श्रुध्युप स्वसरमा गहि ॥

नृमेधस आर्षम् । परस्तात्तच्छब्दश्रुतेर्यच्छब्दोऽध्याहर्तव्यः । यं त्वां इदा अद्य । ह्यश्च । सर्वकालमित्यर्थः । नरः ऋत्विग्लक्षणा मनुष्याः । अपीप्यन् । ओप्यायी वृद्धौ इत्यस्येदं रूपम् । वर्धयन्तीत्यर्थः । वज्रिन् । वज्रः आयुधविशेषः । स यस्यास्ति स वज्री । तस्य सम्बोधनं हे वज्रिन् । वज्रवन्नित्यर्थः । कीदृशाः पुनर्मनुष्याः त्वां वर्धयन्ति । उच्यते । भूर्णयः तस्मिन्नेव वेदिप्रदेशे कर्मकरणार्थं भ्रमणशीलाः । स त्वं हे इन्द्र स्तोमवाहसः । स्तोमा यं वहन्ति त्वां प्रतिपादयन्ति उच्चारयन्ति ते स्तोमवाहसः । स्तोतार इत्यर्थः । इह यज्ञे श्रुधि शृण्वित्यर्थः । सामर्थ्यात्तमेव स्तोमम् । श्रुत्वा च उप स्वसरम् । उप समीपे । स्वसरं स्वकीयं गृहम् । आगहि

आगच्छेत्यर्थः । अथवा स्वसरशब्देन पन्थाः अहर्वा उच्यते । आत्मीयं पन्थानं स्तुत्यहर्वा आगच्छ ॥

नृमेधाः । त्वां इदा इदानीं अपीप्यन् इति विपरिणतमत्र सम्बध्यते । आप्याययन्ति स्तुवन्ति । ह्यः पूर्वेद्युश्चापीप्यन् आप्यायितवन्तः । नरः स्तोतारः हे वज्रिन् । भूर्णयः बिभृतः हवींषि भृताः पूर्णाः सोमेनेति वा । स त्वं हे इन्द्र स्तोमवाहसः स्तोमं वहन्तः । स्तोतुस्तेमानुपश्रुधि उपशृणु । इह यज्ञे हे इन्द्र । उपागहि उपागच्छ । स्वसरं गृहं एषाम् ॥ (१०)

चतुर्थे प्रथमा दशती

प्रत्यु अदर्श्यायत्युछन्ती दुहिता दिवः ।
अपो मही वृणुते चक्षुषा तमो ज्योतिष्कृणोति सूनरी ॥

उषस्येदमृक् । वसिष्ठस्यार्षम् । प्रति अदर्शि प्रतिदृश्यते उषाः । ऊकारः पदपूरणः । आयती आगच्छन्ती । उच्छन्ती स्वेन ज्योतिषा विविधमाच्छादयन्तीत्यर्थः । दुहिता दिवः । द्युलोके जायमानत्वात् दिवः दुहिता । अपो । उकारः पदपूरणः । अपशब्दस्तु वृणुते इत्याख्यातेन सम्बद्ध्यते । अपवृणुते अपवारयति । अपगमयतीत्यर्थः । किं पुनरपगमयति । मही महत् तमः । महदन्धकारमित्यर्थः । अपनीय चान्धकारं चक्षुषा सर्वलोकस्य दर्शनाय ज्योतिः कृणोति प्रकाशं करोतीत्यर्थः । कीदृशी उषा एतत् करोति । उच्यते । सूनरी । शोभना नराः यस्याः स्तावकत्वेन भवन्ति सा सुनरी । सुनर्येव सूनरी । शोभनैः स्तावकैर्नरैः सम्बद्धेत्यर्थः ॥

द्वयोः वसिष्ठः । प्रत्यदर्शि प्रतिदृश्यते । उ इति पूरणः । आयती आगच्छन्ती उषाः । व्युच्छन्ती विवासयन्ती तमांसि । दिवः अन्तरिक्षस्य दुहिता । मही । अप उ अपो । अपोवृणुते तमः । चक्षुषा तेजसा । ज्योतिः स्वप्रकाशम् । कृणोति करोति । सूनरी । शोभनाः नराः स्तोतारः यस्याः सा सूनरी । सु सुष्ठु नयति प्राणिनः इति वा सूनरी ॥ (१)

इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना ।
अयं वामह्वेऽवसे शचीवसू विशं विशं हि गच्छथः ॥

अश्विदेवत्या । वसिष्ठस्यार्षम् । इमाः । उ इति पदपूरणः । वां युवाम् । दिविष्टयः स्वर्गफला इष्टय इत्यर्थः । उस्रा । उस्रेति गोनाम । लुप्तोपमं चेदं द्रष्टव्यम् । उस्रा इव । यथा गावः स्वान् वत्सकान् हवन्ते आह्वयन्ति तद्वदाह्वयन्ति युवां हे अश्विनौ । न केवलं इष्टयः एव आह्वयन्ति । किं तर्हि । मम वसिष्ठस्यान्तरात्मा वां अह्वे आह्वयति । उत्तमपुरुषैकवचनमिदं प्रथमपुरुषैकवचनस्य स्थाने द्रष्टव्यम् । आह्वयति । अवमे पालनार्थं हे शचीवसू । शचीति कर्मनाम । वस्वित्यपि धननाम । यागाख्यं कर्म धनं ययोस्तौ शचीवसू । तयोः सम्बोधनं हे शचीवसू । कर्मधनौ । कस्मात् पुनर्मदीयोऽन्तरात्मा आह्वयति । उच्यते । विशं विशम् । हिशब्दो हेतौ । यस्मात्सर्वमनुष्यान् प्रति युवां गच्छथः तस्मादाह्वयतीत्यर्थः ॥

इमाः दिविष्टयः दिवमिच्छन्त्यः प्रजाः । उस्रा उस्रौ वासकौ । वां युवाम् । हवन्ते हे अश्विना अश्विनौ । अयं अहं च वां युवाम् । अह्वे आह्वयामि । अवसे तर्पयितुम् । हे शचीवसू प्रज्ञया व्याप्तौ । विशं विशं हि सर्वां हि विशं प्रजां स्तोत्रीं गच्छथः ॥ (२)

कुष्ठः को वामश्विना तपानो देवा मर्त्यः ।
घ्नता वामश्नया क्षपमाणोंऽशुनेत्थमु आद्वन्यथा ॥

आश्विनीयम् । पौर आत्रेयः । तस्यार्षम् । कुः पृथिवी । तस्यां स्थितः कुस्थः । कः वां युवां हे अश्विनौ । तपानः तापयमानः । हे देवौ मर्त्यः मनुष्यः । घ्नता वां अश्नया क्षुधा क्षिपमाणः । अंशुना सोमेन इत्थम् । उ इति पदपूरणः । आत् उ अन्यथा ॥

पौर आत्रेयः । अश्विनोः स्तूयमानयोः आगमनविळम्बनात् विचिकित्सेऽयम् । कुष्ठः कुत्रस्थो युवाम् । को मर्त्यः वां युवां क्षपमाणः भवति । अस्मान् प्रहापयन् भवति । अश्विना अश्विनौ । तपानः तप आचरन् । हे देवा देवौ । घ्नता घ्नतौ क्षुत्प्रभृतीनि । वामिति पुनरुक्तिर्विशेषणभेदात् । अंशुना सोमेन क्षपमाणः भवति । अश्नया । अश्नशब्दाद्द्वितीयाद्विवचनस्य यादेशः । अश्नौ व्यापकौ युवाम् । अश्नोतेरश्नौ । तस्य भ्राता मध्यमोऽस्त्यश्नः इति हि निगमः । अथवा अश्नया अशनया फलेच्छयेति । इत्थं उ इत्थमेवेदं उपपद्यते । केनचित् क्षपमाणत्वादेवानागमनं युवयोः । आदिति अथेत्यर्थे वर्तते । उ इति विकल्पे । आदु अथ अन्यथास्माकं परिचरणहान्येति विचिकित्सेति ॥ (३)

अयं वां मधुमत्तमः सुतः सोमो दिविष्टिषु ।
तमश्विना पिबतं तिरोअह्न्यं धत्तं रत्नानि दाशुषे ॥

आश्विनीयम् । प्रस्कण्वस्यार्षम् । तमश्विनेति परस्तात्तच्छब्दश्रुतेः पुरस्ताद्यच्छब्दोऽध्याहार्यः । अयं वाम् । तादर्थ्ये एषा चतुर्थी । युवयोरर्थाय । मधुमत्तमः अतिशयेन मधुस्वादुः यः अभिषुतः सोमः । क्व पुनर्योऽभिषुतः । उच्यते । दिविष्टिषु । दिवं याभिर्गम्यते ता दिविष्टयः स्वर्गफलाः ज्योतिष्टो-

माद्याः । यागसंयोगसंपत्तिरित्यर्थः । तं अश्विनौ पिबतम् । तिरोअह्न्यं तृतीयसवनिकम् । अथवा तिर इति प्राप्तनाम । अहनि भवः अह्न्यः । प्राप्ते यागाहनि भवः तिरोअह्न्यः । तं तिरोअह्न्यम् । प्राप्तयागाहनि भवमित्यर्थः । पीत्वा च धत्तं दत्तम् । रत्नानि धनानि । दाशुषे यजमानाय ॥

प्रस्कण्वः । अयं सोमः । मधुमत्तमः रसवत्तमः । वां युवयोः अर्थे । सुतः अभिषुतः । दिविष्टिषु यज्ञेषु । तं पिबतं हे अश्विनौ । तिरोअह्न्यम् । तिरः सतः इति प्राप्तस्य नामनी । प्राप्ते सुत्याहे भवन्तम् । पीत्वा धत्तं प्रयच्छतम । रत्नानि दाशुषे यजमानाय ॥ (४)

आ त्वा सोमस्य गल्दया सदा याचन्नहं ज्या ।
भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत् ॥

प्रगाथस्यार्षम् । आ इत्ययमुपसर्गः व्यत्ययेन मा इत्येतस्य स्थाने द्रष्टव्यः चुक्रुधमित्याख्यातेन सम्बन्धयितव्यः । त्वा त्वाम् । सोमस्य गल्दया गालनेन क्षरणेन । क्षालनेनेत्यर्थः । सदा याचन् अहं ज्या गिरा स्तुत्या च । भूर्णिं मृगं न । यथा कश्चित् भूर्णिं भ्रमणशीलं मृगं सिंहं व्याघ्रं वा क्रोधयति तद्वन्मा चुक्रुधम् । सवनेषु यज्ञेषु । कः ईशानं ईश्वरमिन्द्रं न याचिषत् न याचिष्यति ॥

प्रगाथः । आयाचन् अभियाचमानः । त्वा त्वाम् । अहं सोमस्य गल्दया । गालनेन इति यास्कः (नि. ६. २४) । गालनं प्रकाशनम् । प्रकाशेन । प्रदानेन इत्यर्थः । सदा याचन्निति सम्बन्धः । यद्वा व्यवहितमपि उत्तरार्धर्चे सम्बध्यते सदा भूर्णिमिति । ज्या स्तुत्या । अहं गिरा (ऋ. वे. ८. १, २०) इति च बह्वृचाः । गल्दया ज्या न चुक्रुधं न क्रोधयेयम् । यद्यपि ते क्रोधहेतून् करोमि तथापि सोमप्रदानेन याचमानाय मे न क्रुध्ये-

दिति। भूर्णिं भर्तारम्। मृगं न। नेत्युपमार्थे। मृगं सिंहमिव भीमं त्वाम्। सवनेषु यज्ञेषु। सोमस्य गल्दया याचन् न त्वां चुक्रुधं इति सम्बध्यते। कः पुमान् ईशानं स्वामिनम्। न याचिषत् न याचेत। स्वामिनं हि याचन्ते पुरुषाः। अतोऽहं त्वां याचमानः सोमेन स्तुतिभिश्चोपगतः क्रोधं न करवाणि इत्यर्थः॥ (५)

अध्वर्यो द्रावया त्वं सोममिन्द्रः पिपासति।
उपो नूनं युयुजे वृषणा हरी आ च जगाम वृत्रहा॥

देवातिथिरध्वर्युमाह। हे अध्वर्यो द्रावय आहवनीयप्रदेशायेत्यर्थः। त्वम्। कस्मात् पुनः द्रावयामि। उच्यते। सोममिन्द्रः पिपासति। सोममिन्द्रः पातुमिच्छतीत्यर्थः। उपो उप उ। उकारः पदपूरणः। उपेत्ययमुपसर्गः व्यत्ययेन नीत्येतस्य स्थाने द्रष्टव्यः युयुजे इत्याख्यातेन सम्बन्धयितव्यः। नूनं निश्चयेन युयुजे। नियुङ्क्ते इत्यर्थः। वृषणौ रेतसः सेक्तारौ। बलवन्तावित्यर्थः। तौ हरी अश्वौ। युक्त्वा च आजगाम। चकारः पदपूरणः। आगच्छति। वृत्रहा मेघस्य हन्ता॥

देवातिथिः। हे अध्वर्यो द्रावय त्वरय त्वं सर्वानृत्विजः। यद्वा द्रावय क्षारय सोमं अंशुभ्यः। सोमं इन्द्रः पिपासति। उप उ उपो युयुजे रथे। नूनं संप्रति। वृषणा वृषणौ युवानौ वर्षितारौ वा हरी। आजगाम च वृत्रहा॥ (६)

अभी षतस्तदा भरेन्द्र ज्यायः कनीयसः।
पुरूवसुर्हि मघवन् बभूविथ भरेभरे च हव्यः॥

वसिष्ठस्यार्षम्। अभीत्ययमुपसर्गः आभरेत्याख्यातेन सम्बन्धयितव्यः। तत इत्येतदपि कनीयस इत्यनेन सम्बन्धयितव्यः। कनीयसः

सतः लघुतरस्य सतो मम वसिष्ठस्य तत् आ आभिमुख्येन भर आनय। देहीत्यर्थः। हे इन्द्र। तदाभरेति पुरस्तात् तच्छब्दश्रुतेर्यच्छब्दोऽध्याहर्तव्यः। ज्यायः अतिशयेन प्रशस्ततरं तदाभरेत्यर्थः। कस्मात् पुनराभरामि। उच्यते। पुरूवसुर्हि। हिशब्दो यस्मादर्थे। यस्मात् त्वं पुरूवसुर्बहुधनः। बभूविथ भवसि तस्मादित्यर्थः। हे मघवन् धनवन्। यस्माच्च भरे भरे सङ्ग्रामे सङ्ग्रामे। क्षेमार्थं हव्यः आह्वातव्यः। एतदुक्तं भवति। यस्मात् ईश्वरः प्रभुश्च तस्मादाभरेत्यर्थः॥

द्वयोर्वसिष्ठः। अभ्याभर तत् त्वया देयम्। ज्यायः प्रशस्यतरं धनम्। कनीयसः सतः मम हे इन्द्र। सम्बुध्यन्तं वा हे ज्याय इति। आमन्त्रितं पूर्वमविद्यमानवत् (पा. ८. १. ७२) इति इन्द्रपदस्य पादादौ विद्यमानस्याविद्यमानत्वाभावात् ज्याय इत्यस्य सर्वानुदात्तत्वाभावः। नकारस्य रुत्वं व्यत्ययात्। पुरूवसुः बहुवसुः बहुधनः। हि बभूविथ भवसि त्वं हे मघवन्। भरे भरे सर्वेषु सङ्ग्रामेषु यज्ञेषु वा। हव्यः आह्वातव्यश्चासि॥ (७)

यदिन्द्र यावतस्त्वमेतावदहमीशीय।
स्तोतारमिद्दधिषे रदावसो न पापत्वाय रंसिषम्॥

वसिष्ठस्यार्षम्। यच्छब्दः यदिशब्दस्यार्थे। यदि इन्द्र यावतः यत्परिमाणस्य धनस्य त्वं एतावत्। षष्ठ्या अत्र लुक्। एतावतः। एतत्परिमाणस्येत्यर्थः। अहं वसिष्ठः। इशीय स्वामी स्यां इत्यर्थः। ततः स्तोतारं स्तुतीनामुच्चारयितारं होतारम्। स्तोतृग्रहणं च प्रदर्शनार्थम्। सर्वानृत्विजः आत्मनः यागनिवृत्त्यर्थम्। इच्छब्दः पदपूरणः। दधिषे धारयेयमित्यर्थः। हे रदावसो। वस्विति धननाम। रा दाने। दानसम्पन्नवसो इत्यर्थः। किंच न पापत्वाय पापभयाय। पापात्मने इत्यर्थः। रंसिषं दधामीत्यर्थः॥

यत् यदि। अहं एतावद्धनं ईशीय एतावतो धनस्य स्वामी स्याम्। कियतः। यावतः त्वं ईशिषे हे इन्द्र। ततः अहं स्तोतारं ह्यमुं जनम्। दधिषे धारयेयं धनदानेन। इत् इति एवेत्यस्यार्थे। वाक्यान्ते चास्यान्वयः। हे रदावसो। रदिरत्र दानकर्मा। रदति वसूनीति रदावसुः। न पापत्वाय क्षीणत्वाय। रंसिषम्। रातेरिदं रूपम्। दद्यामिति। न पापत्वाय रासीय (ऋ. वे. ७. ३२. १७) इति बह्वृचाः॥ (८)

त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः।
अशस्तिहा जनिता वृत्रतूरसि त्वं तूर्य तरुष्यतः॥

नृमेधस आर्षम्। त्वं हे इन्द्र प्रतूर्तिषु। प्रकर्षेण तूर्यन्ते हिंस्यन्ते यासु वेलासु योद्धारस्ताः प्रतूर्तयो हिंसावेलाः। तासु प्रतूर्तिषु। हिंसावेलास्वित्यर्थः। अभीत्ययमुपसर्गः असीत्याख्यातेन सम्बध्यते। अभ्यसि अभिभवसीत्यर्थः। विश्वा विश्वान् सर्वान्। स्पृध इति सङ्ग्रामनाम। स्पृधं कुर्वन्ति स्पृधयन्ति। क्विप्। स्पृधातेः स्पृधः। सङ्ग्रामकारिणीः सेना इत्यर्थः। किंच अशस्तिहा अशस्तिनृणां हन्ता। जनिता वृष्टिप्रदानद्वारेण सर्वस्य जनिता। वृत्रतूरसि वृत्रस्य शत्रोः तूर्विता हन्ता असि भवसीत्यर्थः। किंच त्वं तूर्य हिंस इत्यर्थः। किं पुनर्हिंसामि। उच्यते। तरुष्यतः। तरुष्यतिर्वधकर्मा। ये तरुषितुमिच्छन्ति तरुष्यन्ति तान् तरुष्यतः। ये त्वां हन्तुमिच्छन्ति तान् प्रहिंसेत्यर्थः॥

नृमेधाः। त्वं हे इन्द्र प्रतूर्तिषु संग्रामेषु। अभ्यसि अभिभवसि। विश्वाः स्पृधः स्पर्धमानाः सेनाः। अशस्तिहा शत्रूणां हन्ता। न शंसन्तीत्यशस्तयः। यः जनिता विश्वस्य। यश्च वृत्रतूः वृत्रस्य तरिता गन्ता असि। त्वं तूर्य बाधस्व। तरुष्यतः बाधमानान् शत्रून्॥ (९)

प्र यो रिरिक्ष ओजसा दिवः सदोभ्यस्परि ।
न त्वा विव्याच रज इन्द्र पार्थिवमति विश्वं ववक्षिथ ॥

नोधस आर्षम् । प्रेत्ययमुपसर्गः रिरक्ष इत्याख्यातेन सम्बन्धयितव्यः । हीति पदपूरणः । यस्त्वं प्रकर्षेण रिरिक्षे । रुष रिष हिंसायां इत्यस्य मध्यमपुरुषैकवचने एतद्रूपम् । यस्त्वं प्रकर्षेण हिनस्तीत्यर्थः । कान् सामर्थ्याच्छत्रून् । ओजसा स्वेन बलेन । दिवः सदोभ्यः दिवः अवयवभूतानि सदस्स्थानानि । तेभ्यः । पञ्चमीनिर्देशात् आगत्येति वाक्यशेषः । परीति पदपूरणः । पुरस्ताद्यच्छब्दश्रुतेः तच्छब्दोऽध्याहर्तव्यः । न तं त्वा विव्याच न व्याप्नोति माहात्म्येन । रजो लोक इत्यर्थः । हे इन्द्र । कतमं पुनः रजो न व्याप्नोति । उच्यते । पार्थिवम् । यत एवमतो ब्रवीमि । अति विश्वं अतीत्य सर्वं ववक्षिथ महान् भवसीत्यर्थः ॥

नोधाः । प्ररिरिक्षे प्रकर्षेण अतिरिच्यसे यस्त्वमोजसा । दिवो लोकस्य सम्बन्धिभ्यः सदोभ्यः स्थानेभ्यः । परीति पञ्चम्यर्थानुवादकः । न विव्याच न व्याप्नोति । त्वा त्वाम् । रजः लोकः । पार्थिवं पृथिवीमयं हे इन्द्र । अति अत्यर्थं ववक्षिथ वहसि विश्वं जगत् ॥ (१०)

चतुर्थे द्वितीया दशती

बृहत्यष्टौ ।

असावि देवं गोऋजीकमन्धो यस्मिन्निन्द्रो जनुषेमुवोच ।
बोधामसि त्वा हर्यश्व यज्ञैर्बोधा नस्तोममन्धसो मदेषु ॥

वसिष्ठस्यार्षम् । असावि अभिषुतवानहं वसिष्ठः । देवम् । द्वितीयैकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् । देवस्य इन्द्रस्यार्थाय । किं पुनः अभिषुतवान् । उच्यते । गोऋजीकम् । गोशब्देनात्र गोविकारो गृह्यते । दधिक्षीरादिकं ऋजीकं मिश्रणं यस्य तत् गोऋजीकम् । अथवा ताद्धितेन निगमा भवन्तीत्येवं गोविकारः पयआदिरुच्यते । स आर्जितो येन तत् गोऋजीकम् । गोविकारैः पयआदिभिर्मिश्रितमित्यर्थः । अन्धः अन्नं सोमाख्यम् । अभिषुत्य च अस्मिन् इन्द्रो जनुषा । तृतीयैकवचनमिदं पञ्चम्येकवचनस्य स्थाने द्रष्टव्यम् । पञ्चमीनिर्देशाच्च प्रभृतीति वाक्यशेषः । जन्मनः प्रभृति । ईं इति पदपूरणः । उवाच उक्तवान् । उच्चारितवानित्यर्थः । किम् । सामर्थ्यात् स्तुतीः । ताभिश्च स्तुतिभिः बोधामसि । बोधिरयमन्तर्णीतण्यर्थो द्रष्टव्यः । बोधयामस्त्वां हे हर्यश्व । हरिद्वर्णौ अश्वौ यस्य स हर्यश्वः । तस्य संबोधनं हे हर्यश्व । यज्ञैः । तृतीयाबहुवचनमिदं सप्तमीबहुवचनस्य स्थाने द्रष्टव्यम् । यज्ञेषु । बोध बुद्ध्यस्व । नः अस्माकं स्वभूतं स्तोमम् । अन्धसः सोमलक्षणस्यान्नस्य । मदेषु । सप्तमीनिर्देशात् प्राप्तेष्विति वाक्यशेषः । सोमेन अन्नभूतेन अन्नवानित्यर्थः ॥

असावि देवमेकोनत्रिंशत्तासु प्र वो महे ।
त्रिपादोक्ता विराडन्यास्त्रिष्टुभोऽष्टौ च विंशतिः ।
ऐन्द्रीषु तासु तार्क्ष्यस्य हरीन्द्रापर्वतेत्वृचि ॥

द्वयोर्वसिष्ठः । असावि अभिषुतम् । देवं दीप्तम् । गोऋजीकं गोभिः संस्कृतं गव्येन मिश्रितम् । अन्धः अन्नं सोमाख्यम् । नि उवोच नितरां सङ्गतो भवति । अस्मिन् सुते सोमे इन्द्रः । उच समवाये । ईं एनं जनुषा । संभवत एव । ईं अयं इन्द्रः । अथ प्रत्यक्षस्तुतिः । बोधामसि बोधामः । त्वां हे हर्यश्व । यज्ञैः हविर्भिः दत्तैः । बोध बोधस्व । नः अस्माकम् । स्तोमं स्तोत्रम् । अन्धसः अन्नस्य सोमस्य मदेषु सत्सु ॥ (१)

**योनिष्ट इन्द्र सदने अकारि तमा नृभिः पुरुहूत प्र याहि ।
असो यथा नोऽविता वृधश्चिद्दो वसूनि ममदश्च सोमैः ।।**

वसिष्ठस्यार्षम् । योनिः वेद्याख्यं स्थानम् । ते तव हे इन्द्र सदने । अकारि कृतम् । केन । उच्यते । नृभिः अस्मदीयैः ऋत्विग्भिः । तं यज्ञं पुरुहूत बहुभिः यजमानैः आहूत । प्रयाहि आयाहीत्यर्थः । असो यथा । अस इत्येतदाख्यातं अविता इत्यस्मात् परं द्रष्टव्यम् । यथा येन प्रकारेण नः । षष्ठीबहुवचनमिदमेकवचनस्य स्थाने द्रष्टव्यम् । मम वसिष्ठस्य । अविता पालयिता । असि भवसीत्यर्थः । वृधश्चित् । चिच्छब्दः चशब्दस्य स्थाने । वर्धयिता च यथा भवसि । यथेति वचनात्तथेत्यध्याहार्यम् । तथा तेन प्रकारेण । ददः वसूनि धनानि । दत्वा च ममदः तृप्यस्व सोमैः ।।

योनिः स्थानम् । ते तव । सदने उपवेशनार्थम् । अकारि हे इन्द्र । तं योनिं आ अभिप्रयाहि । नृभिः नेतृभिः मरुद्भिः सह । पुरुहूत बहुभिराहूत । अस इति पञ्चमलकारान्तम् । स्याः । यथा नः अस्माकम् । अविता रक्षिता । वृधः वर्धनं चित् च । ददः देहि । वसूनि अस्मभ्यम् । ममदः माद्यस्व सोमैः ।। (२)

**अदर्दरुत्समसृजो वि खानि त्वमर्णवान् बद्बधानाँ अरम्णाः ।
महान्तमिन्द्र पर्वतं वि यद्वः सृजद्धारा अव यद्दानवान् हन् ।।**

गृत्समदो नाम ऋषिः । तस्येदमार्षम । अदर्दः विदारयति । उत्सं मेघम् । विदार्य असृजो वि । छन्दसि परेऽपि (पा. १. ४. ८१) इत्येवमिह विशब्दः परः प्रयुक्तः । स पूर्वो द्रष्टव्यः । व्यसृजः विसृजसि । उद्घाटयसीत्यर्थः । कानि पुनरुद्घाटयामि । उच्यते । खानि आकाशानि

उदकानां गमनबिलानीत्यर्थः । उद्घाट्य च त्वमर्णवान् । अर्णः उदकम् । तेन तद्वान् अर्णवान् । प्रथमैकवचनमिदं द्वितीयाबहुवचनस्य स्थाने द्रष्टव्यम् । अर्णस्वतः माध्यमिकान् उदकसङ्घातान् । बद्बधानान् तेनैव मेघेन निर्गमनद्वारनिरोधनं कुर्वता बाध्यमानान् । अरम्णाः । रम्णातिः संयमनकर्मान्यत्र । इह विसर्जनकर्मा । विसर्जयसि । पातयसीत्यर्थः । महान्तं हे इन्द्र पर्वतं मेघं यद्विवः । नपुंसकलिङ्गमिदं पुंलिङ्गस्य स्थाने द्रष्टव्यम् । यस्त्वं पूर्वेष्वपि कालेषु विवः विवृतवान् असि । पुरस्ताद्यच्छब्दश्रुतेः तच्छब्दपूर्वकोऽयं द्रष्टव्यः । स इदानीमपि महान्तं मेघं विवृतं करोषीत्यर्थः । विवृत्य च ततो मेघात् सृजत् विसृजसि उदकस्य धाराः । न केवलं महतो मेघात् उदकस्य विसृजसि धाराः । किं तर्हि । दानवान् । प्रथमैकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । दानवन्तम् । उदकस्य दातारमित्यर्थः । अवहन् नाशितवानित्यर्थः ॥

गृत्समदः । अदर्दः दारितवान् असि । त्वं उत्सं मेघम् । उत्स उत्सरणाद्वा उत्सदनाद्वा उत्स्यन्दनात् वा उनत्तेर्वा इति यास्कः (नि. १०. ९) । व्यसृजः व्यवृणोः । अस्य मेघस्य खानि स्रोतांसि । त्वं अर्णवान् उदकवतः मेघान् बद्बधानान् बाध्यमानान् प्रतिबाध्यमानान् वृत्रेण । अरम्णाः संयमितवान् असि । महान्तं पर्वतं पर्ववन्तं मेघं हे इन्द्र । यत् यदा विवः विवृतवान् असि । तदा सृजत् सृष्टवान् धाराः । यत् यदा दानवान् वृत्रादीन् अवहन् अवजघन्थ तदा अदर्दरुत्सम् ॥ (३)

सुष्वाणास इन्द्र स्तुमसि त्वा सनिष्यन्तश्चित्तुविनृम्ण वाजम् ।
आ नो भर सुवितं यस्य कोना तना त्मना सह्याम त्वोताः ॥

पृथुर्वैन्यः । तस्येदमार्षम् । सुष्वाणासः सोममभिषुण्वन्त इत्यर्थः । हे इन्द्र स्तुमसि स्तुमः । त्वा त्वाम् । न केवलमभिषुण्वन्त एव

स्तुमः । किं तर्हि । सनिष्यन्तश्चित् । चिच्छब्दः चशब्दस्यार्थे । सनिष्यन्तश्च सम्भजमानश्च । संस्कुर्वन्तश्चेत्यर्थः । हे तुविनृम्ण । नृम्णमिति धननाम । तुवीति बहुनाम । तुवि बहु नृम्णं धनं यस्य स तुविनृम्णः । तस्य सम्बोधनं हे तुविनृम्ण । बहुधन इत्यर्थः । किं पुनः संस्कुर्वतः स्तुमः । उच्यते । वाजं पुरोडाशादिलक्षणमित्यर्थः । यत एवमतो ब्रवीमि । आ नो भर । आ इत्ययमुपसर्गः भर इत्याख्यातेन सम्बध्यते । भर इत्येतच्च हरतेः रूपम् । हृग्रहोर्भश्छन्दसि (वा. ८. २. ३२) इति हकारस्य भकारः । आहर । आनय देहीत्यर्थः । नः अस्मभ्यम् । किं पुनः आहरामि । उच्यते । सुवितं आत्मनः सकाशात् प्रेरितम् । पुत्रमित्यर्थः । कीदृशं पुत्रं आहरामि । उच्यते । यस्य स्वभूतेन तना धनेनात्मनः । त्मना आत्मनैव । सह्याम अभिभवेम । किं पुनरभिभवेम । उच्यते । कोना । कुत्सिताश्च ते ऊनाश्च कोनाः । छान्दसत्वात् कुशब्दस्य काभावः । द्वितीयाबहुवचनस्य स्थाने छान्दसत्वात् आ इत्यादेशः । कोनान् कुत्सितान् ऊनान् च शत्रूनित्यर्थः । त्वोताः त्वया ऊताः रक्षिताः सन्तो वयमित्यर्थः ॥

पृथुर्वैन्यः । सुष्वाणासः । सुनोतेर्लिटः कानच् । अभिषुतवन्तः सोमं वयं हे इन्द्र । स्तुमसि स्तुमः त्वाम् । सनिष्यन्तः लप्स्यन्तः लिप्सन्तः । वाजं अन्नम् । अथवा दास्यन्तो वाजं हविः । हे तुविनृम्ण बहुधन । आभर आहर । नः अस्मभ्यम् । सुवितं भद्रं धनम् । यस्य सम्बन्धिनो धनस्य कोना । कनेः कान्तिकर्मण इदं रूपम् । पचाद्यच् । अकारस्य व्यत्ययात् ओकारः । प्रथमैकवचनस्याकारादेशः । यस्य धनमाच्छिद्य दातुं कामयसे तस्य सुवितं अस्मभ्यं आभर । तना । तनोतेस्तनयः । तनयेन । त्मना आत्मना । शत्रून् धनवतः सह्याम अभिभवेम । त्वोताः त्वया ऊताः रक्षिताः ॥ (४)

जगृह्मा ते दक्षिणमिन्द्र हस्तं वसूयवो वसुपते वसूनाम् ।
विद्मा हि त्वा गोपतिं शूर गोनामस्मभ्यं चित्रं वृषणं रयिं दाः ॥

सप्तगोरार्षम् । जगृह्म गृह्णीम गृह्णामि । ते तावकं दक्षिणं हे इन्द्र हस्तम् । त्वामाश्रिता वयमित्यर्थः । किमर्थं पुनराश्रिताः । उच्यते । वसूयवः धनकामाः । धनमिच्छन्त इत्यर्थः । वसुपते । वसुपतिशब्दः यद्यपि वसूनां पतिः वसुपतिरित्येवं व्युत्पाद्यते तथापि यथा प्रवीणशब्दः प्रकृष्टो वीणायामित्येवमपि व्युत्पाद्यमानो न वीणागतमेव प्रकर्षं प्रतिपादयति । किं तर्हि सर्वगतं तद्वद्वसुपतिशब्दोऽपि न वसुगतमेव आधिपत्यं प्रतिपादयति । किं तर्हि सर्वगतमाधिपत्यमित्यर्थः । कस्य । उच्यमे । वसूनां धनानाम् । विद्म जानीमः । हीति यस्मादर्थे । यस्मात्त्वां जानीमः । हे शूर विक्रान्त । गोपतिं अधिपतिभूतम् । गोनां गवाम् । तस्मादाश्रिता इत्यर्थः । यश्चैतदेवं अतो ब्रूमः । अस्मभ्यं चित्रं पूज्यम् । वृषणं वर्षितृ । क्षीरादीनां भोगानां क्षरितृ इत्यर्थः । रयिं गोलक्षणं धनम् । दाः देहि । बहुदोग्ध्रीर्गावो देहीत्यर्थः ॥

सप्तगुः । जगृह्म इति गृह्णातेः लिट उत्तमपुरुषस्य बहुवचनस्य रूपम् । गृहीतवन्तः वयम् ते तव । दक्षिणं हस्तं हे इन्द्र । वसूयवः वसुकामाः । हे वसूनां वसुपते वसूनां पते इत्यर्थः । विद्म हे शूर जानीमः हि त्वा । गोनां गवाम् । गोपतिं पतिम् । अस्मभ्यं चित्रं विचित्रम् । वृषणं वर्षितारं सर्वफलप्रसाधकम् । रयिं धनम् । दाः देहि ॥ (५)

इन्द्रं नरो नेमधिता हवन्ते यत् पार्या युनजते धियस्ताः ।
शूरो नृषाता श्रवसश्चकाम आ गोमति व्रजे भजा त्वं नः ॥

वसिष्ठस्यार्षम् । इन्द्रं नरः मनुष्याः योद्धारः । नेमधिता । नेमधितिरिति सङ्ग्रामनाम । तस्मात्परस्य सप्तम्येकवचनस्य सुपां सुलुक्

(पा. ७. १. ३९) इत्येवं डा आदेशः । नेमधितौ । सङ्ग्रामे इत्यर्थः । हवन्ते आह्वयन्तीत्यर्थः । कस्मात्पुनराह्वयन्ति । उच्यते । यत् यस्मादित्यर्थः । ता इति पुरस्तात्तच्छब्दश्रुतेः या इत्येतदध्याहार्यम् । याः पार्याः पालयितव्याः प्राप्तव्याः । धियः प्रज्ञा वा क्रिया वा । शत्रुहननार्थं ताः युनजते । बहुवचनमिदमेकवचनस्य स्थाने द्रष्टव्यम् । युङ्क्ते नियुङ्क्ते । उत्पादयन्ति इत्यर्थः । पुरस्ताद्यच्छब्दश्रुतेस्तस्मादित्यध्याहार्यम् । तस्मादाह्वयन्तीत्यर्थः । किंच शूर विक्रान्त इन्द्र । नृषाता । नरो मनुष्याः ऋत्विग्लक्षणाः । ते सन्यन्ते सज्यन्ते यत्र स नृषातिर्यज्ञः । वन षण संभक्तौ इत्यस्येदं रूपम् । तस्मात्परस्य सप्तम्येकवचनस्य डा आदेशः । नृषाता नृषातौ । यज्ञे इत्यर्थः । श्रवसः हविर्लक्षणस्यान्नस्य । षष्ठीनिर्देशात् एकदेशमिति वाक्यशेषः । किंच गोमति व्रजे गोष्ठे । सप्तमीनिर्देशात् स्थित इति वाक्यशेषः । भज सेवस्व त्वम् । नः अस्मान् । गोमति गोष्ठेऽप्यवस्थितोऽस्मभ्यं बह्वीः गाः देहीत्यर्थः ॥

वसिष्ठः । इन्द्रं नरः नेतारः यज्ञानां संग्रामाणां वा । नेमधिता नेमधितौ संग्रामे यज्ञे वा । हवन्ते ह्वयन्ति । यत् यदा । पार्याः पारप्राप्तिनिमित्तभूताः । धियः कर्माणि । ताः युनजते प्रयुञ्जते । शूरः त्वम् । नृषाता नृसातौ नृणां सातौ लाभे । श्रवसः अन्नस्य च कामे । काम्यमाने श्रवसीत्यर्थः । आभज भागिनः कुरु । नः अस्मान् । गोमति बहुगोयुक्ते । व्रजे गोष्ठे ॥ (६)

वयः सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ।
अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान् ॥

गौरिवीतेरार्षम् । वयः । लुप्तोपममेतत् । वय इव । शीघ्रगमनेन पक्षिसदृशा इत्यर्थः । के ते । आदित्यरश्मयः । सुपर्णाः सुपतनाः ।

सुगमना इत्यर्थः । उपसेदुः उपसङ्गच्छन्ति । इन्द्रमीश्वरम् । आदित्यमित्यर्थः । कीदृशाः पुनः रश्मयः आदित्यमुपगच्छन्ति । उच्यते । प्रियमेधाः प्रिययज्ञाः । ऋषयः द्रष्टारः सर्वस्य जगतः । नाथमानाः याचमाना इत्यर्थः । किं पुनर्याचमाना उपसेदुः । उच्यते । अप । अपेत्ययं ऊर्णुहि इत्याख्यातेन सम्बध्यते । अपोर्णुहि आछादय स्वेन तेजसा । किं पुनराच्छादयामि । उच्यते । ध्वान्तं सर्वं तमः । उद्गम्य च यदेतत्तमसा लोकस्य दूरीकृतं चक्षुः आहृत्य तत पूर्धि पूरय देहि वा । मुमुग्धि मोचय । समन्तात् विसृजस्व । अस्मान्निधया इव बद्धान् । निधा पाशसमूहः । पाशसमूहेनेव बद्धान् ॥

गौरिवीतिः । वयः पक्षिणः । सुपर्णाः इत्युमा । पक्षिणो यथा वृक्षं निवासभूतम् । तथा प्रियमेधाः प्रिययज्ञाः ऋषयः । इन्द्रं उपसेदुः नाथमाना याचमानाः धनादिकम् । अथ प्रत्यक्षस्तुतिः । अपोर्णुहि अपच्छादय । ध्वान्तं वारकम् । अप ध्वान्तमूर्णुहि इति । येन तमसा प्रावृतो मन्येत तन्मनसा गच्छेत् । अप हैवास्मान्मुच्यते (ऐ. ब्रा. ३. १९) इति हि ऐतरेयकम् । पूर्धि पूरय तेजसा । चक्षुः चक्षुषी । मुमुग्धि मोचय । अस्मान् पापेभ्यः । निधया पाशेन बद्धान् पापेभ्यः । अत्र चैतरेयकम् । मुमुग्धि अस्मान् निधयेव बद्धान् इति । पाशा वै निधा । मुमुग्ध्यस्मान् पाशादिव बद्धान् इत्येव तदाह (ए. ब्रा. ३. १९) ॥ (७)

नाके सुपर्णमुप यत् पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा ।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥

वेनस्यार्षम् । नाकशब्दः द्युलोकवचनः । तस्मादियमधिकरणसप्तमी योनावित्येतेन सम्बद्ध्यते । सुपर्णं सुपतनम् । सुगमनमित्यर्थः । उपेत्ययमभ्यचक्षतेत्याख्यातेन सम्बन्धयितव्यः । यच्छब्दः पदपूरणः । पतन्तं

गच्छन्तं भगवन्तमादित्यम् । हृदा हृदयेन । वेनन्तः । वेनतेः कान्तिकर्मणः । कामयमानाः । त्वया सह मोक्षावस्थायां ऐकात्म्यं गन्तुमिच्छन्त इत्यर्थः । उप अभ्यचक्षत उपगम्य आभिमुख्येन पश्यन्ति । के ते । सामर्थ्यादस्मदादयो योगिनः । किंपुनः पश्यन्ति । उच्यते । हिरण्यपक्षम् । सर्वस्य लोकस्य हितत्वाद्रमणीयत्वाच्च हिरण्यशब्देनात्र रश्मय उच्यन्ते । ते पक्षस्थानीया यस्य स हिरण्यपक्षः । तं हिरण्यपक्षम् । हितकरणीयैः रश्मिभिर्युक्तमित्यर्थः । वरुणस्य दूतम् । वरुणो मध्यमस्थानः । तस्य दूतम् । कथं पुनरस्य दूतः । उच्यते । राज्ञां यो दूतः स प्रतिसामन्तात् यत् धनमादत्ते तत्स्वराज्ञे समर्पयति । अयमप्यादित्यः पृथिवीलोकात् रश्मिभिः यदुदकमादत्ते तत् मध्यमस्थानाय वरुणाय समर्पयति । अत एव सामान्याद्वरुणस्य दूत इत्युच्यते । क्व पुनर्व्यवस्थितं पश्यन्ति । उच्यते । यमस्य योनौ । यमः आदित्यः । तस्य योनिः स्थानं मण्डलम् । द्युलोके यदादित्यमण्डलं तत्र व्यवस्थितं पश्यन्तीत्यर्थः । कीदृशं पश्यन्ति । उच्यते । शकुनं शक्तम् । योगतः आत्मसात्कर्तुं समर्थमित्यर्थः । भुरण्युं भ्रमणशीलमित्यर्थः ॥

वेनो भार्गवः ।

ततोऽहं जज्ञे भुवनस्य गोपा हिरण्मयः शकुनिर्ब्रह्म नाम (मा.श्रौ.९.९.६)

इति कारणात्मनः शकुनिरूपेण प्रादुर्भावं केचिदभिधीयन्ते । यत् यदा । त्वा त्वाम् सुपर्णं सुपतनम् । नाके स्वर्गे पतन्तं चरन्तम् । विप्राः हृदा हृदयेन । वेनतः कामयमानाः । उप अभ्यचक्षत उपगम्य अभ्यपश्यन् । हिरण्यपक्षं शकुनम् । वरुणस्य इति सर्वदेवतोपलक्षणम् । देवतानां दूतं अग्निरूपावस्थानेन । यमस्य अग्नेः मध्यमस्थानस्य । योनौ योनिस्थाने अन्तरिक्षे । भुरण्युं गमनशीलम् । भुरण्यतिः गतिकर्मा । तदा त्वां स्तुवन्ति इति शेषः ।

यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनाम्
(ऋ. वे. १. ६६. ८)

इत्यस्यामृचि यम इत्यग्निरुच्यते । मध्यमस्थानोऽप्यग्निर्वैद्युतो वर्तते । अस्यामृचि परस्यां च इन्द्रस्याखिलात्मना स्तुतिः इति बोद्धव्यम् ॥ (८)

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥

नकुलस्यार्षम् । ब्रह्मेति बृहेर्वृद्ध्यर्थस्य बिभर्तेर्भरणार्थस्य वा रूपम् । परिवृद्धत्वात् सर्वस्य वा भरणात् ब्रह्मशब्देनादित्यमण्डलं उच्यते । तत् जज्ञानं जायमानम् । प्रथमं अन्यस्मात्सर्वस्मात् प्रथमम् । पुरस्तात् पूर्वस्मिन् काले । सृष्टिकाले इत्यर्थः । अथवा पुरस्तादिति दिग्वचनोऽयम् । पूर्वस्यां दिशि अहन्यहनि जायमानम् । उद्यदित्यर्थः । वीत्ययमुपसर्गः आवरित्याख्यातेन सम्बन्धयितव्यः । किं पुनरादित्याख्यं वस्तु अहन्यहनि उद्यत् करोति । उच्यते । सीमतः । सीम इति सीमाशब्दपर्यायः । सीमाशब्देन मर्यादोच्यते । तस्मादियं पञ्चम्यर्थे तसिः । तच्छ्रुतेश्च आङित्येष अध्याहार्यः । आ सीमातः आ मर्यादायाः । रश्मीनां मर्यादां यावत् इत्यर्थः । वि आवः विवृतान् अकरोत् । कीदृशान् रश्मीन् विवृतानकरोत् । उच्यते । सुरुचः सुदीप्तानित्यर्थः । कीदृशं पुनरादित्याख्यं वस्तु स्वरश्मीन् विवृतानकरोत् । उच्यते । वेनः । पुंलिङ्गमिदं नपुंसकलिङ्गस्य स्थाने द्रष्टव्यम् । वेनं कान्तम् । उज्ज्वलमित्यर्थः । न केवलं स्वरश्मीन् विवृतानकरोत् । किं तर्हि । सः । पुंलिङ्गमिदं नपुंसकलिङ्गस्य स्थाने द्रष्टव्यम् । तत् आदित्याख्यं वस्तु । बुध्न्या । बुध्नमन्तरिक्षम् । तस्मिन् भवाः बुध्न्या दिशः । कीदृश्यो दिशः । उच्यते । उपमाः तस्यैवादित्याख्यवस्तुनः सन्निकृष्टाः । अथवा सर्वस्य जगतः निर्माणभूताः । अस्य विष्ठाः अस्य जगतः विष्टभ्य स्थात्रीः । सतश्च योनिम् ।

द्वितीयैकवचनमिदं बहुवचनस्य स्थाने द्रष्टव्यम् । योनीन् । सद्रूपस्य वस्तुनः योनिभूता इत्यर्थः । असतश्च असद्रूपस्येत्यर्थः । ता अपि विवृता अकरोत् ॥

नकुलः । ब्रह्म हिरण्यगर्भाख्यम् । प्रथमं आद्यम् । पुरस्तात् दिशि आदित्यात्मनि । जज्ञानं जातं प्रादुर्भूतम् । तदेव वेनः । मध्यमस्थानो वेन इन्द्रः । कान्तिकर्मा वेनतिः गतिकर्मा वा । कमनीयं वा सदा गच्छन् आदित्यात्मना वायुरूपेण वेति । आवः आवृणोति तिरस्करोति । सुरुचः दीप्तिरूपः । किमर्थं तिरस्करोति । सीमतः मर्यादायाः । अमीषु ऋतुषु वर्षितव्यम् । अमीषु न इति या मर्यादा तत एवेत्यर्थः । स एव बुध्न्याः बुध्ने प्रतिष्ठारूपेण अन्तरिक्षे भवाः । उपमाः । उपमेत्यन्तिकनाम । अस्य मध्यमस्थानस्य अन्तिकस्थाः । विष्ठाः । वितिष्ठन्ते प्रतिष्ठन्ते इति विष्ठा आपः । ताः विष्ठाः विवः विवृणोति । सीमत एव वर्षतावित्यर्थः । ता एव अपो विशिनष्टि । सतश्च योनिं कारणं असतश्च । शुभाशुभे वस्तुनि सदसती आपः । विव इति वृणोतेः अभ्यस्तात् विना वोपसृष्टात् लुङि मन्त्रे घसह्वर (पा. २. ४. ८०) इत्यादिना च्लेर्लोपे रूपम् ॥ (९)

अपूर्व्या पुरुतमान्यस्मै महे वीराय तवसे तुराय ।
विरप्शिने वज्रिणे शंतमानि वचांस्यस्मै स्थविराय तक्षुः ॥

सुहोत्रस्यार्षम् । अपूर्व्या । शेश्छन्दसि बहुलम् (पा. ६. १. ७०) इत्येवमत्र शसः लुक् । स्वार्थिकश्च यप्रत्ययः । अपूर्वाणि । अन्येन नानुभूतपूर्वाणीत्यर्थः । पुरुतमानि अतिशयेन बहूनि । अस्मै प्रकृताय इन्द्राय । महे । विरप्शिने इत्यनेन पौनरुक्त्यप्रसङ्गात् न महत्त्वं इन्द्रस्य विशेषणम् । किं तर्हि । वीरत्वस्य । महते वीराय । महाशूरायेत्यर्थः । तवसे । तव इति बलनाम । बलाय । अन्तर्णीतमत्वर्थं च द्रष्टव्यम् । तवसे बलवते इत्यर्थः । तुराय । तुर्वतिर्हिंसार्थः । हिंसित्रे । विरप्शिने । शरीरेण

महते । वज्रिणे वज्रवते । शंतमानि अतिशयेन सुखानि । वचांसि वचनानि । स्तुतिरूपाणीत्यर्थः । अस्मै स्थविराय तक्षुः । तक्षतिः करोतिकर्मा । कृतवन्तो वयमित्यर्थः ॥

सुहोत्रो भारद्वाजः । अपूर्व्या नूतनानि अकृतपूर्वाणि अन्यैः । पुरुतमानि वचांसि स्तोत्राणि । अस्मै महे महते । वीराय तवसे बलवते । तुराय त्वरिताय । विरप्शिने विशेषेण स्तुत्याय वज्रिणे । अस्मै इति पुनरुक्तिः अर्धर्चभेदात् । स्थविराय वृद्धाय इन्द्राय । शंतमानि सुखकृत्तमानि । वचांसि तक्षुः । तक्षतिः करोत्यर्थः । कुर्वन्ति स्तोतारः ॥ (१०)

चतुर्थे तृतीया दशती

अव द्रप्सो अंशुमतीमतिष्ठदीयानः कृष्णो दशभिः सहस्रैः ।
आवत्तमिन्द्रः शच्या धमन्तमप स्नीहितिर्नृमणा अध द्राः ॥

तिरश्चेः द्युतानस्य वा आर्षम् । अवेत्ययमुपसर्गः अधदित्याख्यातेन सम्बन्धयितव्यः । द्रप्सः इति सोमरसा उच्यन्ते । लुप्तोपमं द्रष्टव्यम् । द्रप्सः सोमरससदृशनीलवर्ण इत्यर्थः । आवत्तमिति परस्तात्तच्छब्दश्रुतेर्यच्छब्दोऽध्याहर्तव्यः । य एवंविधो रसः । अंशुमतीं नदीम् । अतिष्ठत आस्थितवान् । दुर्भगः भयेन अंशुमतीं आश्रितवानित्यर्थः । ईयानः अनुगम्यमानः स्वभृत्यैः । कृष्णः । रोषात् भयाद्वा इन्द्रस्य कृष्णीभूतः । कियद्भिः पुनः स्वभृत्यैरनुगम्यमानः । उच्यते । दशभिः सहस्रैः । आवत्तं इन्द्रः । अवतेर्गत्यर्थस्येदं रूपम् । तमिन्द्रमनुगम्यमान इत्यर्थः ।

कीदृशं पुनरिन्द्रमनुगतवान् । उच्यते । धमन्तं कर्मणैव शत्रुं विनाशयन्तमित्यर्थः । अनुगत्य च स्त्रीहितीं नदीम् । हिंसन्तीं सेनाम् । अव अधत् आधत्ते । दधातेर्धारणार्थस्येदं रूपम् । अवरुद्धवानित्यर्थः । कीदृशः पुनरिन्द्रः हिंसन्तीं सेनामवरुद्धवान् । उच्यते । नृमणाः । यजमानमनुष्येषु अनुग्राहकं मनो यस्य स नृमणाः । यजमानानामुपरि अनुग्राहकरचित्त इत्यर्थः ॥

अस्याः परस्याश्च द्युतानः । कृष्णनामानमसुरं च इन्द्रः जघान । तत्प्रकारोऽत्र कीर्त्यते । अवातिष्ठत् अध्यतिष्ठत् अंशुमतीम् । अंशुमती नाम नदी । ताम् । द्रप्सो द्रवणशीलः । इयानः अनुगम्यमानः कृष्णः । दशभिः सहस्रैः असुराणाम् । आवत् आगच्छत् । तं कृष्णं इन्द्रः । शच्या कर्मणा विक्रमेण । धमन्तं बाधमानम् । स्त्रिहितीम् । स्त्रिहीति वधकर्मा । घ्नतीं सेनां कृष्णस्य । अध तदानीम् । द्राः । द्रातिः कुत्सितगतिकर्मा । लुङि रूपं द्रा इति । स सिप् अन्तर्णीतण्यर्थः । अपगमयतीत्यर्थः । नृमणाः नृषु स्तोतृषु यज्वसु वा मनो यस्य स इन्द्रः ॥ (१)

वृत्रस्य त्वा श्वसथादीषमाणा विश्वे देवा अजहुर्ये सखायः ।
मरुद्भिरिन्द्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासि ॥

द्युतानस्यार्षम् । वृत्रस्य मेघस्य श्वसथात् आमर्षणात् । गर्जितशब्दादेवेत्यर्थः । ईषमाणाः पलायन्तः नश्यन्तः । विश्वे देवाः सर्वे देवाः । अजहुः त्यक्तवन्तः । के । उच्यते । ये सखायः ये तव सखीभूता आसन् । केवलैर्मरुद्भिः हे इन्द्र सख्यं ते तव अस्तु । लोडयं लडर्थे द्रष्टव्यः । अस्ति । मरुद्भिः त्वं केवलैर्न परित्यक्त इत्यर्थः । अथ तैश्च सहितः त्वं इमा विश्वाः पृतनाः । पृतना इति सङ्ग्रामनाम । सर्वान् सङ्ग्रामानित्यर्थः । जयसि जितवानसीत्यर्थः । अथवा वृत्रो नाम दानवः । तस्य वृत्रस्य श्वसथात् गर्जितशब्दात् ईषमाणा बिभ्यमाना विश्वे देवा अजहुः ।

ओहाङ् त्यागे । त्यक्तवन्तः अन्ये वा ये सखायः त्वदीयाः । एवं स्थिते मरुद्भिः सह हे इन्द्र सख्यं ते अस्तु भवतु । अथ एवं स्थिते इमा विश्वाः सर्वाः पृतनाः जयसि ॥

द्युतानः । अत्र वृत्रवधाख्यानं प्रक्रमते । ऐतरेयकम्—तं हनिष्यन्त आद्रवन् । सोऽवेन्मां वै हनिष्यन्त आद्रवन्ति । हन्त इमान् भीषया इति तानभिप्राश्वसीत् । तस्य श्वसथादीषमाणा विश्वेदेवा अद्रवन् । मरुतो हैनं नाजहुः । प्रहर भगवो जहि वीरयस्व इत्येवैनमेतां वाचं वदन्त उपातिष्ठन्त । तदेतदृषिः पश्यन्नभ्यनूवाच वृत्रस्य त्वा श्वसथादीषमाणा इति (ऐ. ब्रा. ३. २०) वृत्रस्य श्वसथात् श्वासात् । ईषमाणाः बिभ्यन्तः । विश्वे देवाः त्वा अजहुः अत्यजन् । ये सखायः पूर्वं आसन् । मरुद्भिः इदानीमपि त्वामत्यजद्भिः ते सख्यमस्तु हे इन्द्र । अथ एताः विश्वाः पृतनाः वृत्रस्य जयासि अजयस्त्वम् ॥ (२)

विधुं दद्राणं समने बहूनां युवानं सन्तं पलितो जगार ।
देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ॥

बृहदुक्थस्यार्षम् । विधुं वृष्टिप्रदानादिना उपकरणेन सर्वजगतः धारयितारमिन्द्रम् । दद्राणं दारयितारम् । समने सङ्ग्रामे बहूनां शत्रूणाम् । युवानं सन्तं तरुणं सन्तमित्यर्थः । पलितः । पलितत्वं वृद्धस्योपलक्षणार्थम् । वृद्धः अहं जगार । गॄ स्तुतावित्यस्य उत्तमपुरुषैकवचनमिदम् । स्तौमीत्यर्थः । किं च हे मदीय अन्तरात्मन् देवस्य दानादिगुणयुक्तस्येन्द्रस्य । पश्य काव्यम् । कविर्मेधावी । तस्य भावः काव्यम् । कवित्वमित्यर्थः । कीदृशं पुनः कवित्वम् । उच्यते । महित्वा महत्वेन । स्वमाहात्म्येनेत्यर्थः । अद्या ममार स इति पुरस्तात्तच्छब्दश्रुतेः ह्यः इत्यत्र यच्छब्दोऽध्याहार्यः । यः ह्यः अतीते अहनि समान प्राणितवान् ।

अद्या ममारः स इति तच्छब्दः अद्यशब्दात्पूर्वः अपकृष्टव्यः। प्रथमैक-वचनं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्। तमसुरं अद्य अस्मिन्नहनि। ममार। म्रियतिरन्तर्णीतण्यर्थो द्रष्टव्यः। मारयतीत्यर्थः ॥

बृहदुक्थः। विधुं विधातारं कर्मणाम्। दद्राणं द्रावकं बहूनां शत्रूणाम्। समने संग्रामे। युवानं सन्तं पलितः। पलितं जरा। जगार गिरति ग्रसति। अपर आह विधुं चन्द्रमसं दद्राणं द्रावकं गच्छन्तं समने समूहे बहूना स्थित तं युवानं पूर्णं सन्तं पलितो वृद्धो राहुः जगार ग्रसति इति। अद्य ममार म्रियते कश्चित्। स इदानीं म्रियमाणः ह्यः पूर्वेद्युः समान संजिजीव। देवस्य देवेन्द्रस्य सर्वनियामकस्य। काव्यं प्रज्ञानं सकल्पम्। पश्य हे बृहदुक्थ इति स्वात्मानमेवेश्वरस्वातन्त्र्यं बोधयति ॥ (३)

त्वं ह त्यत् सप्तभ्यो जायमानो ऽशत्रुभ्यो अभवः शत्रुरिन्द्र।
गूळ्हे द्यावापृथिवी अन्वविन्दो विभुमद्भ्यो भुवनेभ्यो रणं धाः ॥

तिरश्चेर्द्युतानस्य वा आर्षम्। त्वम्। ह इत्ययं विनिग्रहार्थीयः जायमान इत्येतस्मात्परो द्रष्टव्यः। त्यत्। त्यच्छब्दः तच्छब्दपर्यायः। सप्तम्याश्चात्र लुक्। तदा। सप्तभ्यः असुरेभ्यः जायमानः जायमान एव। कीदृशेभ्य असुरेभ्यः। उच्यते। अशुत्रुभ्यः। अभवः भवसि। शत्रुः शातयिता हे इन्द्र। कदा पुनः प्रभृति शातयिता भवसि। उच्यते। तदेति वचनात् यदेत्यध्याहार्यम्। यदा गूढे निगूढे तेभ्यः असुरेभ्यः भयेन त्वां पलायतेत्यर्थः। द्यावापृथिवी अनु अविन्दः। विद्लृ लाभे इत्यस्येदं रूपम्। लब्धवानसीत्यर्थः। किमर्थं पुनर्लब्धवान्। उच्यते। विभुमद्भ्यः भुवनेभ्यः भूतलेभ्यः। तेषां अर्थाय। सुखं तत्र विभुमन्ति भूतलानि व्यवस्थास्यन्त इत्येवमर्थमित्यर्थः। तेषां भूतजातानां रक्षणार्थं तैरसुरैः सह रणं सङ्ग्रामम्। धाः धारयसि। करोषीत्यर्थः ॥

द्युतानः। त्वं खलु त्यत् तदानीम्। जायमानः प्रादुर्भवन्। सप्तभ्यः अशत्रुभ्यः बाधारहिताभ्यः। षष्ठ्यर्थे चतुर्थी। तासाम्। शत्रुः शातयिता अभवः हे इन्द्र। सप्त यत् पुरः शर्म शारदीर्दत् (ऋ. वे. १. १७४. २) इति हि निगमः। गूढे तमसा। द्यावापृथिवी दिवं च पृथिवीं च। अन्वविन्दः तमोरूपस्य वृत्रस्य हननात्। स त्वं विभुमद्भ्यः व्याप्तिमद्भ्यः। भुवनेभ्यः रणं रमणम्। धाः विधेहि ॥ (४)

मेडिं न त्वा वज्रिणं भृष्टिमन्तं पुरुधस्मानं वृषभं स्थिरप्स्नुम्।
करोष्यर्यस्तरुषीर्दुवस्युरिन्द्र द्युक्षं वृत्रहणं गृणीषे ॥

वामदेवस्यार्षम्। मेडिरिति वाङ्नाम। अन्तर्णीतमत्वर्थं द्रष्टव्यम्। मेडिमन्तम्। वाग्मिनमित्यर्थः। नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः। अस्त्युपमार्थस्य संप्रत्यर्थे प्रयोग इति पादपूरणः। वज्रिणं वज्रवन्तम्। भृष्टिमन्तम्। भृष्टिशब्देन शिखराण्युच्यन्ते। तानि चात्र बाहुशिखराणि परिगृह्यन्ते। तैस्तद्वन्तम्। पुरुधस्मानम्। पूर्विति धननाम। धस्मानमिति धसि सहने इत्यस्येदं रूपम्। धनानां सहनशीलम्। वृषभम्। स्थिरप्स्नुम्। स्थिरः चिरन्तनः स्थविरश्चासौ प्स्नुश्च। तं स्थिरप्स्नुम्। चिरन्तनहविषां भक्षयितारमित्यर्थः। द्युक्षम्। दिवि क्षियति निवसति इति द्युक्षः। तं द्युक्षम्। द्युलोकनिवासिनमित्यर्थः। वृत्रहणं मेघस्य हन्तारं त्वां हे इन्द्र गृणीषे। मध्यमपुरुषैकवचनमिदमुत्तमपुरुषैकवचनस्य स्थाने द्रष्टव्यम्। अहं वामदेवः गृणे स्तौमीत्यर्थः। करोष्यर्यस्तरुषीरित्येतानि यत्तच्छब्दावध्याहृत्यैकवाक्यतां नेयानि। यस्त्वं करोषि। अर्यः ईश्वरः। तरुषीः। तरुष्यतिः वधकर्मा। वधेन सङ्ग्रामो लक्ष्यते। सङ्ग्राममित्यर्थः। तं त्वां दुवस्युः परिचरितुमिच्छन् अहं वामदेवः स्तौमीत्यर्थः ॥

वामदेवः। मेडिरिति वाङ्नाम। मेडिं न वाचमिव। यथा वाचं सरस्वतीं स्तुवन्ति तथा त्वाम्। गृणीषे इत्यन्तर्णीतण्यर्थः। स्तावयसि। वज्रिणं भृष्टिमन्तम्। भृष्टिः भ्राजतेः दीप्तिकर्मणो रूपम्। दीप्तिमन्तम्। पुरुधस्मानम्। दधातेर्धस्मा। पुरूणां बहूनां विश्वेषां धारकम। वृषभं वर्षितारम्। स्थिरप्स्नुम्। प्स इति रूपनाम। तत्र नकार उपजनः। स्थिरदेहम्। शुक्षं शुस्थानम्। वृत्रहणं वृत्राणां असुराणां हन्तारं त्वां गृणीषे हे इन्द्र। यथा त्वा स्तुवन्ति ऋषयः तथा कर्माणि करोषि इत्यर्थः। तान्येव कर्माणि संग्रहेण दर्शयति—अर्यः। अरीः आर्यकर्मसु स्थिताः यज्वानः। तत्सम्बन्धिनीः प्रजाः। अरिशब्दात् शसि वा छन्दसि (पा. ६. १. १०६) इति पूर्वसवर्णस्य वैकल्पिकत्वात् तदभावे यणादेशः। तरुषीः आपदां तारिकाः करोषि। दुवस्युः। दुवः परिचरणम्। तदिश्छन् इति। अथवा गृणीषे इति उत्तमपुरुषैकवचनम्। गृणे त्वामहमिति। सिब्बहुलं लेटि (पा. ३. १. ३४) इत्यत्र बहुलग्रहणात् लेटि सिप्॥ (९)

प्र वो महे महे वृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम्।
विशः पूर्वीः प्रचर चर्षणिप्राः॥

वसिष्ठस्यार्षम्। वसिष्ठ आत्मीयानृत्विज आह। प्रेत्ययमुपसर्गः भरध्वमित्याख्यातेन सम्बन्धयितव्यः। वः। द्वितीयाबहुवचनमिदं प्रथमाबहुवचनस्य स्थाने द्रष्टव्यम्। यूयं हे मदीया ऋत्विजः। महे। तादर्थ्ये एषा चतुर्थी। महतः इन्द्रस्यार्थाय। महे वृधे। इयमपि तादर्थ्ये चतुर्थी। महतां यजमानानां वर्धयितुरिन्द्रस्यार्थायेत्यर्थः। प्रेत्ययमुपसर्गः कृणुध्वमित्याख्यातेन सम्बन्धयितव्यः। सुमतिम्। मन्यते इत्यर्चतिकर्मा। सुशब्दः शोभनार्थः। शोभनां स्तुतिमित्यर्थः। प्रकृणुध्वम्। त्वदर्थं सोमं नयन्ति शोभनां च स्तुतिं कुर्वन्ति। अतो ब्रवीमि। यद्यपि अन्यदीया अपि ऋत्विजस्त्वामाह्वयन्ति तथापि अस्मदीयानेव विशः ऋत्विग्लक्षणान्

मनुष्यान् प्रति । पूर्वीः । स्त्रीलिङ्गमिदं पुंलिङ्गस्य स्थाने द्रष्टव्यम् । पूर्वान् चिरन्तनान् । प्रचर प्रकर्षेण गच्छेत्यर्थः । चर्षणिप्राः । चर्षणयो मनुष्याः । तेषां पूरयिता चर्षणिप्राः । इन्द्रविशेषणमेतत् सम्बुद्ध्यन्तम् । धनेन मनुष्याणां पूरयितः । छान्दसत्वान्निघाताभावः । अथवा विशां विशेषणम् । धनेन मनुष्याणां पूरयित्रीः प्रतीत्यर्थः ॥

वसिष्ठः । प्रभरध्वं प्रणयत । वः यूयम् । महे महते इन्द्राय सोमान् इति शेषः । महे वृधे महतां धनानां वर्धयित्रे । प्रचेतसे प्रकृष्टज्ञानाय । प्रकृणुध्वं सुमतिं सुष्टुमतिं हे मदीयाः पुरुषाः । अथ प्रत्यक्षस्तुतिः । विशः प्रजाः । पूर्वीः पूरयित्रीः हविर्भिः । प्रचर अभिगच्छ । चर्षणिप्राः चर्षणीनां जनानां पूरयिता कामैः त्वम् ॥ (६)

शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानि ॥

विश्वामित्र आह । शुनं सुखं सुखकरमिन्द्रम् । हुवेम । बहुवचनमिदमेकवचनस्य स्थाने द्रष्टव्यम् । आह्वयामि । कीदृशमिन्द्रमाह्वयामि । उच्यते । मघवानम् । मघं धनम् । तद्यस्यास्ति स मघवा । तं मघवानम् । धनवन्तमित्यर्थः । क्व पुनराह्वयामि । उच्यते । अस्मिन् भरे । भर इति सङ्ग्रामनाम । अस्मिन् वर्तमाने सङ्ग्रामे इत्यर्थः । कीदृशमिन्द्रम् । उच्यते । नृतमं अतिशयेन मनुष्यम् । वाजसातौ । इदमपि सङ्ग्रामनाम । अस्मिन् भरे इत्येतेन पौनरुक्त्यप्रसङ्गात् क्रियानिमित्तमेतत् द्रष्टव्यम् । वाजः अन्नम् । तं सम्भज्यते यत्र स वाजसातिः । परकीयान् हत्वा तदीयमन्नं सम्भज्यते । तस्मिन् भरे आह्वयामीत्यर्थः । कीदृशमिन्द्रमाह्वयामि । उच्यते । शृण्वन्तं उग्रम् । किमर्थमाह्वयामि । ऊतये । आत्मनः पालनार्थम् ।

समत्सु सङ्ग्रामेषु । घ्नन्तं वृत्राणि मेघवृन्दानि । संजितं सम्यक् जेतारं धनानाम् ॥

विश्वामित्रः । शुनमिति सुखनाम । सुखसाधनमिन्द्रं हुवेम स्तुमः वयम् । मघवानं धनवन्तम् । अस्मिन् भरे संग्रामे । यज्ञे वा । नृतमं नेतृतमम् । वाजसातौ अन्नलाभे निमित्ते । शृण्वन्तं स्तोत्राकर्णनपरम् । उग्रं ओजस्विनम् । ऊतये तर्पणाय रक्षणाय वा । समत्सु संग्रामेषु घ्नन्तं वृत्राणि शत्रून् । संजितं सम्यक् जयन्तं धनानि शत्रूणाम् ॥ (७)

उदु ब्रह्माण्यैरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ ।
आ यो विश्वानि शवसा ततानोपश्रोता म ईवतो वचांसि ॥

वसिष्ठः अन्तरात्मानमाह । उदु इत्ययमुपसर्गः व्यत्ययेन प्रेत्येतस्य स्थाने द्रष्टव्यः । प्रेत्ययं च ऐरतेत्याख्यातेन सम्बन्धयितव्यः । ब्रह्माणि अन्नानि हविर्लक्षणानि । ऐरत । मध्यमपुरुषबहुवचनमिदमेकवचनस्य स्थाने द्रष्टव्यम् । ईरय । प्रेरयेत्यर्थः । कीदृशानि ब्रह्माणि प्रेरयामि । उच्यते । श्रवस्या श्रवणीयानि । उत्कृष्टानीत्यर्थः । कं प्रति प्रेरयामि । उच्यते । इन्द्रम् । प्रति । न केवलमन्नान्येव प्रेरय । किं तर्हि । समर्ये सङ्ग्रामस्थानीययज्ञे । महय पूजय । स्तुहीत्यर्थः । हे वसिष्ठ मदीय अन्तरात्मन् । कीदृशमिन्द्रं । तं महयामि उच्यते । यः इन्द्रः विश्वानि सर्वाणि ज्योतिष्टोमादीनि कृष्यादीनि च कर्माणि । शवसा स्वेन बलेन । आततान विस्तारयतीत्यर्थः । यश्च उपश्रोता मे मम स्वभूतस्य । ईवतः । इवतेर्व्याप्तिकर्मणः एतद्रूपम् । व्याप्तिमतः । अशेषगुणप्रकाशनस्येत्यर्थः । कस्य पुनः व्याप्तिमतः उपश्रोता । उच्यते । वचांसि । प्रथमाबहुवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् । वचसः । वचनस्येत्यर्थः । यो विश्वानीति परस्ताद्यच्छब्दश्रुतेः तं महय इति पुरस्तात्तच्छब्दमध्याहृत्यैकवाक्यता योजयितव्या ॥

वसिष्ठः । उदैरत उदीरयन्ति । उः पूरणः । ब्रह्माणि स्तोत्राणि ब्राह्मणाः । इन्द्रार्थं इति शेषः । श्रवस्या श्रवस्यया अन्नेच्छया । हे वसिष्ठ त्वं च इन्द्रं समर्ये यज्ञे । महय पूजय । अथ प्रकारान्तरेण स्तौति । यः इन्द्रः विश्वानि भुवनानि आततान आतनोति । श्रवसा यशसा । उपश्रोता भवतु मे मम । ईवतः उपगमनवतः । वचांसि स्तोत्राणि ॥ (८)

चक्रं यदस्याप्स्वानिषत्तमुतो तदस्मै मध्विच्चछद्यात् ।
पृथिव्यामतिषितं यदूधः पयो गोष्वदधा ओषधीषु ॥

गौरिवीतेरार्षम् । चक्रमायुधविशेषः । यत् इन्द्रस्य स्वभूतम् । अप्सु । निमित्तसप्तम्येषा । अप्सु निमित्तभूतासु । निमित्तसप्तमी तादर्थ्यं प्रतिपादयति । चर्मणि द्वीपिनं हन्ति इति यथा । एवमिहापि । उदकार्थमित्यर्थः । आनिषत्तं आभिमुख्ये निषण्णम् । मेघं छित्वा तस्योदरे गतमित्यर्थः । उत् । उत् इत्ययं पदपूरणः । तत् चक्रं अस्य लोकस्यार्थाय बहु उदकं चछद्यात् । कामितवत् कामयित्वा अच्छादयेदित्यर्थः । किंच पृथिव्याम् । पृथिवीत्यन्तरिक्षनाम । अन्तरिक्षे इत्यर्थः । अतिषितं अतिवर्धन्तम् । व्यवस्थितमित्यर्थः । यत् ऊधः ऊधसि । पयः उदकम् । यच्च गोषु । गोशब्देनात्र आदित्यरश्मय उच्यन्ते । यच्च आदित्यरश्मिषु अतिषितं सोमरसलक्षणमुदकं । यदूधरिति पुरस्ताद्यच्छब्दश्रुतेः अदधादित्यत्र तच्छब्दोऽध्याहर्तव्यः । तत्सर्वमिन्द्रः अदधान् ददाति । पातयतीत्यर्थः । ओषधीषु । निमित्तसप्तम्येषा । ओषधीषु व्रीह्यादिषु निमित्तभूतासु । ओषध्यर्थमित्यर्थः ॥

गौरिवीतिः । चक्रं आयुधम् । यत् अस्य इन्द्रस्य अप्सु अन्तरिक्षे मेघे । निषत्तं निषण्णम् । आ इति पूरणः । तत् अस्मै इन्द्राय । मधु उदकम् । इत् एव । चछद्यात् छदयेत् वशं नयेत् । उतो अपि च । परार्धर्चादौ सम्बध्यते ।

पृथिव्यामतिषितम् । स्यतिरुपसृष्टो विमोचने । विमुक्तं यत् ऊधः । पञ्चम्याः लुक् । ऊधसो मेघात् । तत् पयो गोषु अदधाः ओषधीषु च । इति प्रत्यक्ष-स्तुतिः परोऽर्धर्चः ॥ (९)

चतुर्थे चतुर्थी दशती

त्यमू षु वाजिनं देवजूतं सहोवानं तरुतारं रथानाम् ।
अरिष्टनेमिं पृतनाजमाशुं स्वस्तये तार्क्ष्यमिहा हुवेम ॥

तार्क्ष्य आह । त्यशब्दस्तच्छब्दपर्यायः । तच्छब्दश्रुतेश्च योग्यार्थ-सम्बन्धो यच्छब्दोऽध्याहर्तव्यः । यमस्मिन्नाह्वयन्ति तम् । उ सु इति द्वावपि पदपूरणौ । वाजिनं सोमलक्षणेनान्नेन अन्नवन्तम् । देवजूतं देवैर्मरुदादिभिरनुगतम् । सहोवानं स्वेन बलेन बलवन्तम् । तरुतारं हन्तारम् । रथानां शत्रूणां स्वभूतानाम् । अरिष्टनेमिम् । रिष्टं हिंसितम् । रिषेर्हिंसार्थत्वात् । न रिष्टं अरिष्टम् । नेमिरिति वज्रनाम । अरिष्टः अहिं-सितः नेमिर्वज्रो यस्य स अरिष्टनेमिः । तं अरिष्टनेमिम् । अहिं-सितवज्रमित्यर्थः । पृतनाजम् । पृतनेति सङ्ग्रामनाम । तस्मादुत्तरस्थ-जयतेर्डप्रत्ययः । पृतनाजम् । सङ्ग्रामाणां जेतारमित्यर्थः । आशुं क्षिप्रम् । स्वस्तये आत्मनः अविनाशाय । तार्क्ष्यम् । तृक्षप्तृक्षणक्ष गतावित्यस्येदं रूपम् । अभिगमनीयमिन्द्रं देवतान्तरं वा तार्क्ष्यम् । इह सङ्ग्रामे हुवेम ह्वयामि । आह्वयामि इत्येतदाशास्महे ॥

तृक्षपुत्रः अरिष्टनेमिः । त्यं उ तमेव । सु सुष्ठु हुवेम । वाजिनं वेग-वन्तम् । देवजूतं देवैः स्तोतृभिः प्रेरितम् । सहोवानं सहस्वन्तम् । छन्दसी-

वनिपौ च (वा. ९. २. १०९) इति मत्वर्थीयो वनिः । तरुतारं हिंसितारम् । रथानां प्रतिरथानाम् । अथवा रथाना गन्तॄणां तरुतारं गन्तृतमम् । तरतिर्गति-कर्मापि । अरिष्टनेमि अहिंसितारम् । पृतनाजं पृतनानां अजितारं क्षेप्तारम् । अज गतिक्षेपणयोः । आशुं शीघ्रगामिनम् । तार्क्ष्यं सुपर्णम् । स्वस्तये रक्षायै । इह आहुवेम ॥ (१)

त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम् ।
हुवे नु शक्रं पुरुहूतमिन्द्रमिदं हविर्मघवा वेत्विन्द्रः ॥

गर्गस्यार्षम् । त्रातारं पालयितारम् । इन्द्रं अवितारं पालयि-तारमिन्द्रम् । हवे हवे सङ्ग्रामे सङ्ग्रामे । सुहवं स्वाह्वानम् । शूरमिन्द्रं अहमपि गर्गः हुवे । नु इति पदपूरणः । आह्वयामि शक्रं शक्तम् । पुरुहूतमिन्द्रम् । आहूतश्च सन् इदं हविः अस्मदीयं मघवा धनवानिन्द्रः । वेतु । वेतेर्भक्षणार्थस्येदं रूपम् । भक्षयतु इन्द्रः ॥

भरद्वाजः । त्रातारं इन्द्रं हुवे ह्वयामि । अवितारं इन्द्रमिति पुनरुक्तिः स्तोतृतमत्वख्यापनाय । त्राणं नाम उपस्थितेभ्यो भयेभ्यो रक्षणम् । अवनं तु द्वेष्यतानिरोध इति विशेषः । अथवा कामैस्तर्पणं अवनम् । हवे हवे सर्वेषु आह्वानेषु । सुहवं आह्वातुं सुशकम् । शूरमिन्द्रम् । हुवे ह्वयामि शक्रं शक्तं सर्वत्र ।- पुरुहूतं इन्द्रं ह्वयामि । स च मघवा इन्द्रः इदं हविः वेतु अश्नातु कामयतां वा ॥ (२)

यजामह इन्द्रं वज्रदक्षिणं हरीणां रथ्यं विव्रतानाम् ।
प्र श्मश्रुभिर्दोधुवदूर्ध्वधा भुवद्वि सेनाभिर्भयमानो विराधसा ॥

विमदस्यार्षम् । यजामहे वयमिन्द्रम् । कीदृशमिन्द्रं यजामहे । उच्यते । वज्रदक्षिणं वज्रेण गृहीतेन शत्रुवधार्थमुत्साहिनमित्यर्थः । अथवा

वज्रं दक्षिणे हस्ते यस्य सः वज्रदक्षिणः । तं वज्रदक्षिणम् । वज्रहस्तमित्यर्थः । हरीणामात्मीयानामश्वानाम् । रथ्यं समर्थितारम् । नेतारमित्यर्थः । कीदृशानामश्वानां नेतारम् । उच्यते । विव्रतानाम् । व्रतमिति कर्मनाम । तच्चानुगमनकर्म परिगृह्यते । विविधं कर्म येषां ते विव्रताः । तेषां विव्रतानाम् । विविधकर्मयुक्तानामित्यर्थः । पूर्वाऽर्धर्चे यत्तच्छब्दावध्याहृत्य एकवाक्यता नेया । प्रेत्ययमुपसर्गः दोधुवदित्याख्यातेन सम्बन्धयितव्यः । श्मश्रुभिः । तृतीयाबहुवचनमिदं द्वितीयाबहुवचनस्य स्थाने द्रष्टव्यम् । श्मश्रूणि । श्मश्रुग्रहणं चात्र प्रदर्शनार्थम् । सर्वरोमाणि शत्रूणाम् । प्रदोधुवत् । धू विधूनने इत्यस्येदं रूपम् । पुनः पुनः प्रकर्षेण धुवति । उद्धूपितरोमकूपान् शत्रून् करोतीत्यर्थः । किं कुर्वन् । उच्यते । ऊर्ध्वधा भुवत् ऊर्ध्वस्तिष्ठति इत्यर्थः । एतदुक्तं भवति । यदा स ऊर्ध्वस्तिष्ठति तदा सर्वे शत्रवः मां प्रत्येष्यति मां प्रत्येष्यतीत्यनेन भयेन रोमाञ्चिता भवन्तीति । यश्च सेनाभिः हस्त्यश्वरथपदातिलक्षणाभिः भयमानः । अन्तर्णीतण्यर्थमिदं द्रष्टव्यम् । भाययमानः श्मश्रूणि दोधुवत् । यश्च राधसा धनेन अत्यर्थबहुधनं दधत् श्मश्रूणि दोधुवत् । तमिन्द्रं यजामहे । एवं सर्वत्र यच्छब्दमध्याहृत्य तच्छब्देन एकवाक्यता योजयितव्या ॥

वसुकृत् विमदो वा । यजामहे वयं इन्द्रं वज्रदक्षिणं वज्रं दक्षिणे हस्ते यस्य तम् । हरीणां रथ्यं नेतारम् । विव्रतानां विविधकर्मणाम् । प्रदोधुवत् प्रकम्पयन् शत्रून् । श्मश्रुभिः तेजोभिः । ऊर्ध्वधा ऊर्ध्व इत्यर्थः । भुवत् भवति । उद्युक्तो भवतीत्यर्थः । वि विभवति । सेनाभिः भयमानः भीषयन् असुरान् । विभवति राधसा धनेन च ॥ (३)

सत्राहणं दाधृषिं तुम्रमिन्द्रं महामपारं वृषभं सुवज्रम् ।
हन्ता यो वृत्रं सनितोत वाजं दाता मघानि मघवा सुराधाः ॥

वामदेवस्यार्षम्। सत्राशब्दः सदाशब्दपर्यायः। सदा हन्तारं शत्रूणाम्। अथवा सत्रेति सत्यनाम। सत्येन असत्यानामसुराणां हन्तारम्। दाधृषिं अभिभवितारं सर्वस्य शत्रोः। तुम्रम्। लुप्तोपमर्मिदं द्रष्टव्यम्। तुम्रसदृशम्। स्थूलमित्यर्थः। इन्द्रं मह्नां महान्तं शरीरेण। अपारमनन्तं वीर्येण। वृषभं वर्षितारम्। सुवज्रं शोभनवज्रम्। द्वितीयानिर्देशात्स्तुमः यजामो वेति वाक्यशेषः। हन्ता हन्तृतमः। वृत्रम्। षष्ठ्यर्थे द्वितीया। वृत्रस्य। यश्च सनिता सम्भक्ता वाजम्। इयमपि द्वितीया षष्ठ्यर्थे एव। वाजस्य सोमलक्षणस्यान्नस्य। यश्च दाता मघानि। इयमपि षष्ठ्यर्थे एव। मघानां धनानाम्। यश्च मघवान् धनवान्। यश्च सुराधाः शोभनधनः। तं स्तुमः यजामो वेति वाक्यशेषोऽनुषक्तव्यः॥

वामदेवः तिसृणाम्। सत्राहणं बहूनां हन्तारम्। सत्रेति बहुनाम। दाधृषिं भृशं धर्षकं शत्रूणाम्। तुम्रं प्रेरकम्। तुमिः प्रेरणकर्मा। इन्द्रं मह्नां महान्तम्। अपारं अपरिमाणम्। वृषभं वर्षितारम्। सुवज्रम्। स्तुम इति शेषः। यो वृत्रं हन्ता। तृन्नन्तत्वात् षष्ठ्यभावः। एवमुत्तरेष्वपि। उत अपिच। सनिता दाता वाजं अन्नम्। दाता मघानि धनानि। मघवा इन्द्रः। सुराधाः सुधनः। तं स्तुम इति शेषः॥ (४)

यो नो वनुष्यन्नभिदाति मर्त्त उगणा वा मन्यमानस्तुरो वा।
क्षिधी युधाः शवसा वा तमिन्द्राभी ष्याम वृषमणस्त्वोताः॥

वामदेवस्यार्षम्। यः नः अस्मान् वनुष्यन्। वनुष्यतिर्हन्तिकर्मा। अस्मान् हिंसन्। अन्येभ्यः अभिदाति आभिमुख्येन ददाति। योऽस्मा-कमदत्वान्येभ्यो ददातीत्यर्थः। मर्त्यः मनुष्यः। उगणा उरुगणाः। उरु गणयतीत्युरुगणाः। उरुगणाः सन् रुशब्दलोपेन उगणाः उच्यते। एतदुक्तं

भवति । योऽस्मभ्यं अल्पं दत्वा बहु गणयति जनेभ्यः कथयति । यश्च मन्यमानः वाचा पूजयन् । तुरः तुर्वतेर्वधकर्मण एतद्रूपम् । वाचा पूजयन् हृदयेन हिनस्तीत्यर्थः । क्षिधी । क्षि क्षये इत्यस्येदं रूपम् । उपक्षपय इत्यर्थः । केन उपक्षपयामि । उच्यते । युधा युद्धेन । यस्तावच्छरीरेण शक्यते उपक्षपयितुं तं तथा उपक्षपय । यः युधा शक्यते उपक्षपयितुं तं शवसा सेनालक्षणेन बलेन हे इन्द्र । त्वया च उपक्षपयितुं वयमपि अभिष्याम: अभिभवेम इत्येतदाशास्महे । हे वृषभणः त्वोतास्त्वया रक्षिता इत्यर्थः ॥

यो मर्त्यो नः अस्मान् । वनुष्यन् हिंसिष्यन् । अभिदाति अभिदासति अभिहन्ति । उगणा वा उद्गूर्णा वा । तुर इति तुर्वतेः हिंसाकर्मणो रूपम् । वृत्रतुरितिवत् । हन्ति वा शत्रूणां अस्मदीयाः प्रजाः अभिदासति । मन्यमानः आत्मानं बहुमन्यमानः । क्षिधिः क्षयस्य निधिः । क्षिधिशब्दात् तृतीयैकवचन-पूर्वसवर्णदीर्घः । क्षयकरणेन । युधा संप्रहारेण । शवसा बलेन वा अभिदासति । तं वयं अभिष्याम अभिभवेम । हे इन्द्र वृषमणः वर्षकतमः । त्वोताः त्वया रक्षिता वयम् ॥ (९)

यं वृत्रेषु क्षितयः स्पर्धमाना यं युक्तेषु तुरयन्तो हवन्ते ।
यं शूरसातौ यमपामुपज्मन् यं विप्रासो वाजयन्ते स इन्द्रः ॥

वामदेवस्यार्षम् । इन्द्रस्यातिभक्ततया इन्द्ररूपमास्थितः असुरैर्गृहीतो हन्यमान आह । यं वृत्रेषु शत्रुषु । हन्तव्येष्विति वाक्यशेषः । क्षितयः मनुष्याः योद्धारः परस्परेण स्पर्धमानाः । क्षितयः यं च युक्तेषु रथेषु अश्वेषु वा युद्धार्थमाह्वयन्ति । तुरयन्तः त्वरमाणाः हिंसन्तो वा शत्रून् आत्मनो जयार्थं आह्वयन्ते । यं च शूरसातौ संग्रामे जयार्थं आह्वयन्ति ।

यं च अपामुपज्मन् । उपपूर्वस्य अज गतिक्षेपणयोरित्यस्येदं रूपम् । आपः समीपे यस्मिन् काले आगच्छन्ति सः अपामुपज्मा वर्षाकालः । तस्मिन् अपां उपज्मे । उदकार्थं वर्षाकाले यमाह्वयन्तीत्यभिप्रायः । यं च विप्राः मेधाविनः यजमानाः । वाजयन्ते पूजयन्ते । सः हे असुरजनाः इन्द्रः । अहं इन्द्रो न भवानीति ॥

यं हवन्ते वृत्रेषु उपद्रवेषु सत्सु । क्षितयः मनुष्याः स्पर्धमानाः शत्रुभिः सह । यं युक्तेषु रथेषु सत्सु हवन्ते । तुरयन्तः त्वरयन्तः । यं शूरसातौ संग्रामे प्रवृत्ते हवन्ते । यं हवन्ते अपां उपज्मन् उपगमने प्राप्तौ । वृष्ट्यर्थमित्यर्थः । यं च विप्रासः प्राज्ञाः वाजयन्ते वाजिनं बलिनं कुर्वन्ति स्तोत्रेषु यज्ञेषु । स इन्द्र सर्वेषामपेक्षित इत्यर्थः ॥ (६)

इन्द्रापर्वता बृहता रथेन वामीरिष आ वहतं सुवीराः ।
वीतं हव्यान्यध्वरेषु देवा वर्धेथां गीर्भिरिडया मदन्ता ॥

विश्वामित्रस्यार्षम् । हे इन्द्रापर्वतौ बृहता महता रथेन । वामीः वननीयाः । सम्भजनीया इत्यर्थः । इषः अन्नानि । आवहतं आनयतम् । अस्मभ्यं दत्तमित्यर्थः । कीदृशीः पुनः इषः आनयावः । उच्यते । सुवीराः शोभनैर्वीरैः पुत्रैः पौत्रैश्च युक्ताः । वीतं भक्षयतम् । हव्यानि हवींषि । अध्वरेषु यज्ञेषु । हे देवौ दानादिगुणयुक्तौ । भक्षयित्वा हवींषि वर्धेथां गीर्भिः स्तुतिभिः । स्तूयमानाविति वाक्यशेषः । इडया सवनीयलक्षणेनान्नेन । मदन्तौ तृप्यन्तावित्यर्थः ॥

विश्वामित्रः । हे इन्द्रापर्वता इन्द्रापर्वतौ । पर्वतो नाम देवर्षिः इन्द्रस्य सखा । बृहता रथेन वामीः वननीयाः । इषः अन्नानि । आवहतं अभिवहतं

अस्मभ्यम् । सुवीराः शोभनपुत्रपौत्रसहिताः । वीतं अश्नीतम् । हव्यानि अध्वरेषु हे देवा देवौ । वर्धेथां गीर्भिः स्तुतिभिः । इडया अन्नेन सोमेन । मदन्ता हृष्यन्तौ युवाम् ॥ (७)

इन्द्राय गिरो अनिशितसर्गा अपः प्रैरयत्सगरस्य बुध्नात् ।
यो अक्षेणेव चक्रियौ शचीभिर्विष्वक्तस्तम्भ पृथिवीमुत द्याम् ॥

रेणोरार्षम् । इन्द्राय इन्द्रार्थम् । गिरः स्तुतीः । कीदृश्यः स्तुतीः । उच्यते । अनिशितसर्गाः । शो तनूकरणे इत्यस्येदं रूपम् । निष्ठाप्रत्यये निष्ठा शीङ्स्वित् (पा. १. २. १९) इत्येतद्भवति । सर्गः संसर्गः सङ्घातः । निशितः सङ्घातो यासां ताः निशितसर्गाः तनूकृतसङ्घाताः । अनिशितसर्गाः अतनूकृतसङ्घाताः । बह्वीरित्यर्थः । प्रैरयत् । प्रथमपुरुषैकवचनमिदमुत्तमपुरुषैकवचनस्य स्थाने द्रष्टव्यम् । प्रेरयामीत्यर्थः । अपः । द्वितीयानिर्देशात् प्राप्तुमिति वाक्यशेषः । उदकानि प्राप्तुमित्यर्थः । कुतः पुनरुदकानि प्राप्तुम् । उच्यते । सगरस्य अन्तरिक्षस्य बुध्नात् । वृष्टिलक्षणा अपः प्राप्तुमित्यर्थः । यः कीदृशः इन्द्रः यस्य स्तुतीः प्रेरयामि । उच्यते । यः अक्षेणेव चक्रियौ चक्रे । यथा कश्चिद्रथकारः अक्षेण चक्रे स्तम्भयति तद्वत् । शचीभिः यज्ञादिभिः कर्मभिः प्रज्ञाभिः वा । विष्वक् विष्वग्भूते नानागते । तस्तम्भ स्तम्भितवान् । अविचलीकृतवानित्यर्थः । पृथिवीं उत अपि च । द्याम् । द्यावापृथिव्यौ इत्यर्थः । यो अक्षेणेति पुरस्ताद्यच्छब्दश्रुतेः तच्छब्दमध्याहृत्यैकवाक्यता योज्या । तस्मै इन्द्राय गिरः प्रेरयामीति ॥

रेणुः वैश्वामित्रः । इन्द्राय इन्द्रमुद्दिश्य । गिरः स्तुतीः । अनिशितसर्गाः अतनूकृतप्रयोगाः । प्रैरयत् प्रेरयति रेणुः ऋषिः । अपः सगरस्य बुध्नादित्युपमा ।

यथा सगरस्य सलिलं बुध्नात् प्रतिष्ठाय अन्तरिक्षात् अपो वृष्टिलक्षणाः प्रेरयसि त्वं तथेति । य इन्द्रः अक्षेणेव चक्रयौ रथचक्रे । ऋणोरक्षं न चक्रयोः (ऋ. वे. १. ३०. १४) इत्यत्र चक्रिशब्दः चक्रे दृष्टः । शचीभिः प्रज्ञाभिः सङ्कल्पैः । विष्वक् सर्वतः । तस्तम्भ स्तभ्नाति । पृथिवीं उत अपि च । द्यां दिवम् । तस्मै इन्द्राय ॥ (८)

आ त्वा सखायः सख्या ववृत्युस्तिरः पुरू चिदर्णवान् जगम्याः ।
पितुर्नपातमा दधीत वेधा अस्मिन् क्षये प्रतरां दीद्यानः ॥

वामदेव आह । आ इत्ययमुपसर्गः ववृत्युरित्याख्यातेन सम्बन्धयितव्यः । आववृत्युः आवर्तयन्ति । आभिमुख्यं कुर्वन्तीत्यर्थः । त्वा त्वां इन्द्रम् । सखाय अस्मदीया ऋत्विजः । केन पुनरावर्तयन्ति । उच्यते । सख्या सखिकर्मणा । यागेनेत्यर्थः । अभिमुखीभूतश्च सन् तिरः प्राप्त एव । अस्मान् प्रति अदूरस्थ एव इत्यर्थः । पुरू पुरुणा बहुना उदकेन । अर्णवान् उदकवान् भूत्वा । उदकसहित इत्यर्थः । जगम्याः अत्यर्थं शीघ्रमागच्छेत्यर्थः । एत्य च पितुर्न । नशब्दः उपरिष्टादुपचारत्वादुपमार्थीयः । पितुरिव । पातम् । पा रक्षणे इत्यस्य नपुंसके भावे क्तः (पा. ३. ३. ११४) इति क्तप्रत्यये एतद्रूपम् । पातं रक्षणम् । यथा कश्चित् पितुः रक्षणं आधत्ते तद्वत् भवानपि अस्माकं आदधीत अदधातु । करोत्वित्यर्थः । वेधाः मेधावी भवान् । किं पुनः कुर्वन् रक्षणं करोतु । उच्यते । अस्मिन् क्षये निवासे अस्मदीयां प्रतरां प्रकृष्टतराम् । सम्पदमिति वाक्यशेषः । दीद्यानः ध्यायन् । कुर्वन् इत्यर्थः ॥

वामदेवः । आववृत्युः आत्माभिमुखं वर्तयेयुः । त्वा त्वाम् । सखायः स्तोतारः । सख्या सख्येन । तिरः तिरस्कृतोऽपि । पुरु चित् बहु एव ।

अर्णवान् अन्तरिक्षात् जिगम्याः आगच्छ । अथ परोक्षस्तुतिः । पितुर्मदीयस्य नपातं पौत्रम् । मम पुत्रमित्यर्थः । आदधीत वेधाः विधाता इन्द्रः । अस्मिन् क्षये निवासे प्रतरां दीद्यानः अतिशयेन दीप्यमानः ॥ (९)

को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।
आसन्नेषामप्सुवाहो मयोभून् य एषां भृत्यामृणधत्स जीवात् ॥

गौतमस्यार्षम् । कः पुण्यवान् आदित्यस्तुतिकरणद्वारेण युङ्क्ते नियुङ्क्ते । क्व पुनर्नियुङ्क्ते । उच्यते । इन्द्रस्य स्वभूतस्य रथस्य धुरि धुरायामित्यर्थः । काः पुनर्नियुङ्क्ते । उच्यते । गाः । गोशब्देनात्र समय-योगात् अश्वा उच्यन्ते । अश्वानित्यर्थः । ऋतस्य सत्यस्य सर्वगतस्य वा इन्द्रस्य स्वभूतान् । कीदृशस्येन्द्रस्य स्वभूतान् । उच्यते । शिमीवतः । शिमीति कर्मनाम । तद्यस्यास्ति स शिमीवान् । तस्य शिमीवतः कर्मवतः इन्द्रस्य स्वभूतान् । भामिनः शत्रूणामुपक्रुद्धस्य । अथवा अश्वस्य विशेषणे एते । न इन्द्रविशेषणे । शमनवतोऽश्वान् शत्रूणामुपक्रुद्धान् । दुर्हृणायून् कुत्सित-क्रोधानित्यर्थः । आसन् एषां अप्सुवाहः । अप्सु निमित्तभूतासु ये वहन्ति ते अप्सुवाहः उदकस्य पातयितारः । तान् । मयोभून् स्तोतॄणां यष्टॄणां सुखस्य भावयितॄन् । य एषामश्वानां भृत्यां भृतिम् । का पुनरेषां भृतिः । मृजाबन्धनाश्रितं वयः । ऋणधत् । ऋण वृद्धौ इत्यस्येदं रूपम् । तां यो वर्धयतीत्यर्थः । सः जीवात् स जीवति सुजीवितम् । सः कः पुण्य वानित्यर्थः ॥

गौतमः । इन्द्रस्य स्तूयमानस्य दर्शनादियमुच्यते । कः स्तोता अद्य स्तुतिभिः ऋतस्य सत्यस्य इन्द्रस्य । गाः अश्वान् । धुरि रथस्य युङ्क्ते । गच्छन्तीति गावोऽश्वाः । शिमीवतः कर्मवतः । भामिनः दीप्तिमन्तः । इन्द्रस्य

दुर्हणायून् दुरन्तकहिंसाकामान्। अप्सुवाहः। अप्सु अन्तरिक्षे वहन्तीति अप्सुवाहः। मयोभून् सुखस्य भावयितॄन्। गा इत्यस्य व्यवहिते अप्यश्वविशेषणे। आसन् आस्येन। स्तोत्रेणेत्यर्थः। आस्यशब्दस्य पद्दन् (पा. ६. १. ६३) इत्यादिना शस्प्रभृतिषु आसन्नादेशः। तृतीयैकवचनस्य लुक्। एषां गवां स्तोत्रेण कः इमान् धुरि युङ्क्ते इति योजना। यो जनः एषामश्वानां भृत्यां भरणम्। ऋणधत् ऋध्यात् समर्धयेत्। स जनः जीवात् जीवेत् चिरकालम्॥ (१०)

चतुर्थे पञ्चमी दशती

त्रिष्टुप् तीनि।

गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः।
ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे॥

मधुच्छन्दस आर्षम्। गायतिः अर्चतिकर्मा। गायन्ति स्तुवन्तीत्यर्थः। त्वा त्वाम् गायत्रिणः। गायत्रं साम। तद्येषामस्ति ते गायत्रिणः। उद्गातार इत्यर्थः। न केवलमुद्गातारः। किं तर्हि। अर्चन्ति अर्कं देवं अर्किणः। अर्कः मन्त्रः। सः येषामस्ति ते अर्किणः। मन्त्रवन्तः होतारोऽपीत्यर्थः। ब्रह्माणः। ब्रह्मा नाम एक ऋत्विक्। तत्पुरुषा ब्रह्माणः। सभ्यादीनामपेक्षया बहुवचनम्। ब्रह्मादयः त्वां हे शतक्रतो। शतमिति बहुनाम। क्रतुरित्यपि कर्मनाम। बहूनि कर्माणि वृत्रवधादीनि यस्य बह्वयो वा प्रज्ञाः यस्य स शतक्रतुः। तस्य सम्बोधनं हे शतक्रतो। बहुकर्मन् बहुप्रज्ञ वेत्यर्थः। उद्वंशमिव येमिरे। उदित्ययमुपसर्गः येमिरे इत्याख्यातेन सम्बन्धयितव्यः। यथा कश्चिद्वंशमुद्यच्छति उत्क्षिपति। उच्छ्रयाच्चात्र वीर्यविवृद्धिरभिप्रेता। स्तूयमाना च देवता वीर्येण वर्धते। स्तुतिं कुर्वन्तः वीर्येण वर्धयन्तीत्यर्थः॥

सन्त्यष्टाविंशति ऋचो गायन्ति त्वेत्यनुष्टुभः ।
यदी वहन्त्याशव इत्यनया मरुतां स्तुतिः ॥
दधिक्राव्ण इति त्वस्या दधिक्रावाग्निरीडितः ।
इन्द्राग्न्योः कश्यपस्येति मित्रावरुणयोः परे ॥
अश्विनोः स्तुतिरित्येके सखायस्तेऽग्निसंस्तवः ।
वयश्चिदित्युषस्येयं वैश्वदेवी त्वमी इति ।
ऋक्सामयोः स्तुतिर्ऋचः सामेत्यैन्द्र्योऽपरा ऋचः ॥

मधुच्छन्दाः । गायन्ति स्तुवन्ति त्वा त्वां गायत्रिणो गीतिमन्त उद्गातारः । अर्चन्ति अर्कं अर्चनीयम् । अर्किणः शस्त्रिणः होतारः । एवं ब्रह्माणः उद्गातारः होतारश्च उद्येमिरे उद्गच्छन्ति । त्वां हे शतक्रतो शतकर्मन् शतप्रज्ञेति वा । वंशमिव बहवः पुरुषाः ॥ (१)

इन्द्रं विश्वा अवीवृधन् समुद्रव्यचसं गिरः ।
रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥

जेता नाम ऋषिः । तस्येदमार्षम् । इन्द्रं विश्वाः सर्वाः । अवीवृधन् वर्धयितवत्यः । वर्धयन्तु । कीदृशमिन्द्रम् । उच्यते । समुद्रव्यचसम् । समुद्रस्येव व्यचः व्याप्तिर्यस्य स समुद्रव्यचाः । तं समुद्रव्यचसम् । समुद्रव्याप्तिमित्यर्थः । काः पुनस्ता वर्धयन्ति । उच्यते । गिरः स्तुतयः । कीदृशमिन्द्रम् । उच्यते । रथीतमं रथीनाम् । वाजानाम् । षष्ठीनिर्देशात् पतिमित्येतेन सम्बन्धः । अन्नानां पतिम् । सत्पतिं सतां च पालयितारम् ॥

जेता माधुच्छन्दसः । इन्द्रमेव अवीवृधन् वर्धयन्ति । विश्वा गिरः स्तुतयः । समुद्रव्यचसं समुद्रस्य अन्तरिक्षस्येव व्यचो व्याप्तिः यस्य तम् । रथीतमं नेतृतमम् । रथीनां नेतॄणाम् । वाजानां अन्नानां बलानां वा । पतिं स्वामिनं सत्पतिम् । ज्येष्ठानां अधिपतिम् । इन्द्रो ज्येष्ठानामधिपतिः इति हि निगमो भवति ॥ (२)

इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदम् ।
शुक्रस्य त्वाभ्यक्षरन् धारा ऋतस्य सादने ॥

गोतमस्यार्षम् । इमं इन्द्र सुतं अभिषुतं सोमं पिब । कीदृशं सोमम् । उच्यते । ज्येष्ठं अतिशयेन प्रशस्यम् । अमर्त्यममरणधर्माणम् । मदं मदकरम् । शुक्रस्य शुक्रसंज्ञकस्य ग्रहस्य । धारा त्वां अभि । अभिशब्दः अभिरभागे (पा. १. ४. ९१) इत्येवं कर्मप्रवचनीयः प्रतिशब्देन समानार्थः । त्वां प्रति । अक्षरन् क्षरितवन्तः क्षरन्तु । काः । धाराः । ऋतस्य यज्ञस्य सम्बन्धिनि सदने वेद्याख्ये स्थाने इत्यर्थः ॥

गौतमः । इमं सुतं अभिषुतं सोमं पिब हे इन्द्र । ज्येष्ठं प्रशस्यतरम् । अमर्त्यं अमर्त्यताहेतुम् । मदं मदकरं इति विशेषणं वा संज्ञैव वा सोमस्य मदः इति । शुक्रस्य दीप्तस्य सोमस्य । धाराः त्वा त्वां अभि उद्दिश्य । अक्षरन् दशापवित्रं द्रोणकलशं प्रति । ऋतस्य यज्ञस्य सादने गृहे यज्ञवास्तुनि ॥ (३)

यदिन्द्र चित्र म इह नास्ति त्वादातमद्रिवः ।
राधस्तन्नो विदद्वस उभया हस्त्या भर ॥

अत्रिराह । हे इन्द्र चित्र विचित्र पूज्य वा । यत् मे इह गृहे नास्ति । त्वादातं त्वया दातव्यम् । त्वद्देयमित्यर्थः । हे अद्रिवः । अद्रिर्वज्रः । स यस्यास्ति सः अद्रिवान् । तस्य सम्बोधनं हे अद्रिवः । वज्रवन्नित्यर्थः । राधः धनं तत् । नः अस्मभ्यं हे विदद्वसो । विद्लृ लाभे इत्यस्येदं रूपम् । वसुशब्दः धनवचनः । तत् लब्धं येन स विद्वद्वसुः । तस्य सम्बोधनं हे विदद्वसो । लब्धधन इत्यर्थः । उभया । उभयशब्दादुत्तरस्य तृतीयाद्विवचनस्य सुपां सुलुक् (पा. ७. १. ३९) इति या

आदेशः । उभाभ्यामित्यर्थः । हस्त्या । हस्तशब्दादुत्तरस्य तृतीयाद्विवचनस्य सुपां सुलुक् (पा. ७. १. ३९) इति या आदेशः । हस्ताभ्यामित्यर्थः । आभर आनय । देहीत्यर्थः ॥

अत्रिः । यत् राधः धनं हे इन्द्र । चित्र पूजनीय । इदं मे मम । नास्ति इह लोके अद्रिवः अद्रिवन् वज्रिन् । तत् राधः नः अस्मभ्यं उभया हस्त्या उभाभ्यां हस्ताभ्यां संगृहीतम् । आभर आहर । त्वादातं त्वया देयमित्यर्थः । हे विदद्वसो । वेदयति लम्भयति वसूनीति विदद्वसुः ॥ (४)

श्रुधी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति ।
सुवीर्यस्य गोमतो रायस्पूर्धि महाँ असि ॥

तिरश्चिर्ऋषिः । तस्यार्षम् । श्रुधि शृणु । हवम् आह्वानम् । तिरश्च्या ऋषेः मम हे इन्द्र । कीदृशस्य ऋषेः शृणोति । उच्यते । यस्त्वां सपर्यति । सपर्यतीति परिचरणकर्मा । प्रथमपुरुषैकवचनमिदमुत्तमपुरुषैकवचनस्य स्थाने द्रष्टव्यम् । योऽहं त्वां परिचरामीत्यर्थः । अथवा तिरश्चिः आत्मानमेव परोक्षरूपेण प्रतिनिर्दिशति । यस्त्वां परिचरति । सुवीर्यस्य । वीर्यं सामर्थ्यम् । शोभनं यागकरणसामर्थ्यं यस्य स सुवीर्यः । तस्य सुवीर्यस्य । यागकरणसामर्थ्यस्येत्यर्थः । गोमतः । गोशब्देनात्र सोम उच्यते । सोमवत इत्यर्थः । श्रुत्वा च आगच्छ । एत्य च रायो धनम् । पूर्धि पूरय देहीति वा । कस्मात्पुनर्ददामि । उच्यते । महान् असि ॥

तिरश्चिराङ्गिरसः । श्रुधि शृणु । हवं स्तोत्रम् । तिरश्च्याः तिरश्चेः मम हे इन्द्र । यः तिरश्चिः त्वा त्वां सपर्यति परिचरति । श्रुत्वा च हवं सुवीर्यस्य शोभनवीर्यस्य । गोमतः गोभिर्युक्तस्य । रायः धनस्य । पूर्धि पूरय अस्मान् । पूरयतेः योगे करणे प्रायः षष्ठ्येव दृश्यते । महान् प्रवृद्धः असि त्वं सर्वैः धनादिभिः ॥ (५)

असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि ।
आ त्वा पृणक्त्विन्द्रियं रजः सूर्यो न रश्मिभिः ॥

गोतमस्यार्षम् । असावि अभिषुत सोमः हे इन्द्र । ते त्वदर्थम् । एतत् ज्ञात्वा हे शविष्ठ अतिशयेन बलवन् । धृष्णो शत्रूणामभिभवितः । आगच्छ । आगतं च सन्तं त्वा त्वां पृणक्तु । पृणिः पूरणार्थः । आपूरयतु त्वामित्यर्थः । इन्द्रियम् । अन्तर्णीतमत्वर्थमिदं द्रष्टव्यम् । इन्द्रियवन्तम् । अविकलेन्द्रियमित्यर्थः । कथं पुनरापूरयतु । उच्यते । रजः सूर्यो न रश्मिभिः । रजःशब्दः लोकवचनः । नशब्द उपमार्थीयः । सूर्यः लोकमिव । एतदुक्तं भवति । यथा पृथिवीलोकं अन्तरिक्षलोकं च सूर्यः रश्मिभिः आपूरयति तद्वत् आपूरयतु ॥

गौतमः । असावि सुतः आसीत् सोमः हे इन्द्र । ते त्वदर्थम् । हे शविष्ठ शूरतम । धृष्णो धर्षक शत्रूणाम् । अतः आगहि आगच्छ । आपृणक्तु त्वां पूरयतु त्वाम् । इन्द्रियं बलं सोमपानार्थम् । रजः अन्तरिक्षम् । सूर्यो न सूर्य इव रश्मिभिः ॥ (६)

एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम् ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥

नीपातिथिराह । आ इत्ययमुपसर्गः याहीत्याख्यातेन सम्बन्धयितव्यः । आयाहि हे इन्द्र हरिभिः आत्मीयैरश्वैः । उप समीपे । कथं पुनरागच्छामि । उच्यते । कण्वस्य सुष्टुतिम् । लुप्तोपममेतद्द्रष्टव्यम् । कण्वस्य स्तुतिमिव । एतदुक्तं भवति । यथा कण्वस्य स्वभूतां शोभनां स्तुतिं प्रति आगच्छति तद्वत् आगच्छेत्यर्थः । कुतः पुनरागच्छामि ।

उच्यते । दिवः द्युलोकादित्यर्थः । कृते च कार्ये अमुष्य । षष्ठ्येकवचनमिदं पञ्चम्येकवचनस्य स्थाने द्रष्टव्यम् । अमुष्मात् पृथिवीलोकात् । शासतः । पञ्चम्येकवचनमिदं प्रथमैकवचनस्य स्थाने द्रष्टव्यम् । शासन् । ये तव द्युलोकं प्रति गच्छतः असुरा विप्रकुर्वन्ति तान् शासन् प्रशासयन्नित्यर्थः । दिवं द्युलोकं यय प्रतिगच्छ । हे दिवावसो दीप्तधन ॥

काण्वो नीपातिथिः । आयाहि हरिभिः हे इन्द्र । कण्वस्य पुत्रस्य मम नीपातिथेः सुष्टुतिमुप प्रति । दिवो लोकस्य अमुष्य दूरे दृश्यमानस्य । शासतः ईशानस्य । अमुं लोकं शासत इत्यर्थः । अधीगर्थदयेशां कर्मणि (पा. २. ३. ५२) इति शेरर्थे वर्तमानस्य शास्तेः योगात् कर्मणि षष्ठी । ईदृशस्य तव दिवं स्तुतिम् । ययेति यातेः प्रापणकर्मणो लडर्थे लिटि उत्तमपुरुषैकवचनम् । ण्यर्थोऽप्यन्तर्णीतः । प्रापयामि । हे दिवावसो दीप्तावासक ॥(७)

आ त्वा गिरो रथीरिवास्थुः सुतेषु गिर्वणः ।
अभि त्वा समनूषत वत्सं न धेनवः ॥

तिरश्चिराह । आ इत्ययमुपसर्गः अस्थुरित्याख्यातेन सम्बध्यते । आ अस्थुः आस्थितवत्यः । आश्रिता इत्यर्थः । त्वा त्वाम् । गिरः अस्मदीयाः स्तुतयः । कथं पुनराश्रिताः । उच्यते । रथीरिव यथा कश्चिद्रथी रथं आतिष्ठति तद्वत्त्वामाश्रिता इत्यर्थः । कस्मिन् काले । उच्यते । सुतेषु अभिषुतेषु सोमेषु । गिर्वणः । गिरः स्तुतयः । ताभिर्यो वन्यते सम्भज्यते स गिर्वणः । तस्य सम्बोधनं हे गिर्वणः । गीर्भिः सम्भजनीय इत्यर्थः । किंच अभि त्वा आभिमुख्येन त्वां समनूषत समनूषयन्ति । संशब्दयन्ति मदीया ऋत्विजः । कथं पुनः संशब्दयन्ति । उच्यते । गावो वत्सं न यथा गावः वत्सं संशब्दयन्ति तद्वदित्यर्थः । कीदृश्यो गावः शब्दयन्ति । उच्यते । धेनवः अचिरप्रसूता इत्यर्थः ॥

तिरश्चिः अस्याः परस्याश्च । आ अस्थुः त्वा त्वाम् । गिरः स्तुतयः । सुतेषु सोमेषु । तव हृदयं आरोहन्तु इत्यर्थः । रथीरिव रथवानिव रथम् । हे गिर्वणो गीर्भिर्वननीय । अभि समनूषत अभिसंस्तुवन्ति त्वां स्तोतारः । गावः वत्सं न धेनवः ॥ (८)

एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना ।
शुद्धैरुक्थैर्वावृध्वांसं शुद्धैराशीर्वान् ममत्तु ॥

तिरश्चिः आह आत्मीयानृत्विजः । आ इत आगच्छत । उ इति पदपूरणः । नु क्षिप्रम् । किमर्थं पुनरागच्छामः । उच्यते । इन्द्रं स्तवाम इन्द्रं स्तोतुमाशास्महे । कीदृशमिन्द्रम् । उच्यते । शुद्धं शुद्धेन शुद्धसंज्ञकेन साम्ना । न केवलेन साम्ना । किं तर्हि । शुद्धैः उक्थैः स्तोत्रैश्च । कीदृशमिन्द्रम् । उच्यते । वावृध्वांसं वृद्धम् । वर्धयन्तमित्यर्थः । शुद्धः इन्द्रः आशीर्वान् । सोममिश्रितं दधि आशिरमुच्यते । तद्यस्यास्ति सः आशीर्वानिन्द्रः । सः ममत्तु अत्यर्थं तृप्यतु । कस्य । सामर्थ्यात्तस्यैव दधिमिश्रितस्य ॥

आ इत उ इति त्रयाणां समुदायः एतो इति । आगच्छ हे स्तोतारः नु क्षिप्रं इन्द्रं स्तवाम वयम् । शुद्धमिन्द्रं शुद्धेन साम्ना । शुद्धैरुक्थैः शस्त्रैः । ववृध्वांसं वृद्धं इन्द्रम् । वृधेर्लिटः क्वसोः रूपं ववृध्वानिति । शुद्धैः इत्यस्य विशेष्याश्रवणादुक्थैः इति पुरस्ताच्छ्रवणात् स्तोत्रैः इति अध्याहार्यम् । शुद्धैः स्तोत्रैः आशीर्वान् आशीस्संयुक्तः ममत्तु मादयतु इन्द्रम् ॥ (९)

यो रयिं वो रयिंतमो यो द्युम्नैर्द्युम्नवत्तमः ।
सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः ॥

शंयोरार्षम् । यः रयिवः । रयिरिति धननाम । तद्यस्यास्ति स रयिवान् धनवान् । तस्य सम्बोधनं हे रयिवः । धनवन्नित्यर्थः । रयितमः

धनतमः । सर्वधनेभ्यः प्रकृष्ट इत्यर्थः । यश्च द्युम्नैः सवनीयपुरोडाशादिभिः अन्नैर्यानि वा यागस्य फलभूतानि यजमानेभ्यो ददाति तैः द्युम्नवत्तमः । सोमः सुतः अभिषुतः सः हे इन्द्र ते तवार्थाय अस्ति विद्यते अस्मद्यज्ञे हे स्वधापते । तेन सोमेन मद तृप्यस्व ॥

शंयुः बार्हस्पत्यः । यः सोमः रयिं धनम् । प्रयच्छति इति शेषः । व इति वचनव्यत्ययः । तव ये परिचारकाः ते इत्यर्थः । रयितमः । रयिशब्दात् व्रीह्यादित्वादिनिः । यश्च द्युम्नैः यशोभिः तद्वत्तमः । द्युम्नानि च प्रयच्छतीत्यर्थः । स सोमो मदः मदकरः हे इन्द्र ते त्वदर्थं सुतोऽभिषुतः । अस्ति विद्यते । तिष्ठतीत्यर्थः । हे स्वधापते अन्नपते सोमपते । तमागत्य पिब इति शेषः (१०)

इति चतुर्थे षष्ठी दशती

प्रत्यस्मै पिपीषते विश्वानि विदुषे भर ।
अरंगमाय जग्मयेऽपश्चादध्वने नरः ॥

भरद्वाजस्यार्षम् । आत्मीयमध्वर्युमाह । अस्मै इन्द्राय । पिपीषते पातुमिच्छते । विश्वानि सर्वाणि ग्रहचमसादीनि पात्राणि । विदुषे यत्किंचित् ज्ञेयं तस्य सर्वस्य ज्ञात्रे । प्रतिहर । प्रतिशब्दः धात्वर्थानुवादी लम्बते प्रलम्बते इति यथा । भर । भरेत्येतच्च हरतेः रूपं हृग्रहोर्भश्छन्दसि (वा. ८. २. ३२) इति हकारस्य भकारापत्त्या । हर । होमार्थमा-

हवनीयदेशं नय। अथवा प्रतिशब्दो लक्षणाकर्मप्रवचनीयः। प्रतिहर अध्वर्यो। कीदृशाय इन्द्राय। उच्यते। अरंगमाय। अरं अलं पर्याप्तं शत्रून् प्रति गमनाय। जग्मये गन्त्रे गमनशीलाय। अपश्चाद्ध्वने। दध्नातिर्गतिकर्मा। अपश्चाद्गामिने इत्यर्थः। नरः प्रथमैकवचनमिदं चतुर्थ्येकवचनस्य स्थाने द्रष्टव्यम्। नराय मनुष्याकाराय॥

भरद्वाजः। प्रतिभर उपहर सोमं अध्वर्यो। अस्मै इन्द्राय। पिपीषते पातुमिच्छते। विश्वानि वेद्यानि विदुषे। अरङ्गमाय पर्याप्तगमनाय क्षिप्रगमनाय इति वा। जग्मये गमनशीलाय यज्ञान् प्रति। अपश्चाद्ध्वने। दघ्निर्गतिकर्मा। पश्चादर्थे पश्चेत्यव्ययम्। पश्च पश्चा च छन्दसि (पा. ५. ३. ३३) इति। अग्रगामिने इत्यर्थः। नर इति नृशब्दाच्चतुर्थ्यर्थे षष्ठी। ऋतो गुणश्छान्दसः। अपश्चाद्ध्वने नरे (ऋ. वे. ६. ४२. १) इति बह्वृचा अधीयन्ते। नरे नायकाय विश्वस्य॥ (१)

आ नो वयो वयःशयं महान्तं गह्वरेष्ठाम्।
महान्तं पूर्विनेष्ठामुग्रं वचो अपावधीः॥

वामदेवस्यार्षम्। यस्त्वं महान्तं गह्वरेष्ठाम्। गह्वरे पर्वतदेशे यस्तिष्ठति स गह्वरेष्ठाः मेघः। तं गह्वरेष्ठाम्। अपावधीरित्येतत्पुरस्तादपकृष्टव्यम्। प्रथमपुरुषैकवचनमिदं मध्यमपुरुषैकवचनस्य स्थाने द्रष्टव्यम्। अपावधीरिति। यस्त्वं महान्तं गह्वरेष्ठां अपावधीः। यश्च त्वं महान्तं पूर्विणेष्ठाम्। पूरणसमर्थं पूर्वं बहु उदकम्। तद्यस्यास्ति स पूर्विण उदकवान् मेघः। तस्मिन् हूयमाने यः प्रत्यवतिष्ठते त्वदीयः पुत्रः पौत्रो वा स पूर्विणेष्ठाः। तं पूर्विणेष्ठाम्। यस्त्वमपावधीः। यश्च त्वं उग्रं वचः अप्रसह्यं वचनं शत्रोः स्वभूतं अपावधीः तं त्वां ब्रूमः॥

वामदेवः । आ इत्युपसर्गदर्शनात् योग्यक्रियापदाध्याहारः । आहर नः अस्मभ्यम् । रयिमिति शेषः । वयो वयःशयं वयसि अन्ने यौवनादिषु वा गतं प्राप्तम् । शयतेः शयः । सर्वान्नसाधकमिति वा सर्वावस्थासु अनुगतमिति वा । महान्तं अपरिमितम् । गह्वरेष्ठाम् । गह्वरे गुहायां तिष्ठतीति गह्वरेष्ठाः । आतो मनिन्क्वनिब्वनिपश्च (पा. ३. २. ७४) इति चकारात् तिष्ठतेर्विट्-प्रत्ययः । अनपहार्यमित्यर्थः । महान्तमिति पुनर्वचनं अर्थभूयस्त्वाय । अत्यर्थं महान्तमिति । पूर्विणेष्ठाम् । पूर्वसिद्धं पूर्विणम् । गम्भीरेभिः पथिभिः पूर्विणेभिः (का. सं. १. ६) इति निगमः । पूर्वेषु स्थितम् । कुलक्रमागतमिति यावत् । पुत्रो वा अनया प्रार्थ्यते । वयो वयःशयमिति पूर्णायुषमित्युक्तं भवति । गह्वरेष्ठा-मिति रहस्येषु यज्ञेषु निष्ठितमिति । पूर्विणेष्ठामिति पुरातने मार्गे वेदात्मके निष्ठितमिति । उग्रं वचः शत्रुभिः उद्गूर्णं उद्यतं वचः अभिशंसनादिकम् । अपावधीः अपजहि । छन्दसि लुङ्लङ्लिटः (पा. ३. ४. ६) इति लोडर्थे लुङ् ॥ (२)

आ त्वा रथं यथोतये सुम्नाय वर्तयामसि ।
तुविकूर्मिमृतीषहमिन्द्रं शविष्ठ सत्पतिम् ॥

प्रियमेधा आह । आ इत्ययमुपसर्गः वर्तयामसीत्याख्यातेन सम्बन्ध-यितव्यः । आवर्तयामः स्तुतिभिः हविर्भिश्च अभिमुखं कुर्म इत्यर्थः । त्वा त्वाम् । रथं यथा । यथा कश्चित् रथमावर्तयति तद्वदावर्तयामः । किमर्थम् । उच्यते । ऊतये अवनाय पालनाय । सुम्नाय सुखाय । कीदृशं त्वाम् । उच्यते । तुविकूर्मिम् । तुवीति बहुनाम । कूर्मिः कर्ता । बहूनां वृत्रवधा-दीनां कर्मणां कर्तारम् । ऋतीषहम् । ऋतयः सेनाः गन्तृत्वात् । ता यः सहते अभिभवति स ऋतीषाट् । तं ऋतीषाहम् । परकीयानां सेनानां अभिभवितारमित्यर्थः । इन्द्रं शविष्ठ । सम्बुद्ध्येकवचनमिदं द्वितीयैक-वचनस्य स्थाने द्रष्टव्यम् । शविष्ठं अतिशयेन बलवन्तम् । सत्पतिं सतां पालयितारमित्यर्थः ॥

प्रियमेधाः। आवर्तयामसि आवर्तयामः अभिवर्तयामः स्तुतिभिः। ऊतये तर्पणाय रक्षणाय वा। सुम्नाय सुखाय चास्माकम्। रथं यथेति जगन्निर्वाहकत्वादुपमा। तुविकूर्मिं बहुकर्माणम्। ऋतीषहं ऋतीनां अरीणां सोढारं अभिभवितारम्। इन्द्रमीश्वरम्। सत्पतिं त्वां हे शविष्ठ शूरतम ॥ (३)

स पूर्व्यो महोनां वेनः क्रतुभिरानजे।
यस्य द्वारा मनुः पिता देवेषु धिय आनजे ॥

प्रगाथ आह। स मनुष्यः पूर्व्यः प्रथम इत्यर्थः। महोनाम्। घकारस्य हकारापत्तिः छान्दसी। मघोनां मघवतां धनवतां मध्ये। वेनः कान्तः। क्रतुभिः कर्मभिः ज्योतिष्टोमादिभिः। आनजे व्यक्तीकरोति आत्मानम्। सः प्रथमं यागं करोतीत्यर्थः। यस्य द्वारा द्वाराणि। सामर्थ्यात् आधानादीनि। मनुर्ज्ञाता सर्वस्य इन्द्रः। पिता पालयिता। देवेषु देवानां मध्ये। धियः यागविषयाः प्रज्ञाः। बुद्धीरित्यर्थः। आनजे। अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु इत्येतस्य गत्यर्थस्य अन्तर्णीतण्यर्थस्य चेदं रूपम्। आगमयति। उत्पादयतीत्यर्थः। एतदुक्तं भवति। यस्य यागद्वारभूतानि आधानादीनि यागविषयाश्च बुद्धीः सर्वस्य ज्ञाता इन्द्र उत्पादयति। स प्रथमं यागं करोतीति समस्तार्थः ॥

प्रगाथः। स इन्द्रः। पूर्व्यः मुख्यः। महोनां महीयमानानां पूज्यानाम्। वेनः प्राज्ञः कमनीयो वा। क्रतुभिः कर्मभिः सर्वैः। आनजे प्राप्यते। अज गतौ। यस्य इन्द्रस्य द्वारा द्वारभूतेन। मनुः प्रजापतिः। पिता पितृसमः। तस्य देवेषु इन्द्रियेषु। धियः प्रज्ञानानि। आनजे निक्षिप्तवान्। अज क्षेपणे। इन्द्रो हि प्राणाः। तदधिष्ठितानीन्द्रियाणि ज्ञानानि जनयन्ति। अतः इन्द्रस्य स्वभूतानि इन्द्रियाणि इत्युच्यते .. (४)

यदी वहन्त्याशवो भ्राजमाना रथेष्वा ।
पिबन्तो मदिरं मधु तत्र श्रवांसि कृण्वते ॥

श्यावाश्वस्यार्षम् । यदीत्ययं यत्रेत्येतस्य स्थाने । यत्र यजमानगृहे । वहन्ति । रथेषु आ इत्ययमाकारः पुरस्तादपकृष्यते । आवहन्ति । कं आवहन्ति । प्रकृतत्वादिन्द्रम् । के आवहन्ति । सामर्थ्यात् अश्वाः । कीदृशाः अश्वाः । उच्यते । आशवः शीघ्राः । भ्राजमानाः विविधं दीप्यमानाः । रथेषु नियुक्ताः सन्त इति वाक्यशेषः । पिबन्ति मदिरं मदकरं मधु । तत्र तस्मिन् यजमानगृहे । श्रवांसि विविधानि अन्नानि । कृण्वते । करोतिः क्रियासामान्यवचनः ददात्यर्थे वर्तते । ददते । यानि चात्र इन्द्रः तैरानीतः अन्नानि ददाति तानि ते एव ददते इति ह्युपदिश्यते ॥

श्यावाश्व आत्रेयः । यदीत्यव्ययं यत्प्रातिपदिकार्थे वर्तते । यदि यत्र देशे । वहन्तीत्यनेन उपरितन आकारः संबध्यते । आवहन्ति । वहिर्गतिकर्मा । आगच्छन्ति । आशवः क्षिप्रगामिनः । रथेषु भ्राजमानाः मरुतः । पिबन्तो मदिरं मधु सोमम् । तत्र श्रवांसि कृण्वते कुरुते वृष्टिद्वारा ॥ (९)

त्यमु वो अप्रहणं गृणीषे शवसस्पतिम् ।
इन्द्रं विश्वासाहं नरं शचिष्ठं विश्ववेदसम् ॥

शंयोरार्षम् । त्यशब्दः तच्छब्दपर्यायः । तच्छब्दश्रुतेश्च योग्यार्थसम्बन्धः यच्छब्दोऽध्याह्रियते । य उक्तगुणोऽसि तम् । उ इति पदपूरणः । वः । बहुवचनमिदमेकवचनस्य स्थाने द्रष्टव्यम् । त्वाम् । अप्रहणं केनचित्प्रहर्तुमशक्यम् । गृणीषे । गृ स्तुतावित्यस्येदं रूपम् । मध्यमपुरुषैकवचनं च उत्तमपुरुषैकवचनस्य स्थाने द्रष्टव्यम् । गृणे स्तौमीत्यर्थः ।

कीदृशम् । उच्यते । शवसः पतिं बलस्य स्वामिनम् । कम् । इन्द्रम् । विश्वासाहं सर्वेषां शत्रूणामभिभवितारम् । नरं नराकारम् । शचिष्ठं अतिशयेन अन्नवन्तम् । विश्ववेदसं सर्वज्ञं सर्वधनं वा ॥

शंयुः । त्यं तं इन्द्रम् । उः पूरणः एवार्थे वा । वः यूयम् । अप्रहणं अप्रहन्तारम् । गृणीषे इति वचनव्यत्ययः । स्तुत । व इत्यत्र वा वचनव्यत्ययः । त्वं स्तुहि स्तोतः इति । शवसो बलस्य पतिम् । इन्द्रं विश्वासाहं विश्वस्य शत्रोः अभिभवितारम् । नरं नेतारम् । शचिष्ठं शूरतमम् । विश्ववेदसं विश्वस्य द्रष्टारम् ॥ (६)

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत् प्र न आयूंषि तारिषत् ॥

वामदेवस्यार्षम् । दधन् अश्वरूपं यः क्रामति स दधिक्रावा । तस्य दधिक्राव्णः । अकारिषं करोम्यहम् । किम् । सामर्थ्यात्स्तुतीः । जिष्णोः शत्रूणां जेतुः । अश्वस्य वाजिनः वेगवतः । अथवा जिष्णुर्नामाश्वः । तस्य वाजिनः । स परितुष्टः नः अस्माकं सुरभीणि मुखानि करत् करोतु । प्र ण आयूंषि तारिषत् । तरतिर्वृध्यर्थः । आयूंषि जीवितानि समपूरयत् ॥

वामदेवः । दधिक्रावा अग्निविशेषः । अग्निस्तु पुरा अश्वरूपोऽवसदिति हि निगमः । अश्वरूपं कृत्वा यदश्वत्थेऽतिष्ठत् देवेभ्यो निलाय इति । धारयति क्रामयति देशान्तरं प्रापयति इति दधिक्रावा अग्निः। क्रमेर्वनिन्प्रत्यये विड्वनोरनुनासिकस्यात् (पा. ६. ७. ४१) इति अनुनासिकस्याकारादेशः । दधिक्राव्णो देवस्य परिचरणम् । अकारिषमिति पञ्चमलकारान्तम् । करोतेर्लिङर्थे लेट् (पा. ३. ४. ७) इति लेटि कृते लेटो मिप् । लेटोऽडाटौ (पा. ३. ४. १४) इति मिपोऽडागमः । सिब्बहुळं लेट् (पा. ३. १. ३४) इति सिपि तस्य

आर्धधातुकस्येड्वलादेः (पा. ७. २. ३५) इति इडागमः। सिब्बहुलं छन्दसि णिद्वक्तव्यः (वा. ३. १. ३४–७) इति सिपो णिद्वद्भावस्यानुशासनात् अचो ञ्णिति (पा. ७. २. ११५) इति वृद्धिः। इतश्च लोपः परस्मैपदेषु (पा. ३. ४. ९७) इति इकारलोपः। छन्दस्यपि दृश्यते (पा. ६. ४. ७३) इति अडागमः। अकारिषं करवाणीति प्रार्थना। जिष्णोः जयशीलस्य। वाजिनः अन्नवतः वेगवतो वा अश्वस्य। स च दधिक्रावा सुरभि। शेश्छन्दसि बहुलम् (पा. ६. १. ७०) इति शेर्लुक्। सुगन्धीनि शुद्धानि। करत् करोतु। नः अस्माकम्। मुखा मुखानि। प्रतारिषत् वर्धयतु च नः आयूंषि ॥ (७)

पुरां भिन्दुर्युवा कविरमितौजा अजायत।
इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥

जेता इन्द्रमाह। पुरां भिन्दुः असुरपुराणां भेत्ता। युवा तरुणः। कविर्मेधावी। अमितौजाः अपरिमितबलः। अजायत जातः। जन्मप्रभृति ईदृश इत्यर्थः। कः। उच्यते। इन्द्रः। विश्वस्य सर्वस्य। कर्मणः दर्शपौर्णमासादेः। धर्ता धारयिता। कथम्। सर्वस्य कर्मणः वृष्ट्यायत्तत्वात्। वृष्टेश्च इन्द्रायत्तत्वात्। वज्री वज्रवान्। पुरुष्टुतः बहुभिर्यजमानैः स्तुतः ॥

जेता। पुरां आसुरीणां भिन्दुः भेत्ता। युवा नित्यमेव। कविः कमनीयः। अमितौजाः अपरिमितबलश्च अजायत। इन्द्रः विश्वस्य शुभाशुभात्मकस्य कर्मणः। धर्ता धारयिता विवेक्ता वज्री पुरुष्टुतः। एवंभूतः इन्द्रः जायमान एव अमितौजाः अभवत् इत्यर्थः ॥ (८)

चतुर्थे सप्तमी दशती

प्र प्र वस्त्रिष्टुभमिषं वन्दद्वीरायेन्दवे ।
धिया वो मेधसातये पुरन्ध्या विवासति ॥

प्रियमेधस आर्षम् । प्र प्र । एकः प्रशब्दः प्रसमुपोदः पादपूरणे (पा. ८. १. ६) इति पादपूरणार्थः । प्रेत्युपसर्गश्रुतेः वः इति च संप्रदानश्रुतेः ददातिक्रिया अध्याह्रियते । प्रददामि वः प्रकर्षेण ददामि युष्मभ्यम् । किम् । उच्यते । त्रिष्टुभमिषं त्रिभिः स्तुतमन्नमित्यर्थः । अथवा त्रिष्टुप्छन्दोयुक्तम् । स्तुतिसंयुक्तमित्यर्थः । कीदृशाय तुभ्यम् । वन्दद्वीराय अधिकविक्रान्ताय इत्यर्थः । इन्दवे । इदि परमैश्वर्ये इत्यस्य रूपम् । सर्वदेवानां परमेश्वरायेत्यर्थः । अपिच मदीय ऋत्विक् धिया स्वया प्रज्ञया । वः । बहुवचनमिदमेकवचनस्य स्थाने द्रष्टव्यम् । त्वाम् । मेधसातये । अपठितमपि यज्ञनामैतत् द्रष्टव्यम् । चतुर्थ्येकवचनमिदं सप्तम्येकवचनस्य स्थाने द्रष्टव्यम् । मेधसातौ । यज्ञे इत्यर्थः । पुरन्ध्या बहुविधेन दर्शपूर्णमासादिकर्मणा । आविवासति परिचरतीत्यर्थः ॥

प्रियमेधाः । प्र प्र इति द्विरुक्तिः पादपूरणार्था । उपसर्गदर्शनादाख्याताध्याहारः । प्रभरत । वः यूयम् । त्रिष्टुभं त्रिस्तोत्रम् । इषं अन्नम् । सोममित्यर्थः । त्रिष्वपि अभिषवेषु पवमानस्य स्तुतिः क्रियते । स्तोभतेः स्तुतिकर्मणः स्तुप् । मन्दद्वीराय । मादयति वीरान् स्तोतॄन् इति मन्दद्वीरः । तस्मै । इन्दवे । इन्द्रशब्दस्य यन्निर्वचनं तदत्र इन्दुशब्दे कर्तव्यम् । तत्र संग्रहेण किंचित् क्रियते । इरां ददातीति वा इन्देर्वा परमैश्वर्यकर्मण इन्द्रः । स च इन्द्रः धिया स्तुत्या हेतुना । वः युष्मान् आविवासति अभिगच्छति । मेधसातये यज्ञसंभजनाय । पुरन्ध्या पुरूणां धारयित्र्या धिया ॥ (१)

कश्यपस्य स्वर्विदो यावाहुः सयुजाविति ।
ययोर्विश्वमपि व्रतं यज्ञं धीरा निचाय्य ॥

कश्यपस्यार्षम् । मम कश्यपस्यर्षेः स्वर्विदः स्वर्गस्य लोकस्य द्रष्टुः । यौ आहुः सयुजौ अश्वौ इति । एवं स्थिते ययोरश्वयोः विश्वं सर्वं अपि व्रतम् । व्रतशब्देनात्र कर्म वा अभिधीयते । ताविन्द्रस्याश्वौ यज्ञमस्मदीयम् । धीराः । बहुवचनमिदं द्विवचनस्य स्थाने द्रष्टव्यम् । धीरौ । निचाय्य नितरां चाययन्ति चेतयन्ति ॥

वामदेवः । कश्यपस्य प्रजापतेः । आदित्यो वा कश्यप इति उच्यते । तथाहि केचिदामनन्ति ।

आरोगोभ्राजः पटरः पतङ्गः
स्वर्णरो ज्योतिषीमान् विभासः ॥ (तै. आ. १. ७. १)

इति सप्तादित्यान् उक्त्वा—कश्यपोऽष्टमः । स महामेरुं न जहाति (तै. आ. १. ७. १) इति । तथा—ते अस्मै सर्वे कश्यपात् ज्योतिर्लभन्ते (तै. आ. १. ७. २) इति । अस्मै । अस्मादित्यर्थः । कश्यपः पश्यको भवति । यत्सर्वं परिपश्यति इति कश्यपशब्दनिर्वचनं आमनन्ति (तै. आ. १. ८. ८) तस्य यौ देवौ सयुजौ सहचरौ इत्याहुः । स्वर्विदः वेदविदः । विश्वमपि व्रतं कर्म जगद्विषयं वर्षधारणादिकं ययोरेव आहुः । यज्ञं च प्रीणनं च ययोरेव आहुः । धीराः प्राज्ञाः । निचाय्य ज्ञात्वा प्रमाणयुक्तिभिः । तौ मित्रावरुणौ । अहर्वै मित्रो रात्रिर्वरुणः इति सर्वस्य कालस्य तयोरेव अन्तर्भावात् । इन्द्राग्नी वा तयोरेव सर्वनिर्वाहकत्वात् । अश्विनौ वा तयोरादित्यपुत्रत्वप्रसिद्धेः ॥ (२)

अर्चत प्रार्चत नरः प्रियमेधासो अर्चत ।
अर्चन्तु पुत्रका उत पुरमिद्धृष्ण्वर्चत ॥

प्रियमेधा आत्मीयान् ऋत्विज आह । अर्चत पूजयत । इन्द्रं स्तुत इत्यर्थः । प्रार्चत च प्रकर्षेण अर्चत । नरः मनुष्याः । यूयमपि हे प्रियमेधासः प्रियमेधसः पुत्राः अर्चन्तु । पुत्रकाः पौत्रा इत्यर्थः । एतेऽपि

अर्चन्तु । उतशब्दः पदपूरणः । कथम् । उच्यते । पुरमित् धृष्णु । इच्छब्द इवशब्दस्यार्थे । पुरमिव धृष्णुः । यथा कश्चित्पुमान् धृष्णुं दृढं अभिभवनं परकीयानां सेनानां अर्चति तद्वदर्चत इत्यर्थः ॥

प्रियमेधाः । अर्चत स्तुत । ऋच स्तुतौ । प्र प्रकर्षेण अर्चत हे नरः प्रियमेधासः । आत्मानमेव बहुवचनेन निर्दिश्य आह ऋषिः । अर्चत इति पुनरुक्तय आदरार्थाः । इन्द्रं अर्चन्तु पुत्रकाः मदीयाः । उत अपि च । पुरमित् पुरमिव । धृष्णु धर्षकं शत्रूणां इन्द्रं अर्चत ॥ (३)

उक्थमिन्द्राय शंस्यं वर्धनं पुरुनिष्षिधे ।
शक्रो यथा सुतेषु णो रारणत्सख्येषु च ॥

मधुच्छन्दा आह । उक्थं इन्द्राय इन्द्रस्यार्थाय । शंस्यं शंसनीयम् । कीदृशम् । उच्यते । वर्धनं वर्धयितृ । कस्य । सामर्थ्यादिन्द्रस्य । कीदृशाय इन्द्राय । उच्यते । पुरुनिष्षिधे । पुरु इति बहुनाम । बहूनां शत्रूणां निषेधयित्रे इत्यर्थः । कथं पुनः शंस्यम् । उच्यते । शक्रः यथा सुतेषु अभिषुतेषु सोमेषु । नः अस्माकं स्वभूतेषु । रारणत् । रमेरेतद्रूपम् । छान्दसेन मकारस्य णत्वम् । अत्यर्थं रमते । न केवलं सोमेषु । किं तर्हि । सख्येषु च अस्माभिः सह सुतैः गुणप्रतिपादनमनेन प्रकारेण क्रियते । अधिगुणशंसिनो हि देवाः । यथा उक्थेषु सख्येषु च रमते तथा शंस्यम् ॥

मधुच्छन्दाः । उक्थं शस्त्रम् । इन्द्राय इन्द्रमुद्दिश्य । शंस्यं शंसनीयं युष्माभिः । वर्धनं इन्द्रस्य । पुरुनिष्षिधे बहूनां असुराणां निष्षिधे निषेधकाय इन्द्राय । शक्रः शक्तः इन्द्रः । सुतेषु सोमेषु । सख्येषु सखिकर्मसु स्तोत्रेषु च । नः अस्मदीयेषु । रारणत् भृशं रमते । रमेर्वर्णव्यत्ययः । रणिरेव वा रमेरर्थे वर्तते । यथा रारणत् तथा शंस्यम् ॥ (४)

विश्वानरस्य वस्पतिमनानतस्य शवसः ।
एवैश्च चर्षणीनामूती हुवे रथानाम् ॥

प्रियमेधस आर्षम् । तस्य विश्वानरस्य । व इति द्वितीयाबहुवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । त्वाम् । पतिं स्वामिनम् । न केवलस्य । अनानतस्य च शवसः सर्वस्य बलस्य स्वामिनम् । एवैश्च । एवाः कामाः । तैश्च । निषिक्तभूतैर्यान् यान् कामान् प्रार्थयन्ते तांस्तान् संपादयत्यनेन प्रकारेण कर्मैर्निमित्तभूतैः । चर्षणीनां मनुष्याणां स्वामिनम् । एवंगुणविशिष्टं भवन्तं ऊती । चतुर्थ्येकवचनस्य स्थानेऽयमीकारः । अवनाय पालनार्थम् । हुवे आह्वयामि । कस्य पालनार्थं आह्वयामि । उच्यते । रथानामात्मीयानाम् ॥

प्रियमेधाः । विश्वानरस्य विश्वान् प्रत्यृतस्य । विश्वनेतुः इति वा । अनानतस्य उच्छ्रितस्य । शवसो बलस्य पतिम् । वः त्वाम् । विश्वानरस्य आदित्यस्य यत् शवः तत्पतिमिति यास्कः (नि. १२. २१) एवैः कामैश्च । चर्षणीनां मनुष्याणाम् । तत् संपादयितुमित्यर्थः । रथानां ऊती ऊत्या पथा । रथ्येन मार्गेण अन्तरिक्षेण । अथवा रथानामेव पथा भूमावित्यर्थः । हुवे ह्वयामि ॥ (९)

स घा यस्ते दिवो नरो धिया मर्तस्य शमतः ।
ऊती स बृहतो दिवो द्विषो अंहो न तरति ॥

भरद्वाज आह । स इति ऊती स इति सशब्देन सम्बन्धयितव्यः । वीप्साश्रुतेः य इत्यत्रापि वीप्सा द्रष्टव्या । यो यः । घ इति पदपूरणः । ते । षष्ठ्येकवचनं द्वितीयैकवचनार्थे ज्ञेयम् । दिवः । इदमपि द्वितीयैकवचनान्तं द्रष्टव्यम् । दिवं दीप्तम् । नरः । इदमपि प्रथमैकवचनं द्वितीयार्थे ज्ञेयम् । नरं नराकारम् । धिया स्तुत्याख्येन कर्मणा । स्तौति इति वाक्य-

शेषः । मर्तस्य । षष्ठ्येकवचनमिदं प्रथमैकवचनस्य स्थाने द्रष्टव्यम् । मर्त्यः मनुष्यः । शमतः । शमेरुपशमार्थस्य अन्तर्णीतण्यर्थस्य च शतरि एतद्रूपम् । शत्रूणामुपशमयितुः तव स्वभूतया । ऊती ऊत्या पालनेन । त्वया पाल्यमान इत्यर्थः । द्विषः । द्वेष्टुः । अंहो न पापमिव । तरति निस्तरति । अतिक्रामतीत्यर्थः ॥

भरद्वाजः । यः नरः । दिवः द्योतमानस्य । ते सखा स्तोता भवति । मर्तस्य मनुष्यस्य । धिया स्तुत्या । शमतः स्तूयमानस्य । शमिः स्तुतिकर्मा । शशमान इति हि स्तुतिकर्मसु पठितम् । परस्मैपदयगभावौ छान्दसौ । मनुष्याणां स्तोत्रैः अखिलैः स्तूयमानस्य तव यः सखा भवति स नरः । ऊती ऊत्या रक्षया । बृहतः महतः । दिवः द्योतनादियुक्तस्य तव ऊती इति सम्बन्धः । द्विषः द्वेष्टृजनस्य । अंहः अनर्थं कर्म । न तरति न प्राप्नोति ॥ (६)

विभोष्ट इन्द्र राधसो विभ्वी रातिः शतक्रतो ।
अथा नो विश्वचर्षणे द्युम्नं सुदत्र मंहय ॥

अत्रिराह । दानहोमयागादिक्रियासु विभवतीति विभुः प्रभूतः । तस्य विभोः । प्रभूतस्येत्यर्थः । ते तव स्वभूतस्य । हे इन्द्र राधसः धनस्य । विभ्वी रातिः प्रभूतं दानमित्यर्थः । हे शतक्रतो बहुप्रज्ञ बहुकर्मन् वा । य एवं अथ एतस्मात्कारणात् । नः अस्मभ्यम् । हे विश्वचर्षणे विश्वस्य जगतः द्रष्टः । द्युम्नं धनम् । हे सुदत्र । शोभनं दत्तं दानं यस्य स सुदत्रः । तस्य सम्बोधनं हे सुदत्र । हे शोभनदान इत्यर्थः । मंहय । महतिर्दानकर्मा । देहीत्यर्थः ॥

अत्रिः । विभोः महतः । ते तव । राधसो धनस्य । रातिः दानम् । विभ्वी महती भवति । हे इन्द्र शतक्रतो शतकर्मन् । अथ अतः कारणात् ।

नः अस्मभ्यम् । द्युम्नं धनम् । मंहय प्रयच्छ । हे विश्वचर्षणे विश्वद्रष्टः । सुदत्र सुधन सुदानेति वा ॥ (७)

वयश्चित्ते पतत्रिणो द्विपाच्चतुष्पादर्जुनि ।
उषः प्रारन्नृतूँरनु दिवो अन्तेभ्यस्परि ॥

उषोदेवत्येयमृक् । प्रस्कण्वस्यार्षम् । वयश्चित् । चिच्छब्द इवशब्दस्यार्थे । वय इव पक्षिणः इव । ते तव स्वभूताः । पतत्रिणः पतनशीला गमनशीलाश्च । द्विपात् चतुष्पाच्च प्रति यावत्किंचिद्द्विपाच्चतुष्पाच्च तत्सर्वं प्रति । हे अर्जुनि । अर्जुनः शुक्लो वर्णः । शुक्लवर्णे उषः । प्रारन् अर्तेर्गत्यर्थस्येदं रूपम् । प्रकर्षेण गच्छन्ति । कस्मिन् काले । उच्यते । ऋतून् अनु । ऋतुशब्दः कालवचनः । अनुशब्दो लक्षणे कर्मप्रवचनीयः प्रतिशब्देन समानार्थः । कालं प्रति । यो गमनकालस्तस्मिन् गच्छन्तीत्यर्थः । कुतः गच्छन्ति । उच्यते । दिवः द्युलोकस्य अन्तेभ्यः परि । परीति अधिपरी अनर्थकौ (पा. १. ४. ९३) इत्येवं कर्मप्रवचनीयः पदपूरणः ॥

प्रस्कण्वः । वयः पक्षिणः । चिदित्युपमार्थे । पक्षिण इव । ते त्वदीयाः । पतत्रिणः वाहाः । द्विपाच्चतुष्पात् भूतजातम् । प्रारन् प्रगच्छन्ति हे अर्जुनि । अर्जुनीत्युषसो नाम । शुभ्रे उषः । ऋतून् कालान् अनु । त्वदागमनकालेष्वित्यर्थः । दिवः अन्तरिक्षस्य । अन्तेभ्यः पर्यन्तेभ्यः । परीति पञ्चम्यर्थानुवादकः ॥ (८)

अमी ये देवा स्थन मध्य आ रोचने दिवः ।
कद्व ऋतं कदमृतं का प्रत्ना व आहुतिः ॥

त्रितस्यार्षम् । वैश्वदेवीयमृक् । अत्रेतिहासमाचक्षते । आप्तस्य ऋषेः त्रयः पुत्राः बभूवुः एकतः द्वितः त्रित इति । ते यष्टुकामाः याज्यान्

यजमानान् गा ययाचिरे लेभिरे च । ताः आदाय गृहं जग्मुः । तद्गच्छतः पथा सरस्वत्यास्तीरेण परस्मिन् कूले निषण्णो गवादकः ददर्श । दृष्ट्वा चोत्थाय अभिमुखः सारस्वतीरप अवतीर्य रात्रौ त्रासयामास । तेषां त्रासात् त्रस्यतां तृतः कूपे निर्जले तृणैर्वल्लीभिश्चावकीर्णे पपात । तस्य तत्रस्थस्यैवं मनः प्रादुरभूत् । कृतयागसङ्कल्पस्य अकृतयागस्य मम मृत्युर्न श्रेयसे । तत्कथमिहस्थ एवाहं सोमं पिबेयं इति । अन्ये तु पुनः एतदेवेतिहासमन्यथा व्याचक्षते । एकतद्वितार्भ्यां स्वल्पा गावो लब्धाः त्रितेन च बह्वयः । तत ईर्ष्यया ताभ्यां कूपे प्रक्षिप्तः । स एवं चिन्तयानः एता गावो भ्रातृभिः गृहीताः न पूर्वं मम ऋत्विजः । एवं चिन्तयन् यदृच्छया तस्मिन् कूपे वीरुधमुत्तीर्णां ददर्श । स तामादाय सोमोऽयमिति मनसा निश्चित्य यागैश्वर्यमन्यानि अपि यागसाधनानि मनसा सङ्कल्प्य शर्करा अभिषवग्राव्णः कृत्वा तां वीरुधमभिसुषाव । अभिषुत्य च देवानाजुहाव । ते देवाः आहूताः सन्तः आह्वानकारणमनवबुद्ध्यमानाः आविग्ना बभूवुः । तद्बृहस्पतिः शुश्राव । श्रुत्वा व देवानुवाच तृतस्य यज्ञो वर्तते । तत्र गच्छामः इति । ततस्ते देवा आजग्मुः । स तानागतान् कूपादुत्तरणार्थी तुष्टाव उपालब्धवांश्च । अमी ये देवास्थन भवथ । तिष्ठथेत्यर्थः । क्व । उच्यते । मध्ये आरोचने दिवः आदीप्ते दिवः सम्बन्धिन्यादित्यमण्डले । यच्छब्दश्रुतेर्योग्यार्थसम्बन्धोऽत्र तच्छब्दोऽध्याहर्तव्यः । तानहं पृच्छामि । कदित्यव्ययं क्वशब्दपर्यायः । क्व ऋतं सत्यम् । क्वचामृतम् । चकारस्य स्थाने वकारः । का । केत्ययं क्वेत्येतस्य स्थाने । क्व प्रत्ना पुराणा । चिरंतनेत्यर्थः । वः युष्माकं सम्बन्धिनी । प्रत्ना आहुतिः । एतदुक्तं भवति । नष्टसत्यासत्यविवेका अकृतज्ञाश्च यूयं येन मामस्मात्कूपात् नोत्तारयत इत्युपालम्भः । अयं द्वितीयः पक्षः । अमी ये देवाः स्थनः । देवाः स्थ भवथ । मध्ये आदित्यमण्डले । आरोचने दिवः द्युलोकादपि दीप्ततरे

स्थाने भागं गृहीतुमागताः । कत् व ऋतम् । एतदुक्तं भवति । ऋत मन्नम् । तदत्र नास्ति कूपे निर्जले । तत्कत् अमृतं सोमाख्यम् । हविर्धानाः करम्भः पुरोडाशः परीवापः पय उपवसथ्यः पशुरग्नीषोमीयः पशुः सवनीयः एवमादिकं हि तत् । अमृतं च क्वात्र विद्यते । तस्मान्मम देवा याग-मुद्दिश्य भवन्तोऽत्र समागताः । ततस्तैः कूपादुत्तारितः ॥

आप्त्यस्त्रितः । हे देवाः अमी यूयं स्थन भवथ त्रिषु स्थानेषु । आ इति पूरणः । दिवः सूर्यस्य मध्ये । रोचने प्रकाशे । वर्तमाने सतीति शेषः । ते यूयं इदं ब्रूत इति वाक्यसमाप्तिः । कत् किम् । वः युष्मदीयम् । ऋतं सत्यम् । किंच अनृतम् । सत्यानृतविभागः क्व इत्यर्थः । का वः युष्मदीया । प्रत्ना पुराणी । आहुतिः दानम् । हु दानादानयोः ॥ (९)

ऋचं साम यजामहे याभ्यां कर्माणि कृण्वते ।
वि ते सदसि राजतो यज्ञं देवेषु वक्षतः ॥

वामदेवस्यार्षम् । ऋचं साम यजामहे । याभ्यामृक्सामभ्यां कर्माणि कृण्वते ऋत्विजः । वि ते ऋक्सामनी सदसि राजतः । यज्ञं देवेषु वक्षतः वहतां इत्यर्थः ॥

वामदेवः । ऋचं साम च तदभिमानिन्यौ देवते । यजामहे प्रीणयामः हविषा । याभ्यामृक्सामभ्यां कर्माणि कृण्वते याज्ञिकाः । ते ऋक्सामे सदसि यज्ञसदसि राजतः प्रकाशतः स्तोत्रशस्त्ररूपाभ्याम् । ते च देवेषु देवानुद्दिश्य । यज्ञं हविः । विवक्षतः इति पञ्चमलकारान्तम् । वहताम् ॥ (१०)

इति चतुर्थेऽष्टमी दशती

विश्वाः पृतना अभिभूतरं नरः सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे ।
क्रत्वे वरे स्थेमन्यामुरीमुतोग्रमोजिष्ठं तरसं तरस्विनम् ॥

रेफस्यार्षम् । विश्वाः पृतनाः सर्वाः सेनाः । अभिभूतरम् । नरः नराकारः । अथवा नरः सैनिकाः । सजूः सहितः । . . . . उत अपिच उग्रं उद्गूर्णम् । ओजिष्ठं बलवन्तम् । तरसं तरणसमर्थम् । तरस्विनं वेगवन्तमित्यर्थः ॥

सन्त्येकादश या विश्वाः पृतना अभिभूतरम् ।
जगत्य ऐन्द्र्यो रोदस्योः स्तुतिर्धृतवती इति ॥
जगतीभेद एवासौ महापङ्क्तिरुभे इति ।
षडत्राष्टाक्षराः पादास्त्रींश्चार्धर्चानधीमहे ॥

रेफः काश्यपः । विश्वाः पृतनाः सेनाः प्रतिद्वन्द्विनीः । तासामभिभूतरं अतिशयेन अभिभावुकं इन्द्रम् । नरः नेतारः यज्ञानां स्तोत्राणां वा । सजूः ततक्षुः तीक्ष्णं चक्रुः स्तुतिभिः यज्ञैर्वा । जजनुः चक्रुः । राजसे राजनाय । क्रत्वे कर्मणे असुरवधादिलक्षणाय । वरे श्रेष्ठे । स्थेमनि स्थाने स्थितम् । आमुरीं अभिमारणं शत्रूणाम् । उत अपिच । उग्रं ओजस्विनम् । ओजिष्ठमतिशयेनोग्रम् । तरसम् । तरो बलम् । तद्वन्तम् । मत्वर्थीयलोपः । तरस्विनं अतिशयेन बलवन्तम् । अतिशायने मत्वर्थीयप्रत्ययः ॥ (१)

श्रत्ते दधामि प्रथमाय मन्यवेऽहन् यद्दस्युं नर्यं विवेरपः ।
उभे यत्त्वा रोदसी धावतामनु भ्यसात्ते शुष्मात्पृथिवी चिदद्रिवः ॥

सुदेवस्य आर्षम् । श्रत् सत्यम् । ते तुभ्यम् । दधामि ददामि । प्रथमाय उत्कृष्टाय अग्र्याय । मन्यवे बलाय कोपाय वा । किम् । सामर्थ्यात् हविः । अथवा दधामि धारयामि । करोमीत्यर्थः । किम् ।

सामर्थ्यात् स्तोमम् । कीदृशाय तुभ्यम् । उच्यते । प्रथमाय उत्कृष्टाय । मन्यवे दीप्ताय । कस्मात् पुनर्हविर्ददामि स्तोमं वा करोमि । उच्यते । अहन् यत् । यदित्यत्र पञ्चम्या लुक् । यस्मात् । अहन् हतवानसि । दस्युं मेघम् । हत्वा च नर्यं नृभ्यो हितम् । विवेः विविधं गमयसि अपः । क्व पुनर्गमयति । उभे । अत्रापि पञ्चम्या लुक् द्रष्टव्यः । उभयस्मात् । यत् यस्मात् । त्वा त्वां अनु इत्ययं पुरस्तादपकृष्टव्यः प्रतिशब्देन च समानार्थो द्रष्टव्यः । त्वां प्रति । रोदसी द्यावापृथिव्यौ । धावताम् । एकवचनमिदं द्विवचनस्य स्थाने द्रष्टव्यम् । लिङ् लडर्थे द्रष्टव्यः । धावतः । यस्मात् द्यावापृथिव्यावपि त्वां प्रति गच्छत इत्यर्थः । यस्मादनुभ्यसात् । भ्यस भयचलनयोः इत्यस्येदं रूपम् । बिभेति । ते तव स्वभूतात् शुष्मात् बलात् । पृथिवीत्यन्तरिक्षनाम । अन्तरिक्षम् । अन्तरिक्षग्रहणं च प्रदर्शनार्थम् । त्रयोऽपि लोका इत्यर्थः । चिच्छब्दः पदपूरणः । हे अद्रिवः अद्रिर्वज्रः । तद्वान् अद्रिवान् इन्द्रः । तस्य सम्बोधनं हे अद्रिवः । वज्रवन्नित्यर्थः ॥

सुदेवः शैलूषिः । श्रद्दधामि ते त्वदीयाय । प्रथमाय पुराणाय । मन्यवे क्रोधाय । अमोघः ते मन्युः इत्यत्र निश्चयं करोमि । संकल्पो वा मन्युः । अहन् हतवान् असि । यत् येन मन्युना । दस्युमसुरम् । नर्यं नरहितम् । नर्यमिति क्रियाविशेषणम् । एतच्च वक्ष्यमाणस्य । येन च विवेः । वेतेः गतिकर्मणः अन्तर्णीतण्यर्थस्य रूपं विवेरिति । अगमयः अपः । अवेदयः अलम्भय इति वा । नरहितार्थं वर्षसीत्यर्थः । यत् येन च । त्वा त्वाम् । अनुधावतां अनुगच्छताम् । उभे रोदसी द्यावापृथिव्यौ । किंच भ्यसात् । भ्यसतेः भयार्थस्य पञ्चमलकाररूपं भ्यसादिति । बिभीयात् । ते शुष्मात् बलात् । पृथिवी चित् पृथिव्यपि । अद्रिवः वज्रिन् । यस्य शुष्माद्रोदसी अभ्यसेताम् (ऋ. वे. २. १२. १) इति च मन्त्रान्तरम् ॥ (२)

समेत विश्वा ओजसा पतिं दिवो य एक इद्भूरतिथिर्जनानाम् ।
स पूर्व्यो नूतनमाजिगीषन् तं वर्त्तनीरनुवावृत एक इत् ॥

वामदेवस्यार्षम् । हे मदीया ऋत्विजः समेत सम्भूय आगच्छत । इन्द्रं स्तोतुमिति वाक्यशेषः । विश्वा विश्वे । सर्वे इत्यर्थः । कीदृशमिन्द्रम् । उच्यते । ओजसा पतिं दिवः स्वेन बलेन स्वामिनं द्युलोकस्य । द्युग्रहणं चात्र प्रदर्शनार्थम् । त्रयाणामपि लोकानां स्वामिनमित्यर्थः । कीदृशमिन्द्रम् । उच्यते । यः एक इत् । इच्छब्द एव इत्यस्यार्थे । यः एक एव । भूः । मध्यमपुरुषैकवचनमिदं प्रथमपुरुषैकवचनस्य स्थाने द्रष्टव्यम् । भूत् भवति । अतिथिरतिथिस्थानीयः पूजनीयः । जनानां यजमानमनुष्याणाम् । यः कीदृशः इन्द्रः । उच्यते । सः पूर्व्यः चिरंतनः । नूतनं नवं तं यागम् । अन्येनाकृतपूर्वमित्यर्थः । आजिगीषन् आगन्तुमिच्छन् । वर्तनीः अनु वावृते आगच्छतीत्यर्थः । एक इत् एक एवेत्यर्थः ॥

वामदेवः । समेत उपगच्छत यूयं विश्वाः । विश्वशब्दात् षष्ठ्येकवचने पूर्वसवर्णः । विश्वस्याः दिवः पतिं द्युलोकस्य पतिं इन्द्रम् । ओजसा बलेन समेत । य इन्द्रः एक इत् एक एव । जनानां सर्वेषामतिथिः पूज्यः । भूः भवति । भवतेः छन्दसि लुङ्लङ्लिटः (पा. ३. ४. ६) इति लडर्थे लुङ् । प्रथमपुरुषेण मध्यमपुरुषव्यत्ययः । बहुलं छन्दस्यमाङ्योगे (पा. ६. ४. ७५) इति अडागमाभावः । स पूर्व्यः पुरातन इन्द्रः । नूतनं अद्यतनं स्तोतारम् । वर्तनीः अभिवर्तमानाः सेनाः । आजिगीषन् अभिजेतुमिच्छन् । तमनु उद्दिश्य । एक इत् एक एव । ववृते अभिगच्छति तस्य जयार्थम् ॥ (३)

इमे त इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो ।
न हि त्वदन्यो गिर्वणो गिरः सघत् क्षोणीरिव प्रति तद्धर्य नो वचः ॥

सव्यस्यार्षम् । इमे ते तव स्वभूताः हे इन्द्र । ते वयं हे पुरुष्टुत बहुभिर्यजमानैः स्तुत । ये त्वा त्वां आरभ्य आश्रित्य । चरामसि अप्रतिहताः परिभ्रमामः । हे प्रभूवसो प्रभूतधन । न हि त्वदन्यः न च त्वत्तोऽन्यः कश्चित् । हे गिर्वणः गीर्भिः सम्भजनीय स्तुतिना वा सम्भक्त । गिरः स्तुतयः । सघत् सहते । नान्यः कश्चित् त्वद्वत् स्तुत्यतां प्रतिपत्तुं समर्थ इत्यर्थः । एतदुक्तं भवति । सर्वदा त्वदासक्ता वयम् । न चान्यः स्तुतियोग्य इत्यर्थः । यत एवमतो ब्रवीमि । क्षोणीरिव मनुष्या इव । प्रति मनुष्यं प्रति यत् तत् हर्य प्रतिकामयस्व । नः अस्माकं स्वभूतं वचः । तदिति वचनात् यदिति योग्यार्थसंबन्धो यच्छब्दोऽध्याह्रियते । यदेतदुपकल्पितम् ॥

सव्य आङ्गिरसः । ते इमे वयं ते त्वदीया भवाम । हे इन्द्र पुरुष्टुत । ये वयं त्वा त्वां आरभ्य आलम्ब्य आश्रयत्वेन । चरामसि चरामः । हे प्रभुवसो प्रभूतधन । न हि त्वदन्यः देवः । गिरः स्तुतीः । सघत् सहेत । तासां योग्यः स्यादित्यर्थः । हे गिर्वणः गिरां संभक्तः । क्षोणीरिव इति सर्वसहत्वस्य उपमा । क्षोणीः भूमिरिव । सोर्लोपाभावः छान्दसः । गौरीर्मिमाय (ऋ. वे. १. १६४. ४१) इतिवत् । प्रतिहर्य प्रतिकामयस्व । नः अस्मदीयम् । वचः स्तुतिरूपम् । तत् तस्माद्धेतोः । यत्त्वमेव गिरां सोढासि तस्मात् ॥ (४)

चर्षणीधृतं मघवानमुक्थ्यमिन्द्रं गिरो बृहतीरभ्यनूषत ।
वावृधानं पुरुहूतं सुवृक्तिभिरमर्त्यं जरमाणं दिवे दिवे ॥

विश्वामित्रस्यार्षम् । चर्षणीधृतम् । चर्षणयो मनुष्याः । तेषां तेन तेन प्रकारेण धारयितारम् । अथवा शत्रुमनुष्याणां हन्तारं निरोद्धारम् । मघवानं धनवन्तम् । उक्थ्यं प्रशस्यं इन्द्रम् । अस्मदीया गिरः बृहतीः । द्वितीया-बहुवचनमिदं प्रथमाबहुवचनस्य स्थाने द्रष्टव्यम् । बृहत्यः महत्यः ।

अभ्यनूषत आभिमुख्येन स्तुतवत्यः । स्तुवन्ति वा । कीदृशमिन्द्रं स्तुवन्ति । उच्यते । वावृधानं वर्धमानं वीर्येण शरीरेण वा । पुरुहूतं बहुभिरन्यैरपि यजमानैः आहूतम् । कीदृश्यो गिरः स्तुवन्ति । उच्यते । सुवृक्तिभिः । तृतीयाबहुवचनमिदं प्रथमाबहुवचनस्य स्थाने द्रष्टव्यम् । सुवृक्तयः सुष्ठु वर्जिता दोषैः । कीदृशमिन्द्रं स्तुवन्ति । उच्यते । अमर्त्यं अमरणधर्माणं जरामरणवर्जितम् । जरमाणं अन्यैरपि यजमानैः स्तूयमानम् । दिवे दिवे अहन्यहनीत्यर्थः ॥

विश्वामित्रः । चर्षणीधृतं चर्षणीनां जनानां धारकम् । मघवानं प्रभूतधनं प्रभूतदानं वा । उक्थ्यं स्तुत्यं इन्द्रम् । गिरः । गृणन्ति इति गिरः स्तोत्र्यः प्रजाः । बृहतीः बृहत्यः । परिवृढाः विद्याकर्मादिभिः । अभ्यनूषत अभिष्टुवन्ति । वावृधानं वृद्धं सद्गुणैः । लिटः कानच् । पुरुहूतं बहुभिराहूतं इन्द्रम् । सुवृक्तिभिः सुष्टुतिभिः । अभ्यनूषत । सुष्ठु वृङ्क्ते इति सुवृक्तयः । अमर्त्यं नित्यम् । जरमाणम् । जरिः स्तुतिकर्मा । स्तूयमानः सर्वैः । दिवे दिवे प्रतिदिनम् ॥ (९)

अच्छा व इन्द्रं मतयः स्वर्युवः सध्रीचीर्विश्वा उशतीरनूषत ।
परिष्वजन्त जनयो यथा पतिं मर्यं न शुंध्युं मघवानमूतये ॥

कृष्णः आत्मीयान् ऋत्विज आह । अच्छ आप्तुम् । इन्द्रं वः युष्माकं स्वभूताः मतयः । कीदृश्यो मतयः । उच्यते । स्वर्युवः । स्वर्गं याः गन्तुमिच्छन्ति ताः स्वर्युवः । स्वर्गगमनशीला इत्यर्थः । सध्रीचीः । द्वितीयाबहुवचनमिदं प्रथमाबहुवचनस्य स्थाने द्रष्टव्यम् । सध्रीच्यः । सह गन्त्र्य इत्यर्थः । विश्वाः सर्वाः । उशतीः उशत्यः तमेव इन्द्रं कामयमानाः । अनूषत स्तुतवत्यः स्तुवन्ति च । परिष्वजन्त तमेव इन्द्रं परिष्वजन्ते । आश्रयन्ते इत्यर्थः । कथमाश्रयन्ते । उच्यते । जनयो यथा पतिं भार्या इव

भर्तारमित्यर्थः । मर्यं न । द्वितीयाबहुवचनमिदं प्रथमैकवचनस्य स्थाने द्रष्टव्यम् । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । मर्त्य इव मनुष्य इव । शुध्यं आदित्यम् । मघवानं धनवन्तम् । ऊतये आत्मनः पालनार्थमित्यर्थः ॥

कृष्ण ऋषिः । अच्छ अभि अनूषत अभिष्टुवन्ति । वः त्वाम् । इन्द्रं ईश्वरम् । मतयः स्तुतयः । मनेः कर्तरि वा क्तिचि रूपं मतय इति । स्तोत्र्यः प्रजाः । स्वर्युवः सर्वज्ञाः । स्तुतिपक्षे सर्वकालं वहन्त इति । सध्रीचीः सङ्गताः सत्यः । विश्वाः सर्वाः । निविष्टा यज्ञसदसि इति वा । उशतीः कामयमानाः । परिष्वजन्त परिष्वजन्ते । जनयः जायाः । यथा पतिम् । मर्यं न मर्त्यमिव । शुन्ध्युं शोधयितारं शुद्धिकामा जनाः । मघवानं इन्द्रम् । ऊतये रक्षायै .. (६)

अभि त्यं मेषं पुरुहूतमृग्मियमिन्द्रं गीर्भिर्मदता वस्वो अर्णवम् ।
यस्य द्यावो न विचरन्ति मानुषं भुजे मंहिष्ठमभि विप्रमर्चत ॥

अङ्गिरा नाम ऋषिः । स इन्द्रं पुत्रं याचमानः स्वात्मन्यभिध्यानमकरोत् । तस्य योगैश्वर्यबलात् तत एवाभिध्यानात् सव्यनामा इन्द्रः पुत्रोऽजायतेति । तदेतच्छौनकेनोक्तम्—तं मेषः मेधातिथिकाण्वायनमाजहारेन्द्रो मेषरूपी कस्मिंश्चित्कारणान्तरे । तद्ब्राह्मणेनोक्तम् । मेधातिथिं ह काण्वायनं मेषो भूत्वाजहारेति । तदभिवादिन्येषा भवति । तमिन्द्रं मेषं मेषरूपम् । पुरुहूतं बहुभिर्यजमानैराहूतम् । ऋग्मियम् । ऋचः स्तुतयः । ताभिर्यः स्तूयते स ऋग्मियः । तं ऋग्मियं स्तुतिमन्तम् । स्तुत्यमित्यर्थः । इन्द्रं गीर्भिः स्तुतिलक्षणाभिर्वाग्भिः । अभिमदत । मदतीत्यर्चतिकर्मा । यागे अभ्यर्चत हे मदीया ऋत्विजः । कीदृशमिन्द्रं स्तुमः । उच्यते । वसोः अर्णवं धनस्य समुद्रम् । यस्य द्यावः द्युलोकाः । न विचरन्ति न

विगच्छन्तीत्यर्थः । किं नातिक्रामन्ति । उच्यते । मानुषमनन्तं ज्ञानम् । यस्य द्युलोकोऽपि वशे वर्तते इत्यर्थः । किमर्थं पुनरभिष्टुमः । उच्यते । भुजे आत्मनः पालनार्थम् । इन्द्रं मंहिष्ठं दातृतमं दातृस्वभाविनम् । अभ्यर्चत अभिष्टुत ॥

अस्याः परस्याश्च सव्यः । अभिमदता अभिष्टुवन्ति । मतिः स्तुतिकर्मा । त्यं तं मेषम् । मेधातिथिमृषिमिन्द्रो मेषो भूत्वा उपजगाम इति हि श्रूयते । मेधातिथेर्मेषः इति च सुब्रह्मण्यानिगदे श्रूयते । पुरुहूतं ऋग्मियं ऋग्म्यं स्तुत्यर्हम् । इन्द्रं गीर्भिः स्तुतिभिः । वस्वः धनस्य । अर्णवं उदधिमिवाकरभूतम् । यस्य इन्द्रस्य द्यावः स्तोतारः । दीव्यतेः स्तुतिकर्मणो द्यौः । न विचरन्ति न विचलन्ति स्वस्थानात् । मानुषं मनुष्येभ्यः हितम् । मंहिष्ठं दातृतमम् । विप्रं प्राज्ञं तं इन्द्रम् । अर्चत स्तुत हे स्तोतारः । भुजे भोगार्थं वा रक्षणार्थं वा ॥ (७)

त्यं सु मेषं महया स्वर्विदं शतं यस्य सुभ्वः साकमीरते ।
अत्यं न वाजं हवनस्यदं रथमेन्द्रं ववृत्यामवसे सुवृक्तिभिः ॥

सव्यस्यार्षम् । अन्तरात्मन एवायं प्रैषः । त्यं तं इन्द्रम् । मेषं मेषरूपम् । सुमहय सुष्ठु पूजय स्तुतिभिः हे मदीया ऋत्विजः । कीदृशमिन्द्रम् । उच्यते । शतं यस्य । शतमिति बहुनाम । सुभुवः । अपठितमपि महन्नामैतद्द्रष्टव्यम् । बहवो यस्य महान्तः । कम् । सामर्थ्यात् स्तोतारम् । साकं सहभूताः । ईरते प्रेरयन्ति । किम् । सामर्थ्यात् स्तुतिः सहभूता यं स्तुवन्तीत्यर्थः । अहमपि अत्यं न अश्वमिव । वाजं हविर्लक्षणं अन्नं प्रति । हवनस्यदम् । स्यन्दतिर्गतिकर्मा । आह्वानं प्रति गन्तारम् । केन । उच्यते । रथम् । द्वितीयैकवचनमिदं तृतीयैकवचनस्य स्थाने द्रष्टव्यम् । रथेन । इन्द्रं आववृत्यां आवर्तयेयुरित्येतदाशास्महे । किमर्थम् ।

उच्यते। अवसे तर्पणाय सोमेन। सुवृक्तिभिः सुष्ठु वर्जितदोषाभिः स्तुतिभिः ॥

त्यं तं सुष्ठु मेषं महय पूजय हे स्तोतः। स्वर्विदं सर्वकामलम्भनं सर्वज्ञं वा। शतं बहवः जनाः। सुभुवः सुष्ठु भवाः स्तोत्राणि। यस्य इन्द्रस्य। यमुद्दिश्य इत्यर्थः। साकं युगपदेव ईरते प्रेरयन्ति स्तोत्राणि। अत्यं न अश्वमिव। वाजं वेगवन्तम्। हवनस्यदं हवनं स्तोत्रं प्रति स्यन्दमानम्। रथं गच्छन्तम्। इन्द्रं आववृत्यां आवर्तयानि। सुवृक्तिभिः सुष्टुतिभिः। अवसे रक्षणाय तर्पणाय वा ॥ (८)

घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा।
द्यवापृथिवी वरुणस्य धर्मणा विष्कुभिते अजरे भूरिरेतसा ॥

भरद्वाजस्यार्षम्। घृतवती। घृतमित्युदकनाम। तेन तद्वत्यौ। भुवनानां भूतजातानाम्। अभिश्रिया आश्रयणीये। उर्वी। उर्विति बहुनाम। अवयवबहुत्वाच्च बहुव्यपदेशः। बह्ववयवे। पृथ्वी। विस्तीर्णे। मधुदुघे। मध्वित्युदकनाम। दुहिः क्षरणार्थः। उदकस्य क्षरत्यौ। द्यौः तावत्साक्षादेव उदकं क्षरति। पृथिव्यपि उदकस्य हेतुभूता या आहुतिः तत्प्रदानद्वारेण। सुपेशसा। पेश इति रूपनाम। सुरूपे। द्यावापृथिवी वरुणस्य। वरुणो मध्यमस्थानः। स त्विन्द्र एव। तस्य स्वभूतेन। धर्मणा वृष्ट्याख्येन। विष्कुभिते प्रतिषिद्धे। स्वावस्थातः अप्रच्युते इत्यर्थः। अजरे जरावर्जिते। भूरिरेतसा बहूदके ॥

भरद्वाजः। घृतवती दीप्तिमत्यौ। प्रथमाद्विवचनस्य वा छन्दसि (पा. ६. १. १०६) इति पूर्वसवर्णः। भुवनानां भूतानाम्। अभिश्रिया अभिश्रयणीये। उर्वी विस्तीर्णे। पृथ्वी प्रथिते। मधुदुघे कामदुघे। सुपेशसा। पेशो बलम्।

सुबले । द्यावापृथिवी द्यावापृथिव्यौ । वरुणस्य सर्वनियामकस्य धर्मणा वृष्टिरूपेण धर्मेण । विष्कुभिते विष्टब्धे आश्रयीभूते । अजरे नित्ये । भूरिरेतसा बहुकार्ये । इत्थं इत्थं च भवतो द्यावापृथिव्यौ ॥ (९)

उभे यदिन्द्र रोदसी आपप्राथोषा इव ।
महान्तं त्वा महीनां सम्राजं चर्षणीनाम् ।
देवी जनित्र्यजीजनद् भद्रा जनित्र्यजीजनत् ॥

मान्धातुरार्षम् । उभे इत्येतत् रोदसी इत्येतेन समानाधिकरणम् । रोदसी इत्येतेन च द्यावापृथिव्यौ उच्येते । उभे द्यावापृथिव्यौ । यत् । नपुंसकमिदं पुंलिङ्गस्य स्थाने द्रष्टव्यम् । यः त्वं हे इन्द्र । आपप्राथ । मध्यमपुरुषबहुवचनमिदं एकवचनस्य स्थाने द्रष्टव्यम् । आपप्रासि अत्यर्थं पूरयसि । पुनः पुनर्वा पूरयसीत्यर्थः । सम्यक् वृष्ट्युदकेन आपूरयसि । किमिव । उच्यते । उषा इव । यथा उषाः स्वेन तेजसा द्यावापृथिव्यावापूरयति तद्वदित्यर्थः । पुरस्ताद्यच्छब्दश्रुतेस्तच्छब्दोऽध्याहार्यः । तं महान्तं त्वा त्वाम् । महीनां महतीनां मरुदादिसेनानाम् । सम्राजं सम्यगीशानम् । चर्षणीनां मनुष्याणां च ईशितारमित्यर्थः । देवी दानादिगुणयुक्ता । जनित्री अदितिर्देवमाता । अजीजनत् जनितवती । भद्रा शोभना । जनित्री अजीजनत् ॥

मान्धाता यौवनाश्वः । यत् यस्त्वं हे इन्द्र । उभे रोदसी आपप्राथ आपूरयसि तेजसा । प्रा पूरणे इत्यस्मात् लडर्थे लिटि रूपं आपप्राथ इति । उषा इव । तं त्वा महान्तं महीनां महताम् । सम्राजं सम्यगीशानम् । चर्षणीनां जनानाम् । देवी दात्री सर्वकामनाम् । जनित्री जनयित्री तव माता । अजीजनत् भद्रा कल्याणी । पुनरुक्तिरादरार्था ॥ (१०)

प्र मन्दिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना ।
अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तं सख्याय हुवेमहि ॥

कुत्सः आत्मीयान् पुत्रान् पौत्रांश्चाह । प्रेत्ययमुपसर्गः अर्चत इत्याख्यातेन सम्बन्धयितव्यः । मन्दतिरर्चतिकर्मा । मन्दनं मन्दः स्तुतिर्यस्यास्ति स मन्दी स्तुतिमान् । तादर्थ्ये चतुर्थी । स्तुतिमतः इन्द्रस्यार्थाय । पितुमत । पितुरित्यन्ननाम । तद्यस्मिन्नस्ति तत् पितुमत । वचः वचनं स्तुतिलक्षणम् । प्रार्चत । अर्चति इति यद्यप्यन्यत्र स्तुतिकर्मा तथापीह सामर्थ्यादुच्चारणार्थे द्रष्टव्यः । हे मदीयाः पुत्राः पौत्रा वा इन्द्रस्यार्थाय हविर्लक्षणेनान्नेन सहिताः स्तुतीरुच्चारयत इत्यर्थः । यः किं करोति । उच्यते । सः कृष्णगर्भाः । कृष्णो मेघः । तस्य गर्भभूताः आपः । निरहन् । हन्तिः गत्यर्थः अन्तर्णीतण्यर्थश्च द्रष्टव्यः । निर्गमितवान् । पातितवानित्यर्थः । य इति पुरस्ताद्यच्छब्दश्रुतेस्तस्यार्थायेति वाक्यशेषः । परोऽर्धर्चो भिन्नं वाक्यम् । अवस्यवः पालनकामाः । वृषणं वर्षितारम् । वज्रदक्षिणम् । वज्रं दक्षिणे हस्ते यस्य स वज्रदक्षिणः । तं वज्रदक्षिणम् । दक्षिणेन हस्तेन गृहीतवज्रमित्यर्थः । मरुत्वन्तं मरुद्भिस्तद्वन्तम् । सख्याय सखिभावाय । देवानां मनुष्याणां च स्तुत्यस्तोतृलक्षणं सख्यम् । तस्यार्थाय । स्तोतुमित्यर्थः । हुवेमहि आह्वयाम इत्यर्थः ॥

कुत्सः । एषा गर्भस्राविणी उपनिषत् । प्रार्चत प्रोच्चारयत । मन्दिने स्तुत्याय इन्द्राय । पितुमत् अन्नयुक्तं हविषा सहितम् । वचः स्तोत्रम् । य इन्द्रः कृष्णगर्भाः कृष्णेन असुरेण आहितगर्भाः कृष्णस्य भार्याः । निरहन् निजघान गर्भच्यावनाय । ऋजिश्वना राजर्षिणा हेतुना । तदर्थमित्यर्थः । ऋजिश्वनः शत्रुः कृष्णः । तं कृष्णं हत्वा तस्य सन्तानाभावाय गर्भानपि जघान इति । तं इन्द्रं वृषणं वर्षितारम् । वज्रदक्षिणं वज्रं दक्षिणे हस्ते यस्य तम् । मरुत्वन्तं

मरुद्भिः सहितम्। सख्याय सखिकर्मणे सखिभावाय वा। हुवेमहि ह्वयामः। अवस्यवः रक्षणमिच्छन्तः वयम्॥ (११)

इति चतुर्थे नवमी दशती

अनुष्टुप्-चत्वारि।

इन्द्र सुतेषु सोमेषु क्रतुं पुनीष उक्थ्यम्।
विदे वृधस्य दक्षस्य महाँ हि षः॥

नारद आह। इन्द्र सुतेष्वभिषुतेषु सोमेषु। क्रतुं प्रति पुनीषे। पुनातिरत्र गत्यर्थो द्रष्टव्यः। गच्छतीत्यर्थः। कीदृशं क्रतुं प्रति गच्छति। उच्यते। उक्थ्यं प्रशस्यम्। अधिगुणमित्यर्थः। अथवा उक्थसम्बन्धिः उक्थ्यः। सोमयाग इत्यर्थः। कथं पुनर्गच्छति। उच्यते। विदे यथा वेत्ति यथा जानाति। कस्य पुनः स्वभूतं सोमयागं गच्छति। उच्यते। वृधस्य दक्षस्य स्तुतिभिर्हविर्भिश्च वर्धयन् मम दक्षस्य स्वभूतं सोमयागं आगच्छन्। महान् हि सः॥

अष्टाविंशतिरिन्द्रेति मुख्याः सप्तदशोष्णिहः।
दशान्त्याः ककुभो मध्ये पिबेत्येषा त्रिपाद्विराट्॥
तुचे वेत्था ह्यपामीवामादित्यानां तु संस्तवः।
आगन्ता गावो मारुत्यावैन्द्रय एवापरा ऋचः॥

नारदः। हे इन्द्र सुतेषु सत्सु सोमेषु। तान् पीत्वा क्रतुं प्रज्ञानं वीर्यं वा स्वीयम्। पुनीषे शोधयसि। उक्थ्यं प्रशस्यम्। सोमपानेन ते क्रतुः तीक्ष्णो भवति इति यावत्। अथ परोक्षस्तुतिः। विदे विन्दते। वृधस्य

प्रवृद्धस्य । दक्षस्य बलस्य । द्वितीयार्थे षष्ठी । दक्षं विन्दते । महान् हि भवति स इन्द्रः सोमपानेन ॥ (१)

तमु अभि प्रगायत पुरुहूतं पुरुष्टुतम् ।
इन्द्रं गीर्भिस्तविषमा विवासत ॥

गोषूक्ती वाश्वसूक्ती वा आत्मीयान् ऋत्विजः आह । य उक्तगुणः इन्द्रः तम् । उ इति पदपूरणः । अभिप्रगायत । अभिप्रगायतीत्यर्चतिकर्मा । अभिष्टुत । कीदृशमिन्द्रम् । उच्यते । पुरुहूतम् । अन्यैरपि बहुभिर्यजमानैराहूतम् । पुरुष्टुतं बहुभिर्यजमानैः स्तुतम् । इन्द्रं गीर्भिः स्तुतिभिः । तविषं महान्तम् । आविवासति परिचरतीत्यर्थः ॥

द्वयोः गौषूक्त्यश्वसूक्तिनौ । तमु तमेव । अभिप्रगायत हे ऋत्विजः । पुरुहूतं पुरुष्टुतं इन्द्रं गीर्भिः स्तुतिभिः अभिप्रगायत । तविषम् । तविषी बलम् । तद्वन्तम् । आविवासत परिचरत च कर्मभिः ॥ (२)

तं ते मदं गृणीमसि वृषणं पृक्षु सासहिम् ।
उ लोककृत्नुमद्रिवो हरिश्रियम् ॥

गोषूक्ती वाश्वसूक्ती वा इन्द्रमाह । तं ते तव स्वभूतम् । मदं गर्वम् । उत्सेकमित्यर्थः । गृणीमसि । गृणातिरर्चतिकर्मा । स्तुम इत्यर्थः । कीदृशम् । उच्यते । वृषणं वर्षितारम् । पृक्षु सङ्ग्रामेषु । सासहिं अत्यर्थमभिभवितारं शत्रूणाम् । उ लोककृत्नुम् । उकारः पदपूरणः । लोककृत्नुं लोकानां च कर्तारम् । हे अद्रिवः । अद्रिर्वज्रः । तद्वान् अद्रिवान् । तस्य सम्बोधनं हे अद्रिवः । वज्रवन्नित्यर्थः ॥

तं प्रसिद्धं सर्वकामप्रदम्। ते तव। मदं सोमपानार्थं गृणीमसि स्तुमः वयम्। वृषणं वर्षितारम्। पृक्षु संग्रामेषु। सासहिं अभिभवितारम्। उलोककृत्नुम्। लोक एव उलोकः। लोककृतं यजमानानाम्। हे अद्रिवः वज्रिन्। हरिश्रियं हरिभ्यां श्रितं हरी वा श्रयन्तम्॥ (३)

यत्सोममिन्द्र विष्णवि यद्वा घ त्रित आप्त्ये।
यद्वा मरुत्सु मन्दसे समिन्दुभिः॥

पर्वतस्यार्षम्। यत्। पञ्चम्या अत्र लुक्। यस्मात् सोमं हे इन्द्र विष्णवि। सप्तम्येकवचनमिदं तृतीयैकवचनस्य स्थाने द्रष्टव्यम्। सहयोगे च तृतीया। विष्णुना सह। यत् यस्मात्। वाशब्दः चशब्दार्थे। घ इति पदपूरणः। त्रिते। इदमपि सप्तम्येकवचनं तृतीयैकवचनस्य स्थाने द्रष्टव्यम्। सहयोगे च तृतीया। त्रितेन च ऋषिणा सह। आप्त्ये। इदमपि सप्तम्येकवचनं सहयोगतृतीयैकवचनस्यैव स्थाने द्रष्टव्यम्। आप्त्येन च ऋषिणा सह। यस्माद्वा मरुत्सु मरुद्भिः मह मन्दसे। मद तृप्तावित्यस्येदं रूपम्। तृप्यसि। पिबसीत्यर्थः। कीदृशैर्मरुद्भिः। उच्यते। इन्दुभिः। इदि परमैश्वर्ये इत्यस्येदं रूपम्। अत्यन्तैश्वर्यैः इत्यर्थः। यस्मादिति वचनात् तस्मात् त्वां यजामीति वाक्यशेषः॥

पर्वतः। हे इन्द्र यत् यदि सोमं लभेथाः। विष्णवि विष्णौ तव सहायभूते। यद्वा यदि वा घ। घेति पूरणः। त्रिते आप्त्ये आप्तस्य पुत्रे लभेथाः। यद्वा यदि वा मरुत्सु मन्दसे सोमेन। तत आगत्य संरमस्व इन्दुभिः मर्दायैः॥ (४)

एदु मधोर्मदिन्तरं सिञ्चाध्वर्यो अन्धसः।
एवा हि वीरः स्तवते सदावृधः॥

विश्वमनस आर्षम् । आ इत्ययमुपसर्गः । सिञ्चेत्याख्यातेन सम्बन्धयितव्यः । इत् उ इति द्वावपि पदपूरणौ । मधोः मधुनः सकाशात् । मदिन्तरम् । मदः कर्तव्यत्वेन यस्यास्ति स मदी । अतिशयेन मदी मदिन्तरः । अतिशयेनमदकरमित्यर्थः । किं तत् । सामर्थ्यात् सोमम् । आसिञ्च ग्रहे । चमसे क्षारयेत्यर्थः । हे अध्वर्यो अन्धसः । षष्ठ्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । अन्धः सोमाख्यमन्नम् । कस्मात् पुनः आसिञ्चामि । उच्यते । एव हि । हिशब्दो यस्मादर्थे । यस्मादेव क्षारितं सन्तं वीर इन्द्रः स्तवते । स्तवतिर्वृध्यर्थः । वर्धते शरीरेण वीर्येण च । कीदृश इन्द्रः । उच्यते । सदावृधः । षष्ठ्येकवचनमिदं प्रथमैकवचनस्य स्थाने द्रष्टव्यम् । सदावृत् । सदावर्धयिता स्तोतॄणां यष्टॄणां च ॥

तिसृणां विश्वमना वैयश्वः । आ इत् उ एदु । इत् उ इतीमौ पादपूरणौ । आसिञ्च मधोः मधुरस्य । अन्धसः सोमस्य । मदिन्तरं अतिशयेन मादयितारं रसं हे अध्वर्यो । एव एवं हि । वीरः सदावृधः सर्वदा प्रवृद्ध इन्द्रः । स्तवते स्तूयते अस्माभिः । अत आसिञ्च पात्रेषु सोमम् ॥ (९)

एन्दुमिन्द्राय सिञ्चत पिबाति सोम्यं मधु ।
प्र राधांसि चोदयते महित्वना ॥

विश्वमना आत्मीयान् ऋत्विज आह । आ इत्ययमुपसर्गः सिञ्चत इत्याख्यातेन सम्बन्धयितव्यः । इन्दुं सोमं इन्द्राय । तादर्थ्ये एषा चतुर्थी । इन्द्रार्थमासिञ्चत ग्रहैः चमसैश्च क्षारयित्वा गृह्णीतेत्यर्थः । कस्मात् पुनरासिञ्चामः । उच्यते । यस्मात् पिबाति पिबति पातुमिच्छति । सोम्यं सोममयम् । मधु मधुसदृशम् । इष्टमित्यर्थः । पीत्वा च मधुसदृशेन सोमेन मत्तः राधांसि धनानि । प्रचोदयते स्तोतृभ्यः यष्टृभ्यश्च ददातीत्यर्थः । महित्वना महित्वेन । स्वेन माहात्म्येनेत्यर्थः ॥

आसिञ्चत इन्द्रमिन्द्राय पात्रेषु हे अध्वर्यवः । पिबाति पिबतु । सोम्यं सोमात्मकं मधु । पीत्वा च प्रचोदयते प्रेरयति । राधांसि धनानि अस्मदर्थम् । महित्वना महित्वेन युक्त इन्द्रः ॥ (६)

एतो न्विन्द्रं स्तवाम सखायः स्तोम्यं नरम् ।
कृष्टीर्यो विश्वा अभ्यस्त्येक इत् ॥

विश्वमना आत्मीयानृत्विज आह । आ इत आगच्छत । उकारः पदपूरणः । नु क्षिप्रम् । किमर्थमागच्छामः । उच्यते । इन्द्रं स्तवाम अहं च यूयं च । कथं नाम इन्द्रं स्तवामेत्येवमर्थम् । ते सखायः मदीया ऋत्विजः । कीदृशमिन्द्रं स्तवामः । उच्यते । स्तोम्यं स्तोमार्हम् । स्तुत्यमित्यर्थः । नरं नराकारम् । य इन्द्रः किं करोति स्तुतः । उच्यते । कृष्टीः शत्रुमनुष्यजातीयाः । विश्वाः सर्वाः । अभ्यस्ते अभिभवति । एक इत् । इच्छब्द एवशब्दस्यार्थे । एक एवेत्यर्थः ॥

आ इत उ नु एतो नु । एत आगच्छत हे सखायः । उः पूरणः । नु अद्य । तं इन्द्रं स्तवाम स्तोम्यं स्तोमार्हम् । नरं नेतारं इन्द्रम् । कृष्टीः प्रजाः । विश्वाः सर्वाः । य इन्द्रः एक इत् एक एव । अभ्यस्ति अभिभवति । तं इन्द्रं स्तवाम ॥ (७)

इन्द्राय साम गायत विप्राय बृहते बृहत् ।
ब्रह्मकृते विपश्चिते पनस्यवे ॥

नृमेधा आत्मीयानुद्गातॄनाह । इन्द्राय इन्द्रार्थं साम गायत । कीदृशायेन्द्राय । उच्यते । विप्रस्य । विप्र इति चैतन्मेधाविनाम । विपश्चित इत्यनेन पौनरुक्त्यप्रसङ्गात् क्रियानिमित्तं द्रष्टव्यम् । अतः प्रा पूरणे इत्यस्येदं

रूपम् । विविधमुदकेन पूरयिता विप्रः । तस्मै विप्राय । बृहते शरीरेण च वीर्येण च महते । कीदृशं साम गायाम । उच्यते । बृहत् महत् बृहतीसंज्ञकं वा । पुनः कीदृशाय इन्द्राय । उच्यते । ब्रह्मकृते । ब्रह्म अन्नम् । तद्यः करोति स ब्रह्मकृत् । तस्मै ब्रह्मकृते । अन्नस्य कर्त्रे इत्यर्थः । कथं च पुनरिन्द्रः अन्नस्य कर्ता । उच्यते । अन्नस्य ओदनादेः प्रकृतिभूतं व्रीह्यादि । तच्चासौ वृष्टिद्वारेण करोति । अतः अन्नस्य कर्तेति व्यपदिश्यते । विपश्चिते मेधाविने । पनस्यवे । पनस्यतीत्यर्चतिकर्मा । सर्वे स्तुत्यर्थाः । तान् य इच्छति स पनस्युः । तस्मै पनस्यवे । स्तुतिकर्माये-त्यर्थः ॥

नृमेधाः । इन्द्राय इन्द्रमुद्दिश्य । साम गायत विप्राय प्राज्ञाय । बृहते महते । बृहत् साम । ब्रह्मकृते अन्नकृते । ब्रह्म अन्नम् । तत्कर्त्रे । विपश्चिते सर्वज्ञाय । पनस्यवे स्तुतिकामाय ॥ (८)

य एक इद्विदयते वसु मर्ताय दाशुषे ।
ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ।

गौतमस्यार्षम् । य एकः । इच्छब्द एवशब्दार्थः । एक एव इत्यर्थः । विदयते विविधं ददाति । वसु धनम् । मर्ताय मनुष्याय । दाशुषे यजमानाय । ईशान ईश्वरः । अप्रतिष्कुतः । ष्कु आप्रवणे । आप्रवणमागमनं । प्रवर्तेर्गत्यर्थत्वात् । अन्येन अप्रतिगतः अप्रतिष्कुतः । युद्धेऽभियुञ्जानः अन्येन अप्रत्यभियुक्तः । पूर्वाभियोद्धा इत्यर्थः । कोऽसौ । उच्यते । इन्द्रः । अङ्गेति निपातः पदपूरणः । अथवा क्षिप्रवचनः विदयत इत्यनेन सम्बध्यते । क्षिप्रं ददातीत्यर्थः । य इति पुरस्ताद्यच्छब्दश्रुतेः तं स्तुम इति वाक्यशेषः ॥

गौतमः । यः एक इत् एक एव । विदयते प्रयच्छति । वसु वसूनि । मर्ताय मनुष्याय । दाशुषे यजमानाय इन्द्रः । ईशानः विश्वस्य । अप्रतिष्कुतः अप्रत्यागतः केनापि । अङ्ग सत्यम् ॥ (९)

सखाय आशिषामहे ब्रह्मेन्द्राय वज्रिणे ।
स्तुष ऊ षु वो नृतमाय धृष्णवे ॥

विश्वमना आत्मीयानृत्विज आह । हे सखायः यूयं वयं च आशिषामहे आशास्महे । प्रार्थयाम इत्यर्थः । किं प्रार्थयामः । उच्यते । ब्रह्म अन्नम् । अन्नग्रहणं प्रदर्शनार्थम् । गोधनहिरण्यादि सर्वं प्रार्थयामः । कं पुनः प्रार्थयामः । उच्यते । इन्द्राय वज्रिणे । द्वे अप्येते चतुर्थ्येकवचने द्वितीयैकवचनस्य स्थाने द्रष्टव्ये । इन्द्रं वज्रिणम् । स्तुषे यस्मात् यूयं वयं च स्तुमः तस्मादित्यर्थ । ऊ सु इति द्वावपि पदपूरणौ । कीदृशमिन्द्रम् । उच्यते । वः नृतमाय युष्माकं मध्ये अतिशयेन मनुष्याय । धृष्णवे । इदमपि चतुर्थ्येकवचनं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । धृष्णुम् । शत्रूणामभिभवितारमित्यर्थः ॥

इति माधवाचार्यकृते छन्दसिकाभाष्ये चतुर्थः प्रपाठकः

विश्वमनाः । सखायः वयं आशिषामहे आशास्महे । ब्रह्म अन्नं हविः स्तोत्रं वा । इन्द्राय वज्रिणे । अथ प्रत्यक्षस्तुतिः । स्तुषे स्तौमि स्तुतिमुच्चारयामि । उ सु इतीमौ पादपूरणौ । वः तुभ्यम् । नृतमाय नेतृतमाय । धृष्णवे शत्रूणाम् ॥ (१०)

चतुर्थे दशमी दशत्या

चतुर्थः प्रपाठकः

पञ्चमः प्रपाठकः

गृणे तदिन्द्र ते शव उपमां देवतातये ।
यद्धंसि वृत्रमोजसा शचीपते ॥

प्रगाथ आह । गृणे स्तौमि । तत् हे इन्द्र ते शवः बलम् । कीदृशम् । उच्यते । उपमां सर्वबलानामुपमानभूतम् । अत्यन्तोत्कृष्ट-मित्यर्थः । क्व पुनः स्तौमि । उच्यते । देवतातये । चतुर्थ्येकवचनमिदं सप्तम्येकवचनस्य स्थाने द्रष्टव्यम् । देवतातौ । यज्ञे इत्यर्थः । कीदृशं पुनर्बलं स्तौमि । उच्यते । यत् । तृतीयाया अत्र लुक् द्रष्टव्यः । येन हंसि वृत्रं मेघम् । ओजसा बलेन । हे शचीपते । शचीति कर्मनाम । तस्य पतिः शचीपतिः । तस्य सम्बोधनं हे शचीपते । ज्योतिष्टोमादीनां कर्मणां अधिपतिभूत इत्यर्थः ॥

प्रगाथः । गृणे स्तौमि । तत् ते शवः बलं हे इन्द्र । उपमां अन्तिकम् । नित्यसिद्धं इत्यर्थः । देवतातये यज्ञार्थं यजमानार्थं वा । किं तच्छवः तदाह । यत् यः । हंसि अहन् । वृत्रं असुरम् । ओजसा बलेन हे शचीपते ॥ (१)

यस्य त्यच्छम्बरं मदे दिवोदासाय रन्धयन् ।
अयं स सोम इन्द्र ते सुतः पिब ॥

भरद्वाज आह । यस्य । यस्येत्यनेन सोमः प्रतिनिर्दिश्यते मदे इत्यनेन च सम्बद्ध्यते । मदे इत्यत्र यस्य च भावेन भावलक्षणम्

(पा. २. ३. ३७) इत्येवं सप्तमी। तच्छ्रुतेश्च लक्षणभूतक्रियापदाध्याहारः। यस्य सोमस्य मदे प्राप्ते। त्यत्। त्यच्छब्दः तच्छब्दपर्यायः। नपुंसकलिङ्गं व्यत्ययेन पुंलिङ्गस्य स्थाने द्रष्टव्यम्। तं शम्बरं नामासुरम्। दिवोदासाय दिवोदासनाम्नः राज्ञः अर्थाय। रन्धयन्। अयं सः सोमः हे इन्द्र त्वदर्थं सुतः अभिषुतः। एतत् ज्ञात्वा पिब॥

भरद्वाजः। यस्य सोमस्य मदे सति। त्यत् तत् प्रसिद्धं पूर्भेदनादिकर्म अकार्षीः। शम्बरं असुरं दिवोदासाय ऋषये रन्धयन्।

अहं पुरो मन्दसानो व्यैरं नव साकं नवतीः शम्बरस्य।
शततमं वेश्यं सर्वताता दिवोदासमतिथिग्वं यदावम्॥

(ऋ. वे. ४. २६. ३)

इति हि निगमः। अयं सः सोमः हे इन्द्र। ते त्वदर्थम्। सुतः अभिषुतः। पिब तं सोमम्॥ (२)

एन्द्र नो गधि प्रिय सत्राजिदगोह्य।
गिरिर्न विश्वतः पृथुः पतिर्दिवः॥

नृमेधा आह। आ इत्ययमुपसर्गः गधीत्याख्यातेन सम्बन्धयितव्यः। आगधि आगहि आगच्छेत्यर्थः। क्व। सामर्थ्यादस्मद्यज्ञे। हे इन्द्र नः अस्माकम्। प्रियः हे सत्राजित् सर्वदा शत्रूणां जेता। अगोह्य अगोहनीय। श्लाघ्य इत्यर्थः। गिरिर्न गिरिरिव। विश्वतः सर्वतः पृथुः। पतिः स्वामी। दिवः द्युलोकस्य। यत्तच्छब्दावध्याहृत्यैकवाक्यता योज्या। यस्त्वं गिरिरिव विश्वतः पृथुः पतिश्च द्युलोकस्य स त्वं हे इन्द्र आगहि॥

नृमेधाः। आगधि आगच्छ हे इन्द्र। नः अस्मान्। हे प्रिय सखे। सत्राजित् सर्वेषां जेतः। अगोह्य गूहयितुं तिरस्कर्तुं अशक्य। सदाप्रकाश।

गिरिः न शिलोच्चय इव । विश्वतः पृथुः विस्तीर्णः । पतिर्दिवः द्युलोकस्य स्वामी त्वं आगधि ॥ (३)

य इन्द्र सोमपातमो मदः शविष्ठ चेतति ।
येना हंसि न्यत्रिणं तमीमहे ॥

पर्वतस्यार्षम् । यस्तव स्वभूतः हे इन्द्र । सोमपातमः अतिशयेन सोमस्य पाता मदः । येन मदेन मत्तः पुनः पुनः सोमं पिबसीत्यर्थः । शविष्ठ । शव इति बलनाम । तदतिशयेन यस्यास्ति स शविष्ठः । तस्य सम्बोधनं हे शविष्ठ । अतिशयेन बलवन्नित्यर्थः । चेतति चेत्यते । ज्ञायते इत्यर्थः । जानाति वा सर्वम् । येन च मदेन निहंसि अत्रिणं रक्षःपिशाचादि । तं मदं ईमहे प्रार्थयामि । स तव मदः अस्मदीये यज्ञे अस्तु । तेन मदेन माद्यस्वेत्यर्थः ॥

पर्वतः । यः मदः त्वदीयः हे इन्द्र । सोमपातमः अतिशयेन सोमपाः । चेतति विज्ञायते सर्वैः । सोमपानजनिते मदे सति पुनश्च इन्द्रः सोमं पिबतीति सोमपातम इत्युच्यते । हे शविष्ठ शूरतम । येन मदेन निहंसि अत्रिणं अदनशीलं राक्षसम् । तं ईमहे उपगच्छामः । गोदा इद्रेवतो मदः (ऋ. वे. १. ४. २) इति हि मदस्य गवादिकामप्रदातृत्वं श्रुतम् ॥ (४)

तुचे तुनाय तत्सु नो द्राघीय आयुर्जीवसे ।
आदित्यासः समहसः कृणोतन ॥

इरिम्बिठिर्नाम ऋषिः । तस्येदमार्षम् । तुगित्यपत्यनाम । तस्मादियं तादर्थ्ये चतुर्थी । अपत्यस्यार्थायेत्यर्थः । तुनायेति तु धननाम । तस्मादियं तादर्थ्ये चतुर्थी । धनस्य चार्थायेत्यर्थः । तच्छब्दः आयुःशब्दात् परो द्रष्टव्यः । सुशब्दः पदपूरणः । नः अस्माकं देवस्येन्द्र-

स्यार्थाय । आयुस्तच्छब्दस्य प्रतिनिर्देशः । कस्मात् । श्रुतत्वात् । द्राघीय इत्यत्र उद्देशार्थीयस्य यच्छब्दोऽध्याहर्तव्यः । यद्द्राघीय आयुः यदतिशयेन दीर्घमायुः । तत्र जीवसे चिरं जीवनाय । हे आदित्यासः समहसः सपूजाः । कृणोतन कुरु इत्यर्थः । अपत्यानि धनं जीवितं चेति त्रितयमप्यनेन प्रकारेण प्रार्थ्यते । आदित्येयं ऋक् ॥

इरिम्बिठिः । तुचे तोकाय पुत्राय । तुनाय । तनोतेस्तुनः पौत्रः । तुनाय पौत्राय । तत् यत् युष्माभिः देयं तत् । सु सुष्ठु । नः अस्मदीयाय तुचे तुनाय च । द्राघीयः दीर्घतरम् । आयुः कृणोतन कुरुत । जीवसे जीवनाय । हे आदित्यासः अदितेः पुत्राः । समहसः सतेजसः ॥ (९)

वेत्था हि निर्ऋतीनां वज्रहस्त परिवृजम् ।
अहरहः शुन्ध्युः परिपदामिव ॥

विश्वमनस आर्षम् । हे इन्द्र वेत्थ जानीहि । कुर्वित्यर्थः । निर्ऋतीनाम् । निर्ऋतिर्मृत्युदेवता । तस्याः स्वभूतानां प्रवृत्तीनां मारणात्मिकानाम् । परिवृजं परिवर्जनम् । येनाहं तमावर्जये तथा कुर्वित्यर्थः । हे वज्रहस्त । कथं पुनर्जानीहि । उच्यते । अहरहः अहन्यहनि । शुन्ध्युः आदित्यः परिपदामिव । परीति सर्वतोभावे । पदिर्गत्यर्थः । सर्वतो गच्छन्तीति परिपदः । तेषां परिपदाम् । सर्वतो गन्तॄणां प्राणिनामित्यर्थः । एतदुक्तं भवति । यथा सर्वप्राणिनां आदित्यः लोकपालत्वात् शुभाशुभप्रवृत्ती वेत्ति तद्वन्निर्ऋतिप्रवृत्तीनां वर्जनं वेत्थ ॥

विश्वमनाः । वेत्थ जानासि हि त्वम् । निर्ऋतीनां निरयाणां अर्थानाम् । परिवृजं परिवर्जनं रिपुबाधनं वा । हे वज्रहस्त अहरहः शुन्ध्युः आदित्यः । परिपदामिव परितः पद्यमानानां रक्षसां मद्देहानामिव वर्जनम् ॥ (६)

अपामीवामप स्रिधमप सेधत दुर्मतिम् ।
आदित्यासो युयोतना नो अंहसः ॥

इरिम्बिठिर्नाम ऋषिः । तस्येदमार्षम् । आदित्या देवता । अपेत्ययमुपसर्गः सेधतेत्याख्यातेन सम्बन्धयितव्यः । सेधतिर्गत्यर्थः अन्तर्णीतण्यर्थश्च द्रष्टव्यः । अपसेधत अपगमयतेत्यर्थः । किम् । उच्यते । अमीवां रोगमित्यर्थः । अपगमयत स्रिधं शोषयितारं उद्वेगकरं सत्वादि । अपगमयत दुर्मतिं पापबुद्धिं रक्षःपिशाचादि । अपगमयतेत्यनुषङ्गः । हे आदित्यासः न केवलममीवादीन् अपगमयत । किं तर्हि । युयोतन पृथक्कुरुत । नः अस्मान् । कुतः । उच्यते । अंहसः पापात् । येन पापेन संबध्यामहे तत् पृथक्कुरुतेत्यर्थः । हे आदित्याः पापान्मोक्षयत ॥

इरिम्बिठिरेव । अपसेधत अपबाधध्वम् । अमीवां रोगम् । अपसेधत स्रिधं हिंसां शत्रुभिः क्रियमाणाम् । क्षयो वा स्रिक् । अपसेधत दुर्मतिं दुर्मनसम् । हे आदित्यासः आदित्याः । युयोतन पृथक्कुरुत । नः अस्मान् । अंहसः पापात् ॥ (७)

पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः ।
सोतुर्बाहुभ्यां सुयतो नार्वा ॥

वसिष्ठ इन्द्रमाह । हे इन्द्र पिब सोमम् । स च पीतः सन् मन्दतु । मन्दतिस्तृप्त्यर्थः अन्तर्णीतण्यर्थश्च द्रष्टव्यः । तर्पयतु त्वा त्वाम् । यः कतमः सोमः । उच्यते । यं ते त्वदर्थम् । सुषाव अभिषुतवान् अहं हर्यश्व । हरितवर्णावश्वौ यस्य स हर्यश्वः । तस्य सम्बोधनं हे हर्यश्व । हरितवर्णाश्व इत्यर्थः । अद्रिः । प्रथमैकवचनमिदं तृतीयाबहुवचनस्य स्थाने द्रष्टव्यम् ।

अद्रिभिः अभिषवणग्रावभिरित्यर्थः । सोतुः अभिसोतुः अध्वर्योः बाहुभ्याम् । कथं वा पिबामि । उच्यते । सुयतः सुबद्धः । नशब्द उपमार्थीयः अर्व-शब्दाच्च परो द्रष्टव्यः । अर्वशब्दः अश्ववचनः । अश्व इवेत्यर्थः ॥

वसिष्ठः । पिबा पिब सोमं हे इन्द्र । पीतश्च सोमः मन्दतु त्वा त्वाम् । यं सोमं ते त्वदर्थम् । सुषाव अभिषुतवान् । अद्रिः ग्रावा हे हर्यश्व । सोतुः अभिषवकर्तुः अध्वर्योः । बाहुभ्यां हस्ताभ्याम् । सुयतः सुपरिगृहीतः । नेति पुरस्तादुपचारोऽपि उपमार्थीयः । अर्वा न अश्व इव सादिना सुयतः ॥ (८)

पञ्चमे प्रथमा दशती

अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि ।
युधेदापित्वमिच्छसे ॥

सौभरेरार्षम् । भ्रातृव्यः शत्रुः । अविद्यमानो भ्रातृव्यो यस्य सः अभ्रातृव्यः । असम्भजितवान् शत्रुभिरित्यर्थः । अना । अनः प्राणः । तस्मात्तृतीयैकवचनस्य सुपां सुलुक् (पा. ७. १. ३९) इति पूर्वसवर्णः । अना अनेन प्राणेन हेतुना । सर्वशत्रूणां जितत्वात् अशत्रुः त्वम् । तथा अनापिः त्वं हे इन्द्र जनुषा जन्मना । सनादसि ज्ञातिर्भवसि । कथं तर्हि ज्ञातिर्भवति । उच्यते । युधा युद्धेन । विनिर्जित्येति वाक्यशेषः । इच्छब्दः पदपूरणः । आपित्वं ज्ञातित्वं इच्छसे । एतदुक्तं भवति । यस्त्वां सम्भजते यस्तव यागं करोति यश्च त्वां यजेत तस्य त्वं ज्ञातित्व-मिच्छसि नान्यस्य ॥

षण्णां सौभरिः । अभ्रातृव्यः अशत्रुकः । अना । नेता यस्य नास्ति सोऽना । स्वयं सर्वस्य नेता । अनापिः । आपिः बन्धुः । तद्रहितश्चासि त्वम् । जनुषा जन्मना स्वतः । सनात् चिरादारभ्य हे इन्द्र । युधा इत् युद्धेनैव । आपित्वं बन्धुभावम् । इच्छसे इच्छसि । येषां स्तोतॄणां अर्थे युध्यसे तेषां बन्धुत्वं इच्छसि ॥ (१)

यो न इदमिदं पुरा प्र वस्य आनिनाय तमु वः स्तुषे ।
सखाय इन्द्रमूतये ॥

सौभरेरार्षम् । यः इन्द्रः । नः अस्मभ्यम् । इदमिदं वः युष्मभ्यं प्रदत्तवान् । प्र वस्यः प्रकर्षेण वस्यः वसीयः । आनिनाय आभिमुख्येन गच्छति । हे सखायः मदीया ऋत्विजः । तमिन्द्रम् । उ इति पदपूरणः । वः स्तुषे स्तौमि । किमर्थम् । उच्यते । ऊतये आत्मनः पालनार्थमित्यर्थः ॥

यः नः अस्मभ्यम् । इदमिदं इदं दृश्यमानं सर्वं गृहधनादिकम् । वस्यो वसीयः प्रशस्यतरम् । प्र प्रकर्षेण आनिनाय । पूर्वं सामान्येन वचनात् आनिनायेति प्रथमपुरुषः । तमु तमेव । वः त्वाम् । स्तुषे स्तुमहे वयम् । सखायः पूर्वं च स्तोतारः वयम् । इन्द्रमीश्वरं त्वाम् । ऊतये रक्षार्थम् ॥ (२)

आगन्ता मा रिषण्यत प्रस्थावानो माप स्थात समन्यवः ।
दृढा चिद्यमयिष्णवः ॥

सौभरेरार्षम् । मरुत उच्यन्ते । हे मरुतः आगन्त आगच्छत अस्मदीयं यज्ञम् । मा रिषण्यत मा हिंसिष्ट किंचित् । मा केनचित् सह युद्धं कार्ष इत्यर्थः । हे प्रस्थावानः शत्रूणामुपरि युद्धार्थं गन्तार इत्यर्थः । दृढाः स्थिराः चित् । चिच्छब्दः अपिशब्दस्यार्थे । दृढानामपि शत्रुकुलानां यमयिष्णवः यमनशीलाः । निरोद्धार इत्यर्थः ॥

आगन्ता आगच्छत । मा रिषण्यत मा हिंस्त । हे प्रस्थावानः प्रस्थानशीलाः सदागतयो मरुतः । मापस्थात मा अपगच्छत अस्मत्तः । समन्यवः समानचित्ताः । दृढा चित् दृढान्यपि पर्वतादीनि । यमयिष्णवः यन्तुं शक्ताः ॥ (३)

आ याह्ययमिन्दवेऽश्वपते गोपत उर्वरापते ।
सोमं सोमपते पिब ॥

सौभरेरार्षम् । आयाहि आगच्छ । अयं इन्दवे । द्वे अपि द्वितीयैकवचनस्य स्थाने द्रष्टव्ये । इममिन्दुं प्रति । हे अश्वपते गोपते उर्वरापते । उर्वरा जातसस्या पृथिवी । तस्याः स्वामी उर्वरापतिः । तस्य सम्बोधनं क्रियते हे उर्वरापते । जातसस्यायाः पृथिव्याः स्वामिन्नित्यर्थः । एत्य च सोमं हे सोमपते पिब ॥

आयाहि आगच्छ । इन्दवे इन्दुं सोममुद्दिश्य । अयं सोमः । त्वदर्थं तिष्ठतीति शेषः । हे अश्वपते गोपते उर्वरापते । उर्वरा सर्वसस्याढ्या भूमिः । आगत्य च सोमं पिब हे सोमपते इन्द्र ॥ (४)

त्वया ह स्विद्युजा वयं प्रति श्वसन्तं वृषभ ब्रुवीमहि ।
संस्थे जनस्य गोमतः ॥

सौभरिः नाम ऋषिः । स इन्द्रमाह । त्वया । ह इति विनिग्रहार्थीयः । त्वयैव । स्विदिति पदपूरणः । युजा । युज्यत इति युक् सहायः । तेन युजा । सहायेनेत्यर्थः । वयम् । प्रतीत्ययं ब्रुवीमहीत्यनेन सम्बन्धयितव्यः । प्रतिब्रुवीमहि प्रतिवदामेत्येतदाशास्महे । क्व पुनर्वदामः । उच्यते । संस्थे । संतिष्ठन्ते यत्र योद्धारः स संस्थः सङ्ग्रामः । तस्मिन्

संस्थे । कस्य सम्बन्धिनि । उच्यते । जनस्य गोमतः गोषु ह्रियमाणासु चोरैः सह यः सङ्ग्रामः तस्मिन् कृते हन्याम इत्यर्थः ॥

त्वया युजा सहायेन । वयं प्रतिब्रुवीमहि प्रतिबोधेमहि इत्यर्थः । श्वसन्तं बाधमानमिति यावत् । स्विदिति पूरणः । हे वृषभ वर्षितः कामानाम् । संस्थे संस्थाने । जनस्य शत्रुजनस्य गोमतः । युद्धे इत्यर्थः ॥ (९)

गावश्चिद्धा समन्यवः सजात्येन मरुतः सबन्धवः ।
रिहते ककुभो मिथः ॥

मारुतीयमृक् । सौभरेरार्षम् । गोशब्देनात्र आदित्यरश्मय उच्यन्ते । चिच्छब्दः उपमायाम् । आदित्यरश्मय इव । ह इति पदपूरणः । समन्यवः । मन्युर्मन्यतेर्दीप्तिकर्मणः । समानदीप्तयः । आदित्यरश्मय इव सर्वे सदीप्ता इत्यर्थः । सजात्येन समानजातित्वेन सर्वेषाम् । कथं समानजातित्वम् । एकस्मात् पृश्नेः सकाशाज्जायमानत्वात् । मरुतः सबन्धवः । स एव पृश्निः समानो बन्धुर्येषाम् । एकपितृका इत्यर्थः । रिहते आस्वादयन्ति । ककुभः प्रधानभूताः आदित्यरश्मयः । मिथः परस्परम् । अथवा ककुभो दिशः । दिक्शब्देनात्र दिग्वासिनो यजमाना लक्ष्यन्ते । तानास्वादयन्ति उपजीवन्तीत्यर्थः । कथमुपजीवन्ति । उच्यते । मिथः सहभूता इत्यर्थः । अथवा गाव एव समन्यवो दीप्ताः । सजात्यः सपक्षाः पुत्रपौत्रभ्रात्रादि । तेन । हे मरुतः अनड्वाहः । सम्बन्धवः रिहते आस्वादयन्ति । ककुभः ककुप्प्रदेशे तज्जिह्वया विलिहन्ति । मिथः पृथक् ॥

गावश्चित् गाव इव वत्सान् । रिहते इति सम्बन्धः । घेति पूरणः । हे समन्यवः सजात्येन सजातेर्भावेन । एकस्माद्रुद्रात् जाता इति सजात्येन समन्यव

इति। हे मरुतः सबन्धवः समानः एको बन्धुः द्रष्टा सौभरिः यासां ककुभां ताः सबन्धवः। ककुभः ककुप्छन्दस्का ऋचः। मिथः सबन्धव इति संबन्धः। रिहते लिहते युष्मान्। रेफश्छान्दसः। आगन्ता मा रिषण्यत इत्यस्मिन् सूक्ते (ऋ. वे. ८. २०) काकुभा हि प्रगाथाः। अतः ककुभो रिहते इति कीर्त्यते॥ (६)

त्वं न इन्द्राभर ओजो नृम्णं शतक्रतो विचर्षणे।
आ वीरं पृतनासहम्॥

नृमेधस आर्षम्। त्वं नः अस्मभ्यम्। हे इन्द्र आभर आनय। देहीत्यर्थः। किमाभरामि। उच्यते। ओजो बलम्। नृम्णं धनं चेत्यर्थः। हे शतक्रतो। शतमिति बहुनाम। क्रतुरित्यपि कर्मनाम प्रज्ञानाम वा। बहूनि कर्माणि प्रज्ञा वा यस्य स शतक्रतुः। तस्य सम्बोधनं हे शतक्रतो बहुकर्मन् बहुप्रज्ञ वेत्यर्थः। हे विश्वचर्षणे विश्वस्य द्रष्टः। आ इत्युपसर्गश्रुतेः भरेत्याख्यातं अपकृष्यते। आभर। वीरं पुत्रम्। कीदृशं पुत्रम्। उच्यते। पृतनासहम्। पृतना इति सङ्ग्रामनाम। तस्मिन् शत्रूणामभिभवितारमित्यर्थः॥

द्वयोः नृमेधाः। त्वं नः अस्मभ्यम्। आभर आहर। ओजो बलम्। नृम्णं नृभिः मननीयं स्तुत्यम्। हे इन्द्र शतक्रतो विचर्षणे विद्रष्टः। आहर वीरं पुत्रम्। पृतनासहं सेनानां अभिभवितारम्॥ (७)

अधा हीन्द्र गिर्वण उप त्वा काम ईमहे ससृग्महे।
उदेव ग्मन्त उद्भिः॥

नृमेधस आर्षम्। अध इत्ययं पदपूरणः। हीत्ययं हेतौ ईमहे इत्येतस्माच्च परो द्रष्टव्यः। हे इन्द्र गिर्वणः। गिरः स्तुतयः। ताभिर्वन्यते

सम्भज्यते यः स गिर्वणः । तस्य सम्बोधनं हे गिर्वणः । स्तुतिभिः सम्भजनीय इत्यर्थः । उपेत्ययमुपसर्गः ईमहे इत्याख्यातेन सम्बन्धयितव्यः । त्वा त्वाम् । कामः । प्रथमैकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । कामम् । कामशब्देनात्र काम्यमानत्वात् धनमुच्यते । कामं धनं उपेमहे । उपगम्य याचामहे इत्यर्थः । कस्मात्पुनर्याचामहे । उच्यते । ससृग्महे । हि यस्मात् विसृजाम दद्मः । किम् । सामर्थ्याद्धविः । एतदुक्तं भवति । यस्मात्तव हविर्दत्तं तस्माद्याचामहे इत्यर्थः । कथं याचामहे । उच्यते । उदा इव ग्मन्तः उदभिः यथा केचिद्वणिजः नदीस्रोतोलक्षणेन उदकेन बहुभिर्वा समुद्रलक्षणैरुदकैर्वाणिज्यार्थेन नावा गच्छन्तः लाभादष्टगुणं याचन्ते तद्वद्याचामहे इत्यर्थः ॥

अधा अधुना । हीति पूरणः । हे इन्द्र गिर्वणः उप ईमहे उपगच्छामः । कामे स्वकामे निमित्ते । ससृग्महे संसृजामः । त्वा त्वाम् । स्तुतिभिः इति शेषः । उदा इव उदकेनेव । ग्मन्तः गच्छन्तः पुरुषाः । उदभिः उदकैः संयोजयन्ति उदकार्थिनः पुरुषान् । अथवा काम इत्यत्र विभक्तिव्यत्ययः । कामैः धनादिभिः ससृग्महे संयुञ्जेमहि यथा उदकेन च ग्मन्त उदकैः संयुज्यन्ते तद्वत् ॥ (८)

सीदन्तस्ते वयो यथा गोश्रीते मधौ मदिरे विवक्षणे ।
अभि त्वामिन्द्र नोनुमः ॥

सौभरेरार्षम् । सीदन्तः । कथं सीदन्तः । उच्यते वयो यथा । वयः पक्षिणः । ते यथा सन्ध्यायामेकत्र वृक्षे समस्ताः व्यवतिष्ठन्ते तद्वदेकत्र वेद्याख्ये प्रदेशे व्यवतिष्ठन्तः इत्यर्थः । ते तव सम्बन्धिनि सोमे । कीदृशे सोमे । उच्यते । गोश्रीते । गोशब्देनात्र गोविकारत्वात पय उच्यते । तेन सह मिश्र्यते यः स गोश्रीतः । तस्मिन् गोश्रीते । पयोभि-

मिश्रिते इत्यर्थः । मधौ मधुरस्वादुयुक्ते । मदिरे मदकरे इत्यर्थः । विवक्षणे वक्तुमिच्छते । येन बह्वयो वाचः प्रयुज्यन्ते स विवक्षणः । तस्मिन् विवक्षणे । एतदुक्तं भवति । येन सोमेन पीतेन मत्तः सन् एकः ऋग्यजुस्सामविषयः प्रयुङ्क्ते यजमानः ॐ श्रावय अस्तु श्रौषट् इति च तस्मै यथा धनं ददासि तस्मिन् । अभिषुतः इति वाक्यशेषः । अभीत्ययमुपसर्गः नोनुम इत्याख्यातेन सम्बन्धयितव्यः । त्वा त्वां हे इन्द्र । अभिनोनुम अत्यर्थं स्तुम इत्यर्थः ॥

द्वयोः सौभरिः । सीदन्तः तिष्ठन्तः । ते तव असाधारणे । गोश्रीते गोविकारेण आशिरा पक्वे । मधौ सोमे । मदिरे हर्षकरे । विवक्षणे विवेक्तरि । सोमयागशीले इत्यर्थः । वयो यथा पक्षिणो यथा वृक्षे सीदन्ति तद्वत् सोमे सीदन्तः वयं त्वां अभिनोनुमः भृशं अभिष्टुमः हे इन्द्र ॥ (९)

वयमु त्वामपूर्व्य स्थूरं न कच्चिद्भरन्तोऽवस्यवः ।
वज्रिन् चित्रं हवामहे ॥

सौभरेरार्षम् । वयम् । उ इति पदपूरणः । त्वा त्वाम् । अपूर्व्य । अविद्यमानः पूर्वो यस्मात् स अपूर्वः । अपूर्व एव अपूर्व्यः । स्वार्थिको यप्रत्ययः । तस्य सम्बोधनं क्रियते हे अपूर्व्य । स्थूरं न । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । स्थूरशब्दोऽत्र ईश्वरवचनः । ईश्वरवत् । कच्चित् किञ्चिदित्यर्थः । भरन्तः । डुभृञ् धारणपोषणयोरित्येतस्य पोषणार्थस्य इदं रूपम् । भरन्तः पुष्णन्तः । किम् सामर्थ्याद्धविः । अथवा स्थूरं न । नशब्द उपमार्थीयः । स्थूरमिव । यथा कश्चिद्रथं भरन्तः धान्यादि हरन्तः प्रापयन्तो वा । अवस्यवः पालनकामा इत्यर्थः । वज्रिन् ।

वज्रोऽस्यास्तीति वज्री । तस्य सम्बोधनं हे वज्रिन् । चित्रं पूज्यं त्वाम् । हवामहे आह्वयामः ॥

वयं त्वां हवामहे । उ इति पूरणः । हे अपूर्व्य यस्मात् पूर्वः नास्ति सः अपूर्व्यः प्रथमः । स्थूरं न कच्चित् स्थूलमिव किंचित् कुसूलादिकं यवादिभिः । त्वां भरन्तः पूरयन्तः पूरयिष्यन्तः सोमेन । अवस्यवः रक्षणं इच्छन्तः । चित्रं पूजनीयं त्वाम् । हवामहे हे वज्रिन् ॥　(१०)

पञ्चमे द्वितीया दशती

स्वादोरित्था विषुवतो मधोः पिबन्ति गौर्यः ।
या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभथा वस्वीरनु स्वराज्यम् ॥

गोतमस्यार्षम् । स्वादोः विषुवतः मध्वः । त्रीण्येतानि उदकविशेषणानि । स्वादोः सृष्टस्य । कस्य । सामर्थ्यात् उदकस्य । विषुवतः । विषुशब्दः विष्लृ व्याप्तौ इत्यस्य व्याप्तिवचनः । व्याप्तिमतः । मधोः मधु स्वादु उदकं पिबन्ति । काः पिबन्ति । सामर्थ्यात् गावः । क्व पुनः पिबन्ति । उच्यते । इत्था अमुत्र देवलोके । कीदृश्यो गावः । उच्यते । गौर्यः गौरवर्णाः । इन्द्रेण सयावरीः सहगन्त्र्यः । यत्र यत्र इन्द्रो गच्छति तत्र तत्र पश्चाद्गच्छन्ति इत्यर्थः । कीदृशेनेन्द्रेण । उच्यते । वृष्णा वर्षित्रा । मदन्ति तृप्यन्ति घासादिना । शोभथा शरीरे वृष्टिलक्षणशोभनार्थम् ।

वस्वीः । वस्विति धननाम द्रष्टव्यम् । वस्वीः धनवत्यः । क्व पुनः तृप्यन्ति । उच्यते । अनु स्वराज्यं स्वराज्यं प्रति । यत्र यत्र स्वाधिपत्यं तत्र तत्र तृप्यन्ति इत्यर्थः । या इन्द्रेण सयावरीरिति परस्ताद्यच्छब्दश्रुतेः पूर्वोऽर्धर्चः तच्छब्द-मध्याहृत्य एकवाक्यतां नेयः । या इन्द्रेण सयावरीः ताः स्वादोरित्था विषुवतो मध्वः पिबन्तीति । अथवा गौर्यः आदित्यरश्मयः गमनात् । मधोः सोमलक्षणस्य । षष्ठीनिर्देशात् पिबन्त्येकदेशम् । याः इन्द्रेण आदि-त्येन सयावरीः सह गच्छन्त्यः । वृष्णा वर्षकर्त्रा । अपः मदन्ति तृप्यन्ति । शोभथा दीप्त्या । वस्वीः धनवत्यः स्वराज्यमनु तृप्यन्ति ॥

स्वादोरष्टादशस्वृक्षु चरमा न तमित्यसौ ।
उपरिष्टाद्बृहत्यन्यास्ताः सप्तदश पङ्क्तयः ॥
चन्द्रमा नतमित्येते वैश्वदेव्यौ प्रतीत्यसौ ।
आश्विनी तिस्र आग्नेय्य आ ते अग्न इधीमहि ॥
अग्निं नाग्निं तमित्येता महे नो उषसः स्तुतिः ।
सौमी तु भद्रमित्येषा शिष्टा एकादशेन्द्रगीः ॥
आदितो गौतमोऽष्टानामृषिः क्रत्वा महेति च ।
प्रतिप्रियेत्यवस्युः स्यात् चन्द्रमा इति तु त्रितः ॥
आ ते अग्निं तमित्येते द्वे वसुश्रुत् समैक्षत ।
सत्यश्रवा उषस्याया अग्निं नो भद्रमित्यृचौ ॥
विमदोऽपश्यदन्त्यं तु वामदेवोऽब्रवीन्न तम् ॥

इन्द्रलोको गोलोकः इत्यस्यामृचि उच्यते । स्वादोः रसवतः । इत्था अमुत्र लोके । विषुवतः व्याप्तिमतः । मधोः सोमस्य । सोममित्यर्थः । पिबन्ति गौर्यः गावः । याः इन्द्रेण सयावरीः सहगन्त्र्यः । आतो मनिन्क्वनिब्वनिपश्च (पा. ३. २. ७४) इति वनिप् । वनो र च (पा. ४. १. ७) इति स्त्रीप्रत्ययो रेफश्च नकारस्य । वृष्णा वर्षित्र्यः । मदन्ति तृप्यन्ति । शोभथा । पुरुषव्यत्ययः । शोभन्ते । वस्वीः बृहत्यः ता अन्वासते स्वराज्यं स्वराड्भावं इन्द्रस्य ॥ (१)

इत्था हि सोम इन्मदो ब्रह्मा चकार वर्धनम् ।
शविष्ठ वज्रिन्नोजसा पृथिव्या निःशशा अहिमर्चन्ननु स्वराज्यम् ॥

गोतमस्यार्षम् । हिशब्दो यस्मादर्थे । इत्था सत्यं अनेन वा वक्ष्यमाणेन प्रकारेण । सोमे इत् । इच्छब्दः पदपूरणः । मदः । प्रथमैकवचनमिदं सप्तम्येकवचनस्य स्थाने द्रष्टव्यम् । मदे । सप्तमी चेयं यस्य च भावेन भावलक्षणम् (पा. २. ३. ३७) इत्येवम् । तच्छ्रुतेश्च लक्षणभूतक्रियापदाध्याहारः । सोमे उपकल्पिते । ब्रह्म चकार । ब्रह्मशब्दः ब्राह्मणशब्दपर्यायः । गोतमश्च परोक्षरूपेण प्रथमपुरुषेण आत्मानं निर्दिशति । गोतमनामा ब्राह्मणः चकार करोति । किं करोति । सामर्थ्यात् स्तोत्रम् । कीदृशं स्तोत्रम् । उच्यते । वर्धनं वीर्येण शरीरेण वा वृद्धिकरमित्यर्थः । यस्मादिति वचनात्तस्मादित्याध्याहार्यम् । तस्मात् हे शविष्ठ अतिशयेन बलवन् । ओजसा स्वेन बलेन । पृथिव्याः । पृथिवीत्यन्तरिक्षनाम । अन्तरिक्षात् । निःशशाः । शश प्लुतावित्यस्येदं रूपं अन्तर्णीतण्यर्थश्चात्र द्रष्टव्यम् । निर्गमय । भूमौ पातयेत्यर्थः । अहिं मेघम् । वृष्टिमित्यर्थः । अर्चन्ननु । अनुशब्दः छन्दसि परेऽपि (पा. १. ४. ८१) इत्येवं अर्चन्शब्दात् परः प्रयुक्तः स पूर्वो द्रष्टव्यः । अन्वर्चन् अनुपूजयन्नित्यर्थः । स्वराज्यं त्रैलोक्याधिपत्यम् ॥

इत्था इत्थं वक्ष्यमाणप्रकारेण । हीति पूरणः । सोमे गृहीते सतीति शेषः । इत् एव । मदः । मदेः स्तुतिकर्मणः मदः स्तोता । ब्रह्म स्तोत्रम् । चकार करोति । वर्धनं वृद्धिहेतुं तव । हे शविष्ठ शूरतम । वज्रिन् ओजसा बलेन स्वेन । पृथिव्याः अन्तरिक्षात् । निःशशाः निर्गमय । शश प्लुतगतौ इति धातुः । अहिं मेघम् । अर्चन् पूजयन् अनु अन्वास्ते स्वराज्यं स्वराड्भावम् ॥　　(२)

इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
तमिन्महत्स्वाजिषूतिमर्भे हवामहे स वाजेषु प्र नोऽविषत् ॥

गोतमस्यार्षम् । तमिन्महत्स्विति परस्तात्तच्छब्दश्रुतेः यच्छब्दोऽध्याहर्तव्यः । यः इन्द्रः मदाय ववृधे वर्धते स्तुतिभिः सोमैश्च । शवसे बलाय । वृत्रहा मेघस्य हन्ता । नृभिः शत्रुमनुष्यैः । अथवा वृत्रः शत्रुः । तस्य हन्ता । तमिन्द्रम् । इदिति पदपूरणः । महत्सु आजिषु सङ्ग्रामेषु । ऊतिम् । द्वितीयैकवचनमिदं चतुर्थ्येकवचनस्य स्थाने द्रष्टव्यम् । ऊतये पालनाय । अर्भे अल्पे च सङ्ग्रामे । हवामहे आह्वयामः । आहूतश्च सन् सः वाजेषु सङ्ग्रामेषु । प्र नोऽविषत् । प्रेत्ययमुपसर्गः अविषदित्यनेन सम्बन्धयितव्यः । नः अस्मान् । प्राविषत् प्रकर्षेण अवतु रक्षत्वित्यर्थः ॥

इन्द्रः वृत्रहा मदाय । मदयतीति मदः सोमः । तदर्थम् । तं पातुं इत्यर्थः । ववृधे वर्धयते । लडर्थे लिट् । वृद्धः क्रियते । प्रवृद्धेन हि सोमः पातव्यो भवति । शवसे बलाय । सोमपानेन हि बलं भवति इति । कैः ववृधे । नृभिः नेतृभिः स्तोत्राणां कर्मणां वा ऋत्विग्यजमानैः वा । तं इन्द्रं इत् । महत्सु आजिषु संग्रामेषु प्राप्तेषु । हवामहे आह्वयामः । इदिति एवार्थे । ऊतिम् । अवतेः कर्तरि क्तिच् । रक्षकम् । अर्भे अल्पे च संग्रामे हवामहे । सः इन्द्रः वाजेषु । संग्रामेषु भविष्येषु । प्राविषत् प्ररक्षतु । नः अस्मान् ॥ (३)

इन्द्र तुभ्यमिदद्रिवोऽनुत्तं वज्रिन् वीर्यम् ।
यद्ध त्यं मायिनं मृगं तव त्यन् माययावधीरर्चन्ननु स्वराज्यम् ॥

गोतमस्यार्षम् । हे इन्द्र तुभ्यम् । चतुर्थ्येकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् । तव । इदिति पदपूरणः । हे अद्रिवः । अद्रयः अभिषवणग्रावाणः । तैस्तद्वान् । अथवा अद्रिर्मेघः । तेन हन्तव्येन तद्वान् ।

अथवा अद्रिर्वज्रः । तेन तद्वान् । अनुत्तम् । नुद प्रेरणे इत्येतस्येदं रूपम् । अप्रेरितम् । अनभिभूतपूर्वं केनचिदित्यर्थः । हे वज्रिन् वीर्यं सामर्थ्यमित्यर्थः । येन किं कृतम् । उच्यते । यद्ध त्यम् । ह इति पदपूरणः । त्यच्छब्दः तच्छब्देन समानार्थः । द्वितीया च तृतीयार्थे द्रष्टव्या । येन । मायिनं मायावन्तम् । मृगं नामासुरम् । मार्गणीयं वा मेघम् । तच्छब्दश्रुतेश्च योग्यार्थसम्बन्धो यच्छब्दोऽध्याहर्तव्यः । यमन्ये हन्तुमशक्नुवन्तः । त्यत् तं तव मायया स्वकीयया प्रज्ञया अवधीः । अर्चन्ननु स्वराज्यमित्युक्तार्थम् ॥

हे इन्द्र तुभ्यं इत् तवैव । वीर्यं अनुत्तं अनुक्तं केनापि । हे अद्रिवः अद्रिमन् । अद्रयः अभिषवणग्रावाणः । हे वज्रिन् यत् येन वीर्येण । हेति पूरणः । मायिनं मायाविनम् । त्यं तम् । मृगं मार्गितव्यं इतस्ततः । न दृश्यमित्यर्थः । मायया अवधीः मृगनामानं असुरम् । तव तवैव । त्यत् तत् कर्म भवति । अर्चन्ननु स्वराज्यं इति सिद्धः पादः ॥ (४)

प्रेह्यभीहि धृष्णुहि न ते वज्रो नि यंसते ।
इन्द्र नृम्णं हि ते शवो हनो वृत्रं जया अपोऽर्चन्ननु स्वराज्यम् ॥

गोतमस्यार्षम् । प्रेहि प्रगच्छ । प्रगम्य च अभ्येहि । अभिगम्य च धृष्णुहि अभिभव च शत्रुम् । किं कारणम् । उच्यते । यस्मात् न ते वज्रो नियंसते यस्मात्तव स्वभूतो वज्रः न नियम्यते । न निवार्यते केनचिदित्यर्थः । किंच हे इन्द्र नृम्णं हि ते शवः यस्मात शत्रुभूतानामपि मनुष्याणामवनामकरं तव शव. बलं तस्मात् हनः वृत्रं मेघम् । हत्वा च जया अपः साधय पातय वा । अर्चन्ननु स्वराज्यम् ॥

प्रेहि प्रगच्छ । अभीहि अभिगच्छ शत्रून् । धृष्णुहि आक्रमस्व । न नियंसते न नियम्यते केनचित् । ते वज्रः हे इन्द्र । नृम्णं नृणां

नामकम् । हि ते शवो बलम् । हनः जहि वृत्रम् । जया वशीकुरु अपः । सिद्धः शेषः ॥ (९)

यदुदीरत आजयो धृष्णवे धीयते धनम् ।
युङ्क्ष्वा मदच्युता हरी कं हनः कं वसौ दधोऽस्मा इन्द्र वसौ दधः ॥

गोतमस्यार्षम् । यत् यस्मात् । उदीरत उच्चारयन्ति तव स्तुतीरित्यर्थः । आजयः । आजिः सङ्ग्रामः । तस्माच्चात्र तात्स्थ्यं लक्ष्यते । मञ्चाः क्रोशन्तीति यथा । सङ्ग्रामस्था मनुष्याः । यदा च धृष्णवे परकीयानामभिभवित्रे । योद्धे इत्यर्थः । धीयते परितुष्टैः स्वामिभिर्दीयते धनम् । अथवा यदा उदीरते उदीर्यन्ते प्रेर्यन्ते । कास्ताः । उच्यते । आजयः । अज गतिक्षेपणयोरित्येतस्येदं रूपम् । त्वां प्रति गन्त्र्यः स्तुतय इत्यर्थः । किं च धृष्णवे शत्रूणामभिभवित्रे तव । धीयते दीयते धनम् । धिनोतेः प्रीणनार्थस्य धनम् । प्रीणयति सोमाहुतिरित्यर्थः । यदेति वचनात्तदेत्यध्याहार्यम् । तदा युङ्क्ष्व स्वरथे अस्मत्समीपागमनार्थम् । मदच्युता मदच्युतौ हरी मदकरं सोमं प्रति गन्तुमुन्मुखौ अश्वौ । एत्य च कं हनः कं वसौ दधः कंचित् जहि । कंचिद्वसौ दधः धृतवान् । केषांचिद्धनं देहीत्यर्थः । तत्रास्मान् हे इन्द्र वसौ दधः अस्मान् धने धारय । अस्मभ्यं धनं देहीत्यर्थः ॥

अत्रेदमाख्यानम् । रहूगणपुत्रो गोतमः कुरुसृञ्जयानां पुरोहित आसीत् इति । यद्यदा आजयः सङ्ग्रामाः । उदीरते उद्गच्छति उत्पद्यते । तदानीं धनं धृष्णवे यो धृष्णुः धर्षयिता शत्रूणां जेता भवति तस्मै । धीयते दीयते । धनं भवतीत्यर्थः । हे इन्द्र त्वं तादृशेषु प्रवृत्तेषु मदच्युता शत्रूणां मदस्य च्यावयितारौ । हरी त्वदीयावश्वौ । युङ्क्ष्व त्वदीये रथे योजय । योजयित्वा च कंचिद्राजानं तव परिचरणमकुर्वन्तं हनः हंसि । कंचन त्वां परिचरन्तं वसौ

धने दधः स्थापयसि । हे इन्द्र अस्मान् अस्मदीयान् त्वत्परिचारकान् वसौ धने दधः स्थापयेति ॥ (६)

अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥

गोतमस्यार्षम् । अक्षन् । अदेर्भक्षणार्थस्येदं रूपम् । अक्षन्ताम् । अमीमदन्तेति तृप्त्यर्थः । हिशब्दश्चार्थे । तृप्तवन्तश्च । के । सामर्थ्यात् पितरः । अवेत्ययं अधूषतेत्यनेन सम्बध्यते । कीदृशाः पितरः । प्रियाः मम गोतमस्य भवतो वा इन्द्रस्य । अवाधूषत । धूञ् कम्पने इत्यस्येदं रूपम् । कम्पितवन्तः । अस्तोषत । स्तुताश्च अस्माभिः स्वभानवः स्वदीप्तयः । अनन्यविभूतयः अपराश्रयविभूतय इत्यर्थः । विप्राः मेधाविनः । नविष्ठया नवतरया । मती । मन्यति इत्यर्चतिकर्मा । मतिः स्तुतिः । तस्मात् तृतीयैकवचनम् । तस्मात् अयमीकर आदेशः । मती मत्या । अन्येनानुक्तपूर्वया स्तुत्येत्यर्थः । कृतबुद्धिश्रद्धा यानयोग्या वयम् । एतत् ज्ञात्वा अस्मद्यज्ञमागन्तुं योज नियुङ्क्ष्व । नु क्षिप्रम् । हे इन्द्र ते तव स्वभूतौ हरी अश्वावित्यर्थः ॥

श्राद्धे क्लृप्तानां विप्राणां श्रावणे विहिता एषा । अक्षन् अक्षितवन्तः । घस्लृ अदने इत्यस्मादादेर्वा घस्लादेशे लुङि रूपम् अक्षन्निति । मन्त्रे घसह्वर (पा. २. ४. ८०) इत्यादिना च्लेर्लोपः । अमीमदन्त मादयन्ति स्म । तृप्ता आसन् । हीति चेत्यस्यार्थे । अवाधूषत अवाधून्वन्त क्षुधम् । प्रियाः अस्माकं पितरः विप्ररूपमधिष्ठाय स्थिताः । अस्तोषत अस्तूयन्त । स्वभानवः । स्वीयतया परिगृहीतः भानुः दीप्तिः येषां ते स्वभानवः । विप्राः प्राज्ञाः । नविष्ठया नवतमया । मती मत्या । तैः सह गृहान् गन्तुं योज युङ्क्ष्व रथे । नु सद्यः हे इन्द्र । ते तव हरी अश्वौ ॥ (७)

उपो षु शृणुही गिरो मघवन् मा तथा इव ।
कदा नः सूनृतावतः कर इदर्थयास इद्योजा न्विन्द्र ते हरी ॥

गोतमस्यार्षम् । उपेत्ययमुपसर्गश्रुतेः क्रियापदमध्याहार्यम् । उपगम्य सुशृणुहि सुष्ठु शृणुहि । गिरः अस्मदीयाः स्तुतीः । हे मघवन् धनवन् । मा तथा । तनु विस्तारे इत्यस्येदं रूपम् । मा विस्तारं कार्षीः । मा विलम्बिष्ठाः । शीघ्रमागच्छेत्यर्थः । इवेत्ययमुपमार्थः अस्त्युपमार्थस्य संप्रत्यर्थे प्रयोगः इति पदपूरणः । कदा नः अस्मान् । सूनृतावतः करः अन्नवन्तः करिष्यसि । इत् इति पदपूरणः । कदाचिदर्थयासे प्रार्थयसे प्रार्थयिष्यसि । किम् । सामर्थ्याद्धविः । एतदुक्तं भवति । कदा अस्मान् धनवतः करिष्यसि । कदा च हविः प्रार्थयिष्यसीति एतदाशास्महे । एतत् ज्ञात्वा योजा न्विन्द्र ते हरी ॥

उप उ उपो । उपशृणुहि सु सुष्ठु । नः अस्मदीयाः । गिरः स्तुतीः हे मघवन् । मा मा श्रौषीः । अतथा इव अयथार्था इव परेषां स्तुतीः । कदा नः अस्मान् । सूनृतावतः सत्यस्तुतियुक्तान् । करः कुर्याः । इत् इत् इतीमौ पादपूरणौ । अर्थयासे प्रार्थयेथाः कदा अस्माभिः । कदा वयं त्वां स्तुवीमहि । कदा च कामान् प्रार्थयेमहि इति । युङ्क्ष्व अद्य ते हरी इन्द्र अस्मान् आगन्तुम् ॥ (८)

चन्द्रमा अप्स्वन्तरा सुपर्णो धावते दिवि ।
न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी ॥

त्रितस्यार्षम् । अत्रेतिहासमाचक्षते । आप्तस्य ऋषेः त्रयः पुत्रा आसन् एकतो द्वितः त्रित इति । ते यष्टुकामाः स्वान् याज्यान् गा ययाचिरे लेभिरे च । ता आदाय सरस्वत्यास्तीरेण पथा गच्छतः तान् परस्मिन्

कूले निषण्ण एको वृको ददर्श । दृष्ट्वा चोत्थाय अभ्यपद्यत ग्रहीतुं चोपचक्रमे । ततस्ते ऋषयः गवादकाङ्क्षीताः गाश्च पलायांचक्रिरे । तेषां त्रस्यतां तृतो निर्जले पांसुभिः वीरुद्भिः तृणैश्चाच्छादिते अन्धकूपे पपात । एकतद्वितौ गा आदाय पालयांचक्राते । तदा त्रितस्य चिन्ता बभूव । कृतसंकल्पस्य अकृतसोमस्य मृत्युर्न श्रेयसे । तत् कोऽभ्युपायः स्यात् येनाहं सोमं पिबेयं इति । स एवं चिन्तयानः ततो लम्बमानां वीरुधं ददर्श । तां सोम इति संकल्प्य योगैश्वर्यादुदकं तत्र चकार अभ्याधानादीनि यागसाधनानि च । शर्करा ग्राव्णः स्थाने परिकल्प्य ताभिः तां वीरुधमभिषुषाव । वीरुधमभिषुत्य यागार्थं देवानाजुहाव । ते आह्वानकारणमनवबुध्य देवा आविग्ना बभूवुः । तदाह्वानं बृहस्पतिः शुश्राव । स देवानुवाच । अस्मिन् कूपे त्रितस्य वर्तते यज्ञः । तत्र गच्छामः । अथ तत्र सर्वे देवा आजग्मुः । तानागतान् कूपादुत्तारणार्थी त्रितः क्रमेण अनुतुष्टाव । चन्द्रमा अप्स्वन्तः अपां मध्ये । साकाङ्क्षत्वात् व्यवस्थित इति वाक्यशेषः । अम्मये मण्डले व्यवस्थित इत्यर्थः । कीदृशः चन्द्रमाः । उच्यते । सुपर्णः । पॄ प्रीणने इत्यस्येदं रूपम् । सुष्ठु प्रीणयिता मम त्रितस्य । अथवा सुवर्ण इति रश्मिनाम । अन्तर्णीतमत्वर्थं चेह द्रष्टव्यम् । रश्मिमान् । किं करोति । उच्यते । आधावते मर्यादया सर्वकालं गच्छति । क्व । दिवि द्युलोके । न वः युष्माकम् । हिरण्यनेमयः । हिरण्यमया नेमयः यासां रथेषु ता हिरण्यनेमयः । तासां सम्बोधनं हे हिरण्यनेमयः । पदम् । पादनिधानात् तदाकारं यत् कर्दमादावुत्पद्यते तत् पदमित्युच्यते । तत विन्दन्ति लभन्ते । पश्यन्तीत्यर्थः । हे विद्युतः । चन्द्रमा उदकमये खमण्डले व्यवस्थितः सर्वदा दिवि गच्छन् उपलभ्यते । युष्माकं हे विद्युतः वर्षाभ्योऽन्यत्र पदमिदं नोपलभ्यते इत्यर्थः । वित्तं मे अस्य । विद ज्ञाने । श्रवणेन च

यत् ज्ञानं तदिहाभिप्रेतम् । अस्येत्यपि सन्निहितत्वात् स्तोत्रस्य प्रतिनिर्देशः । द्वितीयार्थे षष्ठी । शृणुतं ममेदं स्तोत्रमित्यर्थः । अथवा अस्येति दुःखस्य प्रतिनिर्देशः । विजानीतं ममेदं कूपपातनिमित्तं दुःखम् । विज्ञापनं चेदमुत्तारणार्थं क्रियते । आर्तानुग्रहस्वभावकतया मामितः कूपादुत्तारयतं इत्यर्थः । हे रोदसी द्यावापृथिव्यौ । अथवा अन्येन प्रकारेणोच्यते मन्त्रः । चन्द्रमाः । अनेन साम्नाभिषुत्यः सोम उच्यते । अप्स्वन्तः प्रविष्टः ग्रावभिरभिषुतः उदकेन च प्रावितः । सुपर्णः शोभनपर्णः । चन्द्रमसः क्षयवृद्ध्यादिनिष्पन्नः पर्णः । सः आधावते गच्छति दिवि । कथं च गच्छति दिवि । अग्नौ प्रास्ता आहुतिः सम्यगादित्यमुपतिष्ठते इत्यनेन प्रकारेण आधावते । हिरण्यमयो नेमिर्येषां रथेषु ते हिरण्यनेमयः । तेषां सम्बोधनं हे हिरण्यनेमयः । वः युष्मदीयं पदं स्थानं वा । न विन्दन्त्यत्र विद्युतः आहुतयः विविधं द्योतयन्त्यः । किं तर्हि । वित्तं मे मम अस्य यज्ञस्य मनोमयस्य । रोदसी द्यावापृथिव्यौ । एतदुक्तं भवति । श्रद्धाकृष्टस्य ममाहुतयः संप्रगृह्यन्तां मनोमात्रसम्पादिताः स्तुतयश्च । एतद्बुध्वा आगम्य देवाः कूपादुत्तारितवन्तः यज्ञे च भागमास्वोदकं दत्तवन्तः परितोषात् ॥

एकतश्च द्वितश्चैव त्रितश्चाप्तस्य सूनवः ।
ते याजयित्वा सर्वा गा निवृत्ता मरुधन्वसु ॥
पिपासयार्तास्तत्रैकं कूपं लब्ध्वा हि तत्स्थिताः ।
अवरोढुं तमिच्छन्तस्त्रितस्तत्रावरूढवान् ॥
इतरौ तु बहिर्लब्ध्वा पीत्वोदकमतृप्यताम् ।
कूपं पिधाय चक्रेण तं गा आदाय जग्मतुः ॥
त्रितस्तु कूपे पिहितो देवान् स्तौतीति नः श्रुतम् ।
स कूपो निर्जलो नूनं यत्रासौ पतितस्तृषा ।
तस्य चन्द्रमसं रात्रौ पश्यतः परिदेवना ॥

चन्द्रमा अप्स्वन्तः अम्मये मण्डले स्थितः आधावते दिवि अन्तरिक्षे। सुपर्णः सुरश्मिः। हे हिरण्यनेमयः विद्युतः। हिरण्यनेमय इत्युपमा। हिरण्यनेमयो रथा इव दृश्यमानाः। यद्वा अभिमतरमणीयमार्गाः। न विन्दन्ति न लभन्ते। वः युष्माकम्। पदं गमनमार्गं मनुष्याः। अथवा विद्युदभिमानिन्यः देवताः स्तूयन्ते। चन्द्रमाः सर्वदा दिवि आधावन्ते। युष्माकं तु विरळः प्रचारः। यूयं च इदानीं दृश्यध्वे। पिपासा मे शाम्येदिति परिदेवना। हे रोदसी द्यावाभूमी। वित्तं विजानीतम्। मे मदीयस्यास्य व्यसनस्य। इदं व्यसनं जानीतमित्यर्थः। बहुदेवतत्वात् वैश्वदेवम्॥ (९)

प्रति प्रियतमं रथं वृषणं वसुवाहनम्।
स्तोता वामश्विनावृषि स्तोमेभिर्भूषति प्रति माध्वी मम श्रुतं हवम्॥

अवस्योरार्षम्। प्रतीत्ययं लक्षणे कर्मप्रवचनीयः रथमित्यनेन सम्बद्धयते। रथं प्रति। कीदृशं रथं प्रति। उच्यते। प्रियतमं अतिशयेन प्रियम्। वृषणं वर्षितारम्। वसुवाहनम्। वसु धनं उह्यते प्राप्यते नीयते येन स वसुवाहनः। तं वसुवाहनम्। धनस्य नेतारम्। नीत्वा च ऋत्विग्भ्यः दातारमित्यर्थः। स्तोता वां युवयोः हे अश्विनौ। ऋषिम्। अवस्युर्नाम ऋषिः आत्मानमेव परोक्षरूपेण प्रथमपुरुषेण निर्दिशति। स्तोमेभिः स्तुतिभिः। भूषते। प्रतिशब्दः पुरस्तादपकृष्टव्यः उपेत्येतस्य च स्थाने द्रष्टव्यः। भूषति इति भवतेः रूपम्। उपभवति समीपे भवतीत्यर्थः। एतत् ज्ञात्वा हे माध्वी। मधुपूर्णो दृतिः माध्वः। तस्येदम् (पा. ४. ३. १२०) इत्यण्।

यो ह वां मधुनो दृतिराहितो रथचर्षणे (ऋ. वे. ८. ५. १९) इति मन्त्रान्तरदर्शनात्। स ययोरस्ति तौ माध्वी। छन्दसीवनिपौ (वा ५. २. १०९) इति ईकारो मत्वर्थीयः। तयोः सम्बोधनं हे माध्वी। मम श्रुतं हवं आह्वानम्॥

प्रतिभूषति प्रतिभूषयति। स्तोमेभिः स्तोत्रैः। अन्यतरः प्रतिरनुवादः। प्रियतमं वां युवयोः। रथं वृषणं वर्षितारम्। वसुवाहनं धनानां वोढारम्। स्तोता वां युवयोः ऋषिः अवस्युः हे अश्विनौ। माध्वी मधुविद्याविदौ। मम श्रुतं शृणुतं हवम्।

आथर्वणायाश्विना दधीचेऽश्व्यं शिरः प्रत्यैरयतम्।
स वां मधु प्र वोचदृतायन् त्वाष्ट्रं यद्दस्रावपि कक्ष्यं वाम्॥
(ऋ. वे. १. ११७. २२)

इति निगमः॥

इति पञ्चमे तृतीया दशती

आ ते अग्न इधीमहि द्युमन्तं देवाजरम्।
यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषं स्तोतृभ्य आ भर॥

वत्सस्यार्षम्। विनियोगोऽस्य पञ्चमेऽहनि। आ इधीमहि दीप्तिमन्तं कुर्यामहे हे अग्ने। द्युमन्तं द्युतिमन्तम्। देव अजरं अजीर्णयत्। यद्ध स्या सा। ते तव। पनीयसी स्तुत्या। का सा। समित् समिन्धनम्। दीदयति दीप्यते। द्यवि दिवि। इषं द्युमन्तं देव अजरं अन्नं तत् स्तोतृभ्यः आभर आहर॥

आ इधीमहि आदीपयामः। ते त्वामित्यर्थः। हे अग्ने द्युमन्तं दीप्तिमन्तम्। हे देव अजरं त्वाम्। यत् यस्य ते। हेति पूरणः। स्या सा प्रसिद्धा। पनीयसी स्तुत्यतरा। समित् दीप्तिमत्। दीदयति दीप्यते। द्यवि अन्तरिक्षे। स त्वं इषं अन्नम्। स्तोतृभ्यः आभर आहर॥ (१)

अग्निं न स्ववृक्तिभिर्होतारं त्वा वृणीमहे ।
शीरं पावकशोचिषं वि वो मदे यज्ञेषु स्तीर्णबर्हिषं विवक्षसे ॥

अग्निं न स्ववृक्तिभि· होतारं आह्वातारं आवृणीमहे । शीरं घृतम् । पावकशोचिषं शान्तदीप्तिम् । वि वः मदे मदार्थे । यज्ञेषु । व्यत्ययेन एकवचनस्य स्थाने बहुवचनम् । यज्ञे । स्तीर्णबर्हिषं विवक्षसे ॥

आवृणीमहे प्रार्थयामः । त्वा त्वाम होतारं होतृत्वेन । अग्निमग्रणीं त्वाम् । न सम्प्रति । स्ववृक्तिभिः सुवृक्तिभिः स्तुतिभिः । शीरं अनुशायिनमिति यास्कः (नि. ४. १४) अनुशयानं सर्वत्र । पावकशोचिषं शोधकदीप्तिं त्वाम् । वीत्युपसर्गेण आख्याताध्याहारः । विभवसि । वः मदे सति सोमस्य । स त्वं यज्ञेषु स्तीर्णबर्हिषं यजमानम् । विवक्षसे विवहसि ॥ (२)

महे नो अद्य बोधयोषो राये दिवित्मती ।
यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥

आग्नेयौ मन्त्रौ । महे नः महते अस्मान् अद्य अस्मिन्नहनि । बोधय उषः । राये धनार्थम् । दिवित्मती दिवः दुहिता । यथा येन प्रकारेण । चित् नः अबोधयः । सत्यश्रवसि । सत्यश्रवो नाम राजा वाय्यः । सुजाते । शोभनजाते । अश्वसूनृते ॥

महे महते । राये धनाय । बोधय धनप्राप्त्यर्थं प्रवर्तय । नः अस्मान् । अद्य हे उषः । दिविद्मती दीप्तिमती । यथा चित् यथैव । नः अस्मान् । अबोधयः त्वं पूर्वस्मिन्नपि काले । सत्यश्रवसि ऋषौ विद्यमानान् । तस्य मम वंश्यानित्यर्थः । वाय्ये वयस्यापत्ये च विद्यमानान् । यथा अबोधयः तथा अस्मान् अद्य बोधय ।

त्वं आविथ नर्यं तुर्वशं यदुं त्वं तुर्वीतिं वय्यं शतक्रतो ।
(ऋ. वे. १. ५४. ६)

इत्यादिषु वय्यश्च श्रूयते । हे सुजाते शोभनप्रादुर्भावे । अश्वसूनृते । अश्वा आशुकारिणी सूनृता वाक् यस्याः सा अश्वसूनृता ॥ (३)

भद्रं नो अपि वातय मनो दक्षमुत क्रतुम् ।
अथा ते सख्ये अन्धसो वि वो मदे रणा गावो न यवसे विवक्षसे ॥

भद्रं भजनीयम् । अपिवातय गमय । नकारः शब्दोपजनः । मन अन्तःकरणम् । दक्षं शीघ्रम् । उत अपिच । क्रतुं कर्म ज्ञानं वा । अथानन्तरम् । ते तव । सख्ये सखिभावाय । अन्धसः वि वः मदे रण रमय । गावः न गाव इव यवसे यथा रमन्ति तद्वत् रण । विवक्षसे महते ॥

भद्रं भजनीयं कल्याणम् । दक्षं बलम् । नः अस्मान् । अपिवातय प्रगमय । मनः मनसा हे सोम । उत अपिच । क्रतुं प्रज्ञानं अपिवातय । अथ अपिच । ते तव सख्ये । अन्धसः अन्नभूतस्य देवानाम् । रणा रमन्तां स्तोतारः । गावो न गाव इव । यवसे घासे । अत्र तु वि वो मदे विवक्षसे इति भिन्ने वाक्ये परस्परानपेक्षे । विभवति इन्द्र इति वा विभवन्ति देवा इति वा । वः तव मदे सति । त्वं च विभवसि विश्वं जगत् ॥ (४)

क्रत्वा महाँ अनुष्वधं भीम आ वावृते शवः ।
श्रिय ऋष्व उपाकयोर्नि शिप्री हरिवान् दधे हस्तयोर्वज्रमायसम् ॥

क्रत्वा कर्मणा । अनुष्वधं अन्वन्नम् । भीमः । बिभेत्यस्मादिति भीमः भयानकः । शवः बलम् । आ वावृते वर्तते अत्यर्थम् । ऋष्वः महान् । उपाकयोर्हस्तयोः । नि शिप्री हरिवान् अश्ववान् . . . . ॥

क्रत्वा कर्मणा हेतुना। कर्म कर्तुमित्यर्थः। महान् भीम इन्द्रः। अनुष्वधं स्वधया अन्नस्य पश्चात्। सोमपानानन्तरमित्यर्थः। आववृते अभिवर्तयति। शवः बलम्। श्रिये पुष्ट्यर्थम्। उपाकयोः समीपवर्तिन्योः द्यावापृथिव्योः। श्रिये निदधे निधत्ते हस्तयोः। वज्रं आयसं अयोमयम्। ऋष्वः दर्शनीयः। ऋष गतौ। गत्यर्था बुध्यर्थाः। शिप्री सुहनुः। हरिवान् हरिवाहनः॥ (५)

स घा तं वृषणं रथमधितिष्ठाति गोविदम्।
यः पात्रं हारियोजनं पूर्णमिन्द्र चिकेतति योजा न्विन्द्र ते हरी॥

. . . .

अधितिष्ठति किञ्चित्। गोविदं गाः येन लभ्यन्ते तम्। यः पात्रं हारियोजनं पूर्णं इन्द्रं चिकेतति प्रकाशयत्यात्मानम्। योजा योजयामः। नु इन्द्र ते तव हरी अश्वौ गमनाय॥

स घ स एव। तं प्रसिद्धम्। वृषणं वर्षकरम्। रथं इन्द्रस्य अधितिष्ठति अधितिष्ठेत्। यः पात्रं हारियोजनं हारियोजनाख्यम्। गोविदं सोमग्रहम्। पूर्णं सोमेन। चिकेतति ज्ञापयेत् तुभ्यं हे इन्द्र। यो यज्ञं समापयतीत्यर्थः। सर्वेषां हि सोमग्रहाणां अन्त्यो हारियोजनो यज्ञपुच्छे क्रियते। योजा नु क्षिप्रं इन्द्र ते हरी अस्मिन् यज्ञे आगन्तुम्॥ (६)

अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः।
अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषं स्तोतृभ्य आ भर॥

विनियोगोऽस्य विधृतिषु। अग्निं तं मन्ये जानीमः। यः यावत्। वसु धनं प्रभूतम्। अश्वं यं विड्भूतं ज्ञात्वा अस्तं गृहं गच्छन्तः धेनवः।

अस्तमर्वन्तः अश्वाः । आशवः शीघ्राः । ज्ञात्वा यन्ति तमस्तम् । नित्यासो नित्याः । वाजिनः वेगवन्तः । इषं हविरन्नं वा । स्तोतृभ्यः आभर आहर ॥

अग्निं तं मन्ये स्तौमि । यः वसुः वासकः । प्रशस्य इति वा । अस्तमिति गृहनाम । अस्तं निवासमिव । यं यन्ति उपगच्छन्ति धेनवः । यत्र अग्निः परिपच्यते तत्र यन्ति । अस्तमिव अर्वन्तः अश्वाः । आशवः क्षिप्रगामिनः । नित्यासः अवियुक्ताः । वाजिनः वेगवन्तः । अस्तमिति पादभेदात् पुनरुक्तिः । विशेषणभेदाद्वा । अथ प्रत्यक्षम् । इषं अन्नम् । स्तोतृभ्यः आभर ॥ (७)

न तमंहो न दुरितं देवासो अष्ट मर्त्यम् ।
सजोषसो यमर्यमा मित्रो नयति वरुणो अति द्विषः ॥

न तं अंहः पापम् । न दुरितं कुत्सितं गमनम् । देवाः अष्ट व्याप्नोति । मर्त्यं मरणधर्माणम् । किंविशिष्टाः । सजोषसः समानजातीयाः । अर्यमा मित्रो नयति वरुणः । अति द्विषः अतीत्य द्विषः वर्तन्ते इति अतिद्विषः ।

न तं जितं मर्त्यम् । अष्ट अश्नुते व्याप्नोति । अंहः आहन्तृ किंचिद्वस्तु । न च दुरितं पापं तमष्ट । देवासः हे देवाः । यं मर्त्यं अर्यमा मित्रः वरुणश्च द्विषः द्वेष्टॄन् । अतिनयन्ति अतिगमयन्ति । प्रत्येकमभिसंबन्धान्नयतीत्येकवचनम् । कीदृशाः ते अर्यमप्रभृतयः । तत्राह । सजोषसः सह प्रियमाणाः ॥ (८)

इति पञ्चमे चतुर्थी दशती

परि प्रधन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय ॥

विनियोगोऽस्य दशमेऽहनि अनुष्टुप्पिपीलिकमध्या . . .
. . . . . ॥

त्रिंशत्परि प्रधन्वेति प्रायशो द्विपदा इह ।
पर्यूषु प्रानु हि त्वेति त्रिपदे द्वे अनुष्टुभौ ॥
ते पिपीलिकमध्याख्ये पुरउष्णिक् पराजनि ।
पङ्क्तिरग्ने तमद्येति पदपङ्क्तिं वदन्त्यमूम् ॥
त्रयः पञ्चाक्षरा आद्याश्चतुर्थश्चतुरक्षरः ।
पञ्चविंशत्यक्षरेयमन्त्यपादः षडक्षरः ॥
गायत्र्येकपदा येयमिन्द्रो विश्वस्य राजति ।
आद्याः षड्दशमी चात्र पावमान्यः क ईमिति ॥
मारुत्येका भवत्याविरित्येषा वाजिनां स्तुतिः ।
अग्ने तमद्या चेत्यग्निरग्ने त्वं भग इत्यमूः ॥
ऋचश्चतस्र आग्नेय्य उषा आयाह्युषाःस्तुतिः ।
सदा गाव इमानूर्जा वैश्वदेव्य इमा ऋचः ॥
ऐन्द्र्यो ऽवशिष्टा इत्येवं छन्दोदैवतनिर्णयः ।
अष्टानां पावमानीनां यौ पिपीलिकमध्ययोः ॥
त्र्यरुणस्त्रसदस्युश्च तौ द्वयोः सहिताावृषी ।
शिष्टानामृषयष्षण्णां धिष्ण्या ऐश्वरयोऽग्नयः ॥
वसिष्ठस्तु क ई व्यक्ताः सांवर्तः स्यादुषस्ययोः ।
ब्रह्माण इन्द्रमनव इत्यवस्युरवैक्षत ॥
बन्धुर्गौपायनोऽग्ने त्वमिमा न्वाप्त्यस्तु भौवनः ।
अया वाजं भरद्वाजो वामदेव्योऽपरा ऋचः ॥

परि परितः । प्रधन्व प्रक्षर दशापवित्रात् । इन्द्राय हे सोम । स्वादुः मधुरः त्वम् । मित्राय पूष्णे भगाय च देवाय प्रधन्व　　　　(१)

पर्यू षु प्रधन्व वाजसातये परि वृत्राणि सक्षणिः ।
द्विषस्तरध्या ऋणया न ईरसे ॥

. . . . . प्रगच्छ वाजसातये अन्नसंभजनाय यजमानाय । परि वृत्राणि सक्षणिः सक्षा वृत्राणां । द्विषस्तरध्यै तारयितुम् । ऋणया ऋणस्य यावयिता । नः ईरसे आगच्छति अस्मान्प्रति ॥

परि प्रधन्व वाजसातये अन्नलाभाय अस्माकम् । पुनरुक्तिरादरार्था । उ सु इतीमौ पूरणौ । परिधन्व वृत्राणि शत्रून् । सक्षणिः अभिभावुकः । द्विषः शत्रून् । तरध्यै हिंसितुम् । ईयसे गच्छ । ऋणयाः ऋणानां यावयिता । नः अस्माकम् । पुनरुक्तिरादरार्था । (२)

पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम ॥

विनियोगोऽस्य अष्टमेऽहनि । पवस्व पूतो भवसि हे सोम । महान् समुद्रः समुद्र इव महान् समुंदनो वा । पिता निर्माता देवानां वस्वादीनाम् । विश्वा विश्वानि । अभि धाम स्थानानि ॥

पवस्व क्षर हे सोम । विश्वा विश्वानि । धाम धामानि तेजांसि । अभि देवान् उद्दिश्य । महान् पूजनीयः । समुद्रः सम्यग्द्रावणः रसानां समुन्दानो वा । पिता जनयिता देवानां त्वम् ।

त्वं सोमः पवते जनिता मतीनाम् ।(ऋ. वे. १. १६. ९)

इति हि भवति ॥ (३)

पवस्व सोम महे दक्षायाश्वो न निक्तो वाजी धनाय ॥

विनियोगोऽस्य नवमेऽहनि । महे महते । दक्षाय समृद्धाय
ीघ्राय वा । अश्वो न नक्तः अश्व इव शुद्धः । वाजी अन्नवान् वेगवान्
ा । धनाय धनार्थम् ॥

पवस्व हे सोम महे महते । दक्षाय बलाय अस्माकम् । अश्वो न
ाश्व इव । निक्तः स्नातः । वाजी वेगवान् । त्वं धनाय च नः पवस्व ॥ (४)

इन्दुः पविष्ट चारुर्मदायापामुपस्थे कविर्भगाय ॥

इन्दुः सोमः । पविष्ट जातः । चारुः शोभनः । मदाय मदार्थम् ।
ः । अपामुपस्थे अङ्के । कविः मेधावी । भगाय भगार्थम् ॥

इन्दुः । इन्धेर्दीप्तिकर्मणः इन्देर्वा क्लेदनकर्मण इन्दुः सोमः । पविष्ट
ावते इत्यर्थः । चारुः शोभनः । मदाय देवानाम् । अपामुपस्थे उपस्थाने
अन्तरिक्षे । कविः शब्दायमानः । कै शब्दे । भगाय धनार्थं अस्मभ्यम् ॥ (५)

अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये ।
वाजाँ अभि पवमान प्रगाहसे ॥

विनियोगोऽस्य दशमेऽहनि । त्वा त्वाम् । सुतं अभिषुतम् । सोम
मदामसि अनुमदामहे । महे महते । समर्यराज्ये विप्रराज्ये यज्ञे । वा-
जान् अन्नानि । हे पवमान अभिप्रगाहसे । पिपीलिकमध्या अनुष्टुप् ॥

अनुमदामसि अभिष्टुमो वयं त्वाम् । हीति पूरणः । सुतं अभिष्टुतं त्वाम् ।
महे महते । समर्यराज्ये युद्धे राजनाय । वाजान् युद्धानि । अभि प्रगाहसे
स्तोतॄणामर्थाय त्वम् ॥ (६)

क ई व्यक्ता नरः सनीडा रुद्रस्य मर्या अधा स्वश्वाः ॥

क ई व्यक्ता नरः सनीडाः सह नीडेन स्थिताः । रुद्रस्य पुत्राः । मर्या मनुष्याः । अधा स्वश्वा शोभनाश्वाः । मारुती ऋक् ॥

के भवन्ति । ई इमे । व्यक्ताः प्रकाशमानाः । नरः नेतारः । सनीडाः समानस्थानाः । रुद्रस्य पुत्रा इति शेषः । मर्याः मर्त्येभ्यो मनुष्येभ्यो हिताः । मर्याकारा इति वा । अध अपिच । स्वश्वाः इति रूपातिशयदर्शनात् विस्मयेनाह ॥ (७)

अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशम् ।
ऋध्यामा त ओहैः ॥

विनियोगोऽस्य ज्योतिष्टोमे । अद्य अस्मिन्नहनि । अश्वं न स्तोमैः यथा अश्वं रथसंयोज्यमश्वं स्नेहपानादिभिः शक्नुवन्ति एवं स्तोमैः ऋत्विजः ओहैः ओघैः ऊहनैः क्रतुं कर्म पूजास्थानम् । न इति संप्रत्यर्थे । भद्रं दीप्तम् । हृदिस्पृशं हृदयं स्पृशति हृदयेन वा स्पृश्यते इति । ऋध्याम । आग्नेयी ऋक् ॥

हे अग्ने । तं ते । त्वामित्यर्थः । अद्य अस्मिन् दिवसे । अश्वं न अश्वमिव वोढारम् । क्रतुं न कर्तारमुपकर्तारमिव । भद्रं भजनीयम् । हृदिस्पृशं प्रियम् । स्तोमैः ऋध्याम समृद्धयामः । ओहैः वहकैः इति स्तोमविशेषणम् ॥ (८)

आविर्मर्या आ वाजं वाजिनो अग्मन् देवस्य सवितुः सवम् ।
स्वर्गाँ अर्वन्तो जयत ॥

विनियोगोऽस्य वाजपेये । ब्रह्मा रथचक्रेऽभिगायति । आविः प्रकाशमानः । मर्या मनुष्याः । वाजं वाजपेयं अन्नं वा । वाजिन अश्वाः । आ अग्मन् आयान्ति । देवस्य सवितुः । सविता सर्वस्य प्रसविता । तस्य । सवं प्रसवं अभ्यनुज्ञां प्रतिपाल्य । स्वर्गान् स्वर्गलोकम् । अर्वन्तः अश्वान् जयत यान्ति । पुरउष्णिक् । सोमो देवता ॥

इयमृक् साम वा अस्यां गीयमानं वाजपेये अध्वर्युणाजिधावने क्रियमाणे ब्रह्मणा प्रयुज्यते । वाजिनो नाम देवविशेषाः । वाजिनभाजः ते मर्याः मर्त्येभ्यो हिताः । आविः प्रकाशमानाः । आ अग्मन् आगच्छन्तु । वाजं युद्धम् । देवस्य सवितुः सवं प्रसवं अनुज्ञानं प्रतिलभ्येत्यर्थः । स्वर्गान् जयत हे यजमानाः पुरुषाः । अर्वन्तः अर्वतः अश्वांश्च जयत ॥ (९)

पवस्व सोम द्युम्नी सुधारो महाँ अवीनामनु पूर्व्यः ॥

पवस्य सोम द्युम्नी यशस्वी अन्नवान् वा । सुधारः शोभनधारः । महान् अवीनां अवीन् अनु अविवालाननु । पूर्व्यः प्रथमः ॥

पवस्व हे सोम । द्युम्नी धनवान् दीप्तिमान् वा । सुधारः शोभनधारायुक्तः । महान् अवीनां इति पञ्चम्यर्थे षष्ठी । महद्भ्यः अविभ्यः । अविवालनिर्मितादशापवित्रादित्यर्थः । अनु सन्ततं पवस्वेति संबन्धः । पूर्व्यः पुरातनः त्वम् ॥ (१०)

इति पञ्चमे पञ्चमी दशती

विश्वतो दावन् विश्वतो न आ भर यं त्वा शविष्ठमीमहे ॥

विनियोगोऽस्य आथर्वणवस्तोभाभ्यां सद उपतिष्ठन्ति। विश्वतो दावन् सर्वतः दानवान्। विश्वतः सर्वतः। नः अस्मभ्यम्। आभर आहर। किमाभर। सामर्थ्याद्धनमानय। यं त्वां शविष्ठमतिशयेन बलवन्तम्। ईमहे प्रार्थयामः॥

विश्वतो दावन् विश्वत आहृत्य दातः। विश्वतः यत्र धनं विद्यते तस्मात्। नः अस्मभ्यम्। आभर धनानि। यं त्वा शविष्ठं शूरतमम्। वयमीमहे स्तुमः। याचामहे इति वा (१)

एष ब्रह्मा य ऋत्विय इन्द्रो नाम श्रुतो गृणे॥

. . . . एतदुक्तं भवति। परियोगैरभीज्यते। यच्छब्दश्रवणात् तच्छब्दोऽध्याहर्तव्यः। यः परियोगैरभीज्यते तमिन्द्रं नाम देवताविशेषम्। श्रुतं विख्यातं स्तुमः। इन्द्रः श्रुत इति प्रथमैकवचने द्वितीयैकवचनस्य स्थाने द्रष्टव्ये। इन्द्रं श्रुतं गृणे। प्राजापत्या ऋक्॥

एष इन्द्रो ब्रह्मा परिवृढो भवति। य ऋत्वियः ऋतुषु काले काले प्रादुर्भवन्। श्रुतः विश्रुतः सर्वत्र। इन्द्रो नाम इन्द्र इति प्रसिद्धः। गृणे स्तूयते सर्वैः। स ब्रह्मा भवति॥ (२)

ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्धयन्नहये हन्तवा उ॥

ब्रह्माणः मदीया ऋत्विजः। इन्द्रं महयन्तः पूजयन्तः। अर्कैः ऋग्यजुःसामाख्यैः। अवर्धयन् आभिमुख्येन वर्धयन्ति। किमर्थं वर्धयन्ति।

अहये हन्तवै । उकारः पदपूरणः । दानवाय हननार्थम् । अहये दानवाय वर्धितवन्तः ॥

ब्रह्माणः श्रुतशीलादिभिः परिवृढाः स्तोतारः । इन्द्रं महयन्तः पूजयन्तः । अर्कैः स्तोत्रैः । अवर्धयन् वर्धयन्ति । अहये अहिं वृत्रम् । हन्तवै हन्तुम् । तुमर्थाच्च भाववचनात् (पा २. २. १९) इति कर्मणि चतुर्थी । उ इति पादपूरणः ॥ (३)

अनवस्ते रथमश्वाय तक्षुस्त्वष्टा वज्रं पुरुहूत द्युमन्तम् ॥

अनवः मनुष्याः । ते साङ्ग्रामिकं रथम् । अश्वाय अश्वार्थम् । तक्षुः कृतवन्तः । त्वष्टा देवतक्षा । हे पुरुहूत वज्रम् । किंविशिष्टम् । द्युमन्तं द्युतिमन्तं कृतवान् दधीचास्थिभिः ॥

अनव इति मनुष्यनाम । अनवो मनुष्याः स्तोतारः । ते त्वदर्थम् । अश्वाय अश्नुवानाय विश्वम् । तक्षुः अतक्षन् समकुर्वन् रथम् । त्वष्टा देवशिल्पी । ते वज्रं अतक्षन् । द्युमन्तं दीप्तिमन्तम् । हे पुरुहूत इन्द्र ॥ (४)

शं पदं मघं रयीषिणे न काममव्रतो हिनोति न स्पृशद्रयिम् ॥

शं सुखम् । तस्य पदम् । मघं धनम् । रयीषिणे धनैषिणे यजमानाय । न कामं अव्रतः व्रतरहितः । अकस्मात् हिनोति न प्राप्नोति । कामं न स्पृशति रयिं धनम् ॥

रयीषिणे रयिं धनं हविर्लक्षणं प्रेषयन्तः तवार्थम् । शं सुखं पदं स्थानम् । मघं धनं च । लभन्ते इति शेषः । अव्रतः अकर्मा अननुष्ठितयज्ञादिकः पुरुषः । कामं काम्यं स्वर्गपुत्रपश्वादिकम् । न हिनोति । हि गतौ । न गच्छति । न प्राप्नोति । न स्पृशत् न स्पृशति । न लभते । रयिं च ॥ (५)

सदा गावः शुचयो विश्वधायसः सदा देवा अरेपसः ॥

सदा सर्वदा । गावः शुचयः शुद्धाः पवित्राः । विश्वधायसः । विश्वं सर्वं धारयन्ति । सर्वस्य धारयित्र्यः क्षीरादिभिर्हविर्भिः । अथवा गावः आदित्यरश्मयः । अमेध्येऽपि पतमानाः शुद्धाः । अथवा गावः आपः भूमिगताः । अथवा गावः वाचः ऋग्यजुःसामलक्षणाः शुचयः । विश्वधायसः विश्वस्य धारयित्र्यः । सदा देवाः अरेपसः अलेपकाः अपापाः । रेप इति पापनाम । गौर्देवता अस्य ॥

गावः गन्तारः उपगन्तारः । ये इन्द्रं उपगच्छन्ति परिचरणादिभिः ते । शुचयः सदा विश्वधायसः बह्वन्ना भवन्ति । देवाः स्तोतारः । सदा अरेपसः अपापा भवन्ति ॥ (६)

आ याहि वनसा सह गावः सचन्त वर्तनिं यदूधभिः ॥

हे इन्द्र आयाहि आगच्छ । वनसा सह सङ्घेन सहेत्यर्थः । किंविशिष्टेन वनसा । गावः सचन्ते सेवन्ते । वर्तनिं गोव्रजम् । यत् ऊधभिः सहोधभिः ॥

आयाहि आगच्छ । वनसा वननीयेन धनेन सह हे उषः । गावः सचन्त सेवन्ते । वर्तनिं स्थानं गोष्ठम् । यत् यदा । ऊधभिः पूर्णैः उपलक्षिताः इति प्रातःकालो लक्ष्यते ॥ (७)

उप प्रक्षे मधुमति क्षियन्तः पुष्येम रयिं धीमहे त इन्द्र ॥

विनियोगोऽस्य षष्ठेऽहनि त्रयाणामपि । प्रक्षे निवासे । किंविशिष्टे । मधुमति रसवति । क्षियन्तः निवसन्तः । पुष्येम रयिं धनम् । धीमहे चिन्तयामः ते इन्द्र ॥

उप उपगच्छ। प्रक्षे मदीये गृहे। मधुमति भोग्ययुक्ते। क्षियन्तः निवसन्तः। पुष्येम समृध्येम पुत्रपौत्रैः। रयिं धनं च। धीमहे धारयामः। ते त्वत्त इत्यर्थः। हे इन्द्र ॥ (८)

अर्चन्त्यर्कं मरुत स्वर्का आ स्तोभति श्रुतो युवा स इन्द्रः ॥

अर्चन्ति पूजयन्ति। अर्कं देवम्। मरुतः ऋत्विजः स्वर्काः शोभनमन्त्राः। आस्तोभति स्तूयते स्तोमैः। श्रुतः विख्यातः। युवा तरुणः। कोऽसौ। इन्द्रः ॥

अर्चन्ति स्तुवन्ति। अर्कं अर्चनीयं इन्द्रम्। मरुतः देवाः। स्वर्काः सुष्टुतयः। आस्तोभति अभिष्टूयते सर्वैः। व्यत्ययेन परस्मैपदं शप् च। श्रुतः विश्रुतः युवा नित्यमेव स इन्द्रः ॥ (९)

प्र व इन्द्राय वृत्रहन्तमाय विप्राय गाथं गायता यं जुजोषते ॥

प्र व इन्द्राय। किंविशिष्टाय। वृत्रहन्तमाय विप्राय मेधाविने। हे स्तोतारः गाथं गायत। यं जुजोषते ॥

प्रगायत वः यूयम्। इन्द्राय वृत्रहन्तमाय अतिशयेन पापानां हन्त्रे। हे विप्राः प्राज्ञाः। गाथं स्तोत्रम्। यं गाथं इन्द्रः जुजोषते भृशं सेवते प्रीयते वा तं गाथं प्रगायत ॥ (१०)

इति पञ्चमे षष्ठी दशती

अचेत्यग्निश्चिकितिर्हव्यवाण्ण सुमद्रथः ॥

अग्निः अचेति चेतति जानाति । हव्यवाट् हव्यं वहति । इवार्थे न इति । सुमद्रथः सुगमनरथः सुज्ञानरथो वा ॥

अचेति चेत्यते ज्ञायते सर्वैः । अग्निः चिकितिः ज्ञाता विश्वस्य । हव्यवाट् हव्यानां वोढा । सुमद्रथः प्रशस्तरथः । नेति चार्थः ॥ (१)

अग्ने त्वं नो अन्तम उत त्राता शिवो भुवो वरूथ्यः ॥

गौपायनस्यार्षम् । विनियोगोऽस्य षष्ठेऽहनि । अग्ने त्वं नः अस्माकम् । अन्तमः विप्रकृष्टा देवता । उत अपिच । त्राता परित्राता । शिवः शंतमः । भुवः भवसि । वरूथ्यः वरणीयः अग्रभूतो वा ॥

हे अग्ने त्वं नः अस्माकम् । अन्तमः अन्तिकतमः । भुवः अभवः । उत अपिच । त्राता रक्षिता भुवः । शिवः सुखकरश्च । वरूथ्यः वरणीयः संभजनीयः । अथवा वरूथं गृहम् । गृहे भवः नित्यसन्निहितः । वरूथैः परिधिभिर्वृतेति शाठ्यायनकम् ॥ (२)

भगो न चित्रो अग्निर्महोनां दधाति रत्नम् ॥

भगदेवत्या एषा ऋक् । अग्निर्मघोनां मघवतां धनवताम् । दधाति रत्नं रमणीयम् । ददाति वा । पञ्चदशाक्षरा गायत्री आग्नेयी ॥

भगो न भग इव देवः । चित्रः चायनीयः पूजनीयः । अग्निः मघोनां मघवतां हविर्लक्षणधनवताम् । चतुर्थ्यर्थे षष्ठी । दधाति ददाति । रत्नं रमणीयं धनम् ॥ (३)

विश्वस्य प्र स्तोभ पुरो वा सन् यदि वेह नूनम् ॥

विश्वस्य प्रस्तोभ सर्वस्य प्रशस्तो भवति । पुरः अग्रतः वा सन् । यदि वा इह । नूनमिति वितर्के । इह वा निवासः त्वद्भक्तानां सुखाय भवति ॥

विश्वस्य जनस्य प्रस्तोभ प्रशस्य । इन्द्रः । पुरोभागे वा दूरे वा सन् । यदि वा इह अन्तिके सन् । नूनमिति पूरणः सत्यमिति वा ॥ (४)

उषा अप स्वसुष्टमः सं वर्तयति वर्तनिं सुजातता ॥

उषस्यो मन्त्रः । उषा अप स्वसुष्टमः स्वसुः स्वस्रा भगिन्या इव । अपसंवर्तयति । वर्तनिं रातिं वरणीयां जनस्य । सुजातता ॥

उषाः देवी । अप नीचैः । संवर्तयति नाशयति । तमः शार्वरम् । स्वसुः रात्रिमुषसः स्वसारं आह । तस्याः संबन्धि तमः । वर्तनिं गृहं यज्ञगृहं प्रति । सुजातता सुजाततया युक्ता ॥ (५)

इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवाः ॥

विनियोगोऽस्य षष्ठेऽहनि । इमानि भुवनानि । सीषधेम । साध संसिद्धौ । साधयामः । इन्द्रः । इन्द्रश्च विश्वे च देवाः भवन्तः ॥

इमा भुवना इमानि भुवनानि । सीषधेम साधयेम समर्थयेम वयं यज्ञैः स्तोत्रैः वा । नु कमिति इमौ पूरणौ । इन्द्रश्च विश्वे देवाश्च साधयन्तु भुवनानि अस्माभिरिष्टाः स्तुताश्च ॥ (६)

वि स्रुतयो यथा पथ इन्द्र त्वद्यन्तु रातयः ॥

विविधाः स्रुतयः सरणमार्गाः । इन्द्र त्वत् त्वत्समीपं यन्तु । रातयः दानानि हविर्लक्षणानि । अथवा विस्रुतयः पन्थानः । यथा पथः मार्गं यथा निर्गच्छन्तः । तथा हे इन्द्र त्वत् यन्तु निर्गच्छन्तु रातयः दानानि ॥

वियन्तु विविधं गच्छन्तु निर्गच्छन्तु हे इन्द्र । त्वत् त्वत्तः । रातयः धनानि दानानि वा । श्रुतयः क्षुद्रपथाः यथा पथो महापथाद्वियन्ति तथा ॥ (७)

अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ॥

अया अनया स्तुत्या वाजं अन्नम् । देवहितं देवैः स्थापितम् । सनेम लभेम । मदेम मोदाम । शतहिमाः शतं हेमन्तानाम् । सुवीराः कल्याणपुत्राः ॥

अया अनया स्तुत्या । वाजं अन्नम् । देवहितं देवेन इन्द्रेण हितं दत्तम् । सनेम लभेम । मदेम हृष्येम । शतहिमाः शतं हिमाः हेमन्तान् । शतं समा इत्यर्थः । सुवीराः शोभनपुत्रपौत्राः सन्तः ॥ (८)

ऊर्जा मित्रो वरुणः पिन्वतेडाः पीवरीमिषं कृणुही न इन्द्र ॥

मित्रः वरुणः । ऊर्जा अन्नं वृष्टिर्वा । एते देवताविशेषाः । पिन्वतं ददत । इडा अन्नानि । पीवरीं स्थूलाम् । इषमन्नम् । कृणुहि कुरुत । नः अस्मभ्यम् । हे इन्द्र ॥

ऊर्जा रसेन पिन्वत पिबन्तु आप्याययन्तु । इडाः अन्नानि । मित्रो वरुणश्च । एतदेव इन्द्रमपि याचते । इषं अन्नम् । पीवरीं रसेन पुष्टाम् । कृणुहि कुरु हे इन्द्र । नः अस्मभ्यम् ॥ (९)

इन्द्रो विश्वस्य राजति ॥

इन्द्रः परमेश्वरः । विश्वस्य सर्वस्य । राजति दीप्यते । एकपदा अष्टाक्षरा गायत्री ॥

इन्द्रः देवः विश्वस्य भुवनस्य राजति ईष्टे । राजतिरैश्वर्यकर्मा दृश्यते— राजन्तमध्वराणाम् (ऋ. वे. १. १. ८) इति ॥ (१०)

इति पञ्चमे सप्तमी दशती

त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्म-
स्तृम्पत्सोममपिबद्विष्णुना सुतं यथावशम् ।
स ईं ममाद महि कर्म कर्तवे महामुरुं
सैनं सश्चद्देवो देवं सत्य इन्दुः सत्यमिन्द्रम् ॥

उत्तरं अतिछन्दा महाव्रते । त्रिकद्रुकेषु । त्रिकद्रुकास्तोमाः ज्योतिर्गौरादयः । तेषु । महिषः महान् । यवाशिरं यवमिश्रम् । मन्थी नाम ग्रहः । स एवाशिरो भवति । तुविशुष्मः महाबलः । तृम्पत् तृप्तवान् । सोममपिबत् पीतवान् । विष्णुना अध्वर्युणा । सुतं अभिषुतम् । यथावशं यथोत्साहम् । यथा ऋत्विजः इदमत्तवन्तः । सः ईं ममाद इमं सोममपिबत् । महि कर्म कर्तवे महतः कर्मणः करणार्थम् । महां महान्तम् । उरुं विस्तीर्णम् । अथवा उरुर्नाम दानवः । सः इन्द्रः । एनं दानवम् ।

सश्चत् । सश्चतिर्हिंसार्थः । दानवं हिंसितवान् । अथवा सश्चतिः सेवार्थः । सेवते । देवः इन्द्रः देवं सोमं सः सत्यः इन्दुः सेवते सत्यमिन्द्रम् ॥

त्रिकद्रुकेषु महिषो दशासामष्टिरादिमा ।
जगत्यथेन्द्र याह्यस्तु श्रौषडग्निमया रुचा ॥
चतस्रोऽत्यष्ट्योऽभि त्यं तव त्यं नर्यमित्यृचौ ।
इमे द्वे अतिशक्कर्यावष्टी इत्येक ऊचिरे ॥
प्र वो महेति जगती तमिन्द्रमिति तादृशी ।
अयं सौरी प्र वो मारुत्यग्निमाग्नेयमित्यसौ ॥
अभि त्यमिति सावित्री पावमानीत्यया रुचा ।
अस्तु श्रौषड्वैश्वदेवी शिष्टा ऐन्द्र्य इतीरिताः ॥

अभिप्लवत्र्यहं पूर्वं त्रिकद्रुका इत्याचक्षते । तेषु सोममपिबत् महिषः महानिन्द्रः । यवाशिरम् । यवाः सक्तवः आशीर्मिश्रणं यस्य तं सोमम् । तुविशुष्मो महाबलः । तृम्पत् तृप्यन्निति वा तृप्यतु इति वा । विष्णुना सहापिबत् सुतं अभिषुतम् । यथावशं यथाकामम् । स पीतः सोमः । ईं एनम् । ममाद अमादयत् । महि महत् । कर्म कर्तवे कर्तुम् । महां महान्तम् । उरुं विस्तीर्णम् । स इन्दुः । एनं इन्द्रम् । सश्चत् व्याप्नोत् । देवः देवं सत्यं सत्य इन्दुः ॥ (१)

अयं सहस्रमानवो दृशः कवीनां
मतिर्ज्योतिर्विधर्म ।
ब्रध्नः समीचीरुषसः समैरयदरेपसः
सचेतसः स्वसरे मन्युमन्तश्चिता गोः ॥

विनियोगोऽस्य दशमेऽहनि । छन्दसा आहवनीयमुपतिष्ठते । सहस्रं आनवः मनुष्याः । दृशः द्रष्टा । कवीनां मेधाविनाम् । मतिः प्रज्ञा । ज्योतिः प्रकाशः । विधर्म विविधधर्म । ब्रध्नः महान् सविता । समीचीः

सम्यग्ज्ञाता । उषसः सन्ध्यायाः । समैरयत् प्रेरितवान् । अरेपसः अपापाः । किंविशिष्टाः । सचेतसः चेतनवन्तः । क्व । स्वसरे अहनि । मन्युमन्तः दीप्तिमन्तः । अथवा क्रोधो मन्युः । तद्वन्तः । चिताः सञ्चिताः । गोः पृथिव्याः दीप्तिभिर्वा उदकैर्वा ॥

अयं सदा सन्निहितः । सहस्रं आनवः अन्तस्तोत्रमनुष्याः । दृशः चक्षुषः । ज्योतिः । आदित्येन देवतया अधिष्ठितं चक्षुः । अतश्चक्षुषो ज्योतिरिति प्रकाशनहेतुत्वादुच्यते । विधर्म विधारकं विवेक्तृ ज्योतिः । आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशत् (ऐ. उ. २. ४) इति हि ऐतरेयोपनिषदि श्रुतम् । कवीनां स्तोतॄणाम् । मतिः मननीयः सत्यः । काव्यतेः शब्दकर्मणः कविः । ब्रध्नः आदित्यः । बृहतेः ब्रध्नः । समीचीः समञ्चन्तीः उषसः समैरयत् । आदित्येन हि सह चरत्युषाः ।

सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात् ॥
(ऋ. वे. १. ११५. २)

इति हि निगमः । अरेपसः अपापाः । पापानां तमःप्रभृतीनामपहन्त्रीरुषसः । स्वसरे दिवसे । मन्युमन्तः । मन्युः प्रकाशः । मनेरवबोधकर्मणो रूपम् । सचेतसः तेजस्विनः चन्द्रमाःप्रभृतयः । गोः आदित्यात् । चिताः उपचिताः भवन्ति तेजसा । आदित्योऽपि गौरुच्यते (नि. २. ६) इति निरुक्तम् । सुषुम्नः सूर्यरश्मिश्चन्द्रमा गन्धर्वः (तै. सं. ३. ४. ७. १) इति च निगमः । चन्द्रमसमादित्यस्यैव रश्मिविशेषं दर्शयति ॥ (२)

एन्द्र याह्युप नः परावतो नायमच्छा
विदथानिव सत्पतिरस्ता राजेव सत्पतिः ।
हवामहे त्वा प्रयस्वन्तः सुतेष्वा पुत्रासो
न पितरं वाजसातये मंहिष्ठं वाजसातये ॥

इन्द्र आयाहि । उप समीपम् । नः अस्माकम् । परावतः दूरात् । न अद्य । अच्छ आप्तुम् । विदथानिव व्याप्नोति यज्ञकर्माणि । सत्पतिः सतां पतिः । अस्ता अस्तानि गृहाणि । राजा इव सत्पतिः । हवामहे त्वा आह्वयामः त्वाम् । प्रयस्वन्तः सुतेषु सोमेषु । पुत्रासः न पुत्राः पितरमिव । किमर्थम् । वाजसातये अन्नसम्भजनार्थम् । मंहिष्ठं पूज्यतमम् । वाजसातये अन्नदानार्थम् ॥

आ इन्द्र उपयाहि उपागच्छ । नः अस्मान् । परावतः दूरात् । नेति संप्रत्यर्थे । संप्रति । अयं सत्पतिः सतां ब्राह्मणानां पतिः । राजा सोमः । अच्छ अभि उद्दिश्य त्वाम् । यातीति शेषः । आहवनीयं प्रति । यद्वा त्वामच्छ अभिमुखस्तिष्ठतीति । विदथानिव गृहानिव गृही । सत्पतिरिति पुनरुक्तिरादरार्था । परुच्छेपस्य च शैलीयं पुनरुक्तिः । अस्ता अस्तं गृहमिवेत्यर्थः । हूयामहे ह्वयामः । त्वा त्वां वयम् । प्रयस्वन्तः अन्नवन्तः हविष्मन्तः । सुतेषु अभिषुतेषु सोमेषु । आकारः पूरणः । पुत्रासो न पुत्रा इव पितरम् । वाजसातये अन्नलाभाय । मंहिष्ठं दातृतमम् । वाजसातये इति पुनरुक्तिरादरार्था ॥ (३)

तमिन्द्रं जोहवीमि मघवानमुग्रं सत्रा दधानमप्रतिष्कुतं श्रवांसि भूरि ।
मंहिष्ठो गीर्भिरा च यज्ञियो ववर्त राये नो विश्वा सुपथा कृणोतु वज्री ॥

तमिन्द्रं जोहवीमि अत्यर्थं आह्वयामि । मघवानं धनवन्तम् । उग्रं उद्गूर्णवज्रम् । सत्रा दधानं सदा दधानम् । अप्रतिष्कुतं अस्खलितम् । श्रवांसि यशांसि अन्नानि । भूरि बहूनि । मंहिष्ठः पूज्यतमः । गीर्भिः स्तुतिभिः । आ च यज्ञियो ववर्त वन्दनैः आवर्तय । राये धनाय । विश्वा विश्वानि । सुपथा सुपथानि । कृणोतु करोतु । वज्री वज्रवान् ॥

तं इन्द्रं जोहवीमि भृशमाह्वयामि । मघवानं धनवन्तं दानवन्तं वा । उग्रं उद्गूर्णं ओजस्विनं वा । सत्रा सर्वदा । दधानं धारयन्तं ददतं वा । श्रवांसि अन्नानि यशांसि वा । भूरि भूरीणि । अप्रतिष्कुतं अप्रत्याकूतम् । मंहिष्ठः दातृतमः । गीर्भिः आववर्त आवर्ततां अस्मान् । राये धनार्थम् । नः अस्मभ्यम् । विश्वा विश्वानि । सुपथा शोभनमार्गान् । कृणोतु करोतु । वज्री इन्द्रः ॥ (४)

अस्तु श्रौषट् पुरो अग्निं धिया दध
अनु त्यच्छर्धो दिव्यं वृणीमह इन्द्रवायू वृणीमहे ।
यद्ध क्राणा विवस्वते नाभा संदाय नव्यसे ।
अध प्र नूनमुपयन्ति धीतयो देवाँ अच्छ न धीतयः ॥

अस्तु श्रौषट् शृणोतु श्रवणीयम् । पुरः अग्निं धिया बुध्या । पुरतो निदधे आहवनीयात्मानम् । अनु त्यत् शर्धः बलम् । दिव्यं दिवि भवम् । आवृणीमहे । इन्द्रवायू आवृणीमहे । यत् ह क्राणा चक्राणौ । विवस्वते विवासयित्रे । नाभा नाभौ । सन्दाय सन्दनार्थम् । नव्यसे नवतराय । अध प्र नूनं निश्चितम् । उपयन्ति धीतयः बुद्धयः कर्माणि वा । देवान् अच्छ आप्तुं न धीतयः मरुतीः ॥

अस्तु भवतु । श्रौषट् श्रावणं स्तोत्रस्य । शृण्वन्तु देवाः स्तोत्रमित्यर्थः । अतः परं स्तौति । पुरो दधे पुरस्करोति अग्निम् । धिया स्तुत्या । आवृणीमहे संभजामहे । नु क्षिप्रम् । त्यत् तत् प्रसिद्धम् । शर्धो मारुतं गणम् । दिव्यमन्त-रिक्षे भवम् । इन्द्रवायू इन्द्रश्च वायुश्च । यत् यौ । हेति पूरणः विनिग्रहार्थो वा । यावेव इति । क्राणा कुर्वाणौ धनादिकम् । विवस्वते । विवो धनम् । तद्वते हविष्मते । नव्यसे नवतराय । नाभा नाभौ । नह्यतेर्नाभिः । निबन्धने विश्वस्य । यज्ञे । सन्दाय सम्यक् बध्वा । स्वीकृत्य इत्यर्थः । यौ सन्दाय विवस्वते कुर्वाणौ भवतः ताविन्द्रवायू आवृणीमहे । अथ अपिच । प्र प्रकर्षेण ।

नूनं संप्रति। उपयन्ति उपयन्तु उपगच्छतु। धीतयः स्तुतयः। नः अस्मदीयाः। देवान् विश्वान्। अच्छ अभिमुखा उपयन्तु ॥ (५)

प्र वो महे मतयो यन्तु विष्णवे मरुत्वते गिरिजा एवयामरुत्।
प्र शर्द्धाय प्र यज्यवे सुखादये तवसे भन्ददिष्टये धुनिव्रताय शवसे ॥

वो महे महतः। मतयः प्रज्ञाः। प्रयन्तु विष्णवे माध्यमिकाय। मरुत्वते गिरिजा हृदयात् जाता यज्ञात् जाता वा। एवयामरुत् ऋषिराह। प्र शर्धाय बलाय। प्र यज्यवे यागशीलाय। सुखदाय सुखप्रदाय। तवसे महते। भन्ददिष्टये भन्दनीयाय। धुनिव्रताय कल्पितकर्माय। शवसे बलवते। प्रयन्तु मरुतः ॥

प्रयन्तु प्रगच्छन्तु। वः युष्मदर्थे इति वचनव्यत्ययः। तुभ्यम्। महे महते। विष्णवे मरुत्वते मरुद्भिः सहिताय। मतयः स्तुतयः। गिरिजाः गिरि वाचि ऋचि जाताः। एवयामरुत् इति षष्ठ्या लुक्। एवयामरुतो मम स्तुतयः इत्यर्थः। पूर्वोऽर्धर्चो विष्णुप्रधानः। उत्तरस्तु मारुतः। प्रयन्तु मतयः शर्धाय गणाय मारुताय प्रयज्यवे प्रयजनीयाय। सुखादये। खादिराभरणविशेषः।

अंसेषु व ऋष्टयः पत्सु खादयः (ऋ. वे. ५. ५४. ११)
हस्तेषु खादिश्च कृतिश्च संदधे (ऋ. वे. १. १६८. ३)

इति। तवसे वृद्धाय बलवते वा। भन्ददिष्टये। मन्दन्ति स्तुवन्ति इष्टयः यजमानाः यं तस्मै। धुनिव्रताय धुनिः कम्पनं मेघानां व्रतं कर्म यस्य तस्मै। शवसे। शवतिः गतिकर्मा। गन्त्रे सर्वत्र इत्यर्थः ॥ (६)

अया रुचा हरिण्या पुनानो
विश्वा द्वेषांसि तरति सयुग्वभिः सूरो न सयुग्वभिः।
धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः।
विश्वा यद्रूपा परियास्यृक्वभिः सप्तास्येभिर्ऋक्वभिः ॥

पावमानी ऋक् । विनियोगः एककर्तृके । अया अनया । रुचा दीप्त्या । किंविशिष्टया । हरिण्या हरितवर्णया । पुनानः पवमानः । विश्वा सर्वाणि । द्वेषांसि तरति सयुग्वभिः । सयुग्वान अश्वाः । तैः । सूरो न सूर इव । सयुग्वभिः रश्मिभिः । धारा पृष्ठस्य रोचते दीप्यते पुनानः । अरुषः अरुषवर्णः । हरिः हरणशीलः हरितवर्णो वा । विश्वा विश्वानि रूपाणि । परियासि । ऋक्वभिः स्तोतृभिः । सप्तास्येभिः । सप्त छन्दांसि आस्यभूतानि येषां ऋत्विजां ते सप्तास्याः । तैः सप्तास्येभिः । अथवा सप्त वषट्कारिणो होत्राः सप्तास्यानि । अथवा सप्त सोमसंस्थाः सप्तास्यानि । ताभिः । ऋक्वभिः ऋत्विग्भिः ॥

अया अनया । रुचा । रोचते दीप्यते इति रुक् । दीप्यमानया । हरिण्या धारया । पुनानः पूयमानः सोमः । विश्वा विश्वानि । द्वेषांसि द्वेष्टॄन् । तरति हिनस्ति । सयुग्वभिः सह युक्तैरश्विभिः । सूरो न सूर्य इव तमांसि । सयुग्वभिः इति पुनरुक्तिः परुच्छेपस्य पितुः शैलीयम् । पारुच्छेपिः ह्यनानतः । धारा पतन्ती पृष्ठस्य । पृष्ठ इति धारक उच्यते । धारकस्य जगतः सोमस्य । रोचते दीप्यते । पुनानः पूयमानः आरोचमान इति वा गन्तेति वा । अरुषः अहिंसकः । हरिः हरितवर्णः । यत् यः सोमः । विश्वा विश्वानि रूपाणि । परियासि परिगच्छति । ऋक्वभिः स्तुत्यैः तेजोभिः । सप्तास्येभिः सर्पणशीलमुखैः ॥ (७)

अभि त्यं देवं सवितारमोण्योः कविक्रतु-
मर्चामि सत्यसवं रत्नधामभि प्रियं मतिम् ।
ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि
हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः ॥

त्यं देवं दानादिगुणयुक्तम् । सवितारं सर्वस्य प्रसवितारम् । ओण्योः द्यावापृथिव्योः । कविक्रतुं मेधाविकर्माणं अभ्यर्चामि । सत्यसवं

अवितथसवम् । वरणीयानां रत्नानां धातारम् । अभि प्रियं आभिमुख्येन सर्वभूतानां प्रियम् । मतिम् । ऊर्ध्वा यस्य अमतिः आत्ममयी मतिः आत्मरूपं वा । भाः स्वर्गलोकम् । . . . . . . सावित्री ऋक् ॥

अभ्यर्चामि अभिष्टौमि । त्यं तम् । देवं सवितारम् । ओण्योः अवन्योः द्यावाभूम्योः । रत्नधामिति सम्बन्धः । रत्नानां धनानां दातारम् । कविक्रतुं क्रान्तप्रज्ञम् । सत्यसवं सत्यप्रज्ञं सत्यानुज्ञानम् । अभ्यर्चामि प्रियं सर्वस्य । मतिं मननीयं स्तुत्यम् । यस्य सवितुः अमतिः । अमेरभिभवार्थादमतिः । अभिभवित्री तेजसाम् । भाः दीप्तिः । ऊर्ध्वा अदिद्युतत् द्योतते । सवीमनि अनुज्ञाने सर्वप्रवृत्तीनाम् । हिरण्यपाणिः सविता । दानार्थं पाण्योः हिरण्यं यस्य सः सदा सन्निहितहिरण्यपाणिः । अमिमीत स्वः स्वर्गं सर्वं वा जगत् । सुक्रतुः शोभनकर्मा । कृपा कृपया स्वेन ॥ (८)

अग्निं होतारं मन्ये दास्वन्तं वसो
सूनुं सहसो जातवेदसं विप्रं न जातवेदसम् ।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।
घृतस्य विभ्राष्टिमनु शुक्र शोचिष आजुह्वानस्य सर्पिषः ॥

विनियोगोऽस्यावभृथे प्रवर्ग्ये च । अग्निं होतारं आह्वातारम् । मन्ये दास्वन्तं दानवन्तम् । वसोः धनस्य । सूनुं सहसः बलस्य पुत्रम् । जातवेदसं जातधनं जातप्रज्ञं वा । विप्रं न । नशब्द उपमार्थीयः । विप्रमिव जातवेदसम् । यः ऊर्ध्वया ऊर्ध्वं प्रयाति । आहुतिभिः क्षिप्राभिः । स्वध्वरः शोभनयज्ञः । देवः दानादिगुणयुक्तः । देवाच्या देवानञ्चन्त्या । कृपा कल्पनया दीप्त्या वा । आजुह्वानस्य सर्पिषः घृतस्य हूयमानस्य । विभ्राष्टिं विभ्राजते महानसि । अनु शुक्रशोचिषः । शुक्लदीप्तेः । . . . . . विस्तरेणोक्तमधस्तादासीत् । इदानीं ग्रन्थगौरवभयात् विभक्तिपरिणामो

रूपसिद्धिश्च न क्रियते। कुतः। आरणिका उत्तराश्च व्याख्येयाः। यदि सर्वस्य ग्रन्थराशेर्विस्तरः क्रियते तदा निरासाय गौरवः प्रसज्यते। एतस्मात्कारणात् पदार्थमात्रमुच्यते। विनियोगश्च यावन्मात्रमभिधीयते। आर्षच्छन्दोदैवतब्राह्मणानि च गायत्रप्रभृतीनां साम्नां सवनभागेन। गायत्रं प्रातस्सवनम्। तत्र गायत्राणि सामानि ब्राह्मणेनोक्तार्थानि। माध्यन्दिने सवने त्रीणि छन्दांसि भवन्ति। गायत्री बृहती अनुष्टुबिति। तत्रामहीयवप्रभृतीनि सामानि। तेषामपि च साम्नामर्थच्छन्दोदैवतब्राह्मणानि ब्राह्मणोक्तानि। तृतीयसवने गायत्रीककुबुष्णिहावनुष्टुप् जगतीति छन्दांसि। तत्राप्यार्षादीनि ब्राह्मणोक्तानि। एवमेकाहाहीनसत्रप्रायश्चित्तक्षुद्रपर्यन्तेषु क्रतुषु सामान्येन मन्त्राः। तेषामार्षादीनि गृह्यन्ते। सर्वमुक्तम्। इदानीं पदार्थमात्रमेवोच्यते॥

अग्निं होतारं ह्वातारं देवानाम्। मन्ये स्तौमि। दास्वन्तं दानवन्तम्। सर्वधातुभ्योऽसुन्प्रत्ययो भावे। वसोः प्रशस्यस्य। सहसो बलस्य। सूनुं पुत्रम्। प्राणाद्धि बलान्मथ्यमानोऽभिजायते इति। जातवेदसं प्रभूतधनम्। विप्रं मेधाविनम्। नेति संप्रत्यर्थे। पुनरुक्तयः व्याख्याताः। यः देवः। ऊर्ध्वया उत्कृष्टया। देवाच्या देवान् अञ्चन्त्या। कृपा कृपया कल्पनया। कृपिः कल्पनार्थः। स्वध्वरः सुयज्ञः भवति। सोऽग्निः घृतस्य आज्यस्य सम्बन्धिनीम्। विभ्राष्टिं विशिष्टां दीप्तिम्। अन्विति उपसर्गदर्शनादाख्याताध्याहारः। अनुवष्टि इति बह्वचाः। अनुकामयते। शुक्रशोचिषः शुक्रं दीप्त शोचिरर्चिः भवति येन तस्य घृतस्य। आजुह्वानस्य आहूतस्य। लिटः कानच्। सर्पिषः। विविधं सर्पतीति सर्पिः। ईदृशेन घृतेन या विभ्राष्टिः तामनुवष्टि॥ (९)

तव त्यं नर्यं नृतोप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतम्।
यो देवस्य शवसा प्रारिणा असु रिणन्नपः।
भुवो विश्वमभ्यदेवमोजसा विदेदूर्जं शतक्रतुर्विदेदिषम्॥

तव त्यं नर्यं नृभ्यः हितम् । अथवा वेदं नर्यम् । अपः कर्म । हे नृत इन्द्र नृभ्यो हित । प्रथममग्र्यम् । पूर्व्यं दिवि प्रवाच्यं कृतं पूर्वतरैः कृतं दिवि द्युलोके प्रवाच्यं प्रवचनीयगुणालङ्कृतम् । यः देवस्य शवसा बलेन प्रारिणाः । रिणोतिः हिंसायाम् । असुः असुरान् हिंसितवान् । विश्वं सर्वम् । भवः असि भवसि । अदेवं ओजसा बलेन । रिणन् अपः विसृजन्नुदकम् । विदेत् ऊर्जमन्नस्य रसं बलं वा । विदेत् इषं अन्नम् ॥

तव त्वदीयम् । त्यत् तत् । अपः कर्म । नर्यं नरहितम् । हे नृतः नेतः हे इन्द्र । प्रथमं प्रथितम् । पूर्व्यं पूर्वकाले भवं कृतं त्वया । दिवि स्वर्गे । प्रवाच्यं देवैः । यः त्वं देवस्य विजिगीषोः वृत्रस्य । असुः असुं प्राणम् । शवसा बलेन । प्रारिणाः प्रागमयः । रिणन् प्रवर्तयन्निति हेतौ शतृ । प्रवर्तयितुम् । अपः मेघस्थाः वृत्रेण निरुद्धाः । अभिभुवः अभिभव । विश्वं अदेवं असुरम् । ओजसा बलेन । अथ परोक्षस्तुतिः । विदेत् वेदयेत् लम्भयेत् । ऊर्जं रसम् । शतक्रतुः शतकर्मा इन्द्रः । विदेदिषं अन्नं च ।

शतानि त्रीण्यृचामैन्द्रे द्विपञ्चाशद्वचोऽधिकाः ।
इत्थं श्रीभरतस्वामी काश्यपो व्याकरोदिमाः ॥

पञ्चमे अष्टमी दशमी

इन्द्र कुत्स नव ।.

उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे । उग्रं शर्म महि श्रवः ॥

पावमान्याः गायत्रछन्दस्याः । विनियोगोऽस्य ज्योतिष्टोमे । उच्चैः अन्यैश्च बहुभिः क्रतुभिः । बहुस्थानत्वात् उच्चाः । ते तव । जातं

अन्धसः अन्नं सोमलक्षणम् । दिवि सत् भूमि आददे आदत्ते । उग्रं बलवत् । शर्म शरणम् । महि महत् । श्रवः महत् अन्नं सोमलक्षणं यशो वा । एतदुक्तं भवति । आहुतिरसविपरिणामद्वारेण इमं लोकमागच्छति वृष्ट्यात्मना ॥

पवमानस्य सोमस्य तृतीयं पर्वसंस्तवः ।
उच्चा त इति गायत्र्यः चत्वारिंशच्चतुर्युताः ॥

अमहीयुः । उच्चा उपरिस्थितस्य । ते तव । अन्धसः अन्नभूतस्य देवानाम् । जातं प्रादुर्भूतं प्रभूतम् । दिवि स्वर्गे । सत् विद्यमानम् । भूम्याददे इत्यत्र भूमिः आ ददे इति पदत्रयं आमनन्ति । विसर्जनीयलोपः सांहितिकः । भूमिः भौमाः जनाः । अस्मादृशा इत्यर्थः । आददे आददीमहि । उग्रं उद्गूर्णम् । शर्म सुखम् । महि महत् । श्रवः अन्नं च आददे । त्वया देयं अन्नं सुखं च आददीमहि वयम् ॥ (१)

स्वादिष्ठया मदिष्ठया पवस्व सोम धारया । इन्द्राय पातवे सुतः ॥

विनियोगोऽस्य ज्योतिष्टोमे । स्वादिष्ठया स्वादुमत्तमया । मदिष्ठया मादनीयतमया । हे सोम पवस्व धारया । किमर्थम् । इन्द्राय पातवे पानार्थम् । सुतः अभिषुतः ॥

मधुच्छन्दाः । स्वादिष्ठया स्वादुतमया । मदिष्ठया अतिशयेन मादयित्र्या । धारया पवस्व क्षर दशापवित्रात् द्रोणकलशमभि हे सोम । इन्द्राय इन्द्रार्थम् । पातवे पातुम् । असमानकर्तृकेष्वपि छन्दसि तुमर्थीया दृश्यन्ते । सुतः अभिषुतः त्वम् ॥ (२)

वृषा पवस्व धारया मरुत्वते च मत्सरः । विश्वा दधान ओजसा ॥

विनियोगोऽस्य द्वितीयेऽहनि । वृषा सेक्ता । पवस्व धारया । मरुत्वते मरुद्भिः तद्वते । मत्सरः सोमः । विश्वा विश्वानि भूतानि । दधानः धारयन् । ओजसा बलेन ॥

भृगुः वारुणिः जमदग्निर्वा भार्गवः । वृषा वर्षकः त्वम् । पवस्व धारया मरुत्वते मरुद्भिः सहिताय इन्द्राय । च इति पूरणः । अन्येभ्यश्च देवेभ्यः सवनभागिभ्य इति वा । मत्सरः मदकरः त्वम् । विश्वा विश्वानि भुवनानि । दधानः धारयन् । ओजसा बलेन ॥ (३)

यस्ते मदो वरेण्यस्तेना पवस्वान्धसा । देवावीरघशंसहा ॥

विनियोगोऽस्य द्वितीयेऽहनि । यः मदः ते तव । वरेण्यः प्रार्थनीयः । तेन पवस्व अन्धसा अन्नेन । देवावीः । देवानवति तर्पयति इति देवावीः । अघशंसहा । अघं पापं यः शंसति तस्य हन्ता ॥

अहमीयुः । यः ते त्वदीयः । मदः रसः । वरेण्यः वरणीयः । तेन अन्धसा अन्नभूतेन देवानां पवस्व । देवावीः देवकामः देवान् गच्छन् वा त्वम् । अघशंसहा पापशंसकानां शत्रूणां हन्ता ॥ (४)

तिस्रो वाच उदीरते गावो मिमन्ति धेनवः । हरिरेति कनिक्रदत् ॥

नियोगोऽस्य तृतीयेऽहनि । ऋग्यजुःसामाख्याः वाचः तिस्र उदीरते प्रेरयति । गावः मिमन्ति धेनवः गावः यथा दुह्यमानाः शब्दं कुर्वन्ति एवम् । हरिः हरितवर्णः । एति आगच्छति । कनिक्रदत् शब्दं कुर्वन् ॥

त्रितः । तिस्रः त्रिविधाः । वाचः ऋग्यजुःसामलक्षणाः । उदीरते उदीरयन्ति ऋत्विजः । पवमानमभीति शेषः । गावः आशीर्दुहः । मिमन्ति शब्दा-

यन्ते । धेनवः प्रीणयित्र्यः । हरिः हरितवर्णः सोमश्च । एति पवते । कनिक्रदत् शब्दं कुर्वन् ॥ (५)

इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः । अर्कस्य योनिमासदम् ॥

विनियोगोऽस्य षष्ठेऽहनि । इन्द्राय । किंविशिष्टाय । मरुत्वते मरुत्सहिताय । हे इन्दो मधुमत्तमः रसवत्तमः । अर्कस्य प्रदीप्तस्य । अर्को देवः । देवस्य । योनिं स्थानम् । आसदं आसीदम् ॥

काश्यपः । इन्द्राय मरुत्वते पवस्व हे इन्दो मधुमत्तमः रसवत्तमः त्वम् । अर्कस्य अर्चनीयस्य स्तुत्यस्य इन्द्रस्य स्वभूतम् । योनिस्थानं द्रोणकलशम् । आसदं आसक्तम् ॥ (६)

असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः । श्येनो न योनिमासदत् ॥

विनियोगोऽस्य पञ्चमेऽहनि । असावि अभिषुतः अंशुः । मदाय मदार्थम् । अप्सु वसतीवरीषु । दक्षः शीघ्रः । गिरिष्ठाः गिरौ पर्वते तिष्ठति इति गिरिष्ठाः । श्येनः न पक्षी इव । योनिं स्थानम् । आसदत् आसीदति ॥

जमदग्निः । असावि अभिषुतोऽभवत् । अंशुः सोमः । मदाय देवानाम् । अप्सु वसतीवरीषु । दक्षः समृद्धः । गिरिष्ठाः गिरौ स्थितः पूर्वम् । श्येनो न श्येन इव । योनिं स्थानम् । आसदत् आसीदत् ॥ (७)

पवस्व दक्षसाधनो देवेभ्यः पीतये हरे । मरुद्भ्यो वायवे मदः ॥

विनियोगोऽस्य चतुर्थेऽहनि । पवस्व दक्षसाधनः शीघ्रसाधनः । देवेभ्यः पीतये पानाय हरे । मरुद्भ्यः वायवे मदः मदनीयः ॥

दृढच्युत आगस्त्यः । पवस्व दक्षसाधनः बलसाधकः । देवेभ्यः देवानां अर्थाय । पीतये पानाय तेषाम् । हे हरे हरितवर्ण । मरुद्भ्यः वायवे पवस्व । मदः मदकरः त्वम् ॥ (८)

परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत् । मदेषु सर्वधा असि ॥

विनियोगोऽस्य षष्ठेऽहनि । परि स्वानः सुतः अभिषुतः सोमः । गिरिष्ठाः पवित्रे ऊर्णमये । सोमः अक्षरत् क्षरितवान् । मदेषु सर्वधा सर्वम् । असि शाययति धारयति वा ॥

अस्याः परस्याश्च काश्यपोऽसितः । परि परितः । अक्षरत् क्षरति । स्वानः सुतः सोमः । सुनोतेः लिटः कानच् । अभ्यासाभावः छान्दसः । गिरिष्ठाः व्याख्यातः । पवित्रे दशापवित्रे । अथ प्रत्यक्षस्तुतिः । मदेषु स्तोत्रेषु सर्वधा सर्वकामप्रदः असि त्वम् ॥ (९)

परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः । स्वानैर्याति कविक्रतुः ॥

विनियोगोऽस्य चतुर्थेऽहनि । परि प्रिया दिवः कविः मेधावी । वयांसि अन्नानि पक्षिणो वा । नप्त्योः द्यावापृथिव्योः अहोरात्रयोर्वा हितः । स्वानैः सुतैः । याति कविक्रतुर्मेधाविकर्मा ॥

परि याति प्रिया प्रियाणि । वयांसि स्थानानि इति बहुवचनं स्वावयवापेक्षया । द्रोणकलशम् । दिवो लोकात् । दशापवित्रं द्यौः । मध्यमोऽवकाशः अन्तरिक्षम् । द्रोणकलशः पृथिवी इत्येवं त्रिलोकव्याप्तिः पवमानस्य द्रष्टव्या । कविः स्तुत्यः । कवतेः शब्दकर्मणः कविः । नप्त्योः अधिषवणफलकयोः ।

हित: निहित: पूर्वम् । स्वानै: सुन्वानै: अध्वर्युभि: । न पातयत: सोमं धारयन्त्यौ इति नप्त्यौ । कविक्रतु: क्रान्तप्रज्ञ: ॥　(१०)

इति पञ्चमे नवमी दशती

प्र सोमासो मदच्युतः श्रवसे नो मघोनाम् । सुता विदथे अक्रमुः ॥

विनियोगोऽस्य प्रथमेऽहनि । सोम: मदच्युत: । श्रवसे यशसे अन्नाय वा । न: मघोनां धनवतां यजमानानाम् । विदथे यज्ञगृहे । सुता: अभिषुता: । प्राक्रमु: प्रगच्छेयु: ॥

श्यावाश्व: । प्राक्रमु: प्रक्रामन्ति प्रगच्छन्ति पवित्रम् । सोमास: सोमा: । मदच्युत: रसक्षरणा: । श्रवसे अन्नार्थम् । न: अस्माकम् । मघोनां हविष्मताम् । सुता: अभिषुता: । विदथे यज्ञे ॥　(१)

प्र सोमासो विपश्चितोऽपो नयन्त ऊर्मयः । वनानि महिषा इव ॥

विनियोगोऽस्य प्रथमेऽहनि । सोमास: सोमा: । विपश्चित: प्राज्ञा: जिन्वन्ति । अप: नयन्त उदकानि प्रेरयन्त: । वनानि महिषा इव यथा वनानि महिषा नीयन्ते एवं ऊर्मय: उदकैर्नीयन्ते ॥

त्रित: । प्रक्षरन्ति सोमास: सोमा: । विपश्चित: प्राज्ञा: । अपो न । अप इति षष्ठ्या व्यत्ययेन द्वितीया । अपां ऊर्मय इव । यन्त: गच्छन्त: । वनानि महिषा इव यथा च वनानि महिषा: ॥　(२)

पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने । विश्वा अप द्विषो जहि ॥

विनियोगोऽस्य द्वितीयेऽहनि । हे इन्दो वृषा सुतः अभिषुतः पवस्व । कृधि नः कुरु अस्मान् ज्ञानयशस्विनः । विश्वाः सर्वा द्विषः अपजहि ॥

अमहीयुः । पवस्व हे इन्दो सुतः अस्माभिः वृषा त्वम् । कृधि कुरु । नः अस्मान् । यशसः यशस्विनः । मत्वर्थीयलोपः । जने समूहे । विश्वाः द्विषः द्वेष्ट्रीः प्रजाः अपजहि ॥ (३)

वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे । पवमानः स्वर्दृशम् ॥

वृषा सेक्ता । हि असि भानुना भवसि भानुना दीप्त्या । द्युमन्तं द्युतिमन्तम् । त्वा त्वाम् । हवामहे आह्वयामः । पवमानः स्वर्दृशं स्वर्गलोकं पश्यन्तम् ॥

भृगुः । वृषा हि असि भानुना दीप्त्या युक्तः । द्युमन्तं दीप्तिमन्तम् । त्वा हवामहे । पवमानः स्वर्दृशं सर्वदृशम् ॥ (४)

इन्दुः पविष्ट चेतनः प्रियः कवीनां मतिः । सृजदश्वं रथीरिव ॥

इन्दुः पविष्ट पूतः । चेतनः चेतनावान् प्रियः । कवीनां मेधाविनां मतिः । स एव सृजत् अश्वं रथीरिव यथा रथी संसृजति अश्वं तद्वत् ॥

काश्यपः द्वयोः । इन्दुः सोमः । पविष्ट पवते । चेतनः ज्ञापयिता प्रियः । कवीनां स्तोतॄणाम् । मतिः स्तुत्यः । सृजत् सृजति च रसम् । अश्वं रथीरिव नेतेव ॥ (५)

असृक्षत प्र वाजिनो गव्या सोमासो अश्वया । शुक्रासो वीरयाशवः ॥

विनियोगोऽस्य षष्ठेऽहनि । प्रासृक्षत प्रमृष्टवन्तः । वाजिनः अन्नवन्तः । गव्या गवेच्छया सोमासः । अश्वया अश्वेच्छया । शुक्रासः शुक्रा दीप्ताः । वीरया वीरेच्छया । आशवः शीघ्राः ॥

प्रासृक्षत प्रासृज्यन्त पवित्रे । वाजिनः अन्नवन्तः बलवन्तो वा । शुक्रासः दीप्ताः सोमाः । गव्या गव्यया गोकामनया । अश्वया अश्वेच्छया । वीरया वीरेच्छया च । शवः शवसा बलेन वेगेन ॥ (६)

पवस्व देव आयुषगिन्द्रं गच्छतु ते मदः । वायुमा रोह धर्मणा ॥

विनियोगोऽस्याष्टमेऽहनि । पवस्व देवः आयुषक् सुजनमनाः । इन्द्रं गच्छतु ते तव । मदः मदकरस्त्वम् । वायुमारोह धर्मणा कर्मणा ॥

निध्रुविः काश्यपः । पवस्व देवः द्योतमानः त्वम् । आयुषक् आयुषु मनुष्येषु सक्तः मनुष्यैः सेव्यमान इति वा । इन्द्रं गच्छतु ते त्वदीयः । मदः रसः । वायुं आरोह धर्मणा धारकेण मदेन ॥ (७)

पवमानो अजीजनत् दिवश्चित्रं न तन्यतुम् । ज्योतिर्वैश्वानरं बृहत् ॥

विनियोगोऽस्य चतुर्थेऽहनि । पवमानः अजीजनत् । दिवः चित्रं चायनीयम् । न तन्यतुम् । नशब्द उपमार्थीयः । दिवमिव तनुं विस्तीर्णम् । ज्योतिर्वैश्वानरं वैश्वानराख्यं तेजः । इह लोके बृहत् महत् ॥

अमहीयुः । पवमानः अजीजनत् अजनयत् । दिवः द्युलोकात् । ज्योतिः वैश्वानरं वैश्वानराख्यम् । बृहत् महत् । चित्रं न चित्रमिव । तन्यतुं अशनिम् ॥ (८)

परि स्वानास इन्दवो मदाय बर्हणा गिरा। मधो अर्षन्ति धारया॥

विनियोगोऽस्य सप्तमेऽहनि। स्वानासः सुताः इन्दवः। मदाय मदार्थम्। बर्हणा परिवेष्टनेन। गिरा स्तुत्या। मधो। विभक्तिव्यत्ययः। मधवः परि अर्षन्ति धारया॥

असितः द्वयोः। परि अर्षन्ति परिक्षरन्ति। स्वानासः सुताः। इन्दवः दीप्ताः सोमाः। बर्हणा बृहत्वेन युक्ताः। गिरा। गृणन्ति शब्दायन्ते इति गिरः। धारायाश्च एतत् विशेषणम्। शब्दायमानया धारया पर्यर्षन्ति। मदाय देवानाम्। मधो इति विभक्तिव्यत्ययः। मधवः मधुराः इत्यर्थः॥ (९)

परि प्रासिष्यदत्कविः सिन्धोरूर्मावधि श्रितः। कारुं बिभ्रत्पुरुस्पृहम्॥

परिप्रासिष्यदत् समन्तात् स्यन्दितवान्। कविर्मेधावी। सिन्धोः ऊर्मौ अधि उपरि। श्रितः स्थितः। कारुं कर्तारम्। बिभ्रत् धृतवान्। पोषयति धारयति वा। पुरुस्पृहं बहुभिः स्पृहणीयम्॥

परि परितः। प्रासिष्यदत् प्रस्यन्दते। कविः स्तुत्यः शब्दायमान इति वा। सिन्धोः नद्याः। ऊर्मौ उदके। अधीति सप्तम्यर्थानुवादकः। श्रितः संसृष्टः सोमः। कारुं स्तोतारं बिभ्रत्। पुरुस्पृहं बहुभिः स्पृहणीयम्। अथवा कारुः शङ्खः। कार इति शङ्खनाम। कार एव कारुः। देवतात्मना शङ्खं बिभ्रत् इति। गोविन्दुर्द्रप्स आयुधानि बिभ्रत् (ऋ. वे. ९. ९६. १९) इति निगमः॥ (१०)

इति पञ्चमे दशमी दशती

पञ्चमः प्रपाठकः

षष्ठः प्रपाठकः

उपो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम् । इन्दुं देवा अयासिषुः ॥

विनियोगोऽस्य नवमेऽहनि । उप । उ सु इति पदपूरणार्थौ । जातं अप्तुरं अप्सु भवतीति अप्तुरः । तम् । गोभिः गव्यैः संस्पृष्टम् । भङ्गं भज्यते ग्रावभिः । परिष्कृतं गव्यैः । इन्दुं सोमम् । देवाः संसदनमयासिषुः उपगतवन्तः । अथवा याचितवन्तः ॥

अमहीयुः । उप उ उपो । उप अयासिषुः उपगच्छन्ति स्तोत्रेण । देवाः स्तोतारः । देवा एव वा पानार्थं उपगच्छन्ति । सु सुष्ठु । जातं प्रादुर्भूतं अभिषुतम् । इन्दुं सोमम् । अप्तुरं अपां वसतीवरीणां तरितारम् । गोभिः गव्येन । परिष्कृतं अलङ्कृतम् । भङ्गं भञ्जकं असुररक्षसाम् ॥ (१)

पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः । शुम्भन्ति विप्रं धीतिभिः ॥

विनियोगोऽस्य चतुर्थेऽहनि । पुनानः पवमानः । अक्रमीत् क्रमितवान् । अभि परि समन्तात् । विश्वा मृधः सङ्ग्रामान् जेतुम् । विचर्षणिः विविधं पश्यति । सर्वं वा पश्यति । शुम्भन्ति शोभन्ति अलंकुर्वन्ति विप्रं मेधाविनम् । धीतिभिः कर्मभिः बुद्धिभिर्वा ॥

बृहन्मतिः । पुनानः पूयमानः सोमः । अक्रमीदभि अभिक्रामतु । विश्वाः मृधः हिंसित्रीः प्रजाः । विचर्षणिः विद्रष्टा । तमिमं विप्रं प्राज्ञम् । शुम्भन्ति दीपयन्ति । धीतिभिः स्तुतिभिः स्तोतारः ॥ (२)

आविशन् कलशं सुतो विश्वा अर्षन्नभि श्रियः । इन्दुरिन्द्राय धीयते ॥

आविशन् कलशं द्रोणकलशम् । सुतः अभिषुतः विश्वाः सर्वाः । अर्षन् क्षरन्ति । अभि श्रियः संस्पृहणीयाः । इन्दुः सोमाः इन्द्राय धीयते ॥

जमदग्निः । आविशन् अवेक्षमाणः । कलशं द्रोणकलशम् । सुतः पूर्वम् । विश्वाः श्रियः अभि उद्दिश्य । अर्षन् अक्षरन् । इन्दुः सोमः । इन्द्राय इन्द्रार्थम् । धीयते निधीयते दशापवित्रे अध्वर्युणा ॥ (३)

असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः । कार्ष्मन् वाजी न्यक्रमीत् ॥

असर्जि रथ्यः रथे हितः अश्वः । यथा पवित्रे अविवालमये । चम्वोः द्रोणकलशयोः । कार्ष्मन् अनडुहः चर्मणि । सुतः अभिषुतः सोमः । वाजी अन्नवान् न्यक्रमीत् ॥

प्रभूवसुः । असर्जि सृज्यते सिच्यते पवित्रे । रथ्यः रथवाहः अश्वः यथा । चम्वोः अधिषवणफलकयोः सुतः । कार्ष्मन् युद्धे । अश्व इव इति समन्वयः । वाजी सोमः । न्यक्रमीत् नितरां क्रामति पवते ॥ (४)

प्र यद्गावो न भूर्णयः त्वेषा अयासो अक्रमुः । घ्नन्तः कृष्णामप त्वचम् ॥

विनियोगोऽस्य चतुर्थेऽहनि । गावः न चन्द्ररश्मयः इव । भूर्णयः भ्रमणशीलाः । त्वेषा दीप्ता महान्तः । अयासः गमनशीलाः । प्राक्रमुः क्रमितवन्तः । घ्नन्तः कृष्णां रात्रिं कृष्णरूपाम् । अप त्वचम् अपर्णाः रात्रेः कृष्णां त्वचम् ॥

मेधातिथिः। प्राक्रमुः प्रगच्छन्ति। यत् यदा। गावो न अनड्वाह इव। भूर्णयः भर्तारः। त्वेषाः दीप्ताः। अयासः गमनशीलाः सोमाः। तदा इति शेषः। अपघ्नन्तो भवन्ति। कृष्णां त्वचं कृष्णवर्णं राक्षसं अकर्माणं पापं वा ॥ (५)

अपघ्नन् पवसे मृधः क्रतुवित् सोम मत्सरः। नुदस्वादेवयुं जनम् ॥

विनियोगोऽस्याष्टमेऽहनि। अपघ्नन् मृधः सङ्ग्रामान् पाप्मनश्च। पवसे क्रतुवित् कर्मवित्। सोम मत्सरः मदनीयः भक्षणीयश्च। नुदस्व प्रेरयस्व। अदेवयुं जनम्। यो देवान् यष्टुं न कामयते सः अदेवयुः। तं दुष्टजनम् ॥

निध्रुविर्द्वयोः। मृधः शत्रून्। अपघ्नन् पवसे क्रतुवित् कर्मणां प्रज्ञानां वा लम्भनं हे सोम। मत्सरो मदकरः। नुदस्व बाधस्व। अदेवयुं देवानकामयमानं वेदबाह्यं जनम् ॥ (६)

अया पवस्व धारया यया सूर्यमरोचयः। हिन्वानो मानुषीरपः ॥

अया पवस्व धारया यया सूर्यमरोचयः दीप्तं कृतवान्। अथाप्यस्यैको रश्मिः चन्द्रमसमनुप्राप्तो भवति। हिन्वानः गमयन्। मानुषीः अपः मनुष्यलोकं प्रत्युदकानि। अया अनया। पवस्व पूयस्व। धारया यथा सूर्यमरोचयः। रुच दीप्तौ। सूर्यं दीपयसि। हिन्वानः सेवमानः। मानुषीः मनुष्याणां भवाः अपः ॥

अया अनया धारया पवस्व। यया धारया सूर्यमरोचयः। हिन्वानः प्रेरयन्। मानुषीः मनुष्येभ्यो हिताः। अपः वर्षाणि ॥ (७)

स पवस्व य आविथेन्द्रं वृत्राय हन्तवे । वव्रिवांसं महीरपः ॥

स पवस्व यः आविथ । अवेः तर्पणार्थस्य । तर्पयसि इन्द्रम् । किमर्थम् । वृत्राय हन्तवे । मेघाय वृत्राय हननार्थम् । किं कुर्वाणम् । वव्रिवांसं वरणस्वभावम् । महीः महतीः । अपः वृण्वानं महत्त्वात् ॥

अमहीयुः । स त्वं पवस्व । यः त्वं आविथ ररक्षिथ इन्द्रं अतर्पयः इति वा । वृत्राय वृत्रम् । हन्तवे हन्तुम् । वव्रिवांसं आवृण्वन्तम । महीः महतीः । अपो वृत्रम ॥ (८)

अया वीती परि स्रव यस्त इन्दो मदेष्वा । अवाहन् नवतीर्नव ॥

विनियोगोऽस्याष्टमेऽहनि । वीती । वीतिः कान्तिः मार्गो वा । तेन । परि स्रव परि समन्तात् स्रव । यः ते तव । इन्दो सोम । मदेषु आ पुरतो व्यवस्थितेषु । अवाहन् शत्रूणां नवतीर्नव अष्टौ शतानि दशोत्तराणि ॥

अमहीयुः । अया अनेन रसेन अनेन गन्त्रा इति वा । वीती वीतये अशनाय देवानाम् । परि स्रव हे इन्दो । यः ते रसः मदेषु जनितेषु । आ अभिगम्य । अवाहन् अवहतवान् । नवतीः नव पुरीः इन्द्रः प्रविष्टः सन् ॥ (९)

परि द्युक्षं सनद्रयिं भरद्वाजं नो अन्धसा । स्वानो अर्ष पवित्र आ ॥

परि द्युक्षम् । द्युतौ क्षियन्ते इति द्युक्षम । सनत् चिरन्तनम । रयिं धनम् । भरत् आभरत् सर्वतः । वाजमन्नम् । नः अस्मान् प्रति । अन्धसा तर्पितः । स्वानः सूयमानः पवित्रे । अर्ष क्षर । आ अधि ॥

उचथ्यः । पर्यर्ष परिक्षर कलशमभि । द्युक्षं दीप्तम् । सनद्रयिं दीयमानं धनम् । वाजं बलम् । भरत् बिभ्रत् । नः अस्मदर्थम् । अन्धसा रसेन । स्वानः सुतः । पवित्रे आ आसिक्तः त्वम् ॥ (१०)

इति षष्ठे प्रथमा दशती ।

अचिक्रदद्वृषा हरिर्महान् मित्रो न दर्शतः । सं सूर्येण दिद्युते ॥

विनियोगोऽस्य षष्ठेऽहनि । अचिक्रदत् शब्दं कृतवान् । वृषा सेक्ता । हरिः हरितवर्णः महान् । मित्रो न मित्र इव । दर्शतः द्रष्टा । सं सूर्येण दिद्युते दीप्यते ॥

मेधातिथिः । अचिक्रदत् क्रन्दति शब्दायते पवमानः । वृषा वर्षकः । हरिः हरितवर्णः महान् । मित्रो न मित्र इव । दर्शतः दर्शनीयः । सं सह । दिद्युते द्योतते सूर्येण ॥ (१)

आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे । पान्तमा पुरुस्पृहम् ॥

विनियोगोऽस्य सप्तमेऽहनि । ते दक्षं शीघ्रम् । मयोभुवं सुखभवम् । वह्निं वोढारम् । अद्य आवृणीमहे । पान्तं पालयन्तम् । पुरुस्पृहं बहुभिः स्पृहणीयम् ॥

भृगुः । आवृणीमहे प्रार्थयामहे । ते त्वदीयं रसम् । दक्षं समर्थयितारम् । मयोभुवं सुखस्य भावयितारम् । वह्निं वोढारं विश्वस्य । पान्तं पातव्यम् । आ

आवृणीमहे । पुरुस्पृहं बहुभिः स्पृहणीयम् । अद्य अस्मिन् अहनि आ आवृणीमहे ॥ (२)

अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आनय । पुनाहीन्द्राय पातवे ॥

विनियोगोऽस्याष्टमेऽहनि । अध्वर्यो अद्रिभिः सुतं ग्रावभिरभिषुतं सोमम् । पवित्रे अविमये आनय । पुनीहि पूतं कुरु । इन्द्राय पातवे इन्द्रस्य पानार्थम् ॥

उचथ्यः । हे अध्वर्यो अद्रिभिः ग्रावभिः । सुतं अभिषुतं सोमम् । पवित्रे आनय आधेहि । पुनाहि पुनीहि । इन्द्राय इन्द्रार्थम् । पातवे पानार्थं इन्द्रस्य ॥ (३)

तरत् स मन्दी धावति धारा सुतस्यान्धसः । तरत् स मन्दी धावति ॥

विनियोगोऽस्य षष्ठेऽहनि । चतुर्ऋचो भवति प्रतिष्ठायै । प्रतिष्ठायै यजमानाय । ध्वस्ने वै पुरुषं तीतरन्त । ध्वस्नावेभ्यः स्त्रियः पुरुषन्त्यो बहुसम्भजन्त्यो बहुपुरुषं तीतरन्त । पुरुमीढाभ्यां ऋषिभ्यां वैददश्विभ्यां सहस्राणि अदित्सतां दातुमिच्छताम् । तौ तरन्तौ पुरुमीढौ ईक्षेतां मनसा ग्राह्यमग्राह्य कथं केन प्रकारेण नौ आवामिदं आत्तमप्रतिगृहीतं स्यादिति । तौ प्रत्येताम् । चतुर्ऋचः प्रत्यर्थं ध्वस्नयोः पुरुषन्त्योः रमन्त्योः आदद्महे सहस्राणि आत्तवन्तौ तरत् । तरत् प्रतिग्रहदोषः सः मन्दी सोमः । धावति शोधयति । ततौ वैकृतयोः आत्तं गृहीतमप्रतिगृहीतं भवति । अन्यत्रापि आत्तमस्य अप्रतिगृहीतं भवति । गृहीतमपि यः एवं विजानाति विनाशं सोऽनुभवति । तरन्त पुरुमीढौ उभयस्य अन्नाद्यस्यावरुद्धयै । मानुष्यस्य च दैवस्य च । मानुष्यस्य च अन्नस्य दैवस्य च अवने धनार्थम् । तथा च गौतमः

अप्रतिग्राह्यं प्रतिजिघृक्षत् प्रतिगृह्य वा चतुऋचं तरत्समन्दीत्यप्सु जपेत् । तरत् सः मन्दी सोमः । धावति गच्छति वा शोधयति वा पापम् । न केवलं सोमः । धारा अपि । सुतस्य अन्धसः अन्नस्य सोमलक्षणस्य । तरत् तरति । स पापं यस्य मन्दी धावति शोधयति । उस्रा माध्यमिका वाक् धारा वा । वेद विजानाति । वसूनां मर्त्यस्य देवी अवसः । एवंगुणविशिष्टा धारा । ध्वस्रयोरिति व्याख्याता । आ ययोः पुरुषन्त्योः । त्रिंशतं त्रिंशच्छतानि धनानां सहस्राणि च । आदद्महे । तरत स मन्दी धावति ॥

अवत्सारः । तरत् अतरत् प्राप्नुवन् लोकान् त्रीन् । उक्तं हि पूर्वमस्माभिः—पवित्रं द्युलोको मध्यं अन्तरिक्षं कलशः पृथिवीति । अथवा तरत् तारयत् पापात् । स सोमः । मन्दी मदकरः । धावति पवते । कथं सोमः पवते । धारारूपेण इत्याह । धारा पवते सुतस्य अन्धसः अन्नभूतस्य सोमस्य । तरत् स इति पुनरुक्तिरादरार्था ॥　　　　(४)

आ पवस्व सहस्रिणं रयिं सोम सुवीर्यम् । अस्मे श्रवांसि धारया ॥

आ पवस्व सहस्रिणं रयिं धनम् । सुवीर्यं हे सोम । अस्मे अस्मासु । श्रवांसि अन्नानि यशांसि वा धारया ॥

निध्रुविः । आ अभि उद्दिश्य पवस्व । सहस्रिणं सहस्रसंख्याकम् । रयिं धनं हे सोम । सुवीर्यं शोभनवीर्ययुक्तम् । अस्मे अस्मासु । श्रवांसि अन्नानि धारया ॥　　　　(५)

अनु प्रत्नास आयवः पदं नवीयो अक्रमुः । रुचे जनन्त सूर्यम् ॥

अनु प्रत्नासः पुरातनाः । आयवः मनुष्याः वसिष्ठादयः । पदं पद्यते उत्पाद्यते संसाख्यम् । नवीयो नवतरं अस्मिन् कल्पे । अक्रमुः क्रमितवन्तः । रुचे दीप्त्यर्थम् । जनन्त जनयन्ति सूर्यम् ॥

असितः । प्रत्नासः पुराणाः । आयवः गन्तारः सोमाः । अनु आनुपूर्वम् । नवीयः नवतरं पदम् । अक्रमुः आक्रामन्ति निदधति कलशे च । रुचे दीप्त्यै । जनन्त जनयन्ति सूर्यम् ॥ (६)

अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत् । सीदन् योनौ वनेष्वा ॥

विनियोगोऽस्य पञ्चमेऽहनि । अर्ष क्षर सोम द्युमत्तमः । अभि द्रोणानि कलशादीनि अभियास्यसि । रोरुवत् शब्दं कुर्वन् । सीदन् योनौ स्थाने । वनेषु आ उदकेषु अधि ॥

भृगुः । द्रोणानि द्रोणकलशं अभि । अर्ष क्षर । हे सोम द्युमत्तमः दीप्ततमः त्वम् । रोरुवत् शब्दायमानः । आसीदन् योनौ स्थाने कलशे । वनेषु वृक्षेषु ॥ (७)

वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः । वृषा धर्माणि दध्रिषे ॥

वृषा सेक्ता । सोम । द्युमान् द्युतिमान् । असि भवसि । वृषा सेक्ता देव वृषव्रतः सेक्तृकर्मन् । वृषा सेक्ता । धर्माणि धारणानि । दध्रिषे धारयसि ॥

काश्यपः द्वयोः । वृषा असि त्वं हे सोम । द्युमान् दीप्तिमान् । वृषासि हे देव । वृषव्रतः वृषकर्मा । वृषा त्वं धर्माणि धारकाणि कर्माणि । दध्रिषे विदधिषे विधत्से ॥ (८)

इषे पवस्व धारया मृज्यमानो मनीषिभिः । इन्दो रुचाभि गा इहि ॥

विनियोगोऽस्य तृतीयेऽहनि । इषे अन्नार्थम् । पवस्व धारया मृज्यमानः शोध्यमानः । मनीषिभिः मनसा एषणशीलैः । इन्दो रुचा दीप्त्या । अभि गा आ इहि आगच्छ ॥

इषे अन्नार्थम् । अस्मभ्यं पवस्व धारया । मृज्यमानः पीड्यमानः । मनीषिभिः ऋत्विग्भिः । हे इन्दो रुचा रोचमानया धारया । अभीहि अभिगच्छ । गाः गोचर्माणि ॥ (९)

मन्द्रया सोम धारया वृषा पवस्व देवयुः । अव्या वारेभिरस्मयुः ॥

मन्द्रया मदनीयया । सोम धारया । वृषा सेक्ता । पवस्व देवयुः देवान् कामयते । अव्या वारेभिः अव्यैः वालैः पवस्व । अस्मयुः अस्मानपि कामयते ॥

असितः । मन्द्रया मादयित्र्या धारया । पवस्व हे सोम वृषा त्वम् । देवयुः देवकामः । अव्या मेष्या । वारेभिः वारैः दशापवित्रगतैः । अस्मयुः अस्मत्कामश्च सन् ॥ (१०)

अया सोम सुकृत्यया महान्त्सन्नभ्यवर्धथाः । मन्दान इद्वृषायसे ॥

अया अनया । सोम सुकृत्यया शोभना कृतिः करणम् । तया । महान् सन् अभ्यवर्धथाः । मन्दान इत् एव वृषायसे सेक्तायसे ॥

कविः भार्गवः । अया अनया । सुकृत्यया शोभनेन कर्मणा अभिषवणादिना होमान्तेन । हे सोम महान् सन् महतो देवान् । अभ्यवर्धथाः अभिवर्तसे । मन्दानः मादयन् देवान् । वृषायसे वृषवदाचरसि । वर्षसीत्यर्थः । इत एव ॥ (११)

अयं विचर्षणिर्हितः पवमानः स चेतति । हिन्वान आप्यं बृहत् ॥

अयं सोमः । विचर्षणिः सर्वं पश्यति । हितः निहितः । पवमानः पूयमानः । स चेतति जानाति सम्यक् नयति वा । हिन्वानः गमयन् । आप्यं अप्सु भवम् । बृहत् महत् ॥

जमदग्निः । अयं स पवमानः । विचर्षणिः विद्रष्टा । हितः प्रहितः ऋत्विग्भिः । चेतति ज्ञायते । हिन्वानः प्रेरयन् । आप्यं आप्तव्यम् । बृहत् ब्रह्मान्नं वा ॥ (१२)

प्र न इन्दो महे तुन ऊर्मिं न बिभ्रदर्षसि । अभि देवाँ अयास्यः ॥

प्र न इन्दो महे महते । तुने ऊर्मिं न बिभ्रत् धारयत् । अर्षसि क्षरसि । अभि देवान् देवान् लक्षयित्वा । अयास्यः ऋषिराह ॥

अयास्य आङ्गिरसः । प्रार्षसि हे इन्दो । नः अस्माकम् । महे महते । तुने धनाय । तने इति बह्वृचाः । तना इति च धननामसु पठितम् । ऊर्मिं रसं बिभ्रत् । नेति संप्रत्यर्थे । देवानभि तान् प्रीणयितुम् । अयास्यः गमनशील इति वा गन्तव्य उपगन्तव्यः इति वा ॥ (१३)

अपघ्नन् पवते मृधोऽप सोमो अराव्णः । गच्छन्निन्द्रस्य निष्कृतम् ॥

विनियोगोस्याष्टमेऽहनि । अपघ्नन् मृधः सङ्ग्रामं पाप्मनो वा । सोमः अराव्णः अभिशस्तारः । तान् सोम अपजहि । गच्छन् इन्द्रस्य निष्कृतं सम्यक् संस्कृतं स्थानम् । समवायन् पूतमेवैनं यज्ञीय इन्द्रस्य निःकृतं गमयति ॥

अमहीयुः । मृधः हिंसकान् शत्रून् । अपघ्नन् पवते सोमः । अपघ्नन् अराव्णः अदातृंश्च पवते । गच्छन्निन्द्रस्य निष्कृतं संस्कृतं द्रोणकलशम् ॥ (१४)

इति षष्ठे द्वितीया दशती ।

इत उत्तरं बृहत्यः ।

पुनानः सोम धारयापो वसानो अर्षसि ।
आ रत्नधा योनिमृतस्य सीदस्युत्सो देवो हिरण्ययः ॥

विनियोगोऽस्य ज्योतिष्टोमे । पुनानः सोम धारया अपः वसानः उदकानि आच्छादयमानः । अर्षसि क्षरसि । रत्नधाः रत्नं धारयन् । योनौ स्थाने । ऋतस्य यज्ञस्य । आसीदसि । उत्सः कूपः । देवः हिरण्ययः अमृतमयः ॥

पुनानः सोमेति या द्वादशर्चः सप्तर्षयो बृहतीस्ता अपश्यन् ।
भरद्वाजः काश्यपो गौतमोऽत्रिर्विश्वामित्रो जमदग्निर्वसिष्ठः ॥

पुनानः पूयमानः त्वं हे सोम । धारया अर्षसि क्षरसि । अपः वसतीवरीः । वसानः आच्छादयन् । आसीदसि ऋतस्य यज्ञस्य । योनिं कलशम् । रत्नधाः रत्नप्रदः । उत्सः उत्सारयिता रसस्य । देवो दीप्तः । हिरण्ययः हितरमणीयः ॥ (१)

परितो षिञ्चता सुतं सोमो य उत्तमं हविः ।
दधन्वाँ यो नर्यो अप्स्वन्तरा सुषाव सोममद्रिभिः ॥

विनियोगोऽस्य नवमेऽहनि । हे स्तोतारः परिषिञ्चत सुतम् । सोमः
यः उत्तमं हविः दधन्वान् दधाति । योऽसौ दधन्वान् । यः नर्यः नृभ्यो
हितः । अप्सु अन्तः मध्ये । आसुषाव सोमम् । अद्रिभिः ग्रावभिः ॥

परिषिञ्चत इतः इह पवित्रे । सुतं सोमम् । सोमो य उत्तमं हविः उत्तमं
उत्कृष्टतमं हविः भवति । दधन्वान् धारयिता विश्वस्य । नर्यो नरेभ्यः यजमानेभ्यः
हितः । अप्सु वसतीवरीषु । अन्तः मध्ये । आ आविष्टः । यः सुषाव सोमं
अद्रिभिः ग्रावभिः अध्वर्युभिः ॥ (२)

आ सोम स्वानो अद्रिभिः तिरो वाराण्यव्यया ।
जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दध्रिषे ॥

विनियोगोऽस्य तृतीयेऽहनि । स्वानः आभिमुख्येन अभिषूयमाणः
सोमः । तिरः अधः । वाराणि अव्यया अविमयानि वालानि । जनो
न । नशब्द उपमार्थीयः । परि उपरि । चम्वोः अधिषवणफलकयोः
आनडुहचर्मणोः । विशत् प्रविशत् । हरिः हरितवर्णः । सदः यज्ञसदः ।
वनेषु उदकेषु । दध्रिषे ददाति ॥

अत्र तृतीयः पादः परोक्षकृतः । इतरत् प्रत्यक्षकृतम् । आपवसे त्वं हे
सोम । स्वानः सुतः अद्रिभिः । तिरः तिरस्कुर्वन् । वाराणि अव्यया अव्ययानि
अविमयानि । जनो न जन इव । पुरि नगर्याम् । चम्वोः अधिषवणफलकयोः ।
तदुपरि स्थिते कलशे । विशत् विशति । हरिः सोमः । हे सोम सदः स्थानम ।
वनेषु वार्क्षेषु । दध्रिषे विधत्से त्वम् ॥ (३)

प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा ।
अंशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतम् ॥

विनियोगोऽस्य प्रथमेऽहनि । देववीतये देवतर्पणाय । सिन्धुर्न । न-शब्द उपमार्थीयः । सिन्धुरिव । प्रपिप्ये प्रवर्धते पूर्यते वा । अर्णसा उदकेन । अंशोः पयसा रसेन । मदिरो मदनीयः । न सम्प्रति । जागृविः जागरणशीलः अप्रमत्तः । अच्छ आप्तुम् । कोशं द्रोणकलशम् । मधुश्चुतं मधुस्राविणं रसतां गतम् ॥

प्रपिप्ये प्रप्याय्यसे हे सोम । अंशोः अंशेन सुखकरस्य तव । पयसा रसेन । देववीतये यज्ञार्थम् । सिन्धुर्न सिन्धुरिव । अर्णसा उदकेन । मदिरः त्वम् । न सम्प्रति । जागृविः प्रबुद्धः । अच्छ अभिगच्छसि । कोशं स्थानं द्रोणकलशम् । मधुश्चुतं मदस्य क्षरणम् ॥ (४)

सोम उ ष्वाणः सोतृभिरधिष्णुभिरवीनाम् ।
अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥

विनियोगोऽस्य पञ्चमेऽहनि । स्वानः सूयमानः सोतृभिः । अधि उपरि । स्नुभिः अभिषोतृभिः । अवीनां वालानाम् । अश्वया इव अश्वया यथा गन्ता शीघ्रं गच्छति तद्वच्छीघ्रगामिन्या । हरिता हरितवर्णया । धारया मन्द्रया बहलया । याति धारया ॥

सोमः स्वानः सुतः । सोतृभिः अध्वर्युभिः । उ अधि इतीमौ पादपूरणौ । अवीनां सम्बन्धिभिः । स्नुभिः सानुभिः उच्छ्रितप्रदेशैः पवित्रैः । पूयमान इति शेषः । अश्वयेव वेगवत्या इव । हरिता हरितवर्णया । धारया याति मन्द्रया मादयित्र्या । याति धारया इति पुनरुक्तिरादरार्था ॥ (५)

तवाहं सोम रारण सख्य इन्दो दिवे दिवे ।
पुरूणि बभ्रो निचरन्ति मामव परिधीँ रति ताँ इहि ॥

विनियोगोऽस्य चतुर्थेऽहनि । सोम रारण रमयामि । अथवा रणतिः स्तुतिकर्मा । तव स्तुतिं करोमि । सख्ये सखित्वे । हे इन्दो दिवे दिवे अहन्यहनि । पुरूणि बहूनि । बभ्रो बभ्रुवर्ण । निचरन्ति अभिचरन्ति दुष्कृतानि बहूनि । अथवा बहूनि यजमानकुले निचरन्ति । मामव पालय तेभ्यः परिधीन् अति । तान् इहि ये अन्ये यजमानाः परिचरन्ति तेभ्यः परिधींस्तरणं अतीत्य आ इहि मदीयं यज्ञमायाहि । अथवा दुष्कृतानि ये कुर्वन्ति अतीत्यैतेषां परिधीनायाहि ॥

तव सख्ये अहं रारण रमये । हे इन्दो दिवे दिवे प्रतिदिनं अहर्गणेषु । पुरूणि बहूनि रक्षांसि । मां अवनिचरन्ति हे बभ्रो भर्तः विश्वस्य । तान् परिधीन् परितो निहितान् । अति अतिक्रम्य । इहि आगच्छ । परिधिशब्दस्य पुंलिङ्गत्वात् तानिति पुंलिङ्गता ॥ (६)

मृज्यमानः सुहस्त्य समुद्रे वाचमिन्वसि ।
रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ॥

विनियोगोऽस्य षष्ठेऽहनि । मृज्यमानः शोध्यमानः । सुहस्त्य सुहस्त शोभनहस्त । समुद्रे अन्तरिक्षे । वाचमिन्वसि व्याप्नोषि । अथवा समुद्रे द्रोणकलशे । रयिं धनम् । पिशङ्गं पिशङ्गवर्णं सुवर्णम् । बहुलं प्रभूतम् । पुरुस्पृहं बहुभिः स्पृहणीयम् । पवमान शोध्यमान । अभि अर्षसि क्षरसि ॥

मृज्यमानः पूयमानः त्वम् । हे सुहस्त्य शोभनहस्तानां योग्य । समुद्रे अन्तरिक्षे पवित्रादधोभागे । वाचं शब्दम् । इन्वसि प्रेरयसि । स त्वं अस्मभ्यं रयिं धनम् । पिशङ्गं नानारूपं हिरण्यरजतादिभिः । बहुलं प्रभूतम् । पुरुस्पृहं बहुभिः स्पृहणीयम् । अभि उद्दिश्य । अर्षसि क्षर हे पवमान ॥ (७)

अभि सोमास आयवः पवन्ते मद्यं मदम् ।
समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः ॥

विनियोगोऽस्य तृतीयेऽहनि । सोमासः आयवः मनुष्याः । अभि पवन्ते मद्यं मदनीयं मदम् । समुद्रस्य अन्तरिक्षस्य । अथवा समुद्रस्य द्रोणकलशस्य । अधि उपरि विष्टपे स्थाने । मनीषिणः मत्सरासः मदच्युतः मदस्राविणः ॥

सोमासः सोमाः । आयवः गमनशीलाः । अभिपवन्ते अभिक्षरन्ति । मद्यं स्तुत्यम् । मदमभि देवानां मदार्थं इत्यर्थः । समुद्रस्य अन्तरिक्षस्य । अधि विष्टपे उच्छ्रिते देशे । सिक्ताः इति शेषः । मनीषिणः मनस ईशितारः । मत्सरासः मदकराः । मदच्युतः शत्रूणां मदस्य च्यावयितारः ॥ (८)

पुनानः सोम जागृविरव्या वारैः परि प्रियः ।
त्वं विप्रो अभवोऽङ्गिरस्तम मध्वा यज्ञं मिमिक्ष णः ॥

पुनानः सोमः जागृविः जागरणं कुरु । अव्या अवेः वारैः । परि सर्वतः । प्रियः प्रियतरः भूतानाम् । त्वं विप्रः मेधावी । अभवः भवसि । अङ्गिरस्तम । मध्वा मधुना रसेन यज्ञमस्मदीयम् । मिमिक्ष सिञ्च नः । अथवा मिश्रं कुरु ॥

पुनानः त्वं हे सोम जागृविः प्रबुद्धः । अव्याः मेष्याः वारैः । पवित्रे परि परिषिच्यसे । प्रियः देवानाम् । त्वं विप्रः प्राज्ञः । अभवः भवसि । हे अङ्गिरस्तम गन्तृतम । अङ्गेः गतिकर्मणः अङ्गिराः । स त्वं मध्वा रसेन । यज्ञं नः अस्मदीयम् । मिमिक्ष सिञ्च । अथवा यजमानं वृष्ट्युदकेन सिञ्च ॥ (९)

इन्द्राय पवते मदः सोमो मरुत्वते सुतः ।
सहस्रधारो अत्यव्यमर्षति तमीं मृजन्त्यायवः ॥

सुतः सोमः । मदः मदकरः । इन्द्राय मरुत्वते पवते । सहस्रधारः बहुधारः । अव्यं पवित्रम् । अति अतीत्य अर्षति । तं ई एनम् । मृजन्ति पुनन्ति । आयवः मनुष्याः ॥ (१०)

पवस्व वाजसातमोऽभि विश्वानि वार्या ।
त्वं समुद्रः प्रथमे विधर्मन् देवेभ्यः सोम मत्सरः ॥

पवस्व वाजसातम अभि विश्वानि सर्वाणि । वार्या वरणीयानि उदकानि । त्वं समुद्रः समुद्रस्थानीयः । प्रथमे अग्र्ये । विधर्मन् विधर्मणि विविधकर्मधारणे । देवेभ्यः सोम मत्सरः । मदेस्तृप्तिकर्मणः । मदनीयः ॥

पवस्व वाजसातमः अन्नप्रदतमः । अभि उद्दिश्य । विश्वानि वार्या वरणीयानि धनानि । त्वं समुद्रः समुन्दनः वर्षिता । प्रथमे मुख्ये श्रेष्ठे । विधर्मन् विधारके यज्ञे । देवेभ्यः पवस्व हे सोम मत्सरः त्वम् ॥ (११)

पवमाना असृक्षत पवित्रमति धारया ।
मरुत्वन्तो मत्सरा इन्द्रिया हया मेधामभि प्रयांसि च ॥

पवमानाः असृक्षत क्षरन्ति पवित्रमतीत्य धारया । मरुत्वन्तः मरुद्भिः तद्वन्तः सोमाः । मत्सराः मदनीयाः । इन्द्रियाः इन्द्रियवन्तः । मेधां प्रज्ञाम् । अभि प्रयांसि गच्छ ॥

पवमानाः सोमाः । असृक्षत सृष्टाः उद्युक्ता गच्छन्ति । धारया पवित्रं अति अतीत्य । मरुत्वन्तः स्तोतृमन्तः । महत् रुवन्तीति मरुतः स्तोतारः ।

मत्सराः इन्द्रियाः इन्द्रियस्य हेतवः । हयाः गन्तारः । हि गतौ । मेधां प्रज्ञाम् । प्रयांसि अन्नानि च । अभि उभयं यजमानेभ्यः कर्तुम् ॥ (१२)

इति षष्ठे तृतीया दशती ।

इत उत्तरं त्रिष्टुभः ।

प्र तु द्रव परि कोशं निषीदन् नृभिः पुनानो अभि वाजमर्ष ।
अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्हीं रशनाभिर्नयन्ति ॥

विनियोगोऽस्य ज्योतिष्टोमे । प्रद्रव रसेन । परि सर्वतः । कोशं द्रोणकलशं निषीदन् । नृभिः मनुष्यैः । पुनानः पूयमानः । अभ्यर्ष क्षर । वाजं अन्नं तव । अश्वं न त्वा अश्वमिव त्वाम् । वाजिनमन्नवन्तम् । मर्जयन्तः शोधयन्तः । अच्छ आप्तुम् । बर्हिः प्रवृद्धम् । रशनाभिः नयन्ति प्रापयन्ति । यूपनियोजनी रशना ॥

त्रिष्टुभो विंशतिर्द्वे च प्र तु द्रव परीत्यृचः ।
ऋषींस्तु विप्रकीर्णत्वात् तत्र तत्राभिदध्महे ॥

उशनाः । प्र तु द्रव प्रक्षरतु क्षिप्रम् । कोशं कलशम् । परि उपरि निषीद । नृभिः अध्वर्युभिः । पुनानः पूयमानः । वाजं अन्नम् । अभि उद्दिश्य । यजमानस्य अर्ष गच्छ । अश्वं न अश्वमिव । वाजिनं वेगवन्तम् । त्वा त्वाम् । मर्जयन्तः शोधयन्तः । बर्हिः यज्ञम् । अच्छ अभि नयन्ति नराः । रशनाभिः अङ्गुलीभिः ॥ (१)

प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ॥

विनियोगोऽस्य सप्तमेऽहनि। काव्यं उशना इव प्रब्रुवाणः। देवः सोमः देवानां जनिमा जनिमानि जननानि कर्माणि वा विवक्ति। महिव्रतः महतः कर्मणः अन्नस्य वा धारयिता। शुचिबन्धुः शोभनबन्धुः शुद्धबुन्धुर्वा। पावकः शोधयिता। पदा वराहः सोमः। अभ्येति रेभन् स्तुवन्॥

वृषगणः वासिष्ठः। प्रविवक्ति प्रगैति। देवः सोमः। देवानां जनिमा जन्मानि। शेश्छन्दसि (पा. ६. १. ७०) इति लुक्। जनान् समूहान् अभि। काव्यं स्तोत्रं ब्रुवाणः ऋषिः। उशनेव महिव्रतः महाकर्मा। शुचिबन्धुः दीप्तस्तोत्रकः। पावकः सोमः। पदा पदं स्थानं कलशम्। अभ्येति रेभन् शब्दायमानः। वराहः वराणां धनानां आगमयिता सोमः॥ (२)

तिस्रो वाच ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषाम्।
गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः॥

विनियोगोऽस्य तृतीयेऽहनि। तिस्रो वाचः ऋग्यजुःसामानि। ईरयति प्रेरयति। वह्निः वोढा सोमः। ऋतस्य धीतिं कर्म। ब्रह्मणो मनीषां मन्त्राणि वेदोक्तानि प्रेरयन्ति। गावः यन्ति गोपतिं यजमानम्। दक्षिणासम्बन्धेन पृच्छमाना इव वृषभं वा। सोमं यन्ति मतयः बुद्धयः। वावशानाः कामयमानाः। यद्यपि पावमानीषु सोमं मुक्त्वा अन्या देवता न संभवति तथाप्यष्टादशे व्याख्यातेति कृत्वा तेनापि आत्मनानुस्मरणार्थमालिख्यते। तिस्रो वाचः। ऋग्यजुःसामानि। अथवा तिस्रो वाचः सत्वरजस्तमांसि। अथवा जाग्रत्स्वप्नसुषुप्तिवृत्तयः। ईरयति प्रेरयति। उदकं रश्मींश्च वहतीति वह्निरादित्यः। ऋतस्य आदित्यस्य धीतिम्। अथवा ऋतस्य सत्यब्रह्मणः। अथवा ऋतस्यान्नस्य धीतिं यज्ञस्य वा आदित्यस्य वा। हया इव

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते इति । ब्रह्मणो मनीषां गावः रश्मयः तेन विसृष्टाः । अथवा उदकानि । एतमेव गोपतिं रश्मिस्वामिनं वा । पृच्छन्त इव सोमं यन्ति । पृथिवीं वावशानाः आदित्यं यन्ति प्रविशन्ति । अध्यात्मं वा । वह्निरात्मा भवति वश्यादिगुणसंयोगात् । सः तिस्रो वाचः प्रेरयति विद्याबुद्धिमनांसि । विद्या महान् । बुद्धिरहङ्कारो मन इति प्राधान्याद्भूतेन्द्रियाणि । ऋतस्यात्मनः । धीतिम् । मनसः इष्टानि कर्माणि प्रेरयन्ति । ब्रह्मणः आत्मनः । गावः यन्ति आत्मानं इन्द्रियाणां स्वामिनं पृच्छमानाः आत्मानम् । तदभिप्रायेण शब्दाद्यनुगमनात् । एत-मेवमात्मानं सोमं कामयमाना इव यन्ति मतयः तदर्थं प्रादुर्भवन्ति ॥

पराशरः । तिस्रः त्रिविधाः मन्द्रमध्यमोत्तमाः । वाचः प्रेरयन्ति । वह्निः वोढा यज्ञस्य । ऋतस्य यज्ञस्य । धीतिं विधानं अनुष्ठानं च प्रेरयन्ति । सोमे अभिषुते कर्माणि प्रवर्त्यन्ते । ब्रह्मणः ब्राह्मणानाम् । मनीषां स्तुतिं च प्रेरयन्ति । सामान्यवाची ब्रह्मशब्दः नपुंसकलिङ्गः । गावः यन्ति अभि-गच्छन्ति । गोपतिं सोमम् । पृच्छमानाः अन्विच्छन्त्यः । सोमं यन्ति मतयः स्तुतयः । वावशानाः कामयमानाः ॥ (३)

अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम् ।
सुतः पवित्रं पर्येति रेभन् मितेव सद्म पशुमन्ति होता ॥

विनियोगोऽस्याभिप्लवे । प्रेषा प्रकर्षेच्छया । हेमना सुवर्णेन । पूय-मानः देवः समपृक्त रसम् । देवेभ्यः सुतः अभिषुतः । पवित्रं पूतम् । पर्येति रेभन् आविशति । मितेव सद्म उदकानि । पशुमन्ति होता । अथवा अस्य सोमस्य । प्रेषा प्रकर्षेण इच्छया । हेम्ना सुवर्णेन । पूय-मानः क्षाल्यमानः । देवः सोमः देवेभ्यो वस्वादिभ्यः । संपृच्यते निष्पाद-

यति रसम्। सुतः अभिषुतः दशापवित्रं परि समन्तात्। एति रेभन् सोमः। मिता इव सद्म। मिता कर्ता। सद्म आत्मीयानि गृहाणि। पशुमन्ति होता देवानामाह्वाता ॥

वसिष्ठः। अस्य आत्मनः। प्रेषा प्रेरयित्रा। हेमना गन्त्रा अध्वर्युणा। पूयमानः देवः सोमः देवेभिः देवैः। समपृक्त रसं योजयति रसं स्वम्। सुतश्च अयं पवित्रं परि वर्जयित्वा अतिक्रम्य। एति कलशम्। रेभन् रुवन। मितेव मितानीव। सद्म सद्मानि यज्ञगृहान्। पशुमन्ति नियुक्तपशुकानि। होता यथा अध्रिगुः प्रेषादीन् वदति यज्ञगृहे स्थितः तद्वत् शब्दायते ॥ (४)

सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः।
जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥

विनियोगोऽस्य चतुर्थेऽहनि। सोमः पवते। अधियज्ञपक्षे पर्णसोमस्य पृथिव्यादीनां जनयितृत्वेन सम्भवात् यज्ञद्वारेण स्थितिहेतुत्वात् जनयतीति जनिता। मतीनां जनयिता। दिवः जनयिता। अग्नेर्जनयिता। सूर्यस्य जनयिता। इन्द्रस्य जनयिता। उत अपि च विष्णोर्व्याप्तिमत इति। जनयिता पृथिव्यादिभ्यः रसेन वर्धयिता। अधिदेवेन इन्द्रः सोमः यदात्मनि तदायमर्थः। सर्वमिदं भवति। आत्मा सोमः पवते साधयति। भोक्तृत्वादात्मा सत्कारणं वा प्रधानभूतेन्द्रियाणां जनिता पृथिव्यादीनां च। द्वयोर्ग्रहणेऽन्तरिक्षस्यापि। अग्न्यादीनां चतुःस्थानानां तिसृणां विष्णोश्च व्याप्तिमतः ॥

प्रतर्दनः। सोमः पवते। जनिता जनयिता वर्धयिता। मतीनां स्तोतृणाम्। जनिता दिवः द्युलोकस्य। जनिता पृथिव्याश्च। हवीरूपेण दिवः

वृष्टिरूपेण पृथिव्या इति । जनिता अग्नेः । जनिता सूर्यस्य । जनिता इन्द्रस्य । उत अपि च । विष्णोः जनिता । सोमेन हि देवा आप्याय्यन्ते ॥ (५)

अभि त्रिपृष्ठं वृषणं वयोधामङ्गोषिणमवावशन्त वाणीः ।
वना वसानो वरुणो न सिन्धुर्वि रत्नधा दयते वार्याणि ॥

विनियोगोऽस्याभिप्लवे । त्रयाणां पृष्ठानि सवनानि लोकः देवा वेदा वा । वृषणं सेक्तारम् । वयोधां अन्नानां दातारं यशसां वा । अङ्गोषिणं मतिसमूहम् । अभिवावशन्त अभिकामयन्त । वाणीः वाचः । वना वसानः उदकानि आच्छादयमानः । वरुणः सोमः । न सिन्धुः समुद्र इव । वि रत्नधा विविधानां रत्नानां धाता दाता स्थापिता वा । दयते वार्याणि वरणीयानि धनानि ॥

वसिष्ठः । अभि अवावशन्त अभिकामयन्ते । त्रिपृष्ठं त्रिस्थानं सवनानि त्रीणि द्रोणकलशपूतभृदाहवनीयाख्यानि वा स्थानानि । वृषणं वर्षितारम् । वयोधां वयसः अन्नस्य दातारं सोमम् । अङ्गोषिणं आघोषिणम् । वाणीः वाण्यः स्तुतयः । वना वनानि उदकानि वसानः । वरुणो न वरुण इव । सिन्धुः स्यन्दनात् । स्यन्दयिता । विदयते प्रयच्छति । वार्याणि वरणीयानि । रत्नधाः रत्नप्रदः सोमः ॥ (६)

अक्रान्त्समुद्रः प्रथमे विधर्मन् जनयन् प्रजा भुवनस्य गोपाः ।
वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे स्वानो अद्रिः ॥

विनियोगोऽस्य नवमेऽहनि । अक्रान् क्रान्तवान् समुद्रः । प्रथमे परमे उत्कृष्टे । विधर्मणि धारणे । जनयन् प्रजाः । प्रजायन्ते इति प्रजा देवाद्याः । भुवनस्य गोपाः भूतानां रक्षिता । वृषा सेक्ता । पवित्रे वालमये ।

अधि उपरि। सानौ समुच्छ्रिते। अव्ये अविमये। बृहत्सोमः वावृधे वर्धते। स्वानः अद्रिः आदरणः वज्रः। अक्रान् समुद्रः सामर्थ्यात् अत्यक्रमीत्। अतीत्य गच्छत्युदयादस्तं सदा समुद्रः आदित्यः। प्रथमे प्रकृष्टे व्योमन् सामर्थ्यादन्तरिक्षे। प्रजा जनयन् वर्षकर्मणा। भुवनस्य त्रैलोक्यस्य। गोपा रक्षिता। वृषा वर्षणशीलः। पवित्रे व्याप्तिमये। अधि सानौ अधिषिच्यमानः सोम्यैः। वावृधे वर्धते। बृहदिति सोमविशेषणम्। स्वानः सुतः। अद्रिरादित्यः आदरणः। अत्यक्रमीत् अधिष्ठितवान्। समुद्रः आत्मा। अभिद्रवन्ते तं भूतानि परमेभ्यः धने। भूतेन्द्रियमिश्रं शरीरे जनयन्। ज्ञानकर्मणा बोध्यमुत्पादयन्। प्रज्ञा वर्धयन्। भुवनस्य गोप्ता प्रकाशरूपत्वात्। वृषा पवित्रे सत्यमये। आत्मा वर्षिता भवति। शरीररूपेण पवित्रे ज्ञानमये। अवतेर्गत्यर्थस्य। गत्यर्थाश्च बुद्ध्यर्थाः। अधि सानौ सम्बध्यमानशब्दादिषु। महद्वावृधे सुष्ठु वर्धते। पवित्रे अद्रिः आदरणः॥

पराशरः। अक्रान् क्रन्दति। समुद्रः समुन्दनः सोमः। प्रथमे श्रेष्ठे यज्ञे। विधर्मन् विधारके। जनयन् प्रजाः सर्वाः। भुवनस्य गोपाः रक्षकः। वृषा वर्षिता। सानौ उच्छ्रिते। अव्ये अविमये पवित्रे अधि परिषिक्तः सन्। बृहत् अत्यर्थम्। वावृधे सोमः। स्वानः सुतः। अद्रिः आदारयिता असुररक्षसाम्॥ (७)

कनिक्रदन्ति हरिरा सृज्यमानः सीदन् वनस्य जठरे पुनानः।
नृभिर्यतः कृणुते निर्णिजं गामतो मतिं जनयन्त स्वधाभिः॥

कनिक्रदन्ति। क्रन्दिः शब्दे। एकवचनम्। शब्दं करोति। हरिः हरितवर्णः। सृज्यमानः संसूयमानः। आसीदन् वनस्य उदकस्य। जठरे

उदरे द्रोणकलशस्य । पुनानः पूयमानः । नृभिर्यतः मनुष्यैः संयमितः । कृणुते कारयति । निर्णिजं रूपम् । गां गवां रश्मीनां उदकानां वा । अतः मतिं प्रज्ञां जनयन्त स्वधाभिरन्नैस्तर्पित्वा ॥

प्रस्कण्वः । कनिक्रदन्ति भृशं शब्दायते । क्रन्दतेः चर्करीते रूपं इदम् । हरिः सोमः । सृज्यमानः पवित्रे आसीदन् । वनस्य वार्क्षस्य जठरे । पुनानः पूयमानः । नृभिः ऋत्विग्भिः । यतः गृहीतः । गां गव्यं आशिरम् । निर्णिजं रूपं कृणुते । अतः एतस्माद्धेतोः । मतिं स्तुतिं जनयन्त सोमाय हे जनाः । स्वधाभिः बलैः ॥ (८)

एष स्य ते मधुमाँ इन्द्र सोमो वृषा वृष्णः परि पवित्रे अक्षाः ।
सहस्रदाः शतदा भूरिदावा शश्वत्तम बर्हिरा वाज्यस्थात् ॥

एष स्य ते तव । मधुमान् स्वादुमान् । इन्द्रः सोमः वृषा सेक्ता । वृष्णः सेक्तुस्तव । परि सर्वतः । पवित्रे अक्षाः क्षरितवान् । किंविशिष्टः । सहस्रदाः शतदा अनेकदाता । भूरिदावा बहु प्रभूतं ददाति । शश्वत्तम नित्य । बर्हिः वाजी अन्नवान् । आ अस्थात् स्थितवान् ॥

उशनाः । एष स्य सः । मधुमान् रसवान् सोमः । हे इन्द्र ते तुभ्यम् । वृष्णः वर्षित्रे । चतुर्थ्यर्थे षष्ठी । पवित्रे परि परितः । अक्षाः इति क्षरतेः लङर्थे लुङि रूपम् । क्षरति । वृषा सोमः । सहस्रदाः शतदाः । किं बहुना भूरिदावा प्रभूतप्रदः । शश्वत्तमं पुराणतमम् । बर्हिः यज्ञम् । आ जस्थात् अधितिष्ठति । वाजी बलवान् ॥ (९)

पवस्व सोम मधुमाँ ऋतावापो वसानो अधि सानो अव्ये ।
अव द्रोणानि घृतवन्ति रोह मदिन्तमो मत्सर इन्द्रपानः ॥

पवस्व सोम मधुमान् स्वादुमान् । ऋतावा सत्यवान् । अपः वसानः आच्छादयमानः । अधि सानौ समुच्छ्रिते । अव्ये अविमये । द्रोणानि द्रोणकलशादीनि । घृतवन्ति उदकवन्ति अवरोह । मदिन्तमः अतिशयेन मदनीयः । मत्सरः सोमः । इन्द्रपानः इन्द्रेण पातव्यः ॥

प्रतर्दनः । पवस्व हे सोम मधुमान् मधुरः । ऋतवा यज्ञवान् यज्ञहेतुः । अपो वसानः अव्ये सानौ उपरि सक्तः । अवसीद द्रोणानि कलशं इत्यर्थः । घृतवन्ति दीप्तिमन्ति । मदिन्तमः मदयिता अतिशयेन । मत्सरः हर्षकरः । इन्द्रपानः इन्द्रेण पातव्यः ॥ (१०)

इति षष्ठे चतुर्थी दशती ।

प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना ।
भद्रान् कृण्वन्निन्द्रहवान्त्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ॥

प्र सेनानीः । सेनां नयति इति सेनानीः । शूरः विक्रान्तः । अग्रे रथानां ये देवरथाः । गव्यन् इच्छन् धनं पृथिव्यां भवम् । प्रैति प्रयाति । हर्षते अस्य सेना । भद्रान् भन्दनीयानि । कृण्वन् कुर्वन् । इन्द्रहवान् इन्द्राह्वानानि । सखिभ्यः ऋत्विग्भ्यः । एवंगुणविशिष्टः सोमः वस्त्राणि रभसानि पतन्ति । आदत्ते परसैन्येभ्यः । अथवा सेनानीः स्कन्दः । शूरः विक्रान्तः । अग्रे पुरतः देवरथानाम् । गव्यन् इच्छन् पृथिव्यां भवं धनम् । एति गृह्णाति ददाति सैन्येभ्यः । सोम इव रश्मीन् वस्त्राणि सैन्येभ्यो ददाति ॥

प्रतर्दनः । प्रैति गच्छति । सेनानीः सेनानां नेता सन् । शूरः सोमः यजमानार्थं युध्यन् । अग्रे प्रमुखे रथानाम् । गव्यन् गा इच्छन् शत्रूणाम् ।

हर्षते हृष्यति। अस्य सेना यां असौ नयति सा। सः सोमः यज्ञेषु भद्रान् कल्याणान्। इन्द्रहवान् इन्द्रस्य आह्वानानि। कृण्वन् कुर्वन्। सखिभ्यः यजमानेभ्यः। आहूतो हि इन्द्रः सोमं पीत्वा कामान् प्रयच्छति। आदत्ते सोमः वस्त्रा वस्त्रस्थानीयानि वयांसि। रभसानि वेगकराणि इन्द्रस्य॥ (१)

प्र ते धारा मधुमतीरसृग्रन् वारं यत् पूतो अत्येष्यव्यम्।
पवमान पवसे धाम गोनां जनयन्त्सूर्यमपिन्वो अर्कैः॥

प्र ते धाराः। मधुमतीः रसवतीः असृग्रन्। अव्यं वालं क्षरसि। पवमान पूयमान। पवसे क्षरसे। धाम गोनां गवां रश्मीनामुदकानां वा। जनयन् उत्पादयन्। कम्। सूर्यम्। अपिन्वः अतर्पयः। अर्कैरन्नैर्मन्त्रैर्वा॥

पराशरः। प्रासृग्रन् प्रसृज्यते। ते तव। धाराः मधुमतीः मधुराः। अव्यं अविमयम्। वारं पवित्रम्। यत् यदा। पूतः त्वं अत्येषि अतीत्य गच्छसि। हे पवमान त्वं पवसे। धाम। धीयते पीयते इति धाम पयः। गोनां गवां पयः अभिकामयमानः पवसे। जनयन् सूर्यं अपिन्वः पूरयसि। अर्कैः स्तोत्रैः॥ (२)

प्र गायताभ्यर्चाम देवान्त्सोमं हिनोत महते धनाय।
स्वादुः पवतामतिवारमव्यमा सीदतु कलशं देव इन्दुः॥

प्र गायत अभ्यर्चामः देवान् स्तोत्रैरन्नैश्च। सोमं हिनोत गमयत। महते धनाय। स्वादुः स्वादुमान्। पवतामतीत्य वारम्। अव्यं अविमयम्। आसीदतु कलशं द्रोणकलशम्। देवः इन्दुः सोमः॥

इन्द्रप्रमितिः वासिष्ठः। प्रगायत सोमम्। अभ्यर्चाम अभिष्टुम वयं देवान्। पवमानो हि प्रथमं स्तूयते। पश्चात् अन्ये देवाः स्तूयन्ते। सोमं

हिनोत प्रेरयत पवित्रे। महते धनाय अस्माकम्। अयं च स्वादुः पवतां अति अतिक्रम्य। वारं अव्यं पवित्रम्। आसीदतु कलशम्। देवः दीप्तः इन्दुः ॥ (३)

प्र हिन्वानो जनिता रोदस्यो रथो न वाजं सनिषन्नयासीत्।
इन्द्रं गच्छन्नायुधा संशिशानो विश्वा वसु हस्तयोरादधानः ॥

प्र हिन्वानः प्रीणानः गच्छन् वा। जनिता रोदस्योः द्यावा-पृथिव्योः। रथः न रथः इव। वाजं अन्नम्। सनिषन् सम्भजमानः। अयासीत् गतवान्। इन्द्रं गच्छन् आयुधा आयुधानि। संशिशानः तीक्ष्णानि कुर्वाणः। विश्वा विश्वानि। वसु वसूनि धनानि। हस्तयोः आदधानः ॥

वसिष्ठः। प्रायासीत् प्रयातः सोमः। हिन्वानः प्रेर्यमाणः। जनिता जनयिता रोदस्योः। रथो न रथ इव। वाजं युद्धम्। सनिषन् सेवमानः। इन्द्रं गच्छन् गमिष्यन्। आयुधा आयुधानि। संशिशानः संशितानि कुर्वन्। विश्वा विश्वानि। वसु वसूनि। हस्तयोः आदधानः दानार्थम् ॥ (४)

तक्षद्यदी मनसो वेनतो वाग्ज्येष्ठस्य धर्मं द्युक्षोरनीके।
आदीमायन् वरमा वावशाना जुष्टं पतिं कलशे गाव इन्दुम् ॥

तक्षत् करोति। यदि मनसः चेतसः। वेनतः। वेनतेः कान्ति-कर्मणः। वाक् सखित्वम्। ज्येष्ठस्य प्रशस्तस्य। धर्मं धर्मणः कर्मणः। द्युक्षोः अनीके मुखे। आत् ई आ आयन् वरं वरणीयम्। वावशानाः कामय-मानाः। जुष्टं पतिं पत्नीव। कलशे द्रोणकलशे। गावः रश्मयः उदकानि वा। इन्दुं सोमम् ॥

मृडीकः वासिष्ठः। तक्षत् अतक्षत् संस्करोति। यदि यदा सोमम्। मनसः। मन्यतेः स्तुतिकर्मणः मनः। स्तोत्रस्य। वेनतः कामयमानस्य। वाक् स्तुतिः। ज्येष्ठस्य प्रशस्यस्य। धर्म कर्मणि यज्ञे। द्युक्षोः दीप्तस्तुतिकस्य। टुक्षु शब्दे इत्यस्मात् क्षुः। अनीके प्रमुखे सवनस्य। यदा यज्ञेषु सवनमुखे स्तोतारः स्तुवन्ति सोममित्यर्थः। आत् अनन्तरम्। ईं एनं सोमम्। आ आयन् अभियन्ति। वरं वरणीयम्। वावशानाः कामयमानाः गावः। जुष्टं पर्याप्तं पतिम्। कलशे स्थितं इन्दुम्। आशीरागच्छतीति वा आशीर्दुहो गाव आगच्छन्तीति वा॥ (५)

साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः।
हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी॥

विनियोगोऽस्याभिप्लवे। साकमुक्षः सह वहतोः द्वयोः। मर्जयन्तः स्वसारः भगिन्यः दश। धीरस्य धीतयः धीमत्यः अङ्गुलयः। धनुत्रीः। धनुः त्रायन्त्यः। हरिः हरितवर्णः। पर्यद्रवत् रसभावेन। जाः अपत्यं सूर्यस्य। द्रोणं द्रोणकलशम्। ननक्षे व्याप्नोति। अश्व इव वाजी वेगवान्। वेगवान् अश्वः यथा व्याप्नोति ग्रामं तद्वत्॥

नोधाः। साकमुक्षः साकं सिञ्चन्त्यः। दश स्वसारः अङ्गुलयः। मर्जयन्त शोधयन्ति सोमम्। धीरस्य नोधसः। धीतयः विधात्र्यः कर्मणाम्। धनुत्रीः। धिनोतेर्धनुत्र्यः। प्रीणयित्र्यः। धन्वतेर्वा गतिकर्मणः। प्राप्नुवन्त्यः प्राप्तव्यानि। हरिः सोमः। पर्यद्रवत् परितो धावति पवित्रम्। जाः जनयिता सूर्यस्य। जन जनने इत्यस्मात् धातोर्विट्प्रत्यये विड्वनोः इत्यनुनासिकः स्यात् इति आकारः।

जनिताग्नेर्जनिता सूर्यस्य (ऋ. वे. ९. ९६. ५)

इति च भवति। द्रोणं द्रोणकलशम्। ननक्षे व्याप्नोति। नक्ष व्याप्तौ। अत्यो न अश्व इव। वाजी वेगवान्॥ (६)

अधि यदस्मिन् वाजिनीव शुभः स्पर्द्धन्ते धियः सूरे न विशः।
अपो वृणानः पवते कवीयान् व्रजं न पशुवर्धनाय मन्म ॥

अधि यदस्मिन् वाजिनी अन्नवती इव यज्ञे। शुभः शोभनाः। धियः प्रज्ञाः कर्माणि वा। स्पर्धन्ते अन्योन्यातिशयेन। विशः न प्रजा इव स्पर्धन्ते मां प्रति उदेति। अपः वृणानः आच्छादयमानः। पवते कवीयान् कवितरः। व्रजं मार्गम्। पशुवर्धनाय पशुवृद्ध्यर्थम्। मन्म मन्त्रः ॥

कण्वः। अस्मिन् सोमे अधि। यत् यदा। स्पर्धन्ते धियः स्तुतयः अहमहमिकया अभिगच्छन्ति। वाजिनीव अश्वे इव। शुभोऽलङ्कारः। सूरे न सूर्य इव। विशो जनाः उपस्थाने। अयं च सोमः अपः वसतीवरीः। वृणानः आच्छादयन्। पवते कवीयान् कवीन् स्तोतॄन् कामयमानः। व्रजं न व्रजमिव। पशुवर्धनाय। यथा व्रजं गोष्ठं गोपः पशूनां वर्धनाय गच्छति तद्वत्। मन्म अभिमतं यजमानस्य उद्दिश्य ॥ (७)

इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन् मदाय।
हन्ति रक्षो बाधते पर्यरातिं वरिवस्कृण्वन् वृजनस्य राजा ॥

विनियोगोऽस्य पञ्चमेऽहनि। इन्दुः वाजी अन्नवान् पवते। गोन्योघाः गवां न्योघाः सङ्घाः। इन्द्रे सोमः सह इन्वन् प्रीणयन्। मदाय मदार्थम्। हन्ति रक्षः रक्षांसि हिंसति। परिबाधते अरातिं अकर्माणं शत्रुम्। वरिवः धनानि कृण्वन् वरिष्ठानि। वृजनस्य। व्यत्ययेन सप्तम्यर्थे षष्ठी। सङ्ग्रामे। राजा दीप्यन्ते शोभन्ते ॥

मन्युः वसिष्ठः। इन्दुः दीप्तः। वाजी वेगवान्। गोन्योघाः। गमनशीलः नीचीनोऽवाङ्मुखः ओघः प्रवाहः यस्य स गोन्योघाः। सोमः पवते इन्द्रे सहः

बलम्। इन्वन् प्रेरयन्। मदाय तस्य। हन्ति रक्षः। परिबाधते च अरातिं शत्रुम्। वरिवः धनं कृण्वन् परिचारकाय। वृजनस्य बलस्य यज्ञस्य वा। राजा ईश्वरः॥ (८)

अया पवा पवस्वैना वसूनि मांश्चत्व इन्दो सरसि प्र धन्व।
ब्रध्नश्चिद्यस्य वातो न जूतिं पुरुमेधाश्चित्तकवे नरं धात्॥

विनियोगोऽस्य षष्ठेऽहनि। अया पवा अनेन पवनेन पवस्व। एना वसूनि धनानि। मांश्चत्वे अश्वे आरूढः। हे इन्दो सरसि उदके। प्रधन्व प्रगच्छसि। मांश्चत्वे वा सरसि। प्रधन्वः धारणशीलः। बध्नः ब्रह्मा सविता वा महान् वा। चित् अन्तः। यस्य वातो न वातस्येव चित्स्व-भावस्य इव। जूतिं गतिम्। पुरुमेधाः बहुप्रज्ञः चित्। तकवे। तकुः स्तोता। तस्मै कवये। नरं अपत्यम्। धात् स्थापयति। अथवा अया पवा अनेन मार्गेण। पवस्व वसूनि धनानि। मांश्चत्वे हे इन्दो सरसि उदके गमनसंयुक्ते। प्रधन्व पवस्व। ब्रध्नश्चित्। ब्रध्नः सविता। चिदिति पदपूरणः। यस्य वातः न जूतिं वातस्येव जूतिः वेगः। पुरुमेधा ऋषिः। चिदिति पदपूरणः। तकवे। यो नरं यजमानमवति रक्षति। नरं धात्॥

कुत्सः। अया अनया। पवा पवमानया धारया। पवस्व क्षर। एना एनानि वसूनि। मांश्चत्वे अभिमन्यमानान्। शत्रून् चातयति नाशयति इति मांश्चत्वम्। तस्मिन्। सरसि कलशे। प्रधन्व प्रगच्छ हे इन्दो। ब्रध्नश्चित् आदित्यश्च। वातो न वात इव। जूतिं जूतं वेगितम्। पुरुमेधाश्चित् बहुयज्ञश्च इन्द्रः अत्र अस्मिन् यज्ञे। तकवे। तकेर्गतिकर्मणः तकुः। उपगन्त्रे मह्यम्। नरं नेतारं पुत्रम्। धात् दधातु धारयतु हे सोम त्वया समर्पितौ सन्तौ॥ (९)

महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान्।
अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः॥

महत् महदेवैतत् आश्चर्यमेतत् कर्म । सोमस्य महिषः महनीयस्य । चकार कृतवान् । . . . . . . ओजः बलम् । जनयन् जनितवान् सूर्ये । ज्योतिः प्रकाशम् । इन्दुः सोमः । अधिदेवपक्षे महत् सोमः आदित्यः । महिषः पूजनीयः महत्त्वात् । महत् कर्म चकार । अपां यद्गर्भो देवानामाधिपत्यम् । अवृणीत । आच्छादयत् देवान् तेजसा । किंच अदधादिन्द्रे पवमानः सोमात्मना । ओजः बलं पीतः सन् । अजनयत् सूर्ये सरणमण्डले । ज्योतिरिन्दुरादित्यः । अध्यात्मम् । सोमः अहो महदसम्भाव्यं तत्कर्म । महिषः पूजनीयः । अपां यत् गर्भः दर्शनमात्रम् । पञ्चानां भूतानां गर्भः अधिष्ठानं भूत्वा । अवृणीत अधिष्ठितवान् । देवानिन्द्रियाणि अवृणीत शरीरमध्ये तिष्ठतीति कृत्वा । अदधादिन्द्रे आत्मनीश्वरे पवमानः पूयमानः विषयप्रमाणेन । ओजः बलमणिमादि । अजनयच्च सूर्ये ज्योतिः । तथा-चोक्तम्—येन सूर्यस्तपति तेज इन्द्रः ॥

पराशरः । महत् तत् महान्ति तानि कर्माणि । सोमः महिषः महान चकार । कानि तानि । यत् यम् । अपां गर्भः रसभूतः । अवृणीत देवान् असुरपरित्यागेन । अदधाच्च यत् इन्द्रे ओजः बलं पवमानः । यच्च अजनयत् सूर्ये ज्योतिः इन्दुः दीप्तः ॥ (१०)

असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमा मनीषा ।
दश स्वसारो अधि सानौ अव्ये मृजन्ति वह्निं सदनेष्वच्छ ॥

असर्जि सृष्टवान् । वक्वा वक्ता । अश्वो न रथ्यः रथे हितः । वाजी वेगवान् । धिया प्रज्ञया कर्मणा वा । मनोता । ओतानि मनांसि देवानां यस्मिन् सोमे सः मनोता । प्रथमा मनीषा मनसः एषणः । दश

स्वसारो भगिन्यः । अधि उपरि । सानौ समुच्छ्रिते । अव्ये अविमये । मृजन्ति शोधयन्ति अङ्गुलयः । वह्निं वोढारम् । सदनेषु अच्छ आप्तुम् ॥

काश्यपः । असर्जि सृज्यते प्रेर्यते । रथ्ये रथयोग्ये । आजौ यथा रथः सृज्यते । वक्वा स्तोत्रा । वचेर्वकुः । धिया । विदधाति इति धीः । तया कर्त्र्या । मनोता यस्यां देवानां मनांसि ओतानि सा मनोता । प्रथमा श्रेष्ठा । मनीषा स्तुतिः । किंच दश स्वसारः अङ्गुलयः । अव्ये अविमये । सानौ स्थाने पवित्रे । अधि उपरि । मृजन्ति क्षिपन्ति सोमम् । वह्निं वोढारं यज्ञस्य । सदनेषु कलशेषु । अच्छ अभि ॥ (११)

अपामीवेदूर्मयस्तर्तुराणाः प्र मनीषा ईरते सोममच्छ ।
नमस्यन्तीरुप च यन्ति सं चा च विशन्त्युशतीरुशन्तम् ॥

अपां इव इत् ऊर्मयः सङ्घाताः । तर्तुराणाः तरमाणाः । प्र मनीषा ईरते । कम् । सोमम् । . . . . . . कामयमानम् ॥

प्रस्कण्वः । अपामूर्मय इव तर्तुराणाः मनीषाः स्तुतयः । प्र ईरते प्र गच्छन्ति । सोमं अच्छ अभि । नमस्यन्तीः परिचरन्त्यः । उपयन्ति समीपे गच्छन्ति च । संयन्ति सह गच्छन्ति च सर्वाः । आविशन्ति च सोमम् । उशन्तं कामयमानम् । उशतीः उशन्त्यः मनीषाः ॥ (१२)

इति षष्ठे पञ्चमी दशती ।

इत उत्तरमनुष्टुभः ॥

पुरो जिती वो अन्धसः सुताय मादयित्नवे ।
अप श्वानं श्नथिष्टन सखायो दीर्घजिह्वयम् ॥

विनियोगोऽस्य ज्योतिष्टोमे । पुरः अग्रतः । जिती जित्यै । अन्धसः अन्नस्य सोमलक्षणस्य । सुताय सोमाय । मादयित्वने मदनशीलाय । अपश्नथिष्टन श्वानं अपघ्नत हे सखायः । किंविशिष्टम् । दीर्घजिह्व्यम् । अथवा श्नथिष्टन शिथिलीकरोतु इन्द्रम् । हे सखायः ऋत्विजः । अथवा शिथिलीकरोतु सोमम् । श्वानं कञ्चिदुपद्रवकर्तारमपघ्नत ॥

पुरोजिती नवर्चोऽत्र बृहत्या हर्यताय या ।
अष्टावनुष्टुभः शिष्टा वक्ष्यन्ते ऋषयः पृथक् ॥

अनानतः पारुच्छेपिः । पुरः स्थितस्य जनस्य अन्धसः अन्नभूतस्य । चतुर्थ्यर्थे षष्ठी । सुताय अभिषुताय । मादयित्नवे मदनशीलाय सोमाय । तदर्थम् । श्वानं उपघातकम् । दीर्घजिह्वयं दीर्घजिह्वम् । अथवा दीर्घजिह्वीयं चासुरीम् । अपश्नथिष्टन अपबाधध्वम् । अनुपघाताय हे सखायः वः यूयम् । श्रूयते हि शाट्यायनकं च । दीर्घजिह्वी ह वा आसुर्यः । स सहाह स्म सोमं लेढि इत्यादिना ॥ (१)

अयं पूषा रयिर्भगः सोमः पुनानो अर्षति ।
पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥

विनियोगोऽस्य द्वितीयेऽहनि । पूषा पुष्णातेः सोमः । रयिः धनं भगः । स एव सोमः शोभनः । अथवा पूषा आदित्यः । पुनानः पूयमानः । अथवा पुनानः रश्मिभिः । अर्षति क्षरति आदित्यात्मना गच्छति । पतिः स्वामी विश्वस्य । पूषा च विश्वस्य सर्वस्य भूमनः बहुत्वस्य । व्यख्यत् प्रकाशयति । रोदसी द्यावापृथिव्यौ । उभे उभौ सोमापूषणौ ॥

नहुषो मानवः । अयं सोमः पूषा पोषकरः । रयिः धनवत् प्रियः । भगः भजनीयः । पुनानः पूयमानः पवित्रे । अर्षति गच्छति द्रोणकलशम् । पतिः

विश्वस्य भूमनः भूतजातस्य । व्यख्यत् विचष्टे विजानाति विख्यापयति प्रकाशयति इति वा । रोदसी उभे ॥ (२)

सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः ।
पवित्रवन्तो अक्षरन् देवान् गच्छन्तु वो मदाः ॥

विनियोगोऽस्य तृतीयेऽहनि । सुतासः अभिषुताः । मधुमत्तमाः अतिशयेन रसवत्तमाः सोमाः । इन्द्राय मन्दिनः मदनवन्तः स्तुत्या च तद्वन्तः । पवित्रवन्तः दशापवित्रपूताः । देवान् वस्वादीन् । गच्छन्तु वः युष्माकं मदाः ॥

ययातिः नाहुषः । सुतासः अभिषुताः । मधुमत्तमाः मधुरतमाः सोमाः । इन्द्रस्य मन्दिनः स्वभूताः । पवित्रवन्तः दशापवित्रेण संसृष्टाः अक्षरन् । ते मदाः मदकराः सोमाः देवान् गच्छन्तु । वः युष्मदीयाः हे यजमानाः ॥ (३)

सोमाः पवन्त इन्दवो ऽस्मभ्यं गातुवित्तमाः ।
मित्राः स्वाना अरेपसः स्वाध्यः स्वर्विदः ॥

[1] मनुः सांवरणः । सोमाः पवन्ते इन्दवः दीप्ताः अस्मभ्यम् । गातुवित्तमाः अतिशयेन मार्गलम्भनाः । मित्राः मित्रभूताः । स्वानाः सुताः । अरेपसः अपापाः । स्वाध्यः शोभनाध्यानाः । स्वर्विदः सर्वज्ञाः सर्वकामलम्भना वा ॥ (४)

अभी नो वाजसातमं रयिमर्ष शतस्पृहम् ।
इन्दो सहस्रभर्णसं तुविद्युम्नं विभासहम् ॥

[1] Mādhava's Commentary is missing for verses 4 and 5 and for part of the sixth verse.

ऋजिश्वाम्बरीषश्च । अभ्यर्ष अभिक्षर । नः अस्मभ्यम् । वाजसातमं अतिशयेन बलप्रदं रयिम् । शतस्पृहं बहुभिः स्पृहणीयम् । हे इन्दो सहस्रभर्णसं बहूनां पोषकं । तुविद्युम्नं बह्वन्नम् । विभासहं विदीप्तानां शत्रूणां अभिभवितारम् ॥ (५)

अभी नवन्ते अद्रुहः प्रियमिन्द्रस्य काम्यम् ।
वत्सं न पूर्व आयुनि जातं रिहन्ति मातरः ॥

. . . .

प्रियमिन्द्रस्य पेयतम इन्द्रस्य । काम्यं इन्द्रोऽपि कामयते । वत्सं न वत्समिव । पूर्वे आयुनि आयुषि । जातं रिहन्ति लेलिहन्ति आस्वादयन्ति । मातरः रश्मयः उदकानि वा ॥

रेफश्च सूनुश्च काश्यपः द्वयोः सहैव । अभी नवन्ते अभिष्टुवन्ति स्तोतारः । अद्रुहः मित्रभूताः परस्परम् । प्रियं इन्द्रस्य काम्यं कमनीयं सोमम् । जातं सुतं एनं मातरः गावः । रिहन्ति पयोरूपेण । वत्सं न वत्समिव । पूर्वे प्रथमे । आयुनि वयसि तिष्ठन्तं गावः ॥ (६)

आ हर्यताय धृष्णवे धनुष्टन्वन्ति पौंस्यम् ।
शुक्रा वि यन्त्यसुराय निर्णिजे विपामग्रे महीयुवः ॥

हर्यताय । हर्यतिः प्रेप्साकर्मा । प्रेप्सितव्याय । धृष्णवे धर्षणशीलाय । आ धनुष्टन्वन्ति विस्तारयन्ति किञ्चिच्छब्दं कुर्वन्ति वा । पौंस्यं सामर्थ्ययुक्तम् । शुक्राः शुचिष्मन्तः । वियन्ति असुराय सुखाय असुदानवते । निर्णिजे निर्णेजनार्थम् । विपां प्रज्ञानाम् । अग्रे प्रथमम् । महीयुवः महत् सोमं मिश्रयन्ति रश्मयः उदकानि वा ॥

आतन्वन्ति आरोपितज्यं कुर्वन्ति। धनुः पवित्रम्। धनुः दशाज्या रूप्यते। पौंस्यं वीर्यम्। हर्यताय कमनीयाय। धृष्णवे धर्षकाय शत्रूणाम्। सोमाः शुक्राः शुक्लवर्णाः शाटीः। वियन्ति वयन्तीत्यर्थः। शुक्रां वयन्तीति बह्वृचाः। असुराय। असु बलम्। तद्वते। निर्णिजे। निर्णिजमिति रूपनाम। रूपार्थं शोभायै। गोपयः शाटीत्वेन रूप्यते।

आत्मा पितुस्तनूर्वासः (ऋ. वे. ८. ३. २४)

इति हि निगमः।

वसानो गा अपो हरिः (९. ४२. १)

इति च भवति। विपां विप्राणां स्तोतॄणां अग्रे। महीयुवः पूजाकामाः अध्वर्यवः॥ (७)

परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण।
यो देवान् विश्वाँ इत् परि मदेन सह गच्छति॥

विनियोगोऽस्य नवमेऽहनि। परि समन्तात्। त्यं तम्। हर्यतं हरिं हरितवर्णम्। बभ्रुं च सुवर्णम्। पुनन्ति पावयन्ति वारेण बालेन। किंविशिष्टेन। अविमयेन। देवान् विश्वान् सर्वान् इत्। परि सर्वतः। मदेन सह गच्छति। परि देवं लक्षयित्वा॥

ऋजिश्वाम्बरीषौ। परिपुनन्ति परिशोधयन्ति। त्यं तम। हर्यतं कमनीयम्। हरिं सोमम्। बभ्रुं पोषकम्। वारेण अव्येण दशापवित्रेण। यः देवान् विश्वान् इत् एव। विश्वानेव सह युगपत्। परिगच्छति मदेन रसेन तं पुनन्ति॥ (८)

प्र सुन्वानायान्धसो मर्तो न वष्ट तद्वचः।
अप श्वानमराधसं हता मखं न भृगवः॥

विनियोगोऽस्य प्रथमेऽहनि । सुन्वानाय अभिषूयमानाय । अन्धसः सोमस्य । मर्तः मनुष्यः न । वष्ट कामयते तद्वचः । मर्त्यमिव स्तुतिसंयुक्तम् । अप श्वानं श्वानमिवाराधसम् । अपहत अपघ्नत । अधनं धनरहितम् । अमखं यज्ञबहिष्कृतम् । भृगवः भर्जनशीलाः रश्मय इव अपघ्नते ऋत्विजो वा ॥

प्रजापतिः । न प्रवष्ट न कामयते । वशेः कान्तिकर्मणो रूपं वष्टेति । सुन्वानायेति षष्ठ्यर्थे चतुर्थी । सूयमानस्य । अन्धसः सोमस्य । तत् वचः शब्दम् । मर्तः मारणीयः । कोऽसौ । . . . श्वानमपहत अपबाधध्वम् । अराधसं असमृद्धिहेतुककर्माणम् । अमघमिव यथा अमघमदातारं यज्ञे न प्रवेशयन्ति तद्वत् । भृगवः दीप्ताः यूयं हे मदीया जनाः ॥ (९)

इति षष्ठे षष्ठी दशती ।

इत उत्तरं जगत्यः ।

अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्द्धते ।
आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वञ्चमरुहद्विचक्षणः ॥

विनियोगोऽस्य ज्योतिष्टोमे । अभि प्रियाणि इष्टानि । पवते यजमानाय । चनोहितः अन्ननिहितः । नामानि सोमादीनि । यह्वः महान् । अधि येषु वर्धते । आ सूर्यस्य बृहतः महतः । बृहन् सोमः । अधि उपरि आदित्यमण्डलात् चतुर्थं मण्डलम् । रथं विष्वञ्चं नानावर्णम् । अरुहत् आरुहत् । छन्दसि व्यवहिताश्च । विचक्षणः विविधं प्रकाशयितेत्यर्थः ॥

जगत्यो द्वादशाभीति तिस्र आद्याश्च पञ्चमी ।
कविर्ददर्श तुर्यां च षष्ठीं चर्षिगणो ऽब्रवीत् ॥
निवावरी ताः सिकतास्त्रिरस्मै रेणुरैक्षत ।
वेनो भार्गव इन्द्राय सोमेत्यृचमृषिस्त्रितः ॥
असावि सोम इत्येतां भारद्वाजोऽब्रवीद्वसुः ।
प्र देवमिति वत्सप्रीरञ्जते व्यञ्जते ऋचम् ॥
ऋषिराङ्गिरसोऽपश्यत् पवित्रो द्वादशीमृचम् ॥

अभि उद्दिश्य प्रियाणि सर्वप्राणिनाम । नामानि उदकानि पवते सोमः । चनोहितः । चनोऽन्नम् । तस्मै हितः । यह्वः महान् । येषु नामसु अधिवर्धते वसतीवर्येकधानाभिर्हि वर्धते । ताभिः वृद्धः तदर्थं च पवते । अध्यारुहत् सूर्यस्य बृहतः रथम् । विष्वञ्चं सर्वतो गन्तारम् । बृहन् महान् । विचक्षणः विद्रष्टा ॥ (१)

अचोदसो नो धन्वन्त्विन्दवः प्र स्वानासो बृहद्देवेषु हरयः ।
वि चिदश्नाना इषयो अरातयोऽर्यो नः सन्तु सनिषन्तु नो धियः ॥

अचोदसः अचोदयितारः । धन्वन्तु इन्दवः सोमाः । नः अस्मान् प्रति । स्वानासः सुताः । बृहत देवेषु हरयः हरणशीलाः । वि चित् अश्नानाः विनाशयन्तः । ये अरातयः शत्रवः तान् विनाशयन्तः । अर्यः स्वामिनः । नः अस्माकं सन्तु । सनिषन्तु सम्भजन्तु । नः धियः प्रज्ञाः कर्माणि वा ॥

अचोदसः अप्रेरकाः अबाधकाः सन्तः । नः अस्मदर्थम् । प्रधन्वन्तु प्रगच्छन्तु इन्दवः । स्वानासः सुताः । बृहद्देवेषु बृहत्स्तोत्रेषु अस्मासु । हरयः हरितवर्णाः । वि विशेषेण । भृशमित्यर्थः । अश्नानाः भक्षमाणाः सन्तु । इषयः इषमन्नं कामयमानाः । अरातयः अदातारः । नः अस्माकम् । अर्यः अरयः शत्रवः । चिदिति चेत्यर्थः । अस्माकं अरय एवं भवन्तु चेति । किंच सनिषन्तु संभजन्तु । नः अस्मान् । धियः कर्माणि यज्ञादीनि ॥ (२)

एष प्र कोशे मधुमाँ अचिक्रददिन्द्रस्य वज्रो वपुषो वपुष्टमः ।
अभ्यृतस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसा च धेनवः ॥

एष प्र कोशे द्रोणकलशे । मधुमान् रसवान् । अचिक्रदत् शब्दं कृतवान् । इन्द्रस्य वज्रः सोमः । अनेन पीतेन वज्रं क्षेप्तुं समर्थः । वपुषः वपुष्टमः दीप्तेः दीप्तितमः । अभि ऋतस्य यज्ञस्य । सुदुघाः सुदोहनीः । घृतश्चुतः क्षीरं उदकं वा च्यावयन्त्यः । वाश्राः कामयमानाः । क्षरन्ति पयसा च धेनवः । धेट् पाने । पिबन्त्य उदकं आदित्यरश्मयः कामयमानाः । क्षरन्ति पयः धेनवः आदित्यरश्मयश्च ॥

एष सोमः । मधुमान् रसवान् । कोशे कलशे । प्राचिक्रदत् प्रकर्षेण शब्दायते । इन्द्रस्य वज्रः वज्रवद्वीर्यकरः । वपुषः वपुष्मतः दीप्तिमतः । वपुष्टमः दीप्तिमत्तमः । अभ्यर्षति अभिगच्छति । ई एनं सोमम् । ऋतस्य यज्ञस्य । यज्ञार्थमित्यर्थः । सुदुघाः सुखेन दोग्धव्याः । घृतश्चुतः । घृतं क्षीरं क्षरन्तीति घृतश्चुतः । क्षीरं क्षरन्त्यः । वाश्राः शब्दायमानाः । धेनवः आशीर्दुहः । पयसा अभ्यर्षन्ति च ॥ (३)

प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतं सखा सख्युर्न प्र मिनाति संगिरम् ।
मर्य इव युवतिभिः समर्षति सोमः कलशे शतयामना पथा ॥

विनियोगोऽस्य सप्तमेऽहनि । प्रो अयासीत् इन्दुः सोमः । इन्द्रस्य निष्कृतं समवायं वा । सखा सख्युर्न प्रमिनाति विनाशयति । सङ्गिरं स्तुतिम् । मर्यः मनुष्य इव युवतिभिः सम्बन्धे । अर्षति क्षरति । एवं सोमः कलशे शतयामना शतच्छिद्रेण । पथा पवित्रेण । क्षरति कलशं प्रति ॥

प्र अयासीत् याति इन्दुः । इन्द्रस्य निष्कृतं संस्कृतं स्थानं कलशम् । सखा इन्द्रस्य सख्युः आत्मनः इन्द्रस्य । न प्रमिनाति न प्रहिन्वन्ति । संगिरं

स्तोतारम् । सम्यक् गृणातीति संगिरः । मर्य इव युवतिभिः यथा मनुष्यः कश्चित् युवतिभिः सह गच्छति तद्वत् । सोमः कलशे सहाद्भिः अर्षति गच्छति । शतयामना बहुपत्येन । पथा मार्गेण अन्तरिक्षेण । बहुधारो ऽभिपवते ॥ (४)

धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः ।
हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुषे नदीष्वा ॥

विनियोगोऽस्याष्टमेऽहनि । धर्ता धारयिता दिवः । पवते कृत्व्ये कर्तव्ये रसः । दक्षः शीघ्रः । देवानां अनुमाद्यः अनुमदनीयः । नृभिर्मनुष्यैः ।

. . . .

वृथा पाजांसि कृणुषे अन्नानि करोषि । नदीषु रश्मिषु उदकेषु वा अधि ॥

धर्ता धारकः । दिवो लोकस्य ।

दिवो धर्तासि शुक्रः पीयूषः (ऋ. वे. ९. १०९. ६)

इति हि भवति । सोमस्य रसः पवते क्षरति । कृत्व्यः संस्कृतः । दक्षः समर्थः । देवानां अनुमाद्यः स्तुत्यः । नृभिः ऋत्विग्भिः । हरिः हरितवर्णः । सृजानः सृज्यमानः प्रेक्षमाणः । अत्यो न अश्व इव । सत्वभिः सादिभिः । वृथा अनायासेन । पाजांसि गमनानि । कृणुषे कृणोषि हे सोम । नदीषु अप्सु । आ आविष्टः ॥ (५)

वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिवः ।
प्राणा सिन्धूनां कलशाँ अचिक्रददिन्द्रस्य हार्दिमाविशन्मनीषिभिः ॥

विनियोगोऽस्य तृतीयेऽहनि । वृषा सेक्ता । मतीनां व्रतानाम् । विचक्षणः विविधं प्रकाशयिता । सोमः अह्नां प्रतरीता प्रकर्षेण तारयिता । उषसां दिवः रश्मीनां द्युलोकस्य च । प्राणा प्राणादयः । तेषां कर्ता ।

सिन्धूनामपां कलशादीनि पात्राणि । अचिक्रदत् शब्दं करोति । इन्द्रस्य हार्दि हार्दनः । आविशत् मनीषिभिः मनसः एषणशीलैः पालनैः ॥

वृषा वर्षकः कामानाम् । मतीनां स्तोत्राणाम् । सोमः पवते विचक्षणः विद्रष्टा । अह्नां रात्रीणां प्रतरीता । अहश्शब्दो रात्रावपि वर्तते—

अहश्च कृष्णमहरर्जुनं च (ऋ. वे. ६. ९. १)

इत्यादिषु । उषसां प्रतरीता । दिवो दिवसस्य प्रतरीता । प्राणा । प्रा पूरणे इत्यस्माद्धातोः पॄ पालनपूरणयोः इत्यस्माद्वा लिटः कानच् । अभ्यासाभावः छान्दसः । सोराकारादेशे रूपं प्राणेति । पूर्णः । सिन्धूनां नदीनां पूर्ण इत्यर्थः । कलशान् द्रोणकलशानभि । अचिक्रदत् क्रन्दते । इन्द्रस्य हार्दि हृदयम् । आविशत् आवेक्ष्यन् मनीषिभिः सोमः ॥ (६)

त्रिरस्मै सप्त धेनवो दुदुह्रिरे सत्यामाशिरं परमे व्योमनि ।
चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्द्धत ॥

विनियोगोऽस्याभिप्लवे । अस्मै सोमाय । सप्त धेनवः सप्त छन्दांसि । त्रिः प्रातःसवनमाध्यन्दिनसवनतृतीयसवनेषु दुदुह्रिरे । अथवा त्रिस्त्रिभिः सवनैः । सप्त धेनवः सप्त होत्राः वषट्कारिणः— होता मैत्रावरुणः ब्राह्मणाच्छंसी पोता नेष्टा अच्छावाक आग्नीध्रः— एतेषां वाचः दुह्यन्ते । अथवा धेनवो दुह्यन्ते । सत्यामाशिरं आश्रयणीयं मिश्रणं वा । परमे प्रकृष्टे । व्योमनि व्याप्तिस्थाने यज्ञे वा । चत्वारि अग्निष्टोम उक्थ्यः षोडशी अतिरात्रश्चतुर्थः । अथवा पृथिवी अन्तरिक्षं द्यौर्दिश इति । अथवा चत्वारो वेदाः । अथवा चत्वारो महर्त्विजः । अथवा चत्वारः समुद्राः । अन्या भुवनानि निर्णिजे चतुर्दशभुवनानि । सप्त भूरादयो लोकाः सप्त पातालानि । तान्यपि । चारूणि चक्रे कृतवान् । केन प्रकारेण । यदृतैः

अन्नैः यज्ञैः सत्यैर्वा । अवर्धत । अथवा त्रिः अस्मै सप्त धेनवः सप्तरश्मयः दुदुह्रिरे । अथवा सप्ताश्वाः । अथवा सप्तपावकजिह्वाः सप्त मातरो वा सप्त भूरादयो लोकाः सप्त पातालानि सप्त सोमसंस्थाः सप्त समुद्राः सप्त द्वीपानि सप्त स्वराः—एता दुदुह्रिरे । सत्यामाशिरमुदकं परमे व्योमनि । चत्वारि अन्याः भुवनानि पृथिव्यादीनि । चारूणि चक्रे । यद्दतैः यज्ञैः । अवर्धत इति । अथवा त्रिः अस्मै सप्त धेनवः सप्त प्राणाः शीर्षण्याः ईरिताः उत्पत्तिस्थितिप्रलयेषु । सत्यां अवितथाम् । आशिरं ज्ञानम् । चत्वारि अन्यानि भुवनानि जाग्रत्स्वप्नसुषुप्तितुरीयासु अद्वैतावस्थेति । यद्दतैर्जनैः । अवर्धत विज्ञानाय ॥

त्रिः सप्त एकविंशतिः । धेनवः छन्दांसि माध्यमिकवाग्रूपेणावतिष्ठते इत्येतत्—

अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता ।
सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद्भवन्ती प्रति वव्रिमौहत ॥
(ऋ. वे. १. १६४. २९)

इत्यस्यामृचि ज्ञायते । वाचः छन्दांस्यभिव्यक्तिस्थानानीति वाचः छन्दोवृष्टिः । क्रियते अस्मै सोमाय । दुदुह्रिरे दुहते । सत्यां कारणभूतां आशिरम् । परमे श्रेष्ठे यज्ञाख्ये । व्योम्नि स्थाने स्थिताय । चत्वारि अन्या अन्यानि । भुवनानि उदकानि । अस्य निर्णिजे रूपाय भवन्ति । एकं वासतीवरं त्रीणि ऐकधनानीति भुवनचतुष्टयम् । अयं च सोमः चारूणि भद्राणि । चक्रे करोति यजमानानाम् । यत् यदा । ऋतैः उदकैः । अवर्धत वर्धते । तदा चारूणि चक्रे ॥ (७)

इन्द्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह ।
मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह सन्त्विन्दवः ॥

इन्द्राय सोम सुषुतः अभिषुतः परिस्रव । अप अमीवा व्याधयः । रक्षसा सह अपनुद्यताम् । मा ते तव रसस्य । किंविशिष्टस्य । मत्सतः ।

द्वयाविनः रक्षांसि शत्रवः । द्रविणस्वन्तः धनवन्तः । इह सन्तु इन्दवः । सोमाः रसवन्तो भवन्तु देवानां न तु शत्रुराक्षसादीनाम् ॥

इन्द्राय परिस्रव हे सोम । सुषुतः सुष्ठु अभिषुतः त्वम् । अप अपभवतु नश्यतु । अमीवा रोगः रक्षसा सह । मा मत्सत मा माद्यत न माद्यन्तु । ते त्वदीयस्य । रसस्य रसेन इत्यर्थः । द्वयाविनो द्वयवन्तः वञ्चकाः । येषां वाच्येकं कर्मणि अन्यत् ते द्वयाविनः । द्रविणस्वन्तः धनवन्तः इन्दवः । इह अस्मासु सन्तु वयं तान् परिचराम ॥ (८)

असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
पुनानो वारमत्येष्यव्ययं श्येनो न योनिं घृतवन्तमासदत् ॥

विनियोगोऽस्य नवमेऽहनि । असावि सुतः सोमः । अरुषः अहिंसितः । वृषा सेक्ता । हरिः हरणशीलः । . . . .
वारं वालम् । अत्येषि अत्येति । व्यत्ययेन मध्यमपुरुषः । अव्यमविमयम् । श्येनो न श्येन इव । योनिं स्थानम् । घृतवन्तमुदकवन्तम् । आसदत् स्थितवान् ॥

असावि सुत आसीत् सोमः । अरुषः आरोचमानः । वृषा हरिः राजेव दस्मो दर्शनीयः । दंसु दर्शने । गाः आशीर्दुहः । अभ्यचिक्रदत् शब्दायते । पुनानः पूयमानः । वारं अव्यं अविमयं पवित्रम् । अति अतिक्रम्य । एषीति पुरुषव्यत्ययः । गच्छति । श्येनो न श्येन इव । योनिं स्थानं नीडम् । घृतवन्तं दीप्तिमन्तम् । योनि कलशम् । आसदत् आसीदतु इति वा आसीदत इति वा आसीद इत्येव वा ॥ (९)

प्र देवमच्छा मधुमन्त इन्दवोऽसिष्यन्दन्त गाव आ न धेनवः ।
बर्हिषदो वचनावन्त ऊधभिः परिस्रुतमुस्रिया निर्णिजं धिरे ॥

प्र देवं अच्छ मधुमन्तः रसवन्तः । व्याप्नुवन्ति इन्दवः सोमाः । असिष्यन्दन्त गाव इव स्यन्दन्तो धेनवः । बर्हिषदः बर्हिषि सीदन्तः । वचनावन्तः स्तुतिमन्तः । ऊधभिः परिस्रुतं सर्वतः स्रुतम् । उस्रिया गावः रश्मयो वा । निर्णिजं धिरे दधिरे सोमस्य ॥

प्रासिष्यन्दन्त प्रस्यन्दते । देवं इन्द्रम् । अच्छ अभि । मधुमन्तं रसवन्तं इन्दवः । गावो न गाव इव । धेनवः पयस्विन्यः । आ अभीत्यर्थः । बर्हिषदः बर्हिषि सीदन्तः । वचनवन्तः शब्दवन्तः । तेषु सोमेषु । ऊधभिरिति पञ्चम्यर्थे चतुर्थी । ऊधोभ्यः । परिस्रुतं क्षरितम । निर्णिजं रूपं रूपकरं पयः आशीरूपेण परिणतम् । धिरे दधिरे । उस्रिया गावः ॥ (१०)

अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मध्वाभ्यञ्जते ।
सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमप्सु गृभ्णते ॥

विनियोगोऽस्य उपप्लवे प्रवर्ग्ये च । अञ्जते व्यञ्जते विविधं अञ्जते । समञ्जते सम्यक् अञ्जते । क्रतुं कर्माणि । . . . . . . मध्वा मधुना अभ्यञ्जते । सिन्धोः समुद्रस्य । उच्छ्वासे बडबामुखस्य अग्नेः । पतयन्तं वर्धयन्तं समुद्रम् । उक्षणं महान्तं सेक्तारम् । हिरण्यपावाः हिरण्यस्य पाता रक्षिता । पशुं सोमं अप्सु अन्नभूते गृह्णाति ॥

अञ्जते सिञ्चन्ति । व्यञ्जते मध्वा मधुना आशिरा पृथगञ्जते । गृहेषु स्थितं श्रितदध्यादिभिः सं सह चाञ्जते । पूतप्रभृति क्रतुं कर्म कर्तारं वा । रिहन्ति आस्वादयन्ति देवाः । अभ्यञ्जते अभिमुखं अञ्जते । सिन्धोः नद्याः । उच्छ्वासे उच्छ्वासवत् बहिर्भूते मन्त्रेण परिगृहीते वसतीवर्यैकधानाख्ये उदके । पतयन्तं उक्षणं सेक्तारं पशुम् । पश्यतीति पशुः । प्राज्ञं सोमम् । हिरण्यपावाः हिरण्येन पावनाः ऋत्विजः । हिरण्यपाणयो ह्यभिषुण्वन्ति । अप्सु गृभ्णते गृह्णन्ति नियच्छन्ति ॥ (११)

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तः सं तदाशत ॥

विनियोगोऽस्य तृतीयेऽहनि । पवित्रं पुनातेः । यज्ञे विततं विस्तीर्णम् । ब्रह्मणस्पते अन्नस्य ऋग्यजुःसामलक्षणस्य पातः । प्रभुः ईश्वरः । गात्राणि स्वकीयानि । परि समन्तात् एषि । विश्वतः सर्वतः यज्ञम् । अतप्ततनूः अतप्तशरीरः सूक्ष्मैरपि छिद्रैर्दशापवित्रस्य गच्छन् । न तत् आमः रोगः । अश्नुते व्याप्नोति । शृतासः निष्पन्नाः सोमाः । वहन्तः बहवः प्रापयन्तः सन्तः । आशत । अशू व्याप्तौ । व्याप्नुवन्ति द्रोणकलशम् ॥

सूक्तस्य (ऋ. वे. ९. ८३) आद्या इयमृक् । सूक्तमुक्तमुद्दिश्य शौनकेनोक्तम्—

आध्यात्मिकं पवित्रं ते सूक्तं जप्त्वाप्लुतः शुचिः ।
गतिमिष्टामवाप्नोति वृद्धीश्चापीह विन्दते ॥

इति । दशापवित्रास्तरणे चेयं प्रयुज्यते । आध्यात्मिकत्वेन तावद्योज्यते । पवित्रं सर्वपावनम् । ते तव आत्मभूतं तेजः परमात्माख्यम् । विततं विस्तृत सर्वत्र । हे ब्रह्मणस्पते ब्राह्मणानां स्वामिन् । एष वो भरता राजा सोमोऽस्माकं ब्राह्मणानां राजा (तै. ब्रा. १. ७. ४. २) तस्मात्सोमराजानो ब्राह्मणाः (श. ब्रा. २. ९. ४. ४) इत्यादयो हि निगमा दृश्यन्ते । प्रभुः त्वं गात्राणि अङ्गानि पातॄणाम् । पर्येषि परिगच्छसि विश्वतः । त्वया व्याप्तेन अतप्ततनूः अशोधितशरीरः । अत एव आमः न तत् विततं पवित्रं अश्नुते । असोमपस्य सत्त्वशुद्ध्यभावात् ज्ञानद्वारा परमात्मप्राप्तिः न सिद्ध्यति इति । शृतास इत् पक्वा एव त्वया वहन्तः यज्ञं जनाः । समाशत समश्नुते । तत् पवित्रमिति शब्दसामान्यमात्रेण पवित्रास्तरणे विनियोगः । यथा दधिक्राव्णो अकारिषम् (ऋ. वे. ४. ३९. ६) इत्यस्या दधिद्रप्सप्रकाशने तद्वत् ॥ (१२)

इति षष्ठे सप्तमी जगती

जगत्य उक्ताः । उष्णिह उच्यन्ते ।

इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः ।
श्रुष्टे जातास इन्दवः स्वर्विदः ॥

विनियोगोऽस्य ज्योतिष्टोमे । सुता इमे सोमाः । इन्द्रं वृषणं सेक्तारं अभियन्तु । हरयः हरितवर्णाः । श्रुष्टे जातासः श्रुष्टे जाताः । इन्दवः स्वर्विदः ये स्वर्गं लोकं विन्दन्ति ॥

इन्द्रमच्छ पवस्वेति खण्डौ द्वौ द्वादशाष्टकौ ।
औष्णिहः प्रथमः खण्डो द्वितीयः काकुभोऽत्र तु ॥
स सुन्व इति गायत्री यवमध्येति केचन ।
अक्षरव्यूहनादेषा ककुबेवेति केचन ॥
एष स्य धारयेत्येष प्रगाथः काकुभोऽन्तिमः ।
आद्यामेकादशीमग्निश्चाक्षुषः सप्तमीमपि ॥
द्वितीयां मानवश्चक्षुः परे पर्वतनारदौ ।
नवमीं दशमीं चापि चतस्रस्ताववैक्षताम् ॥
पञ्चमीं तु त्रितः षष्ठीं मनुराप्सव ऐक्षत ।
अष्टमीं द्वादशीं चापि द्वित इत्यार्षमुष्णिहाम् ॥
गौरिवितिरूर्ध्वसद्मऋजिश्वा तुर्वशः क्रमात् ।
ऋणञ्चयस्तु पञ्चम्याः षष्ठ्याः शक्तिरुरुर्द्वयोः ॥

अभियन्तु वृषणं वर्षितारम् । सुता इमे हरयः सोमाः । श्रुष्टीति क्षिप्रनाम। श्रुष्टि यन्त्विति वा श्रुष्टि जातास इति वा सम्बन्धः । जातासः प्रादुर्भूताः । इन्दवः सोमाः । स्वर्विदः सर्वकामलम्भनाः सर्वज्ञा वा ॥ (१)

प्र धन्वा सोम जागृविरिन्द्रायेन्दो परि स्रव ।
द्युमन्तं शुष्ममा भर स्वर्विदम् ॥

प्रधन्व प्रगच्छ सोम । जागृविः जागरणशीलः । इन्द्राय इन्दो परिस्रव सर्वतः स्रव । द्युमन्तं द्युतिमन्तम् । शुष्मं आभर आहर स्वर्विदम् ॥

प्रधन्व प्रगच्छ सोम । जागृविः प्रबुद्धः त्वम् । इन्द्राय परिस्रव परिक्षर हे इन्दो । प्रधन्व इत्युक्तस्यैव पुनर्वचनं परिस्रव इति शब्दान्तरेण इन्द्राय इति वक्तुम् । अथवा प्रधन्व पवित्रम् । ततः परिस्रव इति । द्युमन्तं दीप्तिमन्तम् । शुष्मं बलम् । आभर आहर । स्वर्विदं सर्वकामलम्भनम् ॥ (२)

सखाय आ निषीदत पुनानाय प्र गायत ।
शिशुं न यज्ञैः परिभूषत श्रिये ॥

विनियोगोऽस्य सप्तमेऽहनि । हे सखायः आनिषीदत । पुनानाय सोमाय । प्रगायत स्तोत्राणि । शिशुं न । यथा मातरः शिशुमलङ्कारैर्भूषयन्ति एवम् । सोमं यज्ञैः परिभूषत श्रिये श्र्यर्थम् ॥

सखायः आगच्छत इति शेषः । आ आगत्य निषीदत उपविशत स्तोतुम् । निषद्य च पुनानाय पूयमानाय सोमाय तदर्थं प्रगायत च । शिशुं न शिशुमिव भूषणैः । यज्ञैः हविर्भिः सवनीयपुरोडाशादिभिः । परिभूषत अलंकुरुत । तैः सहितो हि सोमः शोभते । श्रिये पुष्ट्यर्थं युष्माकम् ॥ (३)

तं वः सखायो मदाय पुनानमभि गायत ।
शिशुं न हव्यैः स्वदयन्त गूर्त्तिभिः ॥

विनियोगोऽस्य षष्ठेऽहनि । तं सोमम् । वः मदाय मदनार्थम् । पुनानं अभिगायत हे सखायः । शिशुं न शिशुमिव । हव्यैः हवनीयैः । स्वदयन्तः आस्वादयन्तः । गूर्तिभिः उद्यमनैः । हव्यैः रत्नैर्दानैर्वा ॥

तं पुनानं अभिगायत हे सखायः। वः यूयं मदाय देवानाम्। स्तुतो हि सोमो मदकरो भवति।

न सोम इन्द्रमसुतो ममाद
नाब्रह्माणो मघवानं सुतासः (ऋ. वे. ७. २६. १) ॥

इति हि भवति। शिशुं न शिशुमिव हव्यैः हवनैः स्तोत्रैः। स्वदयन्तः गूर्तिभिः स्तुतिभिः। गृणातेः गूर्त्तिः ॥ (४)

प्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिम्।
विश्वा परि प्रिया भुवदध द्विता ॥

विनियोगोऽस्य पञ्चमेऽहनि। प्राणा प्राणभूतः। शिशुः शंसनीयः। महीनां गोनाम्। हिन्वन् आप्नुवन्। ऋतस्य यज्ञस्य। दीधितिम्। अन्यत्राङ्गुलयः। इह तु दीप्तिं प्रीणनं वा। विश्वा सर्वाणि। प्रिया प्रियाणि। परिभुवत् सर्वत्रानुभवन्ति। अध द्विता द्वैतं पर्णः सोमदेवता च ॥

प्राणा पूर्णः। शिशुः वत्सः। महीनां महतीनां अपाम्। हिन्वन् प्रेरयन् प्रवर्तयन्। ऋतस्य यज्ञस्य। दीधितिं विधातारं यजमानम्। विश्वा विश्वानि। प्रिया प्रियाणि देवानाम्। धामानि पात्राणि। परिभुवत् परिगृह्णाति। द्विता द्विधा स्थितः पृथिव्यां लतारूपेण दिवि चन्द्रमारूपेण च स्थितः ॥ (५)

पवस्व देववीतय इन्दो धाराभिरोजसा।
आ कलशं मधुमांत्सोम नः सदः ॥

विनियोगोऽस्य नवमेऽहनि। पवस्व देववीतये देवपानाय। इन्दो धाराभिः ओजसा बलेन। आ कलशं मधुमान् सोम नः सदः आसदः ॥

पवस्व देववीतये देवानां अशनाय यज्ञाय हे इन्दो। धाराभिः ओजसा बलेन। आसदः आसीद। कलशम्। नः अस्मदीयम्। मधुमांस्त्वं हे सोम॥ (६)

सोमः पुनान ऊर्मिणाव्यं वारं वि धावति।
अग्रे वाचः पवमानः कनिक्रदत्॥

विनियोगोऽस्य चतुर्थेऽहनि। सोमः पुनानः ऊर्मिणा रसेन। अव्यं वारं विधावति। अग्रे वाचः स्तुतीनां पूर्वः। पवमानः कनिक्रदत् शब्दं कृतवान्॥

पुनानः पूयमानः सोमः। ऊर्मिणा धारया। अव्यं अविसम्बन्धिनम्। वारं पवित्रम्। विधावति विसृज्य गच्छति। पवमानः अग्रे पुरः। वाचः स्तुतेः स्वविषयायाः। कनिक्रदत् ब्रुवत् स्वयमेव॥ (७)

प्र पुनानाय वेधसे सोमाय वच उच्यते।
भृतिं न भरा मतिभिर्जुजोषते॥

प्र पुनानाय वेधसे मेधाविने सोमाय। वचः स्तुतिसंयुक्तं उच्यते। भृतिं न भृतिमिव। भर वेतनम्। मतिभिः प्रज्ञाभिः। जुजोषते सोमपानाय।

प्रोच्यते प्रोच्यताम् त्वया। वचः स्तोत्रं हे स्तोतः। पुनानाय वेधसे विधात्रे सोमाय। भृतिं न भृतिमिव भृत्याय। भर प्रापय स्तोत्रम्। मतिभिः स्तुतिभिः। जुजोषते प्रीयमाणाय॥ (८)

गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धनिव।
शुचिं च वर्णमधि गोषु धारय॥

गोमम् धनवन् । नः अस्मभ्यम् । इन्दो अश्ववत् अश्वैः संयुक्तः सुतः । सुदक्षः धनिव । दक्षतिः दानकर्मा । धन्वतिः गतिकर्मा । शुचिं विशुद्धं वर्णमधि गोषु धारय ॥

गोमत् अश्ववदिति क्रियाविशेषणे । गोयुक्तं अश्वयुक्तं च । नः अस्मदर्थम् । हे इन्दो सुदक्ष सुबल । सुतः त्वं धनिव धन्व पवस्व । गोष्वधि गव्यायां गिरि । शुचिं च वर्णं त्वत्संपर्कजं धारय ॥ (९)

अस्मभ्यं त्वा वसुविदमभि वाणीरनूषत ।
गोभिष्टे वर्णमभि वासयामसि ॥

अस्मभ्यं त्वा त्वाम् । वसुविदं वसुनः वेत्तारम् । अभ्यनूषत वाणीः वाक् स्तुतिसंयुक्ता । गोभिः गव्यैः पयआदिभिः । वर्णं रूपम् । अभिवासयामसि आभिमुख्येन आछादयामः ॥

अस्मभ्यं अस्मदर्थम् । वाणीः स्तुतयः स्तोतारो वा । वसुविदं धनलम्भनं त्वाम् । अभ्यनूषत अभिष्टुवन्ति । गोभिः आशिरा ते त्वदीयम् । वर्णं अभिवासयामसि अभिवासयामः ॥ (१०)

पवते हर्यतो हरिरति ह्वरांसि रंह्या ।
अभ्यर्ष स्तोतृभ्यो वीरवद्यशः ॥

विनियोगोऽस्य प्रथमेऽहनि । पवते पाव्यते । पूयतेः प्रेप्साकर्मणः । हर्यतः हरिभिर्गन्ता । हरिः हरणशीलः । अति ह्वरांसि । अविमयानि बालानि । रंहि आ वेगेन । अभ्यर्ष आभिमुख्येन क्षर । स्तोतृभ्यः ऋत्विग्यजमानेभ्यः । वीरवद्यशः पुत्रपौत्रसंयुक्तं यशः अन्नं धनं वा ॥

पवते हर्यतः कमनीयः । हरिः सोमः । अति अतिक्रामन् । ह्वरांसि हिंसकानि रक्षःप्रभृतीनि रंह्या । अथ प्रत्यक्षस्तुतिः । अभ्यर्ष अभिक्षारय स्तोतृभ्यः । वीरवत् पुत्रसहितं यशः ॥ (११)

परि कोशं मधुश्चुतं सोमः पुनानो अर्षति ।
अभि वाणीर्ऋषीणां सप्तानूषत ॥

परि सर्वतः । कोशं मधुश्चुतं द्रोणकलशम् । सोमः पुनानः अर्षति क्षरति । अभि वाणीः ऋग्यजुःसामलक्षणाः । ऋषीणां स्तोतॄणाम् । सप्त अनूषत सप्तछन्दांसि सप्त होत्रा वा । अनूषत स्तुतिमकुर्वत ॥

परि अभीत्यर्थः । अर्षति गच्छति । कोशं कलशम् । मधुश्चुतं रसक्षरणम् । पुनानः सोमः । कलशप्रवेशे च सोमस्य रसातिशयो भवति इति मधुश्चुदित्युच्यते कलशः । अभ्यनूषत अभिष्टुवन्ति । ऋषीणां सप्त वाणीः वाण्यः सप्त छन्दांसि ॥ (१२)

इति षष्ठे अष्टमी दशती ।

ककुभः ।

पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः ।
महि द्युक्षतमो मदः ॥

विनियोगोऽस्य ज्योतिष्टोमे । पवस्व मधुमत्तमः रसवत्तमः अतिशयेन मधुमान् । इन्द्राय इन्द्रार्थम् । सोम क्रतुवित्तमः अतिशयेन कर्मवित् । मदः मदनीयः । महि महान् । द्युक्षतमः द्यवि क्षयति दिवा क्षरति वा । मदः ॥

पवस्व इन्द्राय मधुमत्तमः मधुरतमः त्वं हे सोम । क्रतुवित्तमः अतिशयेन प्रज्ञालम्भनः । मदः मदकरः । महि महान् । द्युक्षतमः दीप्ततमः । मदः मदनीयः स्तुत्यः ॥ (१)

अभि द्युम्नं बृहद्यश इषस्पते दीदिहि देव देवयुम् ।
वि कोशं मध्यमं युव ॥

विनियोगोऽस्य पञ्चमेऽहनि । अभि द्युम्नं यशः अन्नं वा । बृहद्यशः इषस्पते अन्नानां पते । दीदिहि देव देवयुं देवान् कामयते । वि कोशं मध्यमं मध्यमे सवने । युव मिश्रय ॥

अभि दीदिहि प्रयच्छ । ददातेः दीदिहि इति रूपम् । द्युम्नं द्योतमानम् । बृहत् यशः अन्नम् । इषस्पते अन्नस्य पते । देव दानादिगुणक । देवयुं इति विभक्तिव्यत्ययः । देवयुः देवकामः त्वम् । वियुव विश्लथय वर्षणार्थम् । कोशं मेधम् । मध्यमं मध्यमस्थानम् ॥ (२)

आ सोता परि षिञ्चताश्वं न स्तोममप्तुरं रजस्तुरम् ।
वनप्रक्षमुदप्रुतम् ॥

विनियोगोऽस्य तृतीयेऽहनि । आ सोता आसुनुत । परि सर्वतः सिञ्चत । अश्वं न अश्वमिव । स्तोमं सोमलक्षणम् । अप्तुरं य अपः तरति तम् । रजस्तुरं लोकेषु तरति गच्छति वा । वनप्रक्षं वने क्षयति । सोमम् । उदकप्लुतम् ॥

आसोता अभिषुणुत सोमम् । तप्तनप् (पा. ७. १. ४५) इत्यादिना तस्य तबादेशः । बहुळं छन्दसि (पा. २. ४. ७३) इति शपो लुक् । परिषिञ्चत पवित्रे । अश्वं न अश्वमिव वेगवन्तम् । स्तोमं स्तोतव्यम् । अप्तुरं

अपां प्रेरकम् । रजस्तुरं रजसः तेजसः प्रेरकम् । वनप्रक्षं वनानां ओषधिवनस्पतीनां प्रक्षम् । पृच्छतेः पूजाकर्मणो रूपं प्रक्षं पूज्यम् । पतिमित्यर्थः । स्वधितिर्वनानाम् (ऋ वे. ९. ९६. ६) इति हि भवति । अथवा वनं उदकम् । पृचेः संपर्कार्थात् प्रक्षम् । वसतीवरीभिः संपृक्तमिति । उदप्रुतं उदकस्य रसस्य प्रुतं क्षरणं सौमम् ॥ (३)

एतमु त्यं मदच्युतं सहस्रधारं वृषभं दिवो दुहम् ।
विश्वा वसूनि बिभ्रतम् ॥

एतमु त्यं मदच्युतं सहस्रधारं बहुधारम् । वृषभं वर्षितारम् । दिवो दुहं दिवः आहृत्य इमं लोकमुदकेन पूरयति । विश्वा सर्वाणि । वसूनि धनानि । बिभ्रतं धारयन्तम् ॥

एतं त्यं तम् । मदच्युतं रसस्य च्यावकम् । उ इति पूरणः । सहस्रधारं बहुधारम् । वृषभं वर्षितारम् । दिवः । दीव्यतेः स्तुतिकर्मणो दिवः स्तोता अहम् । दुहं अदुहम् । दुहं इति असृग्रं इतिवन्नकारस्य मकारः । दुहन्ति स्म ऋत्विजः । दिवो देवाः स्तोतारः । विश्वा विश्वानि वसूनि । बिभ्रतं धारयन्तं सोमम् ॥ (४)

स सुन्वे यो वसूनां यो रायामानेता य इळानाम् ।
सोमो यः सुक्षितीनाम् ॥

विनियोगोऽस्य षष्ठेऽहनि । स सुन्वे यः वसूनां धनानां आनेता । यो रायां धनानाम् । य इडानां अन्नानाम् । सोमः सुक्षितीनां मनुष्याणां आनेता यः । स सुन्वे तं स्तुमः ॥

सोमः स सुन्वे असावि । यः वसूनां रत्नानामानेता । यो रायां धनानां आनेता । य इडानां अन्नानामानेता । यश्च सुक्षितीनां शोभनानां निवासानां आनेता भवति स सुन्वे ॥ (५)

त्वं ह्यङ्ग दैव्या पवमान जनिमानि द्युमत्तमः ।
अमृतत्वाय घोषयत् ॥

विनियोगोऽस्य चतुर्थेऽहनि । त्वं अङ्ग शीघ्रम् । आमन्त्रितं वा । दैव्य देवानां हित । पवमान जनिमानि जन्मानि द्युमत्तमः । अमृतत्वाय घोषयत् । संस्तूयसे इत्यध्याहारः ॥

अङ्ग क्षिप्रम् । दैव्या देवसम्बन्धीनि । जनिमानि जनान् गणान् । अभि घोषयत् इति पुरुषव्यत्ययः । अभिघोषयसि शब्दायसे हे पवमान । द्युमत्तमः दीप्तिमत्तमः त्वम् । अमृतत्वाय तेषाम् ॥ (६)

एष स्य धारया सुतोऽव्या वारेभिः पवते मदिन्तमः ।
क्रीळन्नूर्मिरपामिव ॥

विनियोगोऽस्य सप्तमेऽहनि । एष स्य सः । धारया सुतः अभिषुतः । अव्या अविमयेन । वारेभिः पवते पूयते । मदिन्तमः अतिशयेन मादयितः । ऊर्मिः सङ्घातः । क्रीडन् रमन् । अपामिव यः ॥

स्यः सः । एष सुतः । अव्या वारेभिः पवित्रेण इत्यर्थः । धारया पवते । क्रीडन् अनायासेन । मदिन्तमः मादयितृतमः । अपां ऊर्मिः संघातः इव ॥ (७)

य उस्रिया अपि या अन्तरश्मनि निर्गा अकृन्तदोजसा ।
अभि व्रजं तत्निषे गव्यमश्व्यं वर्मीव धृष्णवा रुज ।
ओं वर्मीव धृष्णवारुज ॥

य उस्रिया आदित्यरश्मयः अनड्वाहो वा । अन्तरश्मनि अश्मनोऽप्यन्तः । निर्गाः अकृन्तत् नितरां गावः अकृन्तत् अकर्तयत् । अश्मानं

भिन्दय भिन्धि वा । ओजसा स्वेन बलेन । अभि व्रजं गोष्ठम् । तत्निषे वितनुते विस्तारयति । गव्यं गवां भवम् । अश्व्यं अश्वानां भवम् । वर्मि इव । वर्म सन्नहनम् । तद्यस्यास्ति स वर्मी कवची । तस्य सम्बोधनम् । हे धृष्णो धारयितः । आरुज । रुज भङ्गे । भङ्क्त । धनं गव्यं अश्व्यं च मम प्रयच्छेत्यर्थः ॥

इति छान्दसिकाविवरणं माधवाचार्यकृतं परिसमाप्तम्

य उस्रियाः उत्सरणशीलाः । अपि याः अप्सु अन्तरिक्षे भवाः । या आपः अश्मनि मेघे । अन्तः मध्ये स्थिताः । निरकृन्तत् निश्चकर्ष । ओजसा बलेन । समानेनाख्यानात् अत्र प्रथमपुरुषः । लोकेऽपि तथा दृश्यते—यः एवं अकार्षीत् स त्वमिति । गव्यं गोसम्बन्धि । अश्व्यं च व्रजं समूहम् । अभि उद्दिश्य । तत्निषे शब्दायसे । तन्यतुः इति हि शब्दनाम । वर्मीव वर्म कवचम् । कवचीव योद्धा । आरुज भङ्ग्ध रक्षःप्रभृतीन् । हे धृष्णो धर्षणशील ॥ (८)

एकोनविंशतितमाः पवमान इतीरिताः ।
शतानि पञ्चाशीतिश्च पञ्च चाप्यखिला ऋचः ॥
इत्थं श्रीभरतस्वामी काश्यपो यज्ञदासुतः ।
नारायणार्यतनयो व्याख्यत्साम्नामृचोऽखिलाः ॥

इति षष्ठे नवमी दशती

पवमान मेकादश ।

षष्ठः प्रपाठकः

इति श्रीभरतस्वामिनः कृतौ सामवेदसंहिताभाष्ये ऋचां विवरणम् ॥

[*At the end of the fifth Daśatī in the third Prapāṭhaka (p. 177), the last four verses were omitted by an oversight and they are given below.*]

प्रपाठकः ३—दशती ५

पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः ।
आपिर्नो बोधि सधमाद्ये वृधेऽस्माँ अवन्तु ते धियः ॥

मेधातिथेरार्षम् । पिब हे इन्द्र । सुतस्य अभिषुतस्य सोमस्य । षष्ठीनिर्देशादेकदेशमिति वाक्यशेषः । कीदृशस्य सोमस्य एकदेशं पिबामि । उच्यते । रसिनः । रसो ऽस्यास्तीति रसी । तस्य रसिनः रसवतः । पुष्टस्येत्यर्थः । पीत्वा च मत्स्व तृप्यस्वेत्यर्थः । कस्य पुनः स्वभूतस्य सोमस्य एकदेशं पिबामि । उच्यते । नः । बहुवचनमिदं एकवचनस्य स्थाने द्रष्टव्यम् । मम मेधातिथेः स्वभूतस्येत्यर्थः । कीदृशस्य सोमस्य । उच्यते । गोमतः । गोशब्देनात्र वसतीवरीलक्षणान्युदकान्युच्यन्ते । तैस्तद्वतः । तैर्मिश्रितस्येत्यर्थः । कस्मात् पुनः पिबामि । उच्यते । यस्मादापिः ज्ञातिः त्वम् । नः अस्माकम् । तस्मात् पिबेत्यर्थः । किंच बोधि बुध्यस्व । यद्यदहं ब्रवीमि तत् सर्वं शृण्वित्यर्थः । क्व पुनः शृणोमि । उच्यते । सधमाद्ये । सह माद्यन्ते यत्र देवताः स सधमाद्यः यज्ञः । तस्मिन् । तस्मिन्नवस्थित इत्यर्थः । किंच वृधे वर्धनाय । पुत्रपशुग्रामादिभिः अस्मान् अवन्तु रक्षन्तु । ते तव स्वभूताः । धियः प्रज्ञाः ॥

मेधातिथिः । पिबा सुतस्य रसिनः सुतं सोमं रसवन्तम् । मत्स्व माद्यस्व च । नः अस्मदीयस्य च । गोमतः गव्येनाशिरा युक्तस्य सोमस्येत्यर्थः । हे इन्द्र आपिः आप्तो बन्धुः । स त्वं नः अस्माकम् । वृधे वृध्यै । बोधि भव । भवतेर्लोटि रूपमिदम् । हेर्धिः । भकारस्य बकारः । शपो लुक् । गुणश्छान्दसः । सधमाद्ये यज्ञे । सह माद्यन्ति अस्मिन् देवा इति सधमाद्यः । अस्मांश्च अवन्तु रक्षन्तु । ते धियः कर्माणि त्वत्परिचरणादीनि ॥ (७)

त्वं ह्येहि चेरवे विदा भगं वसुत्तये ।
उद्वावृषस्व मघवन् गविष्टय उदिन्द्राश्वमिष्टये ॥

भर्गस्यार्षम् । त्वं हे इन्द्र । हि इति पदपूरणः । आ इहि आभिमुख्येन गच्छ । आगच्छेत्यर्थः । चेरवे । चेरुः चेतयिता । तस्मादियं तादर्थ्ये चतुर्थी । चेरवे ज्ञातुर्मम भर्गस्यार्थायेत्यर्थः । विदा जानीहि । भगं धनम् । किमर्थं पुनर्जानामि । उच्यते । वसुत्तये । धनदानं वसुत्तिः । तस्यै वसुत्तये धनदानार्थम् । एतदुक्तं भवति । एत्य आत्मीयं धनं जानीहि धनमस्माकं देयमिति । ज्ञात्वा च उद्वावृषस्व । वृषु तृषु मृषु सेचने इत्यस्येदं रूपम् । सेचनं च क्षरणम् । क्षर । देहि इत्यर्थः । हे मघवन् । मघं धनम् । तद्यस्यास्ति स मघवान् इन्द्रः । तस्य संबोधनं हे मघवन् । धनवन्नित्यर्थः । कीदृशाय पुनर्मे भर्गाय ददामि । उच्यते । गविष्टये । इषु इच्छायां इत्यस्येदं रूपम् । गोकामाय इत्यर्थः । उत् । उपसर्गाभ्यासात् वावृषस्वेति क्रियापदाभ्यासः । क्षर देहि इत्यर्थः ॥

भर्गः । त्वं हि त्वं खलु । एहि आगच्छ । चेरवे । चेरुश्चरतेः । आचरते कर्मणि । वसुत्तये । वसूनि हविर्लक्षणानि ददाति इति वसुत्तिः हव्यदातिर्यजमानः । तस्मै । विदा लम्भय । भगं धनम् । उद्वावृषस्व उद्युक्तो भव हे मघवन् ।

गविष्टये गवामन्वेषणाय । उत् उद्वावृषसस्व हे इन्द्र । अश्वमिष्टये अश्वान्वेषणाय च ॥ (८)

न हि वश्चरमं चन वसिष्ठः परिमंसते ।
अस्माकमद्य मरुतः सुते सचा विश्वे पिबन्तु कामिनः ॥

. . . . परिमंसते इति च प्रथमपुरुषैकवचनं उत्तमपुरुषैकवचनस्य स्थाने द्रष्टव्यम् । वसिष्ठो नाम ऋषिः । न हि परिमंसते न सर्वतो जानामि इत्यर्थः । किं पुनर्न परिजानामि । उच्यते । वः चरमम् । युष्माकं मध्ये एकमपि चरमं पश्चात् कृतं जघन्यं न जानामि । सर्वे यूयं समानकालाः समानवयस्काः । महान्त इत्यर्थः । यत एवमतो ब्रवीमि । अस्माकं स्वभूतं अद्य अस्मिन्नेवाहनि इत्यर्थः । हे मरुतः सुते । सप्तम्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । सुतमभिषुतं सोमम् । सचा सह । विश्वे सर्वे पिबन्तु यूयम् । कीदृशाश्च पिबन्तु । उच्यते । कामिनः कामवन्तः । श्रद्धावन्तो भूत्वा पिबन्तु इत्यर्थः ॥

वसिष्ठः । अस्याः पूर्वार्धेनर्चो मरुतां प्रत्यक्षस्तुतिः । परेण परोक्षस्तुतिः । न हि वो युष्माकं मध्ये । चरमं अवरजम् । चन अपि च । वसिष्ठ ऋषिः परिमंसते वर्जयित्वा स्तौति । परिः वर्जने । मतिः स्तुतिकर्मा । सर्वानेव युष्मान् स्तौति । अस्माकं मरुतो देवाः । अद्य अस्मिन् अहनि । सुते अभिषुते सति । सचा सह । विश्वे पिबन्तु सोमम् । कामिनः कामयमानाः ॥ (९)

मा चिदन्यद्वि शंसत सखायो मा रिषण्यत ।
इन्द्रमित् स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत ॥

प्रगाथ आत्मीयानृत्विज आह। अन्यत् देवतान्तरम्। मा विशंसत इन्द्रादन्यत् देवतान्तरं मा स्तुवध्वम्। मा स्तुतेत्यर्थः। तच्च अस्तुवानाः हे सखायः ऋत्विजः। परस्परमात्मानं मा रिषण्यत मा हिंसिष्टेत्यर्थः। इन्द्रमित्। इच्छब्द एवकारस्यार्थे। इन्द्रमेव स्तोत स्तुतेत्यर्थः। कीदृशमिन्द्रं स्तुमः। उच्यते। वृषणं वर्षितारम्। कथं स्तुमः। उच्यते। सचा सहभूताः। कदा स्तुमः। उच्यते। सुते अभिषुते सोमे। किं सकृदेव स्तुमः। नेत्युच्यते। मुहुः पुनः पुनरित्यर्थः। केन पुनः स्तुमः। उच्यते। उक्था। द्वितीयाबहुवचनमिदं तृतीयाबहुवचनस्य स्थाने द्रष्टव्यम्। उक्थैः स्तोत्रैः इत्यर्थः। शंसत सुष्ठु स्तुतेत्यर्थः॥

प्रगाथः काण्वः। मा चित् मैव। अन्यत् इन्द्रस्तोत्रात्। विशंसत विविधं ब्रूत हे सखायः। मा रिषण्यथ क्षीणा मा भवत वृथाशब्दोच्चारणेन। इन्द्रमित् इन्द्रमेव। स्तोत स्तुत। तप्तनप्तनथनाश्च (पा. ७. १. ४५) इति तस्य तबादेशः। वृषणं वर्षितारम्। सचा सहायाः स्तुत सर्वे। सुते सोमे सति। मुहुः उक्था शस्त्राणि च शंसत इन्द्राय॥ (१०)

TABULAR STATEMENT OF THE DIVISIONS OF THE SĀMAVEDA

PRAPĀṬHAKA I

Das'ati	Verses	Serial Number
1	1—10	1—10
2	1—10	11—20
3	1—14	21—34
4	1—10	35—44
5	1—10	45—54
6	1—8	55—62
7	1—10	63—72
8	1—8	73—80
9	1—10	81—90
10	1—6	91—96

PRAPĀṬHAKA II

Das'ati	Verses	Serial Number
1	1—10	97—106
2	1—8	107—114 [1]
3	1—10	115—124
4	1—10	125—134
5	1—10	135—144
6	1—10	145—154
7	1—10	155—164
8	1—10	165—174 [2]
9	1—10	175—184
10	1—9	185—193

PRAPĀṬHAKA III

Das'ati	Verses	Serial Number
1	1—10	194—203
2	1—10	204—213
3	1—9	214—222
4	1—10	223—232 [3]
5	1—10	233—242
6	1—10	243—252
7	1—10	253—262
8	1—10	263—272
9	1—10	273—282
10	1—10	283—292

PRAPĀṬHAKA IV

Das'ati	Verses	Serial Number
1	1—10	293—302
2	1—10	303—312
3	1—10	313—322
4	1—9	323—331
5	1—10	332—341
6	1—10	342—351 [4]
7	1—8	352—359
8	1—10	360—369
9	1—11	370—380

[1] Prathamādhyāya and Āgneya Parvan end here according to Bharatasvāmin and Sāyaṇa.

[2] Bahusāmi ends here according to Bharatasvāmin.

[3] Dvitīyādhyāya ends according to Sāyaṇa and Ekasāmi and Aindra Gāyatra end according to Bharatasvāmin.

[4] Tṛtīyādhyāya ends according to Sāyaṇa and Bṛhatī ends according to Bharatasvāmin.

Das'ati	Verses	Serial Number	Das'atī	Verses	Serial Number
10	1—10	381—390 [1]	10	1—10	477—486
	PRAPĀṬHAKA V			PRAPĀṬHAKA VI	
1	1—8	391—398	1	1—10	487—496
2	1—10	399—408	2	1—14	497—510
3	1—10	409—418	3	1—12	511—522
4	1—8	419—426 [2]	4	1—10	523—532
5	1—10	427—436	5	1—12	533—544
6	1—10	437—446	6	1—9	545—553
7	1—10	447—456	7	1—12	554—565
8	1—10	457—466 [3]	8	1—12	566—577
9	1—10	467—476	9	1—8	578—585 [4]

[1] Triṣṭup ends according to Bharatasvāmin.
[2] Anuṣṭup ends according to Bharatasvāmin.
[3] Caturthādhyāya and Aindra Parva end according to Sāyaṇa. Aindra ends according to Bharatasvāmin also.
[4] Pavamānaparvan ends according to Sāyaṇa.

In the text-editions by Wilson and Benfey and in the Ajmer series the division into 6 Prapāṭhakas and each Prapāṭhaka into Das'ātīs has been accepted.

Sāyaṇa adopts the division into 5 Adhyāyas, the first 4 with 12 Khaṇḍas (each Das'atī being called a Khaṇḍa) and the last with 11 Khaṇḍas. The first Adhyāya is Āgneya Parvan, the next 3 Adhyāyas form Aindra Parvan and the last Adhyāya is Pāvamāna Parvan. These three Parvans are accepted by Bharatasvāmin too.

Bharatasvāmin adopts another division also. Bahusāmī ends with II. 6, Ekasāmin and Aindra Gāyatra with III. 4, Bṛhatī with IV. 6, Triṣṭup with IV. 10, and Anuṣṭup with V. 4.

PUBLICATIONS OF THE ADYAR LIBRARY

(The Theosophical Society, Adyar, Madras, S. India)

		Rs	A.
1	A PRELIMINARY LIST OF THE SAMSKṚT AND PRĀKṚT MSS. in the Adyar Library (Samskṛt-Devanāgarī) 1910 Boards ...	1	8
	Cloth ...	2	0
2.	A DESCRIPTIVE CATALOGUE OF THE SAMSKṚT MSS in the Adyar Library By F. O. Schrader, Ph.D, Vol I, Upaniṣads 1912. Cloth ...	5	0
3.	THE MINOR UPANIṢADS (Samskṛt) critically edited for the Adyar Library. By F. O. Schrader, Ph D, Vol I—Samnyāsa 1912 Cloth ...	10	0
4	AHIRBUDHNYA-SAMHITĀ OF THE PĀÑCARĀTRA ĀGAMA (Samskṛt), Edited under the supervision of F O Schrader, Ph.D, 2 Vols 1916 Cloth ...	10	0
5	INTRODUCTION (English) TO THE PĀÑCARĀTRA AND THE AHIRBUDHNYA SAMHITĀ By F O Schrader, Ph D. 1916. Cloth .	3	0
6	YOGA UPANIṢADS—20—with the Commentary of S'rī Upaniṣad Brahma Yogin. Edited by Pandit A. Mahadeva Sastri, B.A 1920 ...	5	0
7.	SĀMĀNYA VEDĀNTA UPANIṢADS—24-with the commentary of S'rī Upaniṣad Brahma Yogin Edited by A. Mahadeva Sastri, B A 1921 ...	5	0
8	VAIṢṆAVA UPANIṢADS—14—with the Commentary of S'rī Upaniṣad Brahma Yogin Edited by A Mahadeva Sastri, B A 1923...	4	0
9.	S'AIVA UPANIṢADS—15—with the Commentary of S'rī Upaniṣad Brahma Yogin Edited by A Mahadeva Sastri, B.A. 1925 ...	3	0
10	S'ĀKTA UPANIṢADS—8—with the Commentary of S'rī Upaniṣad Brahma Yogin. Edited by Pandit A. Mahadeva Sastri, B.A. 1925 ...	2	8
11.	CATALOGUE OF SAMSKṚT MSS in the Adyar Library (revised). Edited by the Pandits of the Adyar Library under the direction of Prof C. Kunhan Raja, M A, D Phil (Oxon), 2 Vols 1926 and 1928 Each ...	3	12
12.	SAMNYĀSA UPANIṢADS—17—with the Commentary of S'rī Upaniṣad Brahmayogin Edited by T R Chintamani, M.A, and the Pandits of the Adyar Library, under the direction of Prof. C Kunhan Raja, M.A, D Phil (Oxon) 1929 ...	4	0
13.	RUKMINĪ KALYĀṆA MAHĀ KĀVYA by Rājacūdāmaṇi Dīkṣita Edited by the Pandits of the Adyar Library and Mr. T R. Chintamani, M A, under the direction of Prof C Kunhan Raja, M.A., D. Phil (Oxon) 1929 ...	2	0
14.	UNPUBLISHED MINOR UPANISADS with the Commentary of S'rī Upaniṣad Brahma Yogin. Edited by the Pandits of the Adyar Library, under the direction of Prof C. Kunhan Raja, M A, D. Phil (Oxon) 1933 ...	5	0
15	TEN MAJOR UPANIṢADS with the Commentary of S'rī Upaniṣad Brahma Yogin, Edited by the Pandits of the Adyar Library		

Rs A

under the direction of Prof C. Kunhan Raja, M.A., D. Phil. (Oxon)

Is'a to Aitareya Vol I —1935 ... 4 8
Chāndogya and Bṛhadāraṇyaka Vol. II —1936 6 0
Vol. I Boards }
Vol. II ,, } ... 5 8

16 MELARĀGAMĀLIKĀ of Mahāvaidyanātha Sivan Edited by Pandit S Subrahmanya Sastri, F T.S 1937 ... 2 0

17. SANGRAHACŪḌĀMAṆI—Edited by Pandit S Subrahmanya Sastri, F T.S with a critical Introduction in English by T R. Srinivasa Aiyangar, B A , L T 1938 ... 5 0

18. PRATYABHIJÑĀHṚDAYAM (The Secret of Recognition) with English Translation and Notes by Dr K F Leidecker, M A., Ph.D., , Text edited by the Staff of the Adyar Library under the direction of Dr G Srinivasa Murti, B.A , B L , M.B C M , Vaidyaratna, Hon Director, Adyar Library 1938 . 3 0

19 BHAVASAMKRĀNTI-SŪTRA AND NĀGĀRJUNA'S BHAVASAMKRĀNTI S'ĀSTRA—with the Commentary of Maitreyinātha—with English Translation by Pandit N Aiyaswami Sastri, Professor, S V S College, Tirupati 1938 ... 2 4

20 YOGA UPANIṢADS Translated into English by T R Srinivasa Aiyangar, B A , L T , and Pandit S. Subrahmanya Sastri, F T S 1938 5 0

21. * WHERE THEOSOPHY AND SCIENCE MEET (in four Parts) by a body of experts—Edited by Professor D D. Kanga, M A., I E S (Retd)

Part 1 Nature—From Macrocosm to Microcosm . . 1 14
Part 2 Man—From Atom to Man ... 1 14
Part 3 God—From Humanity to Divinity ... 2 4
Part 4. Some Practical Applications 1938 ... 2 4

22. ṚGVEDAVYĀKHYĀ, MĀDHAVAKṚTĀ—Edited by Dr C. Kunhan Raja, M.A., D Phil (Oxon) 1939 ... 6 0

23. THE NUMBER OF RASAS By V. Raghavan, M.A , Ph D , Department of Sanskrit, University of Madras, with a Foreword by Prof M Hiriyanna, M A , formerly Professor of Samskṛt Maharajah's College, Mysore, 1940 ... 3 0

24. SĀMĀNYA VEDĀNTA UPANIṢADS—Translated into English by T. R Srinivasa Aiyangar, B A., L T., and Pandit S Subrahmanya Sastri, F T S , 1941 ... 5 0

25 BHAGAVADGĪTĀRTHAPRAKĀS'IKĀ of Upaniṣad Brahmayogin (Samskṛt) Edited by the Pandits of the Adyar Library with an Introduction by Dr. C Kunhan Raja, M A , D.Phil. (Oxon), 1941 4 0

26. SAMAVEDA-SAMHITĀ—With the Commentaries of Mādhava and Bharatasvāmin. Edited by Dr C. Kunhan Raja, M.A , D. Phil. (Oxon), 1941 ...

27. RĀJA DHARMA (Dewan Bahadur K. Krishnaswami Rao Lectures, 1938, University of Madras) by Rao Bahadur K. V. Rangaswami Aiyangar, M.A., 1941 ...

28. VARIVASYĀRAHASYAM of Bhāsurānandanātha (2nd Edition) by Pandit S. Subramanya Sastri, F T.S. (with English Translation), 1941 ...

* *Published under the auspices of the Adyar Library Association.*

Rs A

29. VYAVAHĀRANIRṆAYA OF VARADARĀJA—Edited by Rao Bahadur K V Rangaswami Aiyangar, M A, and A N. Krishna Aiyangar, M A, L T., Jt Editor, *Brahmavidyā*, Adyar Library, 1941 ...

30 SANGĪTARATNĀKARA—With the Commentaries of Catura Kallinātha and Simhabhūpāla Edited by Pandit S. Subrahmanya Sastri, F T S., Vol I, 1941 ...

PAMPHLETS

A VARIANT VERSION OF THE EKĀGNIKĀṆḌA (Reprinted from the Adyar Library Bulletin, October, 1939). Edited by K Madhava Krishna Sarma, M O L ... 0 3

THE RĀJAMṚGĀṄKA OF BHOJA (Reprinted from the Adyar Library Bulletin, October, 1940) Edited by K. Madhava Krishna Sarma, M O.L ... 0 4

IN THE PRESS

1. ĀS'VALAYANAGṚHYA-SŪTRA—With Devasvāmi Bhāṣya—Edited by Swami Ravi Tirtha
2. ĀSVALAYANAGṚHYA-SŪTRA (Bhāṣya of Devasvāmi) Translated into English by A N. Krishna Aiyangar, M.A, L T, Jt. Editor, *Brahmavidyā*, Adyar Library.
3. JIVĀNANDANAM OF ĀNANDARĀYAMAKHI with a Commentary by Vaidyaratna M Duraiswami Aiyangar. Edited by Vaidyaratna G Srinivasa Murti, B A, B L, M B & C. M and Vaidyaratna Pandit M. Duraiswami Aiyangar.
4. S'RĪ PĀÑCARĀTRA RAKṢĀ of S'ri Vedānta Des'ika—Edited by Vaidyaratna M. Duraiswami Aiyangar and Vedānta S'iromaṇi T Venugopalacharya.
5. ĀLAMBANAPARĪKṢĀ AND VṚTTI by Dinnāga With the Commentary of Dharmapāla Edited by Pandit N Aiyaswami Sastri.
6. VAIṢṆAVA UPANIṢADS—Translated into English by T. R. Srinivasa Aiyangar B A., L.T and Pandit S Subrahmanya Sastri, F.T.S.
7. A DESCRIPTIVE CATALOGUE of the Manuscripts in the Adyar Library by K. Madhava Krishna Sarma, M O L, under the direction of Prof. C Kunhan Raja, M A., D Phil. (Oxon)—Vedic.
8. USĀṆIRUDDHO of Rāma Pāṇivāda. Edited by Pandit S. Subrahmanya Sastri, F T.S and Dr C. Kunhan Raja, M A, D. Phil. (Oxon.).
9. SOME CONCEPTS IN ALAṄKĀRA S'ĀSTRA by Dr. V. Raghavan M A., Ph. D
10. NYĀYAKUSUMĀÑJALI of Udayanācārya—Translated into English by Swami Ravi Tirtha
11. THE ĀPASTAMBASMṚTI—Edited by A N Krishna Aiyangar, M A., L T, Joint Editor, *Brahmavidyā*, Adyar Library
12. THE ACYUTARĀYĀBHYUDAYAM of Rājanātha Diṇḍima—Sargas 7 to 12—by A. N Krishna Aiyangar, M A., L T., Adyar Library.

Agents for our publications:

THE THEOSOPHICAL PUBLISHING HOUSE

Adyar, Madras, S. India

WORKS UNDER THE PREPARATION

1. CATURDAS'ALAKSANĪ OF GADĀDHARA with Five Commentaries—Edited by Pandit N Santanam Aiyer.
2. GAUTMASMṚTI—Edited by A. N Krishna Aiyangar, M.A., L.T., Joint Editor, *Brahmavidyā*, Adyar Library.
3. THE KĀLĀDARS'A OF ĀDITYA BHAṬṬA—Edited by Rao Bahadur K. V Rangaswami Aiyangar, M.A., and A N. Krishna Aiyangar, M A., L.T , Joint Editor, *Brahmavidyā*, Adyar Library.
4. THE VIṢṆUSMṚTI—With the Kes'ava Vaijayanti of Nanda Paṇḍita Edited by Rao Bahadur K. V. Rangaswami Aiyangar, M A., and A. N Krishna Aiyangar, M A , L.T , Adyar Library.

BRAHMAVIDYĀ

THE ADYAR LIBRARY BULLETIN

Editor: PROF. C. KUNHAN RAJA, M.A., D.PHIL. (OXON.)

Jt. Editor: A. N. KRISHNA AIYANGAR. M.A., L.T.

Rates of Subscription :

Life Subscription Rs. 100
or $ 50
or £ 10

	Per Annum	Single Copy
India & Ceylon	... Rs. 6	Rs. 2-8
U. S. A.	... $ 3	$. 1.25
British Empire	... Sh. 12	Sh. 5
Other Countries	... Rs. 9	Rs. 3-8

All Communications to be addressed to :

THE DIRECTOR,
Adyar Library,
Adyar, Madras, S. India.

V. P. A.